❀ ओ३म् ❀

अष्टाध्यायी-भाष्यम्

द्वितीयोभागः

(तृतीयोऽध्यायः)

❀ ओ३म् ❀

अष्टाध्यायी-भाष्यम्

श्रीमत्परमहंसपरिव्राजकाचार्येण
दयानन्दसरस्वतीस्वामिना
प्रणीतम्

❀—❀—❀

श्रीमत्या परोपकारिणी-सभया प्रकाशितम्

द्वितीयोभागः

(तृतीयोऽध्यायः)

—❀—

अजमेरनगरे
वैदिक यन्त्रालये मुद्रितः

दयानन्दजन्माब्दः १५३
विक्रमीय संवत् २०३४
ई० सन् १९७७

द्वितीयं संस्करणम्
१०००

मूल्य
रु. १००)

❀ ओ३म् ❀

अष्टाध्यायी-भाष्यम्

द्वितीयोभागः

(तृतीयोऽध्यायः)

❀ ओ३म् ❀

* अथ तृतीयेऽध्याये प्रथमः पादः *

[अथ प्रत्यय-सञ्ज्ञाधिकारः]

प्रत्ययः ॥ १ ॥

प्रत्ययः । १ । १ । प्रत्याययति प्रत्याय्यते वाऽसौ प्रत्यय इति कर्तृसाधनः कर्मसाधनश्च प्रत्यय-शब्दः । अन्येष्वर्थेषु ये प्रत्यया विधीयन्ते, तत्र कर्तृसाधनेन प्रयोजनं, तमर्थं प्रत्याययन्तीति । स्वार्थे ये विधीयन्ते, तत्र कर्मसाधनेन प्रयोजनं, स्वयमेव प्रतीता भवन्तीत्यर्थः । अधिकारोऽयमापञ्चमाध्यायपरिसमाप्तेः । इत ऊर्ध्वं प्रधानतया यो वक्ष्यते, तस्याधिकारेणैव प्रत्यय-सञ्ज्ञा भविष्यति । वक्ष्यति—'**तव्यत्तव्यानीयरः**[1] ॥' कर्त्तव्यम् । करणीयम् ॥ अग्निचित् । सोमसुत् । अत्र क्विपः प्रत्यय-सञ्ज्ञा, तस्य लोपे कृते **प्रत्ययलोपे प्रत्ययलक्षणम्**[2] ॥' इति प्रत्ययलक्षणेन तुग्-आगमो । निमित्तस्य निमित्तिकार्यार्थत्वात् । प्रधाने कार्यसम्प्रत्ययाच्च प्रकृत्युपपदोपाधीनां प्रत्यय-सञ्ज्ञा न भविष्यति । प्रत्ययो निमित्ती, प्रकृत्युपपदोपाधयो निमित्तानि । तत्र प्रकृत्युपपदोपाधीनां निमित्तानां प्रत्ययकार्यार्थं प्रयोगः । प्रकृति—गुप्तिज्किदः । एभ्यः सन्विधिः प्रधानं, तस्यैव प्रत्यय-सञ्ज्ञा न प्रकृतेः । उपपद—'**स्तम्बकर्णयो रमिजपोः**[3] ॥' अत्राप्यच्-प्रत्ययविधिः प्रधानं, तस्यैव प्रत्यय-सञ्ज्ञा न चोपपदस्य । उपाधिः=अभिधेयोऽर्थः—'**हरतेर्दृतिनाथयोः पशौ**[4] ॥' अत्रोपाधिः पशु-शब्दः, तस्मिन्नभिधेये प्रत्ययविधानम् । तत्र 'इन्' इत्यस्यैव प्रत्यय-सञ्ज्ञा न पशोः । आदेशागमाः षष्ठीनिर्दिष्टा भवन्ति, प्रत्ययाश्च परे । अतो विकारागमानामपि प्रत्यय-सञ्ज्ञा न भवति । अस्याध्यायस्यादौ चत्वारो योगा अधिक्रियन्ते ॥ १ ॥

प्रत्यय-शब्द दो प्रकार का होता है—एक तो जो दूसरे अर्थों का निश्चय करावे और एक जो दूसरे विशेष अर्थ को प्रतीत न करावे, किन्तु अपने आप ही प्रतीत हो। इस अध्याय के आदि

---

१. ३ । १ । ९६ ॥
२. १ । १ । ६१ ॥
३. ३ । २ । १३ ॥
४. ३ । २ । २५ ॥

में चार सूत्रों का अधिकार पंचमाध्याय पर्यन्त किया है। ['प्रत्ययः'] यहां से आगे प्राधान्य करके जिस का विधान होगा, उस की प्रत्यय-सञ्ज्ञा होगी ॥ अग्निचित् । यहां क्विप् की प्रत्यय-सञ्ज्ञा हुई है। उस के लोप हो जाने से प्रत्ययलक्षण मानके तुक् का आगम होता है ॥

प्रकृति उसे कहते हैं जिससे प्रत्यय-विधान किया जाय। उपपद उसे कहते हैं कि जो सप्तम्यन्तपद हो। और उपाधि वह होता है कि जिस किसी विशेष अर्थ में प्रत्यय-विधान हो इन तीनों की प्रत्यय-संज्ञा इसलिये नहीं होती कि निमित्ती जो प्रत्यय है, उस के कार्य के लिये ये निमित्त हैं। और प्रधान करके प्रत्यय का उपदेश है, इससे भी उन की प्रत्यय-सञ्ज्ञा नहीं होती ॥ १ ॥

परश्च ॥ २ ॥

परः। १। १। च। [अ०।] अधिकारोऽयमप्यापञ्चमाध्यायपरिसमाप्तेः। अधिकारेण यस्य प्रत्यय-संज्ञा क्रियते, स धातोः प्रातिपादिकाद्वा पर एव भवति। कर्त्तव्यम्। अत्र तव्य-प्रत्ययस्य परप्रयोगो भवति। **'विभाषा सुपो बहुच् पुरस्तात्तु[1] ॥'** **'अव्ययसर्वनाम्नामकच् प्राक् टेः[2] ॥'** इति प्रकृतेः पूर्वं मध्ये च प्रत्ययविधानादन्ये प्रत्ययाः पर एव स्युः। पुनः पर-वचनस्यैतत् प्रयोजनं—प्रत्ययस्य प्रकृतेश्च केवलायाः प्रयोगो न भवेत्, किन्तु प्रकृतेः परः प्रत्ययः प्रत्ययात् पूर्वा च प्रकृतिः प्रयोक्तव्येति नियमः ॥ २ ॥

इस सूत्र का भी पंचमाध्याय पर्यन्त अधिकार है। अधिकार से जिसकी प्रत्यय-संज्ञा होगी, उस का [परः,] प्रकृति से पर प्रयोग होना चाहिये। कर्त्तव्यम्। यहां कृ धातु से पर तव्य-प्रत्यय का प्रयोग होता है। पंचमाध्याय में बहुच्-प्रत्यय प्रकृति से पूर्व और अकच्-प्रत्यय प्रकृति के मध्य में विधान किया है, इससे अन्य प्रत्यय प्रकृति से पर ही होते। फिर यह सूत्र इसलिये है कि प्रकृति और प्रत्यय केवल इन का पृथक् प्रयोग न हो, किन्तु प्रकृति से पर प्रत्यय और प्रत्यय से पूर्व ही प्रकृति का प्रयोग हो ॥ २ ॥

आद्युदात्तश्च[3] ॥ ३ ॥

आद्युदात्तः। १। १। च। [अ०।] अयमप्यधिकार आपञ्चमाध्यायपरिसमाप्तेः। प्रत्ययस्वरस्यानियतस्य नियमः क्रियते। पञ्चमाध्यायपर्यन्तं सामान्येन सर्वे प्रत्यया आद्युदात्ता भवन्ति। कर्त्तव्यम्। ग्राही। इत्यादि। यश्चैकवर्णः प्रत्ययस्तत्राद्यन्तवद्भावेनोदात्तः ॥ ३ ॥

---

१. ५। ३। ६८ ॥
२. ५। ३। ७१ ॥
३. सौ०—सू० २३ ॥

इस सूत्र का भी पंचम अध्याय पर्यन्त अधिकार है। यहां से सब प्रत्ययों का सामान्य करके आद्युदात्त स्वर होगा। कर्त्तव्यम् । ग्राही । यहां तव्य-और णिनि-प्रत्यय को आद्युदात्त हुआ है। जो एक अक्षर का प्रत्यय है, उस को आद्यन्तवत् मानके उदात्त होता है ॥ ३ ॥

अनुदात्तौ सुप्पितौ ॥ ४ ॥

पूर्वसूत्रेणाद्युदात्तत्वे प्राप्तेऽनुदात्तो विधीयते। अनुदात्तौ। १। २। सुप्पितौ। १। २। अयमप्यधिकारः पञ्चमाध्यायपर्यन्तम्। सुप्पितौ प्रत्ययावनुदात्तौ भवतः। सुप्—सोमसुतौ। सोमसुतः। पित्—भवति। पचति। सुप्यौजसावनुदात्तौ, पिति शप्- तिपौ[२] च ॥ ४ ॥

पूर्वसूत्र से सामान्य करके आद्युदात्त पाता है। उस का अपवाद अनुदात्त विधान किया है। ['सुप्-पितौ'] सुप् और पित् जो प्रत्यय हैं, वे ['अनुदात्तौ'] अनुदात्त होंगे पंचमाध्याय पर्यन्त। यह भी अधिकार है। सोमसुतौ । सोमसुतः । यहां सुप् में औ-जस्-इन प्रत्ययों को अनुदात्त हुआ है। और 'भवति । पचति' यहां पित् में शप्-और तिप्-प्रत्यय को अनुदात्त स्वर हुआ है ॥ ४ ॥

गुप्तिज्किद्भ्यः सन्[३] ॥ ५ ॥

गुप्-तिज्-किद्भ्यः। ५। ३। सन्। १। १। **'गुप गोपने'[४], तिज निशाने'[५], कित निवासे रोगापनयने च'[६]** एतेभ्यः परः स्वार्थे सन् भवति। तस्य च प्रत्यय-सञ्ज्ञा। जुगुप्सते। तितिक्षते। चिकित्सति। अनेकार्था अपि धातवो भवन्तीति निन्दार्थाद् गुपः, सहनार्थात् तिजः, भिषगर्थाच्च किद्धातोः सन् भवति ॥

प०—अवयवे कृतं लिङ्ग[७] समुदायस्य विशेषकं भवति, यं समुदायं यो[८]ऽवयवो न व्यभिचरति[९] ॥

अस्याः परिभाषाया एतत् प्रयोजनं—गुपादिभ्यः सन्नन्तेभ्य आत्मनेपदं परस्मैपदं च पूर्वलिङ्गानुसारेणैव यथा स्यात्। 'गुप्, तिज्, मान्, बध, दान्, शान्'

---

१. सौ०—सू० २४ ॥
२. केचित्—तिपोऽनुदात्तत्वं तास्यनुदात्तेत्यादिना (६। १। १८६) एव सिद्धमिति ॥
३. चा० श०—"तिजः क्षान्तौ सन् ॥ कितः संशयचिकित्सयोः ॥ गुपो निन्दायाम् ॥" (१। १। १७—१९)
४. धा०—भ्वा० १०१९ ॥
५. धा०—भ्वा० १०२० ॥
६. धा०—भ्वा० १०४२ ॥
७. पारिभाषिकेऽत उत्तरम्—तस्य ॥
८. पारिभाषिके—सो ॥
९. पा०—सू० १११ ॥

इत्येतेऽनुदात्तेल्लिङ्गा धातवः, किच्चैक उदात्तेत् । तत्र गुपादयोऽवयवास्तेष्वात्मनेपदस्य लिङ्गं कृतं, तत् सन्नन्तस्य समुदायस्य विशेषकं भवति । सन्नन्तादात्मनेपदमेव भवति । किति च परस्मैपदस्य लिङ्गं कृतं, तस्मात् परस्मैपदमेव भवति । गुपादयोऽवयवाः सन्नन्तं समुदायं न व्यभिचरन्ति । 'जुगुप्सयति' इत्यत्र णिजन्तं व्यभिचरतीत्यत आत्मनेपदं न भवति ॥ ५ ॥

['गुप्-तिज्-किद्भ्यः'] गुप्, तिज्, कित्, इन धातुओं से पर ['सन्'] सन् हो । उस की प्रत्ययाधिकार से प्रत्यय-सञ्ज्ञा हो । जुगुप्सते । तितिक्षते । चिकित्सति । यहां निन्दार्थ गुप्, सहनार्थ तिज् और वैद्यार्थ में वर्त्तमान जो कित्, इन से सन्-प्रत्यय होता है । क्योंकि धातुओं के अनेक अर्थ होते हैं ॥

'अवयवे कृतं लिङ्गं० ॥' अवयव में किया हुआ चिह्न उस समुदाय के कार्य करता है कि जिस को वह अवयव कभी न त्यागता हो । यहां इस परिभाषा का यह प्रयोजन है कि गुपादि जो अवयव हैं, उन में अनुदात्तेत् आत्मनेपद का चिह्न किया है । सो [इन] सन्नन्तों से आत्मनेपद और कित् धातु में परस्मैपद का । [सो] उस सन्नन्त से परस्मैपद हो । गुपादि धातुओं से नित्य सन् होता है । और 'जुगुप्सयति' यहां तो णिजन्त समुदाय को गुप् छोड़ देता है, इससे यहां आत्मनेपद नहीं हुआ ॥ ५ ॥

मानबधदानशानभ्यो दीर्घश्चाभ्यासस्य[1] ॥ ६ ॥

सन्-ग्रहणमनुवर्त्तते । मान्-बध-दान्-शान्भ्यः । ५ । ३ । दीर्घः । १ । १ । च । [अ० ।] अभ्यासस्य । ६ । १ । **'मान पूजायां[2], बध बन्धने[3], दानखण्डने[4], शान तेजने[5]'** इत्येतेभ्यो धातुभ्यः सन् प्रत्ययो भवति । मानादीनामभ्यासस्य च दीर्घो भवति । मीमांसते । बीभत्सते । दीदांसते । शीशांसते । **'सन्यतः[6]** ॥ इत्यभ्यासस्येत्त्वं, तस्येकारस्यानेन दीर्घः । **'अवयवे कृतं लिङ्गं० ॥'** इति परिभाषाऽत्रापि प्रवर्त्तते ॥६॥

['मान्-बध-दान्-शान्भ्यः'] मान, बध, दान, शान, इन धातुओं से सन्-प्रत्यय हो, ['च'] और मानादि धातुओं के ['अभ्यासस्य'] अभ्यास को ['दीर्घः'] दीर्घ हो । मीमांसते । यहां मान से सन् । बीभत्सते । यहां बध से । दीदांसते । यहां दान से । और 'शीशांसते' यहां शान धातु से सन्-प्रत्यय । और इन के अभ्यास इकार को दीर्घ हुआ है ॥

---

१. आ०—सू० २६९ ॥
चा० श०—"बध एरो च ॥
शान्दान्मानः ॥" (१ । १ ॥ २०, २१)
२. धा०—भ्वा० १०२१ ॥
३. धा०—भ्वा० १०२२ ॥
४. धा०—भ्वा० १०४३ ॥
५. धा०—भ्वा० १०४४ ॥
६. ७ । ४ । ७९ ॥

'अवयवे कृतं ।।' इस उक्त परिभाषा से यहां भी आत्मनेपद होता है, क्योकि मानादि धातु भी गुपादिकों में गिने जाते हैं ॥ ६ ॥

धातोः कर्मणः समानकर्तृकादिच्छायां वा ॥ ७ ॥

सन्-ग्रहणमनुवर्त्तते । धातोः । ५ । १ । कर्मणः । ५ । १ । समानकर्त्तृकात् । ५ । १ । इच्छायाम् । ७ । १ । वा । [अ० ।] इष-धातुना समानः कर्ता यस्य सः । इच्छाकर्मण इच्छासमानकर्त्तृकाद् धातोर्विकल्पेन सन् प्रत्ययो भवति । कर्तुमिच्छति, चिकीर्षति । द्रष्टुमिच्छति, दिदृक्षति । अत्र कृ-दृशाविच्छायाः कर्मणी । इच्छतिना च समानकर्त्तृत्वम् ।।

'धातोः' इति किम् । प्रकर्त्तुमैच्छत्, प्राचिकीर्षत् । अत्र सोपसर्गादुत्पत्तिर्मा भूत् । यद्यत्र सोपसर्गात् सन् स्यात्, तर्हि सर्वस्य धातु-सञ्ज्ञत्वादुपसर्गात् पूर्वमड्-आगमः स्यात् ।।

'कर्मणः' इति किम् । 'आसनेनेच्छति । शयनेनेच्छति' इत्यत्र सनुत्पत्तिर्न स्यात् ।।

'समानकर्त्तृकाद्' इति किम् । देवदत्तस्य भोजनमिच्छति ।।

'इच्छायाम्' इति किम् । पठितुं जानाति । अत्र सन् नोत्पद्यते ।।

वा-ग्रहणाद् वाक्यमपि भवति ।।

अस्मिन् सूत्रे धातु-ग्रहणस्यैतदपि प्रयोजनं—धातोरुत्पद्यमानानामेव सार्वधातुकार्धधातुकसंज्ञे भवतः । अतः सन आर्द्धधातुकत्वात् 'पिपठिषति' इत्यादिष्विड्-आगमो भवति ।।

वा०—*तुमुन्नन्ताद्वा तस्य च लुग्वचनम्*[1] ॥ १ ॥

तुमुन्-प्रत्ययान्ताद्धातोः सन्, तस्य तुमुनो लुक् । कर्त्तुमिच्छति, चिकीर्षति ।।१।।

लिङुत्तमाद्वा[2] ॥ २ ॥

लिङ्लकारस्योत्तमैकवचनात् सन्, तस्यैकवचनस्य लुक् । कुर्यामि [ती] च्छति, चिकीर्षति ।। २ ।।

---

१. आ०—सू० ५०४ ॥ "तुमो लुक् चेच्छायाम् ॥ व्याप्यात् काम्यच् ॥"
चा० श० (१ । १ । २२, २३)— २. अ० ३ । पा० १ । आ० १ ॥

आशङ्कायामुपसंख्यानम्[1] ॥[2] [३ ॥]

अश्मा लुलुठिषते । कूलं पिपतिषति । श्वा मुमूर्षति । अस्य तृतीयवार्त्तिकस्यैतत् प्रयोजनं—अचेतनावत्सु पदार्थेष्विच्छा नास्तीत्यतोऽनिच्छायां सन् यथा स्यात् ॥ [३ ॥]

का०—शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः ।
सरूपः प्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते ॥[2] १ ॥

'शैषिकात्'=शैषिकप्रत्ययान्तात् 'सरूपः'=समानरूपः प्रत्ययो नेष्टः । यथा शालायां भवः=शालीयः । तत्र भव इति पुनश्छो न भवति । मतुबर्थीयात् सरूपो मतुबर्थिकः प्रत्ययो न भवति । शस्त्रमस्यास्तीति शस्त्रिकः । '**अत इनिठनौ**[3] ॥' इति ठन् । शस्त्रिकाः सन्त्यस्यां नगर्य्यां=शस्त्रिकवती नगरी । असरूपस्तु भवत्येव । किन्तु ठन्नन्ताद् ठन् न भवति । सन्नन्तादिच्छार्थात् सनः पुनः सन्न भवति । सरूपः समान इच्छार्थे विहितात् । पूर्वस्मात् स्वार्थविहितात्तु भवत्येवेच्छायां सन् । कर्त्तुमिच्छति, चिकीर्षति । चिकीर्षितुमिच्छतीति सन्न भवति । जुगुप्सितुमिच्छति, जुगुप्सिषते । अत्र स्वार्थात् सन इच्छायां पुनः सन् भवत्येव ॥ १ ॥ ७ ॥

['कर्मणः, इच्छायाम्'] इच्छा का जो कर्म हो, तथा ['समानकर्तृकाद्'] इच्छा का और जिस का एक कर्त्ता हो, उस ['धातोः'] धातु से पर ['वा'] विकल्प करके सन्-प्रत्यय हो ॥ कर्त्तुमिच्छति । यहां इष धातु का कर्म 'कर्त्तुम्' है, और दोनों का कर्त्ता एक ही है । इससे 'चिकीर्षति' यहां कृ धातु से सन् हो गया ॥

इस सूत्र में धातु-ग्रहण इसलिये है कि 'प्रकर्त्तुमैच्छत्=प्राचिकीर्षत्' यहां प्र उपसर्ग के सहित कृ धातु से सन् न हो, क्योंकि जो प्र-पूर्वक कृ धातु से सन् हो तो प्र के सहित सन्नन्त की धातु-सञ्ज्ञा होने से 'प्राचिकीर्षत्' यहां प्र के पूर्व अट् का आगम हो जावे ॥

कर्म-ग्रहण इसलिये है कि 'गमनेनेच्छति' यहां करणवाची गमनेन से सन् न हो ॥
समानकर्तृक-ग्रहण इसलिये है कि 'देवदत्तस्य भोजनमिच्छति' यहां सन् न हो ॥
और इच्छा-ग्रहण इसलिये है कि 'पठितुं जानाति' यहां भी सन्-प्रत्यय न हो ॥

---

१. महाभाष्ये तु "आशंकायामचेतनेषूपसंख्यानम् ॥" इति वार्त्तिकमुपन्यस्य "अचेतनग्रहणेन नार्थः । आशंकायामित्येव । इदमपि सिद्धं भवति—श्वा मुमूर्षति ।" इत्येवं प्रतिपादितम् ॥
२. अ० ३ । पा० १ । आ० १ ॥
३. ५ । २ । ११५ ॥

'तुमुन्नन्ता० ॥' तुमुन् प्रत्ययान्त धातु से विकल्प करके सन्-प्रत्यय हो और तुमुन्-प्रत्यय का लोप हो जावे। इसी वार्त्तिक के अनुसार सूत्र का उदाहरण दे चुके हैं ॥ [१ ॥]

'लिङुत्तमाद्वा ॥' लिङ् लकार के उत्तम पुरुष के एकवचनान्त धातु से विकल्प करके सन् हो और उत्तम [पुरुष] के एकवचन का लुक् हो जावे। कुर्यामितीच्छति, चिकीर्षति। यहां कृ धातु से सन् हुआ है ॥ २ ॥

'आशङ्काया० ॥' आशंका अर्थ में सामान्य धातु से सन्-प्रत्यय हो। अश्मा लुलुठिषते। इस वार्त्तिक का यह प्रयोजन है कि जड़ पदार्थों में इच्छा नहीं होती, इसलिये जिस धातु का कर्त्ता जड़ पदार्थ हो, वहां भी सन्-प्रत्यय हो जावे ॥ ३ ॥

'शैषिकान्म० ॥' शैषिक प्रत्ययान्त से प्रथम हुआ प्रत्यय न हो। शालीयः, तत्र भवः। यहां छ-प्रत्ययान्त से शैषिक छ-प्रत्यय फिर भी प्राप्त है, वह नहीं हुआ। 'मतुब०' मतुबर्थ प्रत्ययान्त से प्रथम हुआ प्रत्यय न हो। शक्तिकाः सन्त्यस्यां नगर्यां=शक्तिकवती। यहां ठन्-प्रत्ययान्त शक्तिक-शब्द से फिर ठन् नहीं हुआ, किन्तु असरूप मतुप् हो गया। 'सन्नन्ता०' इच्छार्थक जो सन् है, उस से इच्छा अर्थ में फिर सन् न हो, किन्तु स्वार्थ सन् से तो इच्छार्थक सन् हो जावे। चिकीर्षितुमिच्छति। यहां इच्छार्थक सन् से फिर सन् नहीं हुआ। और 'जुगुप्सिषते' यहां स्वार्थ सन् से इच्छार्थक सन् हो जाता है। यह इस एक कारिका का अर्थ हुआ ॥ ७ ॥

सुप आत्मनः क्यच्[1] ॥ ८ ॥

'कर्मण इच्छायां वा' इत्यनुवर्त्तते। सुपः। ५। १। आत्मनः। ६। १। क्यच्। १। १। आत्मनः=स्वस्येच्छायां सुबन्तात् कर्मणो विकल्पेन क्यच् प्रत्ययो भवति। आत्मनः पुत्रमिच्छति, पुत्रीयति। अत्र '**क्यचि च**[2] ॥' इति पुत्र-शब्दस्येत्त्वम् ॥

'सुपः' इति किमर्थम्। महान्तं पुत्रमिच्छतीति वाक्यात् क्यजुत्पत्तिर्मा भूत् ॥

'आत्मनः' इति किम्। राज्ञः पुत्रमिच्छतीति परेच्छायां क्यज् मा भूत् ॥

क्यचि ककारः किमर्थः। '**नः क्ये**[3] ॥' इति सामान्येन ग्रहणं यथा स्यात्। चकारश्चित्स्वरार्थः ॥

वा०—*क्यचि मान्ताव्ययप्रतिषेधः* ॥[4] १ ॥

मकारान्तादव्यय-सञ्ज्ञकाच्च सुबन्तकर्मण आत्मेच्छायां क्यज् न भवति। इदमिच्छति। किमिच्छति। उच्चैरिच्छति। नीचैरिच्छति ॥ १ ॥

---

१. आ०—सू० ५६० ॥
चा० श०—"ससङ्ख्यादमः क्यज्वा ॥" (१। १। २४)
२. ७। ४। ३३ ॥
३. १। ४। १५ ॥
४. अ० ३। पा० १। आ० २ ॥

छन्दसि परेच्छायाम् ।।[1] *२ ।।*

छन्दसि=वेदे परेच्छायामपि क्यज् भवति । **मा त्वा वृका अघायवो विदन्**[2] । अत्र अघायु-शब्दे परेच्छायां क्यव् ।। २ ।।

गोसमानाक्षरनान्तादित्येके वक्तव्यमित्याहुः[3] ॥[4] ३ ॥

येषां केषाञ्चिदाचार्याणां मतमिदम् । गो-शब्दात्, समानाक्षरेभ्यः='अ' इ, उ, ऋ, ऌ' इत्येतदन्तात्, नकारान्ताच्च क्यच् प्रत्ययो भवति । तेषां मते परिगणनात् क्यचि मान्ताव्ययेति वार्त्तिकं न पठितव्यं भवति । गो—गव्यति । समानाक्षर—घटीयति । दधीयति । मधूयति । कर्त्तृयति । नान्त—राजीयति । तक्षीयति । एतेभ्य एव क्यज् यथा स्यात् ।। ८ ।।

['आत्मनः'] आत्म की इच्छा में ['सुपः'] सुबन्त कर्म से विकल्प करके ['क्यच्'] क्यच्-प्रत्यय हो । आत्मनः पुत्रमिच्छति, पुत्रीयति । यहां पुत्र-शब्द से क्यच् हुआ और क्यच् के पर पुत्र-शब्द को ईकारादेश हुआ है ॥

सुप्-ग्रहण इसलिये है कि 'महान्तं पुत्रमिच्छति' यहां वाक्य से क्यच् न हो ॥

आत्म-ग्रहण इसलिये है कि 'राज्ञः पुत्रमिच्छति' यहां दूसरे के लिये इच्छा करना है, इससे क्यच् न हुआ ॥

क्यच्-प्रत्यय में चकार अन्तोदात्त स्वर के लिये है ॥

'क्यचि० ।।' मकारान्त शब्द और अव्यय-संज्ञक शब्दों से क्यच् प्रत्यय न हो । इदमिच्छति । यहां मकारान्त से । उच्चैरिच्छति । और यहां अव्यय संज्ञक उच्चैस्-शब्द से क्यच् नहीं हुआ ।। १ ।।

'छन्दसि० ।।' वैदिक प्रयोगों में दूसरे के लिये इच्छा में भी क्यच् होता है । 'मा त्वा वृका अघायवो विदन्[4] ।' यहां अघायु-शब्द में दूसरे की इच्छा में क्यच् हुआ है ।। २ ।।

'गोसमानाक्षर० ।।' जिन किन्हीं ऋषियों का ऐसा मत है कि गो-शब्द, समानाक्षर [अर्थात्] अ, इ, उ, ऋ, [ऌ], ये अक्षर जिन के अन्त में हों, वे शब्द और नकारान्त शब्दों से ही क्यच्-प्रत्यय हो, के उन मत में मान्त और अव्यय से जो निषेध किया है वह वार्त्तिक नहीं करना पड़ता । गव्यति यहां गो-शब्द से । घटीयति । दधीयति । मधूयति । कर्त्तृयति । यहां समानाक्षरान्त से । और 'राजीयति' यहां नकारान्त से क्यच्-प्रत्यय हुआ है ।। ८ ।।

काम्यच्[5] ॥ ९ ॥

---

१. अस्मिन् सूत्रे महाभाष्य इदं वार्तिकं न दृश्यते ॥

२. यजुः० ४ । ३४ ॥

३. पाठान्तरम्—गो० दित्येके ॥

४. अ० ३ । पा० १ । आ० २ ॥

५. आ०—सू० ५७९ ॥
चा० श०—"व्याप्यात् काम्यच् ॥"

'कर्मण इच्छायां वा' इति 'सुप आत्मनः' इति चानुवर्त्तते । काम्यच् । १ । १ । च [अ० ।] सुबन्तात् कर्मण आत्मेच्छायां विकल्पेन काम्यच्-प्रत्ययो भवति । आत्मनः पुत्रमिच्छति, पुत्रकाम्यति । पृथग्योगकरणमुत्तरसूत्रे क्यचोऽनुवृत्त्यर्थम् । काम्यचः ककारस्येत्-सञ्ज्ञा न भवति । इत्कार्यप्रयोजनाभावात् । चकारश्चान्तोदात्तस्वरार्थ एव ।। ९ ।।

सुबन्त कर्म से आत्मा की इच्छा में विकल्प करके ['काम्यच्'] काम्यच्-प्रत्यय हो। आत्मनः पुत्रमिच्छति, पुत्रकाम्यति । यहां पुत्र-शब्द से काम्यच्-प्रत्यय हुआ है ।।

इस सूत्र के पृथक् करने का यह प्रयोजन है कि आगे के सूत्र में इस [अर्थात् काम्यच्] की अनुवृत्ति न जावे, किन्तु क्यच् की अनुवृत्ति जावे ।।

काम्यच्-प्रत्यय के ककार की इत्-सञ्ज्ञा इसलिये नहीं होती कि कित् मानके कुछ कार्य कर्त्तव्य नहीं ।।

और चकार अन्तोदात्त स्वर के लिये काम्यच्-प्रत्यय के अन्त में पढ़ा है ।। ९ ।।

उपमानादाचारे[1] ।। १० ।।

क्यजनुवर्त्तते । 'कर्मणो वा' इत्यनुवर्त्तते, 'सुपः' इति च । अन्यत् सर्वं निवृत्तम् । उपमानात् । ५ । १ । आचारे । ७ । १ । उपमानवाचिकर्मणः सुबन्तादाचारार्थे विकल्पेन क्यच्-प्रत्ययो भवति । पुत्रमिवाचरति पाठकः, पुत्रीयति छात्रम् । गर्दभमिवाचरति, गर्दभीयत्यश्वम् ।।

'आचारे' इति किम् । गर्दभमिव चालयत्यश्वम् । अत्र क्यज् न भवति ।।

वा०—*अधिकरणाच्च ।*[2] १ ।।

'कर्मणः' इत्यनुवर्त्तनादन्यस्मान्न प्राप्तं, तदर्थमिदमुच्यते । अधिकरणोपमानवाचिनः सुबन्तादपि क्यच्-प्रत्ययो यथा स्यात् । कुटीमिवाचरतीति कुटीयति प्रासादे । प्रासादीयति कुटयाम्[3] ।। १० ।।

['उपमानाद्'] उपमानवाचि सुबन्त कर्म से ['आचारे'] आचार अर्थ में विकल्प करके क्यच्-प्रत्यय हो । पुत्रमिवाचरत्यध्यापकः, पुत्रीयति शिष्यम् । यहां आचार अर्थ में पुत्र-शब्द से क्यच् हुआ है ।।

आचार-ग्रहण इसलिये है कि 'गर्दभमिव चालयत्यश्वम्' यहां क्यच् न हो ।।

'अधिकरणाच्च ।।' अधिकरण उपमानवाचि सुबन्त से क्यच्-प्रत्यय हो । कुटीयति

---

१. आ०—सू० ५८० ।। चा० श०—"उपमानादाचारे ।।" (१ । १ । २५)

२. चा० श०—"आधारात् ।।" (१ । १ । २६) अ० ३ । पा० १ । आ० २ ।।

३. काशिकायां "कुड्ये" इति प्रमादपाठः ।।

प्रासादे । यहां अधिकरणवाची कुटी-शब्द से क्यच् हुआ । सूत्र में कर्म की अनुवृत्ति आती थी, इससे [अधिकरण से] क्यच् नहीं प्राप्त था । इसलिये यह वार्त्तिक रचा गया ॥ १० ॥

कर्त्तुः क्यङ् सलोपश्च[1] ॥ ११ ॥

पूर्वं सूत्रं सर्वमनुवर्त्तते । कर्त्तुः । ५ । १ । क्यङ् । १ । १ । स-लोपः । १ । १ । च । [अ० ।] उपमानवाचिनः सुबन्तात् कर्त्तुराचारेऽभिधेये विकल्पेन क्यङ् प्रत्ययो भवति । सकारान्तो यः शब्दः, तस्य सकारस्य च लोपो भवति । श्येन इवाचरति काकः, श्येनायते । पण्डित इवाचरति मूर्खः, पण्डितायते । पय इवाचरति, पयायते, पयस्यते । अत्र '**अकृत्सार्वधातुकयोर्दीर्घः**[2] ॥' इति दीर्घत्वम् ॥

अथ वार्त्तिकानि—

सलोपो वा ॥[3] १ ॥

अनुवर्त्तितविकल्पेन पक्षे वाक्यं भवति । अतः स-लोपे वैकल्प्यं न प्राप्तम् । पयायते । पयस्यते । यत्र सकारो न लुप्यते, तत्राजन्तत्वाभावाद् दीर्घत्वं न भवति ॥१॥

ओजोऽप्सरसोर्नित्यम्[4] ॥[3] २ ॥

'ओजस्, अप्सरस्' इत्येतयोः शब्दयोः सकारस्य नित्यं लोपो भवति । **ओजायमानं यो अहिं जघान**[5] । अप्सरायते ॥ २ ॥

अपर आह—*सलोपोऽप्सरस*[3] *एव ॥ ३ ॥*

केषाञ्चिन्मतं— अप्सरस्-शब्दस्य सकारस्यैव नित्यं लोपो भवति न त्वोजसः । 'ओजस्यते' इत्येव भवितव्यम् । कथं '**ओजायमानं यो अहिं जघान**[4] ।' छान्दसत्वात् सिद्धम् । छन्दसि दृष्टानुविधिर्भवतीत्यर्थः ॥ ३ ॥

आचारेऽवगल्भ[6]*क्लीवहोडेभ्यः क्विब् वा*[7] *॥*[3] ४ ॥

अवगल्भादिभ्यो विकल्पेन क्विप् । पक्षे क्यङ् । अवगल्भते, अवगल्भायते ।

---

१. आ०—सू० ५८२ ॥ चा० श०—"क्यङ् ॥" (१ । १ । २९)
२. ७ । ४ । २५ ॥
३. अ० २ । पा० १ । आ० २ ॥
४. काशिकायाम्—"ओजसोऽप्सरसो नित्यं पयसस्तु विभाषया ॥
५. ऋ०—२ । १२ । ११ ॥ अ०—२० । ३४ । ११ ॥
६. महाभाष्ये पाठान्तरम्—आचारे गल्भ० ॥
७. चा० श०—"गल्भक्लीवहोडेभ्यो ङित् ॥" (१ । १ । २८)

विक्लीवते, विक्लीवायते । विहोडते, विहोडायते । अवगल्भादयो धातव एव । तेषां स्वाभाविकं धातुत्वं, तस्माद् 'अवगल्भते । विक्लीवते । विहोडते' इत्यादिरूपाणि सिद्धानि भविष्यन्त्येव । पुनः क्विब्विधानस्यैतत् प्रयोजनं—क्विबन्तस्य प्रत्ययान्तत्वात् **'कास्प्रत्ययादाममन्त्रे लिटि'**[1] ॥' इत्याम्-प्रत्ययो यथा स्यात् । अवगल्भाञ्चक्रे । विक्लीवाञ्चक्रे । विहोडाञ्चक्रे ॥ ४ ॥

सर्वप्रातिपदिकेभ्य आचारे क्विब् वा वक्तव्यः ॥[2] ५ ॥

अश्व इवाचरति, अश्वति, अश्वायते । गर्दभति, गर्दभायते । अत्र किप्पक्षे **'अतो गुणे'**[3] ॥' इति पररूपत्वम् ॥ ५ ॥ ११ ॥

उपमानवाची सुबन्त ['कर्तुः'] कर्त्ता से आचार अर्थ में विकल्प करके ['क्यङ्'] क्यङ्-प्रत्यय हो । और जो सकारान्त शब्द हो, उस के ['स-लोपः'] सकार का लोप भी हो । श्येन इवाचरति काकः, श्येनायते । यहां श्येन उपमान, काक उपमेय, इव उपमावाचक, आचार साधारण धर्म है, इसलिये उपमानवाची श्येन-शब्द से क्यङ्-प्रत्यय हुआ और क्यङ् के पर [होते हुए] श्येन आदि अजन्त शब्दों को दीर्घ भी होता है ॥

अब वार्त्तिकों के अर्थ लिखते हैं—

'सलोपो वा ॥' जिस विकल्प की अनुवृत्ति आती है, उससे पक्ष में वाक्य रहता है, इसलिये यह वार्त्तिक कहा कि जिस किसी सकारान्त शब्द से क्यङ्-प्रत्यय हो, वहां उस सकार का लोप भी विकल्प करके हो । पयायते । पयस्यते । यहां सकारान्त पयस्-शब्द के सकार का लोप जिस पक्ष में नहीं होता, वहां अजन्त के न होने से दीर्घ भी नहीं होता ॥ १ ॥

ओजोऽप्सरसोर्नित्यम् ॥ ओजस् और अप्सरस्-शब्द के सकार का नित्य लोप हो जावे । पूर्व वार्त्तिक से विकल्प पाता था । ओजायमानं यो अहिं जघान । यहां 'ओजायमानं' इस प्रयोग में ओजस् के सकार का और 'अप्सरायते' यहां अप्सरस् के सकार का लोप हुआ है ॥ २ ॥

'सलोपोऽप्सरस एव ॥' किन्हीं किन्हीं आचार्यों का ऐसा मत है कि एक अप्सरस् के सकार का ही नित्य लोप होना चाहिये । 'ओजायमानं' में जो नित्य लोप है, वह वैदिक प्रयोग है । वेद में सब विधियों का विकल्प होता ही है । लोक में तो 'ओजस्यते' यहां सकार का लोप नहीं हुआ ॥ ३ ॥

'आचारेऽवगल्भक्लीवहोडेभ्यः किब् वा ॥' [आचार अर्थ में] अव-पूर्वक गल्भ, क्लीव, होड, इन तीन धातुओं से क्विप्-प्रत्यय विकल्प करके और पक्ष में क्यङ् हो । अवगल्भते । यहां क्विप् । अवगल्भायते । यहां क्यङ् । विक्लीवते । विक्लीवायते । विहोडते । विहोडायते । गल्भादि धातुओं से क्विबन्त के जो रूप बनते हैं, वैसे तो स्वाभाविक धातु-सञ्ज्ञा

---

१. ३ । १ । ३५ ॥

२. चा० श०—"कर्तुर्विप् ॥" (१ । १ । २७) अ० ३ । पा० १ । आ० २ ॥

३. ६ । १ । ९७ ॥

से बन जाते, फिर क्विप् विधान करने का यह प्रयोजन है कि क्विप् के होने से प्रत्ययान्त धातु बनके लिट् लकार में आम्-प्रत्यय हो जावे ॥ ४ ॥

'सर्वप्रातिपदिकेभ्य आचारे किप्० ॥' बहुत ऋषियों का ऐसा मत है कि प्रातिपदिक-मात्र से क्विप्-प्रत्यय विकल्प करके हो। अश्वति। यहां क्विप्-प्रत्ययान्त अश्व-शब्द की धातु-सञ्ज्ञा होने से धातु के सब कार्य होते हैं। और पक्ष में 'अश्वायते' यहां क्यङ्-प्रत्यय होता है ॥ [५ ॥] ११ ॥

भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः[1] ॥ १२ ॥

क्यङनुवर्त्तते। भृशादिभ्यः। ५। ३। भुवि। ७। १। अच्वेः। ५। १। लोपः। १। १। च। [अ०।] हलः। ६। १। भुवि=भू-धातुः सत्तार्थः, तस्मिन्। अच्व्यन्तेभ्यो गणपठितेभ्यो भृशादिभ्यः प्रातिपदिकेभ्यो भुवि क्यङ् प्रत्ययो भवति। यश्च हलन्तः शब्दः, तस्य हलो लोपो भवति। अभृशो भृशो भवति=भृशायते। शीघ्रायते। मन्दायते। 'सुमनायते' [इति] अत्र सकारलोपः। 'बृहायते' [इति] अत्र त-लोपः ॥

वा०—*भृशादिष्वभूततद्भावग्रहणम्*।[2] १ ॥

पूर्वं यत् प्रसिद्धं नास्ति पश्चाद् भवेत्, तदभूततद्भावः। इह मा भूत्—क दिवा भृशा भवन्ति। अत्र क्यङ् न स्यात् ॥ १ ॥

सङ्ग्रामयतेः सोपसर्गादुत्पत्तिर्वक्तव्या ॥ २ ॥
असङ्ग्रामयत शूर इत्येवमर्थम्। तन्नियमार्थं भविष्यति। सङ्ग्रामयतेरेव सोपसर्गान्नान्यस्मात् सोपसर्गादिति ॥[2]

सोपसर्गादुत्पत्तेरेतत् प्रयोजनं—सोपसर्गस्य क्यङन्तसमुदायस्याङ्ग-सञ्ज्ञत्वादुपसर्गात् पूर्वमडागमो यथा स्यात्। अन्ये ये सोपसर्गाः शब्दा भृशादिषु पठिताः, तेभ्यः सोपसर्गभ्य उत्पत्तिर्न भवति। स्वमनायत। तेनात्रोपसर्गात् परमडागमो भवति।

अथ भृशादिगणः— १ भृश, २ शीघ्र, ३ चपल, ४ मन्द[3], ५ पण्डित[4], ६ सुमनस्, ७ दुर्मनस्, ८ अभिमनस्, ९ उन्मनस्[5], १० सङ्ग्राम[6], ११ रहस्, १२

---

१. आ०—सू० ५९० ॥ चा० श०—"च्व्यर्थे भृशादिभ्यः स्तलोपश्च ॥" (१। १। ३०)

२. अ० ३। पा० १। आ० २॥

३. चन्द्रो गणान्ते मन्द-शब्दं पठति ॥ काशिकायां "मन्द। चपल" इति क्रमभेदः ॥

४. चान्द्रवृत्त्यादिष्वत उत्तरं—उत्सुक ॥

५. चन्द्रः—"उन्मनस्। अभिमनस्। दुर्मनस्। सुमनस्।"
जयादित्यः—"उन्मनस्। अविमनस्। सुमनस्। दुर्मनस्।"

६. अन्यत्र न दृश्यते ॥
चान्द्रवृत्तावत उत्तरं—"रेहत्। वेहत्। संश्चत्। तृपत्। शुचिवर्चस्। अण्डर। ओजस्। नील। मद्र। पेन। हरित। मन्द।" इति गणः ॥

रेहस्[1], १३ रोहत्, १४ रेहत्[2], १५ संश्चत्[3], १६ तृपत्[4], १७ शश्वत्, १८ भ्रमत्, १९ बृहत्[5], २० बेहत्[6], २१ नृषत्[5], २२ सुचिस्[7], २३ शुचि[8], शुधि[5], २५ अधर[5], २६ वर्चस्[8], २७ अण्डर[9], २८ ओजस्, २९ सुरजस्, ३० अरजस्, ३१ विमनस्,[10] ३२ रभन्, ३३ हन्, ॥ इति[11] भृशादिगणः ॥ १२ ॥

['अच्वेः'] अच्प्रत्यन्त ['भृशादिभ्यः'] गण में पढ़े हुए जो भृशादि प्रातिपदिक हैं, उन से ['भुवि'] भू धातु के अर्थ में क्यङ्-प्रत्यय हो। ['च' और हलन्त शब्दों के 'हलः' हल् का 'लोपः' लोप हो।] अभृशो भृशो भवति=भृशायते। शीघ्रायते। चपलायते। यहां भृश आदि शब्दों से क्यङ् हुआ है॥

'भृशादिभ्वभूततद्भावग्रहणम् ॥' भृशादिकों से अभूततद्भाव अर्थात् प्रथम न हो और फिर हो जावे—इस अर्थ में क्यङ् हो। इस वार्त्तिक के अनुकूल ही [पूर्व] उदाहरण दिये हैं। प्रयोजन यह है कि 'क दिवा भृशा भवन्ति' यहां अभूततद्भाव के न होने से क्यङ् न हुआ॥ [१ ॥]

'सङ्ग्रामयतेः सोपसर्गादुत्पत्तिर्वक्तव्या ॥' उपसर्ग सहित सङ्ग्राम-शब्द से क्यङ् प्रत्यय हो। असङ्ग्रामयत शूरः। यहां सोपसर्ग से उत्पत्ति होने से उपसर्ग के पूर्व अट् का आगम होता है। जो भृशादिकों में अन्य शब्द सोपसर्ग पढ़े हैं, उन से उपसर्ग सहितों से क्यङ् नहीं होता। इससे 'स्वमनायत' यहां उपसर्ग से पर अट् का आगम होता है॥

---

१. बोटलिङ्गस्त्वेतं रेहत्-शब्दस्य पाठान्तरं मन्यते ॥
अत उत्तरं काशिकायाम्—"शश्वत्। बृहत्। बेहत्। नृषत्। शुधि। अधर। ओजस्। वर्चस्। विमनस्। रभन्। हन्। रोहत्। शुचिस्। अरजस्" केषुचित् काशिकाकोशेषु "वर्चस्" इत्यत्र गणः समापितः ॥

२. गणरत्ने (८। ४४०)—"रेहत्=नैर्घृण्यधर्मवृत्तिर्भिक्षाभिलाषधर्मवृत्तिर्वा। रहसि वर्त्तत इत्यन्ये ॥"

३. गणरत्ने (८। ४४१)—"संश्चायते=सातत्येन भवति। शश्वदिति शाकटायनः ॥"

४. गणरत्ने (८। ४४०)—"तृपत्=चन्द्रः समुद्रश्च ॥"

५. बोटलिङ्गीये पाठे गणान्ते—K. ausserdemi, बृहत् नृषत्, (sic), शुधि, अधर"

६. गणरत्ने (८। ४४०)—"=गर्भघातिनी।"

७. बोटलिङ्गः—शुचिस् ॥

८. २३, २६ इत्येतयोः स्थाने बोटलिङ्गः—शुचिवर्चस् ॥

९. गणरत्ने (८। ४४०)—"आण्डरः=मूर्खो मुष्करो वा। 'अण्डर' इत्यन्ये।"
अत उत्तरे बोटलिङ्गः—वर्चस् ॥

१०. बोटलिङ्गीये पाठे ३१—३३ शब्दा न सन्ति ॥

११. गणरत्ने (८। ४४०)—"रेफत् सदोष इत्यर्थः। रेफायते।" इत्यधिकम् ॥

भृशादिगण पूर्व संस्कृत में लिख दिया ॥ १२ ॥

लोहितादिडाज्भ्यः क्यष्[1] ॥ १३ ॥

'भुव्यच्वेः' इत्यनुवर्त्तते । लोहितादि-डाज्भ्यः । ५ । ३ । क्यङ् । १ । १ । अच्व्यन्तेभ्यो लोहितादिभ्यो डाजन्तेभ्यश्च प्रातिपदिकेभ्यो भू-धातोरर्थे क्यष्-प्रत्ययो भवति । अलोहितो लोहितो भवति=लोहितायति,=लोहितायते । अपटपटा पटपटा भवति=पटपटायति,=पटपटायते । अच्वेरित्यनुवर्त्तनादभूततद्भाव एव क्यष् भवति **'वा क्यषः[2] ॥'** इत्युभयपदम् ॥

क्यषि ककारोऽनुबन्धः **'क्याच्छन्दसि[3] ॥'** इति सामान्यग्रहणार्थः । षकारो **'वा क्यषः[2] ॥'** इति विशेषणार्थः ॥

अथ लोहितादिगणः[4]—१ लोहित, २ नील[5], ३ हरित, ४ पीत,[6] ५ चरित[7], ६ फेन, ७ मद्र, ८ दास, ९ मन्द ॥ इति[8] लोहितादिगणः ॥

वा०—*लोहितडाज्भ्यः क्यष्वचनम् ॥*[9] १ ॥

लोहितायति, लोहितायते । पटपटायति, पटपटायते । दमदमायति, दमदमायते । मटमटायति, मटमटायते ॥

भृशादिष्वितराणि पठितव्यानि[1] ॥ २ ॥

अस्यैतत् प्रयोजनं—लोहित-शब्दाड् डाजन्तेभ्यश्चोभयपदमेव स्यात् । अन्येभ्यो लोहितादिभ्यो भृशादिपाठेन क्यङ् विधेयः तस्य ङित्त्वादात्मनेपदं च ॥ १३ ॥

अच्व्यन्त ['लोहितादि-डाज्भ्यः'] लोहितादि और डाच्-प्रत्ययान्त जो प्रातिपादिक, उन से भू धातु के अर्थ में ['क्यष्'] क्यष्-प्रत्यय हो । अच्व्यन्त की अनुवृत्ति होने से अभूततद्भाव में क्यष् होता है । अलोहितो लोहितो भवति=लोहितायति=लोहितायते । यहां लोहित से ।

---

१. आ०—सू० ५९१ ॥ चा० श०—"डाज्लोहितादिभ्यः क्यष् ॥" (१ । १ । ३१)

२. १ । ३ । ९० ॥

३. ३ । २ । १७० ॥

४. चन्द्रः—"आकृतिगणश्चायम् ।" इत्येव, न च गणशब्दान् पठति ॥

५. २-७ शब्दानां स्थाने बोटलिङ्कः—"चरित । नील । फेन । मद्र । हरित ।"

६. बोटलिङ्को गणान्ते—"K. auscerdem: पीत"

७. ५-८ शब्दानां स्थाने जयादित्यः—"मद्र फेन ।"

८. आकृतिगणोऽयमिति सर्वसम्मतम् ।

९. अ० ३ । पा० १ । आ० २ ॥

पटपटायति । पटपटायते । यहां डाजन्त से क्यष् हुआ है । क्यष्-प्रत्ययान्त से आत्मनेपद और परस्मैपद दोनों होते हैं ॥

क्यष्-प्रत्यय में ककार इसलिये है कि 'क्याच्छन्दसि[1]' ।। इस सूत्र में सामान्यग्रहण से उ-प्रत्यय हो जावे । और षकार उभयपद के लिये ॥

'लोहितडाज्भ्यः क्यष्वचनम् ।।' लोहितादि शब्दों से जो क्यष्-प्रत्यय कहा है, वह केवल लोहित से हो । अन्य जो लोहितादि रहे, उन के भृशादिकों में समझने से क्यङ् होता है । प्रयोजन यह है कि लोहित-शब्द से उभयपद और अन्य लोहितादिकों से आत्मनेपद ही हो ॥

लोहितादिगण पूर्व लिख दिया है ॥ १३ ॥

कष्टाय क्रमणे[2] ॥ १४ ॥

क्यङनुवर्त्तते । क्यष् निवृत्तः । कष्टाय । ४ । १ । क्रमणे । ७ । १ । 'कष्टाय' इति तादर्थ्ये चतुर्थी । क्रमणे=अनार्जवे । चतुर्थ्यन्तादनार्जवे वर्त्तमानात् कष्ट-शब्दात् क्यङ्-प्रत्ययो भवति । कष्टाय [कर्मणे] क्रामति=कष्टायते । क्यङनुवृत्त्याऽऽत्मनेपदमेव भवति ।।

अत्यल्पमिदमुच्यते कष्टायेति ।

सत्रकक्षकष्टकृच्छ्रगहनेभ्यः[3] कण्वचिकीर्षायाम् ।।[4] १ ।।

कण्वचिकीर्षायाम्=पापचिकीर्षायाम् । सत्रायते । कक्षायते । कष्टायते । कृच्छ्रायते । गहनायते ।।

सत्रादिभ्य इति किम् । कुटिलायानुवाकाय क्रामति ।
चतुर्थ्यन्तेभ्य इति किम् । अजः कष्टं क्रामति ।।[4]

अत्रोभयत्र क्यङ्-प्रत्ययो न स्यात् ।। १४ ।।

['क्रमणे'] क्रमण अर्थात् कठिन अर्थ में वर्त्तमान जो ['कष्टाय'] चतुर्थ्यन्त कष्ट-शब्द, उस से क्यङ्-प्रत्यय हो । कष्टाय क्रामति=कष्टायते । यहां क्यङ् की अनुवृत्ति होने से केवल आत्मनेपद ही होता है ॥

'सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायाम् ।।' सत्र, कक्ष, कष्ट, कृच्छ्र, गहन, चतुर्थ्यन्त इन सब शब्दों से क्यङ्-प्रत्यय हो पाप करने की इच्छा में । सत्रायते । यहां सत्र-शब्द से । कक्षायते । कष्टायते । कृच्छ्रायते । गहनायते । यथाक्रम उक्त शब्दों से यहां क्यङ् होता है । सत्रादि ग्रहण इसलिये है कि 'कुटिलायानुवाकाय क्रामति ।' यहां क्यङ् न हो । और चतुर्थ्यन्तों से इसलिये कहा है कि 'अजः कष्टं क्रामति' यहां भी कष्ट-शब्द से क्यङ्-प्रत्यय नहीं हुआ ॥ १४ ॥

---

१. ३ । २ । १७० ॥

२. आ०—सू० ५९४ ॥ चा० श०—"कष्टकक्षसत्रगहनाय पापे क्रमणे ॥" (१ । १ । ३२)

३. पाठान्तरम्—सत्रकक्षकष्टगहनेभ्यः ॥

४. दृश्यतां अ० ३ । पा० १ । आ० २ ॥

कर्मणो रोमन्थतपोभ्यां वर्तिचरोः[1] ॥ १५ ॥

क्यङनुवर्त्तते। कर्मणः। ५। १। रोमन्थ-तपोभ्याम्। ५। २। वर्त्तिचरोः। ६। २। **उद्गीर्णस्य वाऽवगीर्णस्य वा मन्थः=रोमन्थः।** उद्गीर्णशब्दस्याऽवगीर्ण-शब्दस्य वा पृषोदरादित्वाद् रोभावः। 'वर्त्ति' इति णिजन्तनिर्देशः॥ वर्त्ति-धातो रोमन्थात् कर्मणः, चर-धातोश्च तपसः कर्मणः क्यङ्-प्रत्ययो भवति। रोमन्थं वर्त्तयति=रोमन्थायते महिषः। तपश्चरति=तपस्यति।

वा०—*हनुचलन इति वक्तव्यम्॥*[2] १॥

हनुचलनेऽर्थे रोमन्थ-शब्दात् क्यङ् भवति। तेन 'कीटो रोमन्थं वर्तयति' अत्र हनुचलनाभावात् क्यङ् न भवति॥

तपसः परस्मैपदं च॥[2]:२॥

ङित्त्वादात्मनेपदं प्राप्तं प्रतिषिध्यते। तपस्यति॥ १५॥

रोमन्थ उस को कहते—अफरे हुए आनन्द में स्थिर होके पशु जो मुख चलाते हैं। [वर्त्तिचरोः, रोमन्थ-तपोभ्याम्, कर्मणः'] णिजन्त वृत धातु का जो रोमन्थ कर्म और चर धातु का जो तपस् कर्म, इन से क्यङ्-प्रत्यय हो। **रोमन्थं वर्त्तयति=रोमन्थायते वृषभः।** यहां रोमन्थ-शब्द से। तपश्चरति=तपस्यति। और कर्मवाची तपस्-शब्द से क्यङ् प्रत्यय हुआ है॥

'हनुचलन इति वक्तव्यम्॥' रोमन्थ-शब्द से थूथर के चलाने में क्यङ्-प्रत्यय हो। प्रयोजन यह है कि 'कीटो रोमन्थं वर्त्तयति' कीड़ों के थूथर नहीं होती, इससे यहां क्यङ् नहीं हुआ॥

'तपसः परस्मैपदं च॥' क्यङ्-प्रत्ययान्त तपस्-शब्द से परस्मैपद हो, क्योंकि क्यङ् के ङित् होते से नित्य आत्मनेपद प्राप्त है, उस का निषेध इस दूसरे वार्त्तिक से हो जावे॥ १५॥

वाष्पोष्मभ्यामुद्वमने[3] ॥ १६ ॥

'कर्मणः' इत्यनुवर्त्तते, क्यङ् च। वाष्पोष्मभ्याम्। ५। २। उद्वमने। ७। १। उद्वमनम्=उद्गीर्णम्। कर्मवाचिभ्यां वाष्पोष्म-शब्दाभ्यामुद्वमनेऽर्थे क्यङ् प्रत्ययो भवति। वाष्पमुद्वमति=वाष्पायते कूपः। ऊष्मायते मनुष्यः॥

उद्वमनमिति किम्। वाष्पं धरति नदी। अत्र क्यङ् मा भूत्॥

---

१. आ०—सू० ५९६॥ चा० श०—"रोमन्थं वर्त्तयति हनुचाले॥" (१।१।३३)

२. अ० ३। पा० १। आ० २॥

३. आ०—सू० ५९९॥ चा० श०—"वाष्पोष्मफेनमुद्वमति॥" (१।१।३४)

वा०—फेनाच्च ॥[1]

फेन-शब्दाच्चोद्गमने क्यङ् स्यात् । फेनमुद्गमति = फेनायते ॥ १६ ॥

उद्गमन = ऊपर को निकलना । ['वाष्प-ऊष्मभ्यां'] वाष्प और ऊष्मवाची शब्दों से ['उद्गमने'] उद्गमन अर्थ में क्यङ् प्रत्यय हो । वाष्पमुद्गमति = वाष्पायते कूपः । ऊष्मायते । यहां वाष्प और ऊष्म-शब्द से क्यङ् होने से आत्मनेपद होता है ॥

उद्गमन-ग्रहण इसलिये है कि[1] 'वाष्पं धरति नदी' यहां क्यङ् न हो ॥

'फेनाच्च ॥' फेन-शब्द से भी उद्गमन अर्थ में क्यङ्-प्रत्यय हो । फेनायते । यहां इस वार्त्तिक से क्यङ् हुआ ॥ १६ ॥

शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे[2] ॥ १७ ॥

क्यङ्नुवर्त्तते, 'कर्मणि' इति च । शब्द-वैर-कलह-अभ्र-कण्व-मेघेभ्यः । ५ । ३ । करणे । ७ । १ । 'शब्द, वैर, कलह, अभ्र, कण्व, मेघ' इत्येतेभ्यः कर्मशब्देभ्यः करणे = करोत्यर्थे क्यङ्-प्रत्ययो भवति । शब्दं करोति = शब्दायते । वैरं करोति = वैरायते । कलहायते । अभ्रायते । कण्वायते । मेघायते । सर्वत्र प्रत्ययार्थः करणम् ॥

'करणे' इति किम् । वैरं त्यजति ॥

'शब्दादिभ्यः' इति किम् । हासं करोति । अत्रोभयत्र क्यङ् न स्यात् ॥

वा०—*अटाट्टाशीकाकोटापोटासोटाप्रुष्टाप्लुष्टाग्रहणम्*[3] ॥[1] [१ ॥]

अटादिभ्योऽपि करोत्यर्थे क्यङ् भवति । अटां करोति = अटायते । अट्टायते । शीकायते । कोटायते । पोटायते । सोटायते । प्रुष्टायते । प्लुष्टायते ॥ १ ॥

सुदिनदुर्दिनाभ्यां च[4] ॥[1] [२ ॥]

सुदिनं करोति = सुदिनायते । दुर्दिनायते ॥ २ ॥

नीहाराच्च ॥[1] ३ ॥

नीहार-शब्दाच्च करोत्यर्थे क्यङ् । नीहारं करोति = नीहारायते ॥ ३ ॥ १७ ॥

---

१. अ० ३ । पा० १ । आ० २ ॥

२. आ०—सू० ६०१ ॥ चा० श०—"शब्दादीन् करोति ॥" (१।१।३६)

३. काशिकाकोशे तु—"०सोटाकष्टाग्रहणं" इति "अट्टाटाशीका०सोटासृष्टाधृष्टापृष्टाग्रहणं" इति वा पाठः ॥

४. जयादित्यः—"सुदिनदुर्दिननीहारेभ्यश्चेति वक्तव्यम् ॥" इति महाभाष्यस्थयोर्द्वयोर्वार्त्तिकयोः स्थान एकं वार्त्तिकं पठति ॥

['शब्द-वैर-कलह-अभ्र-कण्व-मेघेभ्यः'] शब्द, वैर, कलह, अभ्र, कण्व, मेघ कर्मवाची इन शब्दों से ['करणे'] कृ धातु के अर्थ में क्यङ्-प्रत्यय हो। शब्दं करोति = शब्दायते। वैरायते। कलहायते। अभ्रायते। कण्वायते। मेघायते। यहां क्यङ्-प्रत्यय का अर्थ करना है। क्यङ् के ङित् होने से सर्वत्र आत्मनेपद होता है॥

शब्दादि का ग्रहण इसलिये है कि 'हासं करोति' यहां न हो॥

और करण-ग्रहण इसलिये है कि 'वैरं त्यजति' यहां भी क्यङ्-प्रत्यय न हो॥

'अटाट्टा०॥' अटा, अट्टा, शीका, कोटा, पोटा, सोटा, प्रुष्टा, प्लुष्टा, इन शब्दों से कृ धातु के अर्थ में क्यङ्-प्रत्यय हो अटां करोति = अटायते। अट्टायते। शीकायते। कोटायते। पोटायते। सोटायते। प्रुष्टायते। प्लुष्टायते। यहां सूत्र से क्यङ् नहीं पाता था इसलिये वार्त्तिक से विधान किया॥ १॥

'सुदिनदुर्दिनाभ्यां च॥' 'नीहाराच्च॥' सुदिन, दुर्दिन, नीहार, इन शब्दों से भी कृ धातु के अर्थ में क्यङ्-प्रत्यय हो। सुदिनं करोति = सुदिनायते। दुर्दिनायते। नीहारायते। यहां भी अपूर्व विधान किया है [२॥ ३॥]॥ १७॥

सुखादिभ्यः कर्तृवेदनायाम्[1] ॥ १८॥

कर्मग्रहणमनुवर्त्तते, क्यङ् च। सुखादिभ्यः। ५। ३। कर्तृ। ६। १। वेदनायाम्। ७। १। कर्तृ-शब्दे '**सुपां सुलुक्०**[2] ॥' इति षष्ठ्या एकवचनस्य लुक्। तेन 'कर्तुः सम्बन्धीनि सुखादीनि' इति विशेष्यते[3]। कर्तुः सम्बन्धिभ्यः सुखादिकर्मभ्यो वेदनायां सत्यां क्यङ् प्रत्ययो भवति। सुखं वेदयते = सुखायते। दुःखं वेदयते = दुःखायते। स्वकीयं सुखं दुःखं वा वेदयते। यदि कर्तृ-शब्दस्य वेदनया सह समासः स्यात्, तर्हि कर्तृ-ग्रहणमनर्थकं स्यात्। भवन्त्येव सुखादीनि स्वकीयानि परकीयानि च। तत्र वेदनया सह समासे परकीयसुखस्य वेदनायामपि क्यङ् प्राप्नुयात्। सुखं वेदयते प्रसाधको देवदत्तस्य। अत्र देवदत्तस्य सुखेन सह सम्बन्धः, प्रसाधकश्च वेदनायाः कर्त्ता। अत्र क्यङ् मा भूदिति कर्तृ-ग्रहणस्य प्रयोजनम्॥

'वेदनायाम्' इति किम्। सुखं साधयति। अत्र क्यङ् मा भूत्॥

अथ सुखादिगणः—[१] सुख [२] दुःख [३] तृप्त[4] [४] गहन[5]

---

१. आ०—पृ० ६०५॥ चा० श०—"सुखादीनि वेदयते॥" (१।१।३५)

२. ७। १। ३९॥

३. महाभाष्ये—"न कर्तृग्रहणेन वेदनाभिसम्बध्यते। किं तर्हि। सुखादीन्यभिसम्बध्यन्ते। कर्तुर्यानि सुखादीनि।"

४. चन्द्र-वर्धमानौ—तृप्र॥ केषुचित् काशिकाकोशेषु—तीव्र॥ गणरत्ने—"तृप्रं = दुःखम्।" (८। ४४४)

५. चन्द्रो न पठति, बोटलिङ्गश्चान्ते॥

[५] कृच्छ्र[1] [६] अस्र [७] आस्र[2] [८] अलीक [९] प्रतीप[3] [१०] करुण [११] कृपण [१२] सोढ ॥ इति सुखादिगणः ॥ १८ ॥

['कर्तृ'] कर्त्ता के सम्बन्धी जो ['सुखादिभ्यः'] सुखादि कर्मवाची शब्द, उनसे ['वेदनायाम्'] वेदना अर्थात् जानने अर्थ में क्यङ्-प्रत्यय हो। सुखं वेदयते=सुखायते। अपने सुख को जानता है। इस अर्थ में यहां सुख-शब्द से क्यङ् हुआ। इस सूत्र में कर्तृ-शब्द से षष्ठी के एक वचन का लुक् हो गया है अर्थात् वेदना शब्द के साथ समास नहीं। जो वेदना-शब्द के साथ समास हो तो [चाहे] जनाने वाला अपने सुख को जनावे वा दूसरे के सुख को, दोनों के जनाने में क्यङ् प्राप्त हो। और फिर कर्तृ-ग्रहण का भी कुछ प्रयोजन न रहे। इसलिये कर्तृ-शब्द का सुख के साथ सम्बन्ध किया है कि [जहां] जनाने वाला अपने सुख को जनावे, वहीं क्यङ् हो ॥

वेदना-ग्रहण इसलिये है कि 'सुखं साधयति' यहां क्यङ्-प्रत्यय न हो ॥

सुखादि शब्द पूर्व संस्कृत में यथाक्रम सब लिख दिये हैं ॥ १८ ॥

नमोवरिवश्चित्रङः क्यच् ॥[4] १९ ॥

['करणे' इत्यनुवर्त्तते।] नमोवरिवश्चित्रङः। ५। १। क्यच् । १। १। क्यङ्नुवृत्तौ सत्यां क्यच् परस्मैपदार्थम् ॥

वा०—नमसः पूजायाम् । वरिवसः परिचर्यायाम् । चित्रङ आश्चर्ये ॥[5]

पूजा=सत्कारः। परिचर्या=सेवनम् । पूजायां वर्त्तमानान्नमस्-शब्दात्, परिचर्यायां वर्त्तमानाद् वरिवस्-शब्दाद्, आश्चर्यार्थाच्चित्र-शब्दाच्च क्यच्-प्रत्ययो भवति। नमस्यति देवान्। **'उपपदविभक्तेः कारकविभक्तिर्बलीयसी'[6]** इति चतुर्थी बाधित्वा द्वितीया विभक्तिर्भवति। वरिवस्यति पितरं मातरं वा। सेवां करोति [इत्यर्थः।] चित्रीयते। चित्र-शब्दे ङित्करणं क्यजन्तादात्मनेपदार्थम्। **'अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति[7]।'** इति क्यजन्तादात्मनेपदं भवति ॥ १९ ॥

---

१. अत उत्तरं बोटलिङ्कः—"आश्र (आस्र K.)"

२. चन्द्र-जयादित्य-बोटलिका नैतं शब्दं पठन्ति ॥
गणरत्ने—"अस्रमवास्रम्।" (८। ४४४)

३. चन्द्रः प्रतीप-शब्दं सोढ-शब्दादुत्तरं गणान्ते पठति ॥
बोटलिङ्कः ८-१२ शब्दानां स्थाने—"करुण (करुणा K.), सोढ, प्रतीत (प्रमीप ! K.), शील, हल, माला क्षेपे, कृपण, प्रणय (प्रणाय), दल, कक्ष" इति ॥

४. आ०—सू० ६०६ ॥ चा० श०—"नमस्तपोवरिवसः क्यच् ॥ चित्रङ आश्चर्ये ॥" (१। १। ३७, ३८)

५. अ० ३। पा० १। आ० २ ॥

६. पा०—सू० ८२ ॥ प०—सू० ९४ ॥

७. दृश्यतां पा०—सू० १११ ॥

क्यङ् की अनुवृत्ति चली आती, फिर क्यच्-ग्रहण परस्मैपद के लिये है। नमस् आदि शब्दों के अर्थनिर्देश महाभाष्य में किये हैं। ['नमोवरिवश्चित्रङः'] पूजा अर्थ में नमस्-शब्द से, परिचर्या अर्थात् सेवा में वरिवस्-शब्द से और आश्चर्य अर्थ में चित्र-शब्द से ['क्यच्'] क्यच्-प्रत्यय हो। नमस्यति देवान्। यहां देव-शब्द से उपपद विभक्ति चतुर्थी को बाधके कारक विभक्ति द्वितीया हो जाती है। वरिवस्यति गुरून्। गुरु की सेवा करता है। चित्रीयते। आश्चर्य करता है। यहां चित्र-शब्द के ङित् पढ़ने से क्यजन्त से आत्मनेपद होता है, क्योंकि अवयव में ङित् का चिह्न किया है, वह क्यजन्त समुदाय को आत्मनेपद करता है॥ १९॥

पुच्छभाण्डचीवराण्णिङ्[1] ॥ २० ॥

पुच्छ-भाण्ड-चीवरात्। ५। १। णिङ्। १। १। पुच्छादीनां समाहारद्वन्द्वः॥

वा०—पुच्छादुदसने पर्यसने च। भाण्डात् समाचयने। चीवरादर्जने परिधाने च[2]॥[3]

पुच्छ-शब्दादुदसनपर्यसनयोः, भाण्डात् समाचयने, चीवरादर्जनपरिधानयोश्च णिङ्-प्रत्ययो भवति। पुच्छमुदस्यति पर्यस्यति वा=उत्पुच्छयते, =परिपुच्छयते। भाण्डानि समाचिनोति=सम्भाण्डयते। चीवरमर्जति परिदधाति वा=चीवरयते॥

अत्र णिङो ङित्त्वात् सर्वत्रात्मनेपदं भवति। णकारोऽनुबन्धो णि-ग्रहणेन ग्रहणार्थः॥ २०॥

['पुच्छ-भाण्ड-चीवरात्'] पुच्छ-शब्द से उदसन और पर्यसन अर्थ में, भाण्ड-शब्द से समाचयन में और चीवर-शब्द से अर्जन तथा परिधान अर्थ में ['णिङ्'] णिङ्-प्रत्यय हो। उत्पुच्छयते। सम्भाण्डयते। चीवरयते। यहां णिङ् के ङित् होने से सब प्रयोगों में आत्मनेपद होता है। णकार अनुबन्ध इसलिये किया है कि जहां सामान्य णि का ग्रहण है, वहां इस णिङ् का भी ग्रहण हो जावे॥ २०॥

मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्[4] ॥ २१ ॥

'शब्दवैर० [5]॥' इति सूत्रात् करण-ग्रहणमनुवर्त्तते। मुण्ड-मिश्र-श्लक्ष्ण-लवण-व्रत-वस्त्र-हल-कल-कृत-तूस्तेभ्यः। ५। ३। णिच्। १। १। मुण्डादिभ्यः करोत्यर्थे

---

१. आ०—सू० ६७०॥

२. पाठान्तरे क्रमभेदश्च—"भाण्डात् समाचयने। चीवरादर्जने परिधाने वा। पुच्छादुदसने पर्यसने चेति।"

३. अ० ३। पा० १। आ० २॥ पूर्वसूत्रस्य व्याख्याने॥

४. आ०—सू० ६०८॥

५. ३। १। १७॥

णिच् प्रत्ययो भवति । मुण्डं करोति=मुण्डयति माणवकम् । मिश्रयति गुडम् । श्लक्ष्णयति । लवणयति । व्रतयति । वस्त्रयति । हलि करोति=हलयति । कलि करोति=कलयति । कृतयति । तूस्तयति । मुण्डादयः सर्वे शब्दा अदन्ताः । हलकलाविकारान्तौ ।।

वा०—*हलिकल्योरत्वनिपातनं सन्वद्भावप्रतिषेधार्थम् ॥*[1]

इकारस्य निपातनेनाकारः । तत्रातो लोपे सत्यग्लोपिनौ भवतः । तेन लुङ्लकारे '**सन्वल्लघुनि०** [2]॥' इति सन्वद्भावः प्राप्नोति । स मा भूत् । अजहलत् । अचकलत् । अत्र सन्वदभ्यासस्येत्त्वं न स्यात् ।। २१

पूर्व से करण की अनुवृत्ति चली आती है । ['मुण्ड-मिश्र-श्लक्ष्ण-लवण-व्रत-वस्त्र-हल-कल-कृत-तूस्तेभ्यः'] मुण्ड, मिश्र, श्लक्ष्ण, लवण, व्रत, वस्त्र, हल, कल, कृत, तूस्त, इन शब्दों से कृ धातु के अर्थ में ['णिच्'] णिच्-प्रत्यय हो। 'मुण्डं करोति=मुण्डयति माणवकम्' इत्यादि उदाहरण संस्कृत में लिखे हैं। वैसे ही यहां भी जानना । मुण्ड आदि सब शब्द अकारान्त हैं, परन्तु हलि और कलि इन इकारान्त शब्दों को अकारान्त निपातन करके पढ़ा है । प्रयोजन यह है कि लुङ् लकार में 'अजहलत् । अचकलत्' यहां इकार के होने से सन्वद्भाव पाता है, सो उस का निषेध होने के लिये अकारान्त निपातन किये हैं ॥ २१ ॥

धातोरेकाचो हलादेः क्रियासमभिहारे यङ्[3] ॥ २२ ॥

'**धातोः कर्मणः०**[4]॥' इति सूत्रात् सर्वस्मिन् प्रकरणे वा-ग्रहणमनुवर्त्तते । धातोः । ५ । १ । एकाचः । ५ । १ । हलादेः । ५ । १ । क्रियासमभिहारे । ७ । १ । यङ् । १ । १ । **समभिहरणं=समभिहारः** । सम्-अभि-पूर्वात् हृ-धातोर्भावे घञ् । क्रियायाः समभिहारः=क्रियासमभिहारः, तस्मिन् । एकाचो हलादेर्धातोः क्रियासमभिहारे =क्रियायाः पौनःपुन्ये [भृशार्थे वा] गम्यमाने विकल्पेन यङ् प्रत्ययो भवति । पक्षे एकाज्झलादिधातुभ्योऽपि क्रियासमभिहारे लोड् यथा स्यात् । पुनः पुनः पचति=पापच्यते । पापठ्यते । यायज्यते । पक्षे लोट् । 'पच पच' इत्येवायं पचति । 'पठ पठ' इत्येवायं पठति । ' यज यज' इत्येवायं यजति ।।

'धातोः' इति किम् । सोपसर्गाद् यङ् मा भूत् । प्राटति भृशम् । अत्र प्र-पूर्वकोऽट् हलादिरेकाच्च, तत्र यङ् प्राप्नोति ।।

---

१. अ० ३ । पा० १ । आ० २ ॥
२. ७ । ४ । ९३ ॥
३. आ०—सू० ५२६ ॥ चा० श०—"एकाचो हलादेः क्रियार्थाद् भृशाभीक्ष्ण्ये यङ् ॥" (१ । १ । ४०)
४. ३ । १ । ७ ॥

'एकाचः' इति किम् । जागर्ति भृशम् । अत्र यङ् मा भूत् ।।

'हलादेः' इति किम् । पुनः पुनरीक्षते । अत्रापि यङ् न स्यात् ।।

वा०—सूचिसूत्रिमूत्र्यटच्यर्त्यशूर्णोतीनामुपसङ्ख्यानम्[1] ।।[2] १ ।।

सूच्यादयस्त्रयो धातवोऽनेकाचः, अन्ये चाजादयः । तेभ्यः सूत्रेणाप्राप्तो यङ् विधीयते । सोसूच्यते । सोसूत्र्यते । मोमूत्र्यते । अटाट्यते । अरार्यते । अशाश्यते । प्रोर्णोनूयते । वार्तिकपठितेभ्योऽपि सूच्यादिभ्यो विकल्पेनैव यङ् भवति । पक्षे स्यादेव लोट् ।।

का०—वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनम् ।
आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात् ।।[2] १ ।।

'**ऊर्णुञ् आच्छादने**[3]' इत्यस्य धातोर्णुवद्भावः स्यात् । णु-धातोर्यानि कार्याणि, तान्यस्यापि यथा स्युः । णुरेकाच् हलादिश्च । अयमपि णुवद्भावेनैकाच् हलादिश्च, तस्माद्, यङ् प्रसिध्येत् । न वार्त्तिकेऽस्य ग्रहणं स्यादित्यर्थः । णुवद्भावेन हलादिः, तेनेजादित्वाभावाद् '**इजादेश्च गुरुमतोऽनृच्छः**[4] ।।' इत्याम्-प्रत्ययस्य प्रतिषेधः स्यात् । तत्र वार्तिकेनाम्-प्रत्ययस्य प्रतिषेधः कृतः, तद्वार्त्तिकं न पठितव्यम् । णुरेकाजनुदात्तश्च । अयमपि णुवद्भावेनैकाजनुदात्तश्च । तेनेडुपग्रह '**एकाच उपदेशेऽनुदात्तात्**[5]।।' इतीट्प्रतिषेधो यथा स्यात् ।। २२ ।।

पूर्व से विकल्प की अनुवृत्ति चली आती है । ['धातोरेकाचो हलादेः'] एकाच् हलादि धातुओं से ['क्रियासमभिहारे'] क्रिया के समभिहार अर्थात् वार वार करने [और भृशार्थ] में विकल्प करके ['यङ्'] यङ्-प्रत्यय हो । पक्ष में एकाच् हलादि धातुओं से भी क्रिया के समभिहार में लोट् लकार हो जावे[6] । पुनः पुनः पचति=पापच्यते । पापठ्यते । अत्यन्त पकाना, शीघ्र पकाना, सम्पूर्ण साधनों से पकाना इत्यादि अर्थों में यहां यङ्-प्रत्यय होता है । पक्ष में 'पच पच इत्येवायं पचति' यहां क्रियासमभिहार में लोट् लकार होता है ।।

धातु-ग्रहण इसलिये है कि 'प्राटति भृशम्' यहां सोपसर्ग से यङ् न हो ।।

एकाच् ग्रहण इसलिये है कि 'जागर्त्ति भृशम्' यहाँ बह्वच् जागृ धातु से यङ् न हो ।।

और हलादि-ग्रहण इसलिये है कि 'पुनः पुनरीक्षते' यहां भी यङ्-प्रत्यय न हो ।।

'सूचिसूत्रि० ।।' सूचि, सूत्रि, मूत्रि, अटि, अर्त्ति, अशु, ऊर्णोति, इन धातुओं से भी क्रियासमभिहार में यङ् प्रत्यय हो । 'सोसूच्यते' इत्यादि उदाहरण संस्कृत में लिख दिये हैं ।

---

१. पाठान्तरम्—"श्यूर्णोतीनां ग्रहणं कर्तव्यम् ।" चा० श०—"ऋसूत्रिमूत्रिसूच्यटश्यूर्णुभ्यः ।।" (१ । १ । ४१)
२. अ० ३ । पा० १ । आ० २ ।
३. धा०—अदा० ३० ।
४. ३ । १ । ३६ ।
५. ७ । २ । १० ।
६. ३ । ४ । २ ।

यहां सूचि आदि तीन धातु अनेकाच् तथा अन्य धातु अजादि हैं। इस कारण सूत्र से यङ् नहीं प्राप्त था। इसलिये यह वार्त्तिक पढ़ा है ॥

'वाच्यः० ॥' 'ऊर्णुञ् आच्छादने[1]' इस धातु को णु धातु के तुल्य कार्य हों ऐसा कहना चाहिये। णु धातु एकाच् हलादि है। उस के तुल्य ऊर्णुञ् को भी एकाच् हलादि मानने से यङ्-प्रत्यय हो जाय। अर्थात् वार्त्तिक में इस का पाठ नहीं करना चाहिये। तथा णु धातु हलादि है। उस से लिट् के पर [होते हुए] आम्-प्रत्यय नहीं होता। ऊर्णुञ् को भी हलादि मानने से आम्-प्रत्यय न हो। अर्थात् प्रत्यय के निषेध के लिये जो वार्त्तिक पढ़ा है, उस का भी कुछ प्रयोजन नहीं। और णु धातु उपदेश में एकाच् अनुदात्त है, इस को भी एकाच् अनुदात्त मानके इट् का प्रतिषेध हो जावे। इत्यादि प्रयोजनों के लिये ऊर्णुञ् धातु को णुवद्भाव इस कारिका से किया ॥ २२ ॥

नित्यं कौटिल्ये गतौ[2] ॥ २३ ॥

विकल्प-ग्रहणं निवृत्तम् । नित्यम् । १ । १ । कौटिल्ये । ७ । १ । गतौ ७ । १ । कौटिल्ये=कुटिलतायां सत्यां गत्यर्थधातुभ्यो नित्यं यङ्-प्रत्ययो भवति । कुटिलं व्रजति=वाव्रज्यते । कुटिलं क्रामति=चङ्क्रम्यते । दन्द्रम्यते ॥

'कौटिल्ये' इति किम् । भृशं क्रामति । अत्र क्रियासमभिहारे यङ् न भवति ॥

'गतौ' इति किम् । कौटिल्येन पचति । अत्रापि न स्यात् ॥ २३ ॥

नित्य के होने से विकल्प की निवृत्ति हुई। ['कौटिल्ये'] कुटिलता अर्थ में ['गतौ'] गत्यर्थक धातुओं से ['नित्यम्'] नित्य यङ्-प्रत्यय हो। कुटिलं व्रजति=वाव्रज्यते। यहां व्रज धातु से यङ्-प्रत्यय हुआ है ॥

कौटिल्य-ग्रहण इसलिये है कि 'भृशं क्रामति' यहां क्रियासमभिहार में यङ् न हो ॥

और गति-ग्रहण इसलिये है कि 'कुटिलं करोति' यहां भी कौटिल्य अर्थ में यङ् न हो ॥ २३ ॥

लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्[3] ॥ २४ ॥

नित्य-ग्रहणमनुवर्त्तते । लुप-सद-चर-जप-जभ-दह-दश-गृभ्यः । ५ । ३ । भावगर्हायाम् । ७ । १ । भावस्य=धात्वर्थस्य गर्हा=भावगर्हा, तस्याम् । 'लुप, सद, चर, जप, जभ, दह, दश, गृ' इत्येतेभ्यो धातुभ्यो भावगर्हायां सत्यां यङ् प्रत्ययो

१. धा०—अदा० ३० ॥
२. आ०—सू० ५३२ ॥ चा० श०—"गत्यर्थात् कौटिल्य एव ॥" (१ । १ । ४२)
३. आ०—सू०....॥ चा० श०—(। १ । १ । ४३) "लुपसदचरगृजपजभदहदशो गर्ह्यात् ॥"

भवति । गर्हितं लुम्पति=लोलुप्यते । गर्हितं सीदति=सासद्यते । चञ्चूर्यते । जञ्जप्यते । दन्दह्यते । दन्दश्यते । जेगिल्यते ॥

नित्य-ग्रहणाल्लुपादिभ्यो भावगर्हायामेव यङ् भवति, किन्तु 'भृशं लुम्पति' अत्र क्रियासमभिहारे न भवति ॥

'भावगर्हायाम्' इति किम् । साधु जपति । अत्रापि यङ् मा भूत् ॥ २४ ॥

['लुप-सद-चर-जप-जभ-दह-दश-गृभ्यः'] लुप, सद, चर, जप, जभ, दह, दश, गृ, इन धातुओं से ['भावगर्हायाम्'] भावगर्हा [अर्थात्] धातु के अर्थ की निन्दा में नित्य यङ्-प्रत्यय हो । 'गर्हितं लुम्पति=लोलुप्यते' इत्यादि उदाहरणों में यङ्-प्रत्यय होता है ॥

नित्य-ग्रहण होने से लुप आदि धातुओं से भावगर्हा में ही यङ् होता है, किन्तु 'भृशं लुम्पति' यहां क्रियासमभिहार में न हो ॥

भावगर्हा-ग्रहण इसलिये है कि 'साधु जपति' यहां भी यङ्-प्रत्यय न हो ॥ २४ ॥

सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्[1] ॥२५॥

[सत्याप-पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्ण-चुरादिभ्यः । ५ । ३ । णिच् । १ । १ ।] 'सत्याप, पाश, रूप, वीणा, तूल, श्लोक, सेना, लोम, त्वच, वर्म, वर्ण, चुरादि' [इति [एतेभ्यो णिच् प्रत्ययो भवति । 'सत्याप' इति सत्य शब्दादापुङ् निर्दिश्यते । करणसामान्ये सत्यादिभ्यो णिज् भवति । **सत्यं करोति=सत्यापयति ।** पाशयति । रूपयति । वीणयति । तूलयति । श्लोकयति । सेनयति । लोमयति । त्वचयति । वर्मयति । वर्णयति । चूर्णयति । चुरादिभ्यस्तु स्वार्थे णिज् भवति । चोरयति । चिन्तयति । मन्त्रयति । स्वाभाविकोऽत्र प्रत्ययार्थः । तत्र यस्मात् सत्यादेर्योऽर्थः सम्भवति तस्मात्तस्मिन् णिजुत्पद्यते[2] । यथा—रूपं पश्यति=रूपयति । वीणां वादयति । [=वीणयति] । इत्यादि करोतेः सामान्यधातुत्वाद् भवन्ति ॥

---

१. आ०—सू० ४५६ ॥ चा० श०—"चुरादिभ्यो णिच् ॥" (१ । १ । ४५)

२. अत्र जयादित्यः—"पाशाद् विमोचने । विपाशयति । वीणयोपगायति, उपवीणयति । तूलेनानुकुष्णाति, अनुतूलयति । श्लोकैरुपस्तौति उपश्लोकयति । सेनयाऽभियाति, अभिषेणयति । लोमान्यनुमार्ष्टि, अनुलोमयति । त्वचं गृह्णाति, त्वचयति । अकारान्तत्वच-शब्दः । वर्मणा सन्नह्यति, संवर्मयति । वर्णं गृह्णाति, वर्णयति । चूर्णैरवध्वंसयति, अवचूर्णयति ।"

वा—*णिविधावर्थवेदसत्यानामापुक् च ।।*[1]

सत्य-शब्दादापुङ् निर्दिष्टस्तत्र ['अर्थ, वेद' इति] द्वाभ्यामपि निर्देष्टव्यम् । अर्थापयति । वेदापयति । सत्यापयति । इति विशेषविधानार्थम् ।। २५ ।।

['सत्याप-पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्ण-चुरादिभ्यः'] सत्याप, पाश, रूप, वीणा, तूल, श्लोक, सेना, लोम, त्वच, वर्म, वर्ण, चूर्ण, चुरादि, इन शब्दों से सामान्य कृ धातु के अर्थ में ['णिच्'] णिच् प्रत्यय हो । सत्य-शब्द से आपुक् का आगम निर्देश किया है । सत्यं करोति=सत्यापयति । यहां प्रत्ययार्थ शब्दों के अनुकूल होता है । इसलिये सामान्य अर्थ में होने से जिस शब्द से जिस अर्थ में सम्भव हो, उस से उस अर्थ में होता है । जैसे—रूपं पश्यति [=रूपयति] । यहां 'रूप' का देखना सम्भव है, इसलिये रूप-शब्द से देखने में णिच्-प्रत्यय हुआ । इसी प्रकार सर्वत्र समझ लेना ।।

'णिविधावर्थ० ।।' सत्य शब्द से आपुक् निर्देश किया है, वहां अर्थ और वेद-शब्द से भी हो । अर्थं करोति=अर्थापयति । वेदमुपदिशति=वेदापयति । इस विशेष विधान करने के लिये दो शब्दों से आपुक् विधान किया है ।। २५ ।।

हेतुमति च ॥ २६ ॥

हेतुमति । ७ । १ । च । [अ० ।] हेतुः प्रयोजककर्त्ताऽस्य तत् प्रयोजकत्वं हेतुमत्, तस्मिन् । हेतुमत्यभिधेये धातोर्णिच् प्रत्ययो भवति । कटं कारयति । ओदनं पाचयति । विद्यां पाठयति । ग्रामं गमयति । अत्र प्रेरकत्वं प्रत्ययार्थः ।।

अथ वार्त्तिकानि—

तत्करोतीत्युपसङ्ख्यानम्[2] ।। [१ ।।]

सूत्रयत्याद्यर्थम् । सूत्रं करोति=सूत्रयति । मूत्रयति[3] ।।

इह 'व्याकरणस्य सूत्रं करोति=व्याकरणं सूत्रयति' इति वाक्ये षष्ठ्युत्पन्ने[4] प्रत्यये द्वितीया । केनैतदेवं भवति । योऽसौ सूत्रव्याकरणयोरभिसम्बन्धः स उत्पन्ने प्रत्यये निवर्त्तते । अस्ति च करोतेर्व्याकरणेन सामर्थ्यमिति कृत्वा द्वितीया भविष्यति ।।१।।

आख्यानात्कृतस्तदाचष्टे [इति] *कुल्लुक् प्रकृतिप्रत्ययापत्तिः प्रकृतिवच्च कारम् ।।*[5] २ ।।

---

१. अ० ३ । पा० १ । आ० २ ।।
२. महाभाष्येऽतः परं "सूत्रयत्याद्यर्थम्" इत्यपि ।।
३. महाभाष्यकोशेषु न दृश्यते ।।
४. क्वचित् "च" इत्यधिकम् ।।
५. अ० ३ । पा० १ । आ० २ ।।

लोपागमवर्णविकारत्वेनाख्यायते=व्याख्यायत इत्याख्यानं यौगिकम्[1] । आख्यानाद् यौगिकात् कृदन्तात् तदाचष्ट इत्यस्मिन्नर्थे णिच् प्रत्ययो भवति । णिच्युत्पन्ने कृत्प्रत्ययस्य लुक् । यादृश्याः प्रकृतेः कृत्प्रत्ययः कृतस्तादृशी प्रकृतिर्लुकि कृते भवेत् । प्रकृत्यनुकूलानि च कारकाणि भवेयुः । कंसस्य वधः=कंसवधः । कंसवधमाचष्टे=कंसं घातयति । अत्र वध इति हनो वधादेशेनाख्यानं कृदन्तं, तत्र '**हनश्च वधः**[2] ॥' इत्यप्-प्रत्ययः । तद्योगे कंस-शब्दात् कर्मणि षष्ठी । एवं सति कंसवध-शब्दात् णिचि कृतेऽप्-प्रत्यस्य लुक् । लुकि सति वधादेशो हन्प्रकृतित्वमापद्यते । कारकं—कृद्योगे षष्ठी पुनः प्रकृत्यनुकूला द्वितीया भवति । कंसं घातयति । राज्ञ आगमनं=राजागमनम् । राजागमनमाचष्टे=राजानमागमयति । तव शायिकामाचष्टे=त्वां शाययति । त्वां जागरयति । एवमसङ्ख्याताः प्रयोगाः सिध्यन्ति ॥ २ ॥

आख्यानाच्च प्रतिषेधः ॥[3] ३ ॥

आख्यान-शब्दात् णिजेव न भवति । आख्यानमाचष्ट इति वाक्यमेव ॥ ३ ॥

दृश्यर्थायां च प्रवृत्तौ ॥[3] ४ ॥

आचष्ट इति दर्शनार्थाभिधायिनि सति कृदन्तात् णिच्, [कृल्लुक्,] प्रकृतिः स्वरूपमापद्यते, प्रकृतिवच्च कारकं भवति । मृगरमणमाचष्टे=मृगान् रमयति । मृगाणां रमणं=मृगरमणम् । मृगरमणमाचष्टे=पश्यति=मृगान् रमयति । अत्र दर्शनं प्रत्ययार्थः ।

'दृश्यर्थायाम्' इति किमर्थम् । यदा हि ग्रामे मृगरमणमाचष्टे, 'मृगरमणमाचष्टे' इत्येव तदा भवितव्यम्[4] ॥[3]

ग्रामे मृगरमणमाचष्टे=कथयतीति दर्शनार्थाभावात् णिज् न भवति ॥ ४ ॥

आङ्लोपश्च कालात्यन्तसंयोगे मर्यादायाम् ।[1] ५ ॥

---

१. एवमेव चात्र जिनेन्द्रबुद्धिः—"आख्यायत इत्याख्यानम् । यत् किञ्चिदाख्यायते तत् सर्वं राजागमनादिकमपीहाख्यानमभिप्रेतम् । न तु संज्ञाभूतमेव कंसवधादिकम् । तस्य यो वाचकः शब्दः सोऽप्यभिधानेऽभिधेयोपचारादाख्यानमित्युच्यते ॥"

२. ३ । ३ । ७६ ॥

३. अ० ३ । पा० १ । आ० २ ॥

४. महाभाष्ये तु "तदा भवतीति" ॥

अत्यन्तश्चासौ संयोगः=अत्यन्तसंयोगः । कालेनात्यन्तसंयोगः=कालात्यन्तसंयोगः[1] । मर्य्यादा=परिमाणम्=इयत्ता । कालात्यन्तसंयोगे मर्यादायां कृदन्तात् णिच् प्रत्ययो भवति तदाचष्ट इत्यस्मिन्नर्थे । कृत्प्रत्ययस्य लुक् । प्रकृतिः स्वरूपमापद्यते । प्रकृतिवच्च कारकं भवति । आङ्-शब्दस्य लोपश्च । आरात्रिविवासमाचष्टे=रात्रिं विवासयति । यावद् रात्रिरतिक्रान्ता तावत् कथा कृतेति रात्र्या कालेन सह कथनस्यात्यन्तसंयोगः[2] । रात्रि-शब्दात् पूर्वं य आकारस्तस्य लोपः । विवास-शब्दो घञन्तस्तस्य घञो लुक् । अन्यानि कार्याणि पूर्ववत् ॥ ५ ॥

चित्रीकरणे प्रापि ॥[3] ६ ॥

चित्रीकरणे=आश्चर्यकरणे गम्ययाने प्रापि=तत्प्राप्नोतीत्यर्थे कृदन्तात् णिज् भवति । तस्य कृत्प्रत्ययस्य लुक् । प्रकृतिः स्वरूपमापद्यते । प्रकृतिवच्च कारकं भवतीति । **उज्जयिन्याः** प्रस्थितो **माहिष्मत्यां**[4] सूर्योदगमनं सम्भावयते=सूर्यमुद्गमयति । अत्रोज्जयिनी काचिन्नगरी तस्याः प्रस्थानं माहिष्मत्यां सूर्योदयस्य प्रापणमित्यधिकगमनमाश्चर्यकरणम् । सम्भावयते=सम्प्राप्नोति । **'भू प्राप्तावात्मनेपदी'**[5] इत्यस्मात् प्राप्त्यर्थे णिज्, आत्मनेपदं च । अन्यत् पूर्ववत् ॥ ६ ॥

नक्षत्रयोगे ज्ञि ॥[3] ७ ॥

नक्षत्रयोगे गम्यमाने तज्जानातीत्यस्मिन्नर्थे कृदन्तात् णिज् वक्तव्यः । तस्य कृत्प्रत्ययस्य लुक् । प्रकृतिः स्वरूपमापद्यते । प्रकृतिवच्च कारकं भवति । पुष्ययोगं जानाति=पुष्येण योजयति । मघाभिर्योजयति । अत्र नक्षत्रेण सह चन्द्रमसो योगः । पुष्येण सह चन्द्रमसो योगस्तं जानातीत्यर्थः ॥ [७ ॥] २६ ॥

['हेतुमति'] हेतुमान् अर्थात् प्रेरणा करने अर्थ में धातुमात्र से णिच् प्रत्यय हो । कटं कारयति । विद्यां पाठयति । यहां 'प्रेरणा करना' यह णिच्-प्रत्यय का अर्थ है ॥

---

१. अत्र जिनेन्द्रबुद्धिः—"कृत्स्नस्य कालस्य व्याप्तिः कालात्यन्तसंयोगः ।"

२. जिनेन्द्रबुद्धिः—"रात्रेर्विवास इति षष्ठीसमासः । पश्चाद् 'आङ् मर्यादा० ॥' [२ । १ । १३] इत्यव्ययीभावसमासः । रात्रिशब्दश्चेह रात्रिसहचरितासु क्रियासु वर्त्तते । वसिरपि विपूर्वोऽतिक्रमे । तेनायमर्थो भवति । अस्तमयनात् प्रभृति याः प्रवृत्ताः क्रियास्ता यावदतिक्रान्ता रात्रिः साकल्येन कथयतीति ।"

३. अ० ३ । पा० १ । आ० २ ॥

४. पुरा हैहयानां राजधानी माहिष्मतीति विख्याताऽधुना मानधातेति क्षुद्रो ग्रामः । अयं नर्मदानद्या दक्षिणतीर उज्जयिन्याश्चत्वारिंशत्क्रोशाध्वना विच्छिन्नः ॥

५. धा०—चुरा० ३०० ॥

इस सूत्र पर वार्त्तिक बहुत हैं। उन का अर्थ किया जाता है—

'तत्करो० ॥' कृ-धातु का कर्मवाची जो शब्द है, उससे कृ-धातु के अर्थ में णिच्-प्रत्यय हो। सूत्रं करोति = सूत्रयति। यहां 'करोति' इस अर्थ में सूत्र-शब्द से णिच्-प्रत्यय हुआ है। 'व्याकरणस्य सूत्रं करोति' यहां व्याकरण-शब्द का सूत्र के साथ सम्बन्ध होने से षष्ठी विभक्ति वाक्य में रहती है और जब णिच्-प्रत्यय आता है तब कृ-धातु का अर्थ णिच् में होने से द्वितीया विभक्ति 'व्याकरणं सूत्रयति' यहां व्याकरण में होती है ॥ १ ॥

'आख्यानात्कृत० ॥' आख्यान अर्थात् यौगिक जो कृदन्त चक्षिङ्-धातु का कर्म शब्द उस से णिच्-प्रत्यय हो और कृत्-संज्ञक प्रत्यय का लुक्। 'आचष्टे' अर्थात् कथन करने अर्थ में। और जिस धातु [से] कृत्-संज्ञक प्रत्यय हुआ हो वह अपने स्वरूप को प्राप्त हो जाय तथा उस धातु का कारक उस के अनुकूल हो जावे। कंसवधमाचष्टे = कंसं घातयति। यहां कंसवध-शब्द कृदन्त है, उससे आख्यान अर्थ में णिच् आया। तब वध-शब्द में हन्-धातु से कृत्-संज्ञक अप्-प्रत्यय हुआ था। उस के योग में कंस-शब्द से षष्ठी विभक्ति आई। सो णिच् के आने से कृत्-संज्ञक अप्-प्रत्यय का लुक्। हन्-धातु को अप्-प्रत्यय के पर [होने से] वध-आदेश हुआ था सो हन् फिर हो गया और उस के योग में कंस शब्द से षष्ठी थी सो द्वितीया हो गई। इस प्रकार कंसवध-शब्द से णिच् करके 'कंसं घातयति' यह प्रयोग सिद्ध हुआ ॥ २ ॥

'आख्याना० ॥' आख्यान-शब्द भी कृदन्त है, उस से उक्त प्रकार णिच् न हो। आख्यानमाचष्टे। यहां पूर्व वार्त्तिक से णिच् पाता था, उस का निषेध इस वार्त्तिक से होने से वाक्य बना रहा ॥ ३ ॥

'दृश्यर्थायां० ॥' दर्शन अर्थ में आङ्-पूर्वक जो चक्षिङ्-धातु उस का कर्म जो कृदन्त-शब्द उससे दर्शन अर्थ में णि[च्]-प्रत्यय, कृत्-संज्ञक प्रत्यय का लुक्, जिस धातु से कृत्-संज्ञक प्रत्यय किया वह अपने स्वरूप को प्राप्त और उस के अनुकूल कारक भी हो। 'मृगरमणमाचष्टे' यहां मृग कारक और रमण कृदन्त शब्द है, उस से दर्शन अर्थ में णिच्-प्रत्यय होने से रमण में जो रम-धातु से कृत्-संज्ञक ल्युट्-प्रत्यय था उस का लुक् और रम-धातु के अनुकूल मृग-शब्द में द्वितीया विभक्ति होके 'मृगान् रमयति' यह प्रयोग बनता है। दर्शनार्थं चक्षिङ् धातु का ग्रहण इसलिये है कि 'ग्रामे मृगरमणमाचष्टे' यहां णिच्-प्रत्यय न हो, किन्तु वाक्य ही बना रहे ॥ ४ ॥

'आङ्लोपश्च० ॥' क्रिया के साथ मर्यादापूर्वक काल का अत्यन्त संयोग हो तो आङ्-पूर्वक कृदन्त शब्द से कथन करने में णिच्-प्रत्यय, आङ्-उपसर्ग का लोप, कृत्-संज्ञक प्रत्यय का लुक्, प्रकृति = धातु अपने स्वरूप को प्राप्त और धातु के अनुकूल कारक भी हो। आरात्रिविवासमाचष्टे। यहां रात्रि जो नियत काल है उस के साथ कथन क्रिया का अत्यन्त संयोग है। विवास-शब्द कृदन्त है, उस से णिच्-प्रत्यय हुआ। रात्रि-शब्द के पूर्व जो आकार है उस का लोप, कृत्-संज्ञक घञ्-प्रत्यय का लुक्, वि-पूर्व वस-धातु से घञ् हुआ था वह अपने स्वरूप को प्राप्त और उस के अनुकूल होने से 'रात्रि विवासयति' यह प्रयोग बनता है ॥ ५ ॥

'चित्रीकरणे० ॥' आश्चर्य दिखाने में प्राप्ति होने अर्थ में प्राप्ति का कर्म जो कृदन्त-शब्द उस से णिच्, कृत्-संज्ञक प्रत्यय का लुक्, धातु अपने स्वरूप को प्राप्त और धातु के अनुकूल कारक भी हो। उज्जयिन्याः प्रस्थितो माहिष्मत्यां सूर्योद्गमनं समम्भावयते। उज्जयिनी नगरी से सायंकाल प्रस्थान करके माहिष्मती नगरी में जाके सूर्योदय को प्राप्त होना—यह आश्चर्य दिखाना है। यहां उद्गमन कृदन्त शब्द से सं-पूर्वक भू-धातु के प्राप्त्यर्थ में णिच्, उत्-पूर्वक गम-धातु से कृत्-संज्ञक ल्युट्-प्रत्यय था उस का लुक् और धातु के अनुसार कारक होने से 'सूर्यमुद्गमयति' यह प्रयोग सिद्ध हुआ ॥ ६ ॥

'नक्षत्रयोगे० ॥' नक्षत्र का चन्द्रमा के साथ योग हो तो कृदन्त शब्द से जानने अर्थ में णिच्, कृत्-संज्ञक प्रत्यय का लुक्, धातु अपने स्वरूप को प्राप्त और धातु के तुल्य कारक भी हो। पुष्ययोगं जानाति। यहां कृदन्त योग-शब्द से णिच्, योग-शब्द में युज-धातु से कृत्-संज्ञक जो घञ् था उस का लुक् और युज के अनुकूल करण कारक होने से 'पुष्येण योजयति' यह प्रयोग बनता है ॥ [७ ॥] २६ ॥

कण्ड्वादिभ्यो यक् ॥ २७ ॥

'धातोरेकाचो०'[1] ॥' इति सूत्राद् धातु-ग्रहणमनुवर्त्तते। कण्ड्वादिभ्यः। ५। ३। यक्। १। १। कण्ड्वादयो द्विविधाः—धातवः प्रातिपदिकानि च। तत्र धातोरनुवर्त्तनाद् धातु-संज्ञापक्षे कण्ड्वादिभ्यो यक् प्रत्ययो भवति, प्रातिपदिकसंज्ञापक्षे 'यक्' न भवति। कण्डूयति। कण्डूयते। कण्डू-शब्दः स्वाभाविको दीर्घान्तः। मन्तूयति। वल्गूयति। अत्र 'अकृत्सार्वधातुकयोर्दीर्घः[2] ॥' इति दीर्घत्वम् ॥

का०—धातुप्रकरणाद् धातुः कस्य चासञ्जनादपि।
आह चायमिमं दीर्घं मन्ये धातुर्विभाषितः ॥[3] १ ॥

धातोरनुवर्त्तनात् ज्ञायते कण्ड्वादयो धातव एव। कस्य=ककारस्यासञ्जनाद् यक्-प्रत्यये ककारानुबन्धकरणाच्च ज्ञायते कण्ड्वादयो धातव इति। यदि कण्ड्वादीनां धातु-संज्ञा भूत्वा यक् स्यात्तदा धातोर्विहितस्य यक आर्द्धधातुक-संज्ञा। आर्द्धधातुके सति ककारो गुणवृद्धिप्रतिषेधार्थः स्यात्। यदि च कण्ड्वादिप्रातिपदिकेभ्यो यगुत्पत्तिः स्यात्तर्हि धातोर्विहितस्यैव शेषप्रत्ययस्यार्द्धधातुक-संज्ञाकरणाद् यक आर्द्धधातुक-संज्ञा न भविष्यति। पुनः ककारो व्यर्थः स्यात्। इमं कण्डू-शब्दं[4] दीर्घं चाह, तेन ज्ञायते कण्ड्वादीनि प्रातिपदिकानि। यदि धातव एव पुनर्नित्यं यक् स्यात्। यकि दीर्घत्वं

---

१. ३। १। २२॥
२. ७। ४। २५॥
३, अ० ३। पा० १। आ० ३॥
४. एवमेव 'ह्रणीङ्, महीङ्' इत्यत्रापि दीर्घत्वं दृश्यते॥

भवत्येव । यथा—मन्तूयति । एवमिमानि प्रातिपदिकान्यपि दृश्यन्ते धातवोऽपि ॥

अथ कण्ड्वादिगणः—[१] कण्डूञ् गात्रविघर्षणे [२] मन्तु अपराधे[1] [३] वल्गु पूजामाधुर्ययोः [४] असु उपतापे । असू, असूञ्[2] इत्येके [५, ६] लेट्, लोट्[3] धौत्यें पूर्वभावे स्वप्ने च [७] लेला दीप्तौ [८, ९, १०] इरस्, इरज्, इरञ् ईर्ष्यायाम् [११] दुवस् परिचर्यायाम् [१२] उषस् प्रभातभावे [१३] वेद धौत्यें स्वप्ने च [१४] मेधा आशुग्रहणे [१५] कुषुभ क्षेपे[4] [१६, १७, १८, १९] नमस्, मनस्, सनस्[5], मगध परिवेष्टने । नीचदास्य इत्यन्ये [२०, २१] तन्तस्, पम्पस् दुःखे [२२, २३] सुख, दुःख तत्क्रियायाम् [२४, २५, २६, २७] भिक्ष, चरम, अवर[6], सपर पूजायाम् [२८] अरर[7] आराकर्मणि [२९] भिषज् चिकित्सायाम्[8] [३०] भिष्णज् उपसेवायाम् [३१, ३२, ३३] अपर, आर[9], इषुध शरधारणे [३४, ३५] चरण, वरण गतौ [३६] चुरण चौर्ये [३७] तुरण तुरायाम्[10] [३८] भुरण धारणपोषणयोः[11] [३९] गद्गद[12] वाक्स्खलने [४०, ४१, ४२, ४३] एला, केला, खेला, रेख विलासे । इला इत्यन्ये [४४] लेखी स्खलने च । अदन्तोऽयमित्येके [४५] लिट् अल्पकुत्सनयोः [४६] लाट् जीवने [४७] हृणीङ् रोषणे लज्जायां

---

१. गणरत्ने (८ । ४३७)—"मन्तु रोषे वैमनस्ये च । मन्तूञ्-मन्तूयति, मन्तूयत इति चन्द्रः ।"

२. गणरत्ने (८ । ४३७) 'असूङ्' इत्यपि ॥

३. गणरत्ने (८ । ४३७, ४३८) 'भूमौ परिवर्त्तते' इत्ययमप्यर्थः प्रतिपादितः ॥

४. गणरत्ने (८ । ४३९)—"कुसुम्भति स्वदेहाश्रयां परकर्तृकां निरोधक्रियामनुभवतीत्यर्थ इत्यन्ये ॥"

५. 'नमस्, मनस्, सनस्' इत्येतेऽपि मगधशब्दस्य पर्यायाः, प्रसिद्धार्था वेति चिन्तनीयम् । एते गणरत्नेऽपठिताः ॥

६. 'भिक्ष, चरम, अवर' इत्येतेऽपि सपर-शब्दस्य पर्यायाः प्रसिद्धार्था वा भवेयुः । गणरत्नेऽपठिता एते ॥

७. गणरत्ने (८ । ४३८)—"अररेति नाम । आरापर्यायवाचि । अररो यज्ञाङ्गं रणश्चेत्यन्यः ॥"

८. गणरत्ने (८ । ४३७) कुत्सायामित्यपि ॥

९. 'अपर, आर' इतीषुधपर्यायौ प्रसिद्धार्थौ वा भवेताम् ॥

१०. गणरत्ने (८ । ४३७) 'त्वरायाम्, इति ॥

११. गणरत्ने (८ । ४३७) "प्रहरणधारणयोः" इति ॥

१२. गणरत्ने (८ । ४३७)—"अन्ये तु गद्गदङिति पठन्ति ॥"

च [४८] महीङ् पूजायाम् [४९] लेखा श्लाघासादनयोः[1] [५०] दुवस् परिताप[परि] चरणयोः [५१] तिरस् अन्तर्द्धौ [५२] अगद नीरोगत्वे [५३] उरस् बल्ग्वर्थे [५४] तरण गतौ [५५] पयस् प्रसृतौ[2] [५६] सम्भूयस् प्रभूतप्रादुर्भावे [५७, ५८] अम्बर, सम्बर सम्भरणे ॥ आकृतिगणोऽयम् । इति कण्ड्वादिगणः समाप्तिमगात्[3] ॥ २७ ॥

कण्ड्वादि शब्दों की धातु और प्रातिपदिक दोनों संज्ञा होती हैं । जिस पक्ष में धातु-संज्ञा है वहां [कण्ड्वादिभ्यः'] कण्ड्वादिकों से [यक्'] यक्-प्रत्यय हो और प्रातिपदिक पक्ष में नहीं । कण्डूयति । कण्डूयते । यहां कण्डू-शब्द स्वाभाविक दीर्घ, उस में अकार अनुबन्ध के होने से यक् प्रत्ययान्त से उभय पद होते हैं। तथा 'बल्गूयति । मन्तूयति' यहां बल्गू और मन्तु-शब्द को यक्-प्रत्यय में ककार के होने से दीर्घ हो जाता है । और ककार अनुबन्ध का यह भी प्रयोजन है कि कण्डू आदि को गुण वृद्धि भी न हों ॥

'धातुप्रकरणाद० ॥' धातु की अनुवृत्ति पूर्व से चली आती है, इससे यह सिद्ध हुआ कि कण्ड्वादि भी धातु हैं, क्योंकि यहां धातु के प्रकरण में प्रातिपदिकों से प्रत्यय नहीं होते । तथा यक्-प्रत्यय में ककार अनुबन्ध के होने से भी मालूम होता है कि कण्ड्वादि धातु हैं, क्योंकि जो प्रातिपदिक होते तो प्रातिपदिकों से पर यक् की आर्द्धधातुक संज्ञा भी न होती । फिर गुण वृद्धि की प्राप्ति और निषेध भी न होता । और धातु से विहित प्रत्यय की आर्द्धधातुक-संज्ञा होती है । वहां गुणवृद्धि-प्राप्ति है, उस के निषेध होने के लिये ककार अनुबन्ध किया है । और कण्डू-शब्द आचार्य ने दीर्घ पढ़ा है । इस से यह सिद्ध होता है कि कण्ड्वादि प्रातिपदिक हैं, क्योंकि जो केवल धातु ही होते तो धातुओं से नित्य यक्-प्रत्यय होता और यक्-प्रत्यय के परे बल्गु, मन्तु के तुल्य दीर्घ हो ही जाता । फिर दीर्घ पढ़ने का यह प्रयोजन है कि प्रातिपदिक पक्ष में यक् न होगा वहां भी दीर्घ बना रहे । इस प्रकार इस कारिका से कण्ड्वादिकों की दो संज्ञा सिद्ध होती हैं ॥

कण्ड्वादि पूर्व अर्थ सहित सब संस्कृत में लिख दिया है ॥ २७ ॥

गुपूधूपविच्छिपणिपनिभ्य आयः ॥ २८ ॥

गुपू-धूप-विच्छि-पणि-पनिभ्यः । ५ । ३ । आयः । १ । १ । **गुपू रक्षणे**[4] । **धूप सन्तापे**[5] । **विच्छ गतौ**[6] । **पण व्यवहारे स्तुतौ च**[7] । **पन च**[8] । एवं गणपठितेभ्यो

१. वर्द्धमानश्च-लेखायति = श्लाघामासादयतीति ॥
२. वर्द्धमानमतेन (८ । ४३८) प्रसूतौ ॥
३. गणान्ते वर्द्धमानः (८ । ४३९)—"पाणिनिशकटाङ्गजदिग्वस्त्रवामनमतेन स्वार्थे कण्ड्वादिभ्यः प्रत्ययः । चन्द्रादीनां मतेन करोत्यर्थे ॥"
४. धा०—भ्वा० ४२२ ॥
५. धा०—भ्वा० ४२३ ॥
६. धा०—तुदा० १२९ ॥
७. धा०—भ्वा० ४६६ ॥
८. धा०—भ्वा० ४६७ ॥

गुपादिधातुभ्य आय-प्रत्ययो भवति । गोपायति । यस्माद् गुप-धातोः स्वार्थे सन् विहितः सोऽन्यः । अयमूकारान्तो गणे पठितः । तस्माद् गुपस्तु नित्यं सन् भवति । अस्मादाय-प्रत्ययान्तादिच्छायां भवति न केवलात् । धूपायति । विच्छायति । पणायति । पनायति । अत्र 'पणी, पनी' द्वौ धातू उपदेश आत्मनेपदिनौ, ताभ्यामायान्ताभ्यामात्मनेपदं नभ वति । अवयवे कृतं लिङ्गं कस्य समुदायस्य विशेषकं भवति योऽवयवो यं समुदायं न जहाति । अत्र तु गुपादय आर्द्धधातुक आयान्तं समुदायं जहति । आर्द्धधातुके यत्र पक्ष आय-प्रत्ययो न भवति तत्रात्मनेपदानुबन्धश्चरितार्थः—'पेणे । पेने' इति ।। २८ ।।

['गुपू-धूप-विच्छि-पणि-पनिभ्यः'] गुपू, धूप, विच्छि, पणि, पनि इन धातुओं से स्वार्थ में ['आयः'] आय-प्रत्यय हो। गोपायति । यहां ऊकारान्त जो गुप-धातु है उस से आय-प्रत्यय होता है और जिस से सन् विधान कर चुके हैं, वह दूसरा गुप है। उस से नित्य सन् ही होता है। इस से तो आय प्रत्यान्त से इच्छार्थ में सन् होगा ।धूपायति । यहां सन्ताप अर्थ में जो धूप उस से आय-प्रत्यय हुआ। विच्छायति । यहां गत्यर्थक विच्छ से। पनायति । पणायति । यहां पण, पन दोनों धातु एकार्थ[1] हैं और उपदेश में दोनों आत्मनेपदी हैं। इन आय-प्रत्ययान्तों से आत्मनेपद इसलिये नहीं होता कि अवयव में जो चिह्न है वह उस समुदाय का साथी होता है कि जो अवयव जिस समुदाय को कभी न छोड़े। गुपादि जो अवयव हैं, ये तो आर्द्धधातुक में आय-प्रत्ययान्त समुदाय से अलग भी हो जाते हैं। आर्द्धधातुक में जहां आय-प्रत्यय नहीं होता वहां आत्मनेपद होने को चरितार्थ है—पेणे । पेने । यहां लिट् लकार में आत्मनेपद ही होता है ।। २८ ।।

ऋतेरीयङ् ।। २९ ।।

ऋतेः । ५ । १ । ईयङ् । १ । १ । ऋतिः सौत्रोधातुः [घृणार्थः], न तु कापि गणे पठितः । ऋत-धातोरीयङ् प्रत्ययो भवति । ऋतीयते । ऋतीयेते । ऋतीयन्ते । ऋतीयाञ्चक्रे । ऋतीयितासे । ऋतीयिष्यते । ऋतीयते । ऋतीयाते । ऋतीयतै । ऋतीयातै । ऋतीयताम् । आर्त्तीयत । ऋतीयेत । ऋतीयिषीष्ट । आर्त्तीयिष्यत । ईयङ्-प्रत्यये ङकार आत्मनेपदार्थः । 'ऋतेश्छङ' इति कृते प्रत्ययादेश्छकारस्येय-आदेशः स्यादेव, पुनरीयङिति गुरु पठितं, तेन ज्ञायते धातोर्विहितानां फ-ढ-ख-छ-घामायन्नादयो न भवन्तीति ।। २९ ।।

ऋत-धातु सौत्र है अर्थात् धातु समुदाय में कहीं इस का पाठ नहीं। ['ऋतेः'] ऋत-धातु से ['ईयङ्'] ईयङ्-प्रत्यय हो । 'ऋतीयते' इत्यादि प्रयोगों में ईयङ्-प्रत्यय में

---

१. अर्थात् स्तुत्यर्थ ।।

ङकार के होने से आत्मनेपद होता है। इस सूत्र में ऋत-धातु से छङ्-प्रत्यय कर देते, प्रत्यय के आदि छकार को ईय-आदेश हो ही जाता। फिर अधिक पढ़ने से यह सिद्ध हुआ कि धातु से विहित प्रत्ययों के आदि फकारादिकों को आयङ् आदि आदेश नहीं होते ॥ २९ ॥

कमेर्णिङ् ॥ ३० ॥

कमेः । ५ । १ । णिङ् । १ । १ । '**कमु कान्तौ**'[1] अस्मान् गणपठितात् स्वार्थे णिङ् प्रत्ययो भवति । कामयते । कामयेते । कामयन्ते । इत्यादि । कमिरप्यात्मनेपदी, तस्मात् कृतावयवलिङ्गादात्मनेपदं न प्राप्नुमतो ङकारोऽनुबन्धः कृतः । णकारो वृद्ध्यर्थः ॥ ३० ॥

['कमेः'] कमु धातु कान्ति अर्थ में है, उस से स्वार्थ में [णिङ्] णिङ्-प्रत्यय हो। कामयते । कामयेते । कामयन्ते । इत्यादि प्रयोग ङकार अनुबन्ध के होने से आत्मनेपद होते हैं। कमु-धातु भी आत्मनेपदी ही है, उस से णि-प्रत्यय करने मे आत्मनेपद नहीं पाता था, इसलिये ङकार, और क को वृद्धि होने के लिये [प्रत्यय में] णकार अनुबन्ध किया है ॥ ३० ॥

आयादय आर्द्धधातुके वा ॥ ३१ ॥

आयादयः । १ । ३ । आर्द्धधातुके । ७ । १ । वा । [अ० ।] 'आर्द्धधातुके' इति विषयसप्तमी । आर्द्धधातुकविषय आयादयः प्रत्यया गुपादिप्रकृतिभ्यो विकल्पेनोत्पद्यन्ते । गोपायाञ्चकार, जुगोप । गोपायिता, गोप्ता । धूपायाञ्चकार, दुधूप । विच्छायाञ्चकार, विविच्छ । पणायाञ्चकार, पेणे । पनायाञ्चकार, पेने । ऋतीयाञ्चक्रे, आनर्त्त । ऋतीयिता, अर्त्तिता । कामयाञ्चक्रे, चकमे । यत्रायादीनामभावस्तत्र गणरूपाणि ॥ ३१ ॥

['आर्द्धधातुके'] आर्द्धधातुक-शब्द में विषयसप्तमी है । आर्द्धधातुक विषय में ['आयादयः'] आयादि प्रत्यय गुप् आदि धातुओं से ['वा'] विकल्प करके हों। पक्ष में गण के प्रयोग बनें। गोपायिता, गोप्ता । ऋतीयिता, अर्त्तिता । कामयिता, कमिता इत्यादि प्रयोगों में आय्, ईयङ्, णिङ् इन तीन प्रत्ययों का विकल्प होता है ॥ ३१ ॥

सनाद्यन्ता धातवः ॥ ३२ ॥

सनाद्यन्ताः । १ । ३ । धातवः । १ । ३ । संज्ञाविधायकं सूत्रमिदम् । सन् आदिर्येषां ते सनादयः । सनादयः प्रत्यया अन्ते येषां ते सनाद्यन्ताः समुदायाः । सनाद्यन्ताः समुदाया धातु-संज्ञा भवन्ति । जुगुप्सते । चिकीर्षति । पुत्रीयति । पुत्रीयिता ।

---

१. धा०—भ्वा० ४७० ॥

पुत्रीयितुम् । पुत्रीयितव्यम् । इत्याद्युदाहरणेषु धातुसंज्ञात्वाद् यथायथं तव्यदादयो भवन्ति ॥

सनादय इत्युक्ते तदन्तविधिना[1]ऽन्त-ग्रहणं कस्मान्न भवति । **'सुप्तिङन्तं पदम्[2] ॥'** इत्यत्रान्त-ग्रहणस्य प्रयोजनमुक्तम् । **'अन्यत्र सञ्ज्ञादिधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति[2] ॥'** इति परिभाषयाऽत्र तदन्तविधिर्न प्राप्तः । अतः कारणादस्मिन् सूत्रेऽन्त-ग्रहणं कृतम् ॥ ३२ ॥

संज्ञाविधायक यह सूत्र है । ['सनाद्यन्ताः'] सनादिप्रत्ययान्त जो समुदाय हैं, उन की ['धातवः'] धातु-संज्ञा हो । सनादि प्रत्ययों के विधान में 'जुगुप्सते' इत्यादि धातु-संज्ञा के ही उदाहरण देते आये हैं ॥

इस सूत्र में तदन्तविधि होने से सनादि की संज्ञा हो जाती, फिर अन्त-ग्रहण इसलिये है कि प्रथमाध्याय के चतुर्थ पाद में 'सुप्तिङन्तं पदम्[2] ॥' इस सूत्र में अन्त-ग्रहण का प्रयोजन कह चुके हैं कि अन्यत्र प्रत्यय की संज्ञा में तदन्तविधि नहीं होती । इसलिये यहां भी सनादि प्रत्ययों की संज्ञा में तदन्तविधि नहीं हो सकती थी । इसलिये अन्त-ग्रहण है ॥ ३२ ॥

स्यतासी लृलुटोः ॥ ३३ ॥

स्य-तासी । १ । २ । लृ-लुटोः । ७ । २ । **'कर्तरि शप्[3] ॥'** इत्यस्यापवादः । लृ-लुटोः परयोर्धातुमात्रात् स्य-तासी प्रत्ययौ भवतः । **'निरनुबन्धकग्रहणे सानुबन्धकानां ग्रहणं भवति ॥'** इति लृ-ग्रहणेन लृट्-लृङोर्ग्रहणम् । भविष्यति । अभविष्यत् । श्वो भविता । श्वः कर्ता । तासि-प्रत्यये इकारः सकाररक्षणार्थः । 'भवितास्थः' इत्यादिषु दर्शनं यथा स्यात् । अत्र **जयादित्येनोक्तम्—'इदित्करणमनुनासिकलोपप्रतिषेधार्थम् । मन्ता । मङ्क्ता'** । इति । तदेतत् विचारणीयम् । क्ङित्यनुनासिकलोपो विधीयते । तास्-प्रत्यये क्वास्ति क्ङित्त्वं यदनुनासिकलोपः स्यात् । अतस्तत्कथनमवद्यतरम्[4] ॥ ३३ ॥

कर्ता में सार्वधातुक के परे जो शप् विकरण होता है, उस का अपवाद यह सूत्र है । ['लृ-लुटोः'] लृ और लुट् लकार के पर धातुमात्र से यथाक्रम ['स्य-तासी'] स्य और तासि-प्रत्यय हों । अर्थात् लृ के पर स्य और लुट् के परे तासि हो । निरनुबन्धक के ग्रहण में सानुबन्धक का ग्रहण किया जाता है । यहां लृ निरनुबन्धक है, उस से लृट् और लृङ् दोनों का ग्रहण होता है । लृ—भविष्यति । अभविष्यत् । यहां लृट् और लृङ् के परे भू-धातु

---

१. दृश्यतां १ । १ । ७१ ॥
२. १ । ४ । १४ ॥
३. ३ । १ । ६८ ॥
४. विस्तरस्तु जिनेन्द्रबुद्धिकृतौ द्रष्टव्यः । तत्र हि जयादित्यस्य वामनस्य च भिन्नमतत्वं प्रतिपादितम् ॥

से स्य-प्रत्यय और 'श्वो भविता' यहां लुट् के पर भू-धातु से तास्-प्रत्यय होता है। तास्-प्रत्यय में इकार की इत्-संज्ञा इसलिये है कि सकार बच जावे अर्थात् सकार की इत्-संज्ञा न हो। यहां जयादित्य पण्डित ने लिखा है कि इकार की इत्-संज्ञा इसलिये है कि 'मन्ता' इत्यादि उदाहरणों में अनुनासिक का लोप न हो। सो विचारना चाहिये कि कित् ङित् के परे अनुनासिक का लोप होता है, [सो] तास्-प्रत्यय में कित् ङित् कहां है जो अनुनासिक का लोप पावे। इससे उन का कथन केवल मिथ्या है ॥ ३३ ॥

सिब् बहुलं लेटि ॥ ३४ ॥

सिप् । १ । १ । बहुलम् । १ । १ । लेटि । ७ । १ । अप्राप्तविभाषेयम् । अप्राप्तः सिब् विकल्प्यते । **'कर्तरि शप्'**[1] ॥' इत्यस्यैवापवादः । लेटि लकारे परतो धातुमात्राद् बहुलं=विकल्पेन सिप् प्रत्ययो भवति । **जीवाति शरदः शतम्**[2] । अत्र सिम्न भवति । **स देवाँ एह वक्षति**[3] । 'वक्षति' इति वह-धातोर्लेटि सिब्-विकरणस्य रूपम् ॥

वा०—सिब्बहुलं छन्दसि णिद्वक्तव्यः ॥

सविता धर्मं साविषत् । प्र ण आयूंषि तारिषत्[4] ॥[5]

अत्र 'साविषत्' इति **'षू प्रेरणे'**[6] इत्यस्य प्रयोगो णित्त्वाद् वृद्धिः ।

अणितं णितं शास्ति तेन णिद्वदिति विज्ञायते ।

णिद्वदपि बहुलमेव भवति । तेन 'सविषत् तरिषत्' इत्यादयोऽपि प्रयोगा भवन्त्येव । 'तारिषत्' इति तॄ-धातोर्लेटि सिप् ॥ ३४ ॥

इस सूत्र में अप्राप्तविभाषा अर्थात् किसी सूत्र से सिप् प्राप्त नहीं, उस का विकल्प किया है। यह सूत्र, कर्त्ता में जो शप् होता है, उसी का अपवाद भी है। ['लेटि'] लेट् लकार में धातुमात्र से ['बहुलं'] विकल्प करके ['सिप्'] सिप्-प्रत्यय हो। वक्षति। इत्यादि प्रयोगों में सिप् विकल्प करके होता है ॥

'सिब्बहुलं० ॥' वैदिक प्रयोगों में सिप्-प्रत्यय णिद्वत् बहुल करके हो। तारिषत्। तरिषत्। यहां जिस पक्ष में इस वार्त्तिक से सिप्-प्रत्यय णित् होता है, वहां वृद्धि होती है, दूसरे पक्ष में नहीं ॥ ३४ ॥

कास्प्रत्ययादाममन्त्रे लिटि ॥ ३५ ॥

कास्प्रत्ययात् । ५ । १ । आम् । १ । १ । अमन्त्रे । ७ । १ । लिटि । ७ । १ ।

---

१. ३ । १ । ६८ ॥
२. ऋ०—१० । ८५ । ३९ ॥ अन्यत्रापि च ॥
३. ऋ०—१ । १ । २ ॥ अन्यत्र च ॥
४. ऋ०—१ । २५ । १२ ॥
५. अ० ३ । पा० १ । आ० ३ ॥
६. धा०—तुदा० ११५ ॥

अमन्त्रे = लौकिकप्रयोगविषये कास्-धातोः प्रत्ययान्ताच्च धातोराम्-प्रत्ययो भवति लिटि लकारे परतः। '**कासृ** शब्दकुत्सायाम्'[1]—कासाञ्चक्रे। प्रत्ययान्तात्—लोलूयाञ्चक्रे। पोपूयाञ्चक्रे। अत्र यङन्ताभ्यां लोलूय-पोपूय-धातुभ्यामाम्। आमन्ताच्च कृञोऽनुप्रयोग आम्-प्रत्ययवदात्मनेपदं च॥

'अमन्त्रे' इति किम्। **कृष्णो नोनाव**[2]। अत्र नोनूय-यङन्ताद्वेद आम्-प्रत्ययो न स्यात्॥

वा०—कास्यनेकाच इति वक्तव्यम्॥[3] **१॥**

'प्रत्ययाद्' इत्यस्य स्थाने 'अनेकाचः' इति कर्तव्यम्। तेन—चुलुम्पाञ्चकार। दरिद्राञ्चकार। चुलुम्पाद्यप्रत्ययान्तेऽप्याम्-प्रत्ययो यथा स्याद्। इति सूत्रस्य न्यासकारीदं वार्त्तिकम्॥ ३५॥

['**अमन्त्रे**'] अमन्त्र अर्थात् लौकिक प्रयोग विषय में ['**कास्प्रत्ययाद्**'] कास् धातु और प्रत्ययान्त धातुओं से लिट् लकार के परे आम्-प्रत्यय हो। कास् – **कासाञ्चक्रे**। यहां कासृ धातु से आम् हो के आम् से कृञ् का अनुप्रयोग हुआ है। प्रत्ययान्त—**लोलूयाञ्चक्रे**। यहां यङन्त लोलूय धातु से आम् और आमन्त से कृञ् का अनुप्रयोग तथा आम्-प्रत्ययान्त के अनुकूल आत्मनेपद भी हुआ है॥

'कास्यनेकाच०॥' सूत्र में 'प्रत्ययात्' जो कहा है उस के स्थान में 'अनेकाचः' ऐसा कहना चाहिये—कि कास् और अनेकाच् धातुओं से आम्-प्रत्यय हो जिससे 'चुलुम्पाञ्चकार। दरिद्राञ्चकार' [इन प्रयोगों में जो] चुलुम्पादि प्रत्ययान्त नहीं हैं, उन से भी आम् प्रत्यय हो जावे॥

अमन्त्र ग्रहण इसलिये है कि 'कृष्णो नोनाव वृषभो यदीदम्[4]' यहां नोनूय यङन्त धातु से आम्-प्रत्यय प्राप्त है, सो न हो॥ ३५॥

इजादेश्च गुरुमतोऽनृच्छः॥ ३६॥

'आममन्त्रे लिटि' इत्यनुवर्त्तते। इजादेः। ५। १। च। [अ० १] गुरुमतः। ५। १। अनृच्छः। ५। १। इच्-प्रत्याहार आदिर्यस्य सः। गुरुर्वर्णो विद्यतेऽस्मिन् स गुरुमान् तस्मात्। गुरुमत इजादेर्धातोरमन्त्रे लिटि परत आम्-प्रत्ययो भवति, अनृच्छः = ऋच्छ-धातुं वर्जयित्वा। इन्दाञ्चकार। ईहाञ्चक्रे। अत्र '**इदि परमैश्वर्ये**[5]। **ईह चेष्टायाम्**[6]' इत्येताभ्यामाम्-प्रत्ययः॥

---

१. धा०—भ्वा ६५४॥
२. ऋ०—१। ७९। २॥
३. अ० ३। पा० १। आ० ३॥
४. ऋ०—१। ७९। २॥
५. धा०—भ्वा० ६४॥
६. धा०—भ्वा० ६६३॥

'इजादेः' इति किम् । मामन्थ ।।

'गुरुमतः' इति किम् । इयजाहम् ।।

'अनृच्छः' इति किम् । आनर्च्छ ।।

'अमन्त्रे' इति किम् । **ईधे** । अत्र सर्वत्र आम् न भवति । 'ईधे' इति वैदिकः प्रयोगः । लोके तु 'इन्धाञ्चकार' 'इति भवत्येवाम् । **'इन्धिभवतिभ्यां च'[1] ।।'** इति क्ङिटः कित्त्वाद् 'ईधे' इत्यनुनासिकलोपः सिद्धो भवति ।।

इयेष । उवोष । अत्र गुणे कृते गुरुमत्त्वादाम् प्राप्नोति । **'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ।।'** इति परिभाषयाऽऽम् न भवति, यं मत्वा गुणः कृतस्तस्मिन् परत आम् स्यादिति सन्निपातः । ऊर्णुञ् धातोराम् न भवतीति वार्त्तिकमत्र न पठितम् । 'प्रोर्णुनाव' इत्याम्प्रतिषेधो **'वाच्य ऊर्णोर्णुवद्भावः०'[2]** इत्युक्तया कारिकया **सिद्ध एवास्ति[2]** ।। ३६ ।।

गुरु अर्थात् दीर्घ [अथवा संयुक्तव्यञ्जन, अनुस्वार अथवा विसर्ग से पूर्ववर्त्ती ह्रस्व] वर्ण जिस में विद्यमान हो उस को गुरुमान् कहते हैं । ['इजादेः'] इजादि जो ['गुरुमतः'] गुरुमान् धातु उस से लौकिक प्रयोग विषय में लिट् के परे आम्-प्रत्यय हो ['अनृच्छः'] ऋच्छ धातु को छोड़ के । इन्दाञ्चकार । ईहाञ्चक्रे । यहां इन्द और ईह धातु से आम्-प्रत्यय होता है ।।

इजादि-ग्रहण इसलिये है कि 'ममन्थ' यहां न हो ।'

गुरुमान्-ग्रहण इसलिये है कि 'इयज । उवप' यहां न हो ।।

अनृच्छ-ग्रहण इसलिये है कि 'आनर्च्छ' यहां न हो ।।

और अमन्त्र-ग्रहण इसलिये है कि 'ईधे' यहां इन्ध धातु से आम्-प्रत्यय न हो । 'ईधे' यह वैदिक प्रयोग है । यहां लिट् के कित् होने से अनुनासिक का लोप हो गया है । लोक में तो **'इन्धाञ्चकार'** यहां आम्-प्रत्यय हो ही जाता है । 'इयेष । उवोष' यहां इष, उष धातु को गुण होने के पीछे गुरुमान् होने से आम्-प्रत्यय प्राप्त है । उस का 'सन्निपात० ।।' इस परिभाषा से निवारण होता है । जिस को मान के गुण हुआ उसी के परे आम् प्राप्त है । यहां सन्निपात है सो लिट् के परे आम् न हुआ । ऊर्णुञ् धातु से जो आम्-प्रत्यय प्राप्त है उस के निषेध के लिये 'वाच्य ऊर्णो० ।।' यह कारिका [३ । १ । २२ में] लिख चुके हैं ।। ३६ ।।

दयायासश्च ।। ३७ ।।

'आममन्त्रे लिटि' इत्यनुवर्त्तते । दयायासः । ५ । १ । दय, अय, आस—एतेषां समाहारद्वन्द्वः । **'दय दानगतिरक्षणहिंसादानेषु[3], अय गतौ[4], आस उपवेशने[5]**—इत्येवं

१. १ । २ । ६ ।।
२. "धातोरेकाचो०" (३ । १ । २२) इत्यस्य सूत्रस्य व्याख्याने ।।
३. धा०—भ्वा० ५१० ।।
४. धा०—भ्वा० ५०३ । ९३५ ।।
५. धा०—अदा० ११ ।।

गणपठितेभ्यो दयादिधातुभ्योऽमन्त्रे लिटि परत आम्-प्रत्ययो भवति। दयाञ्चक्रे। निलयाञ्चक्रे। अत्र **'उपसर्गस्यायतौ[1] ॥'** इति निर्-उपसर्गस्य रेफस्य लत्वम्। आसाञ्चक्रे। अमन्त्र इति किम्-देये। आये। आसे। अत्राम् प्रत्ययो न स्यात् ॥ ३७ ॥

['दयायासः'] दय, अय, आस इन धातुओं से लौकिक प्रयोगों में लिट् के परे आम्-प्रत्यय हो। दयाञ्चक्रे। दय धातु दानादि अर्थों में है, उस से यहां आम्। निलयाञ्चक्रे। यहां गत्यर्थक अय धातु से आम् और अय् धातु के परे निर् उपसर्ग के रेफ को लकार होता है। आसाञ्चक्रे। और यहां उपवेशन अर्थ में आस धातु से आम्-प्रत्यय हुआ है। 'अमन्त्रे' ग्रहण इसलिये है कि 'देये' यहां वेद में 'आम्' न हो ॥ ३७ ॥

उषविदजागृभ्योऽन्यतरस्याम् ॥ ३८ ॥

अप्राप्तविभाषेयम्। उषादिभ्योऽप्राप्त आम् विकल्प्यते। 'आममन्त्रे लिटि' इत्यनुवर्त्तते। उष-विद-जागृभ्यः। ५। ३। अन्यतरस्याम्। **'उष दाहे[2]। विद ज्ञाने[3]। जागृ निद्राक्षये[4]'** इत्येवं गणपठितेभ्य उषविदजागृभ्योऽमन्त्रे लिटि परतो विकल्पेनाऽऽम्-प्रत्ययो भवति। ओषाञ्चकार, उवोष। विदाञ्चकार, विवेद। जागरांचकार, जजागार। उष-जागरोरुभयत्र गुणो भवति ॥

वा—*विदेराम् कित्*[5] ॥

विद-धातोः पर आम्-प्रत्ययः किद्वदिति वार्तिकेनाम्-प्रत्ययसंनियोगे विदधातोर्गुणो न भवति ॥ ३८ ॥

इस सूत्र में अप्राप्तविभाषा अर्थात् उषादि धातुओं से आम् प्रत्यय प्राप्त नहीं, उस का विकल्प किया है। लौकिक प्रयोग विषय में ['उष-विद-जागृभ्यः'] उष, विद, जागृ इन धातुओं से लिट् लकार के परे ['अन्यतरस्याम्'] विकल्प करके आम्-प्रत्यय हो। ओषाञ्चक्रे। उवोष। यहां [उष] धातु से। विदाञ्चकार। विवेद। यहां विद से। और 'जागराञ्चकार। जजागार' यहां जागृ धातु से आम्-प्रत्यय विकल्प करके होने से दो-दो प्रयोग बनते हैं। उष और जागृ धातु को दोनों प्रयोगों में गुण हो जाता है ॥

'विदेराम् कित् ॥' विद धातु से पर आम्-प्रत्यय कित् हो। इस वार्त्तिक से आम्-प्रत्यय के कित् होने से एक पक्ष में आम्-प्रत्यय के परे विद धातु को गुण नहीं होता ॥ ३८ ॥

भीह्रीभृहुवां श्लुवच्च ॥ ३९ ॥

पूर्वसूत्रादन्यतरस्यां-ग्रहणमनुवर्त्तते। अत्राप्यप्राप्तविभाषैव। भी-ह्री-भृ-हुवाम्।

---

१. ८। २। १९ ॥
२. धा०—भ्वा० ७२७ ॥
३. धा०—अदा० ५५ ॥
४. धा०—अदा० ६३ ॥
५. अ० ३। पा० १। आ० ३ ॥

६ । ३ । श्लुवत् । च । '**जिभी भये । ह्री लज्जायाम् । डुभृञ् धारणपोषणयोः**[3] । **हु दानादनयोः**[4]' इत्येवं गणपठितेभ्यो भी-ह्री-भृ-हु-धातुभ्योऽमन्त्रे लिटि परतो विकल्पेनाम्-प्रत्ययो भवति । भ्वादीनां य आम, स च श्लुवद्, अर्थात् श्लौ परतो यानि कार्याणि भवन्ति तान्यामि परतोऽपि स्युः । बिभयाञ्चकार, बिभाय । जिह्रयाञ्चकार, जिह्राय । बिभराञ्चकार, बभार । जुहवाञ्चकार, जुहाव । अत्राम्यक्षे आमः श्लुवत्त्वाद् भ्वादिधातूनां द्वित्वमभ्यासस्य चेत्त्वं भवति ॥ ३९ ॥

इस सूत्र में भी अप्राप्तविभाषा है । लौकिक प्रयोग विषय में ['भी-ह्री-भृ-हुवां'] भी, ह्री, भृ, हु इन धातुओं से लिट् लकार के परे विकल्प करके आम्-प्रत्यय हो और आम् को ['श्लुवत्'] श्लुवत् कार्य अर्थात् श्लु के परे जो कार्य होते हैं वे आम् के परे भी हों । बिभयाञ्चकार । बिभाय । यहां भी धातु से, जिह्रयाञ्चकार । जिह्राय । यहां ह्री धातु से, बिभराञ्चकार । बभार । यहां भृ धातु से, और 'जुहवाञ्चकार । जुहाव' यहां हु धातु से आम्-प्रत्यय हो के सब के दो दो प्रयोग बनते हैं । जिस पक्ष में आम्-प्रत्यय होता है वहां आम्-प्रत्यय के श्लुवत् होने से भी आदि धातुओं को द्वित्वंचन और इन के अभ्यास को इकार आदेश होता है ॥ ३९ ॥

कृञ्चानुप्रयुज्यते लिटि ॥ ४० ॥

कृञ् । १ । १ । च । अनुप्रयुज्यते । लिटि । ७ । १ । अनु पश्चादर्थे । पश्चात् प्रयुज्यते = अनुप्रयुज्यते । 'लिटि' इति वर्तमाने पुनर्लिट्-ग्रहणस्यैतत् प्रयोजनम्—आमः परस्य लेर्लुग् विधीयते तस्य पुनः प्रादुर्भावः स्यात् । 'कृञ्' इति प्रत्याहारग्रहणेन कृ-भू-अस्तीनां ग्रहणं भवति । आमन्तसमुदायात् पश्चात् कृञः प्रत्याहारस्यानुप्रयोगो लिटि परत एव भवति । पाठयाञ्चकार । पाठयाम्बभूव । पाठयामास । अत्रार्द्धधातुकेऽस्-धातोर्भू-आदेशः प्रत्याहारग्रहणसामर्थ्यान्न भवति ॥

भा०—'कृञ्' इति नेदं धातुग्रहणम् । किं तर्हि । प्रत्याहारग्रहणम् । क्व सन्निविष्टानां प्रत्याहारः । 'कृभ्वस्तियोगे' इत्यतः प्रभृत्या कृञो अकारात् ॥[6]

पञ्चमाध्यायस्य चतुर्थपादे '**कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः**[5] ॥' इति

---

१. धा०—जुहो० २ ॥
२. धा०—जुहो० ३ ॥
३. धा०—जुहो० ५ ॥
४. धा०—जुहो० १ ॥
५. अ० ३ । पा० १ । आ० ३ ॥
६. ५ । ४ । ५० ॥

सूत्रादारभ्य **'कृञो द्वितीय०'** ॥[1] इति सूत्रे कृञो अकारपर्यन्तं प्रत्याहारः। तेनामन्त-समुदायात् त्रयाणामनुप्रयोगो भवति ॥ ४० ॥

इस सूत्र में अनु-शब्द पश्चात् अर्थ में है और लिट् की अनुवृत्ति पूर्व से चली आती फिर लिट्-ग्रहण इसलिये है कि आम्- प्रत्यय से परे लिट् का लुक् हो जाता है। उसका अनुप्रयोग के करने में फिर रूपातिदेश हो जावे। आमन्त समुदाय से पर ['कृञ्'] कृञ्-प्रत्याहार का ['अनुप्रयुज्यते'] प्रयोग हो ['लिटि'] लिट् के परे। अध्यापयाञ्चकार। अध्यापयाम्बभूव। अध्यापयामास। यहां आर्द्धधातुक लिट् में कृञ्-प्रत्याहार के ग्रहण होने से अस धातु को भू आदेश नहीं होता ॥

'कृञिति' पञ्चमाध्याय के चतुर्थ पाद में कृ से लेके दूसरे कृञ् के अकार पर्यन्त प्रत्याहार होने से कृ, भू, अस इन तीन धातुओं का यहाँ अनुप्रयोग होता है ॥ ४० ॥

विदांकुर्वन्त्वित्यन्यतरस्याम् ॥ ४१ ॥

विदांकुर्वन्तु । इति । अन्यतरस्याम् । 'अन्यतरस्याम्' इत्यप्राप्तविभाषा । 'विदांकुर्वन्तु' इति सिद्धं रूपं विकल्पेन निपात्यते, पक्षे विदन्तु। अत्र **'विद ज्ञाने'**[2] इत्यस्माद् धातोर्लोटि प्रथमस्य बहुवचन आम्-प्रत्ययः। आमन्ताच्च लोटि परतः कृञोऽनुप्रयोगः। इति शब्दः प्रकारार्थे। 'विदांकुर्वन्तु' इत्येवंप्रकारकं रूपं निपात्यते। अत्र **जयादित्यभट्टोजिदीक्षितादिभिरुक्तम्**—इति-शब्दः प्रदर्शनार्थस्तेन सर्वाणि लोट्-रूपाण्याम्-प्रत्ययान्तादेव विकल्पेनानुप्रयुज्यन्ते—विदांकरोतु, विदांकुरुतात्, विदांकुरुताम् इत्यादीनि । तदेतद्विचारणीयं वक्ष्यमाणसूत्रतः—**'अभ्युत्सादयां०**[3] ॥' अत्र 'अकः' इति लुङि प्रथमैकवचनप्रयोगः। 'अकः' इति चतुर्भ्यः पश्चात् प्रयुज्यते। 'अक्रन्' इति लुङि प्रथमबहुवचन-प्रयोगः। स च 'विदाम्' इत्येकस्मात् परः प्रयुज्यते। सर्वेषामन्ते चेतिकरणः कृतः। तत्र यदीति-शब्दात् सर्वाणि लुङ्रूपाणि भवेयुश्चेद् 'अक्रन्' इत्यस्य पाठोऽनर्थकः स्यात्। कथम्। 'अभ्युत्सादयांप्रजनयांचिकयांरमयांविदामकः [पावयां] क्रियादिति छन्दसि' एवं सूत्रकरणेन लाघवम्। अथ वा 'अभ्युत्सादयादिभिरक्रन्' इति कुर्यात् तेन 'विदामकः, विदामकृताम्, विदामक्रन्' इति सर्वाणि रूपाणि सेत्स्यन्त्येव। पुनराचार्यस्य गौरवकरणेन ज्ञायते यादृशः प्रयोग उपदिष्टस्तादृश एव भविष्यति नान्ये।

---

१. ५ । ४ । ५८ ॥
२ धा०—अदा० ५५ ॥
३. ३ । १ । ४२ ॥

अतो **जयादित्य-भट्टोजिदीक्षितादीनां** कल्पना तुच्छबुद्धिकृतास्तीति विज्ञायते ॥ ४१ ॥

* यहां अप्राप्त विभाषा है ॥ लोट् लकार, प्रथमपुरुष, बहुवचन में 'विदाङ्कुर्वन्तु' विकल्प से निपातन किया है, पक्ष में 'विदन्तु' भी होता है ॥

यहां 'विद ज्ञाने' से लोट् लकार प्रथमपुरुष बहुवचन में 'आम्' प्रत्यय और आमन्त से लोट् परे रहते कृञ् का अनुप्रयोग [तथा 'उ' विकरण इत्यादि] यह सब निपातन से होते हैं। यहां इति[1] शब्द प्रकारवाची है, अर्थात् 'विदाङ्कुर्वन्तु' इस प्रकार का रूप निपातन से होता है ॥

यहां पर 'जयादित्य भट्टोजिदीक्षित' आदि कहते हैं कि 'इति' शब्द इस बात के दर्शाने के लिये है कि विद धातु से लोट् लकार के विदाङ्करोतु । विदाङ्कुरुतात् । विदाङ्कुरुताम् । सब के सब रूप आम् प्रत्ययान्त कृञ् के अनुप्रयोग सहित विकल्प करके होते हैं ॥ अब यहां पर विचारना चाहिये कि 'अभ्युत्सादयां०' इत्यादि अगले सूत्र में 'अकः' यह लुङ् लकार प्रथमपुरुष एकवचन का प्रयोग है, जो 'अभ्युत्सादयादि' चार आमन्तों के पीछे प्रयुक्त हुआ है। तथा लुङ् लकार के प्रथमपुरुष के बहुवचन में जो 'अक्रन्' प्रयोग सिद्ध होता है, उसे 'विदाम्' इस एक पद से परे अनुप्रयुक्त किया गया है., इति शब्द सब के अन्त में है, अब यदि इति शब्द से लुङ् लकार के सब रूप बनें तो 'अक्रन्' इस पद का अनुप्रयोग करना व्यर्थ सिद्ध होता है क्योंकि 'अभ्युत्सादयां प्रजनयां चिकयां रमयां विदामकः पावयां क्रियादिति छन्दसि' ऐसा सूत्र बना देने से काम चल ही जाता, अथवा 'अभ्युत्सादयादिभिरक्रन्' अन्त में पढ़ देते तो भी काम चल ही जाता इससे

---

* विशेष सूचना—मूल हस्त लेख (कोष) में भावार्थ 'कृञ्चानुप्रयुज्यते लिटि' अ० ३ । १ । ४० सूत्र तक ही विद्यमान है, आगे सम्पूर्ण ग्रन्थ में अन्त तक नहीं है अतः भाषा जानने वालों के लाभार्थ हमने ग्रन्थकार के अभिप्राय को लक्ष्य में रख कर मूलसंस्कृतानुसार भावार्थ की पूर्ति कर दी है अन्यथा यह ग्रन्थ अपूर्ण रह जाता ॥

पाठकों को यह भी विदित रहे कि यह कार्य्यभार हमें यहां से आगे दिया गया है ॥

सम्पादक

१. इस सूत्र में जो इति शब्द पढ़ा है उससे शब्द के स्वरूप का बोध होता है और इति शब्द का यही प्रयोजन सर्वत्र आता है। काशिकाकार आदि और भट्टोजिदीक्षित ने लिखा है कि इति शब्द पढ़ने से पुरुष और वचन की विवक्षा नहीं कि लोट् के प्रथम पुरुष बहुवचन का ही प्रयोग निपातन होवे किन्तु लोट् के सब प्रयोगों में निपातन किया है। 'विदाङ्करोतु' आदि भी होते हैं, सो यह व्याख्यान माननीय नहीं है, क्योंकि मूल और महाभाष्य से विरुद्ध है। इससे अगले—'अभ्युत्सादयां०' सूत्र में ऐसे ही आमन्त निपातन किये हैं वहां भी इति शब्द पढ़ा है उसका व्याख्यान इन लोगों ने भी स्वरूप बोधक ही रक्खा है इससे इनका व्याख्यान पूर्वापर विरुद्ध भी है।

[आख्यातिक में पृ० ३५० पर यह टिप्पण है] ॥

'विदामकः । विदामकृताम् । विदामक्रन्' इत्यादि सब रूप सिद्ध हो ही जाते फिर आचार्य के लाघव को छोड़ कर गौरव करने अर्थात् अधिक पाठ करने से यह सिद्ध होता है कि जैसा प्रयोग सूत्र में कहा उतना ही प्रयोग बनेगा अन्य प्रयोग नहीं, अतः इससे यह सिद्ध होता है कि जयादित्य भट्टोजिदीक्षित आदि की यह कल्पना तुच्छबुद्धिकृत ही है ॥ ४१ ॥

अभ्युत्सादयांप्रजनयांचिकयां रमयामकः पावयांक्रियाद् विदामक्रन्निति छन्दसि[1] ॥ ४२ ॥

पूर्वस्माद् 'अन्यतरस्याम्' इत्यनुवर्तते। अभ्युत्सादयां-प्रजनयां-चिकयां-रमयामकः, पावयांक्रियात्, विदामक्रन् इति छन्दसि । ७ । १ । 'अकः' इति चतुर्भिः सहानुप्रयुज्यते ॥ छन्दसि=वैदिकप्रयोगेषु 'अभ्युत्सादयाम्' इत्यादि समुदाया विकल्पेन निपात्यन्ते । अभ्युत्-पूर्वस्य ण्यन्तस्य षदॢ-धातोः, प्र-पूर्वस्य ण्यन्तस्य जन-धातोः, 'चिकयाम्' इति चित्र्-धातोरामि द्विर्वचनमभ्यासात् परस्य चकारस्य कुत्वं च, 'रमयाम्' इति रम-धातोराम्-प्रत्ययः—एतेभ्यश्चतुर्भ्य आमन्तसमुदायेभ्यः 'अकः' इति लुङ्लकारस्य प्रथमैकमचने कृञ् प्रयुज्यते लुङ् च परो भवति । अभ्युत्सादयामक[2]:, पक्षे—अभ्युदसीषदत् । प्रजनयामक[2]:, पक्षे—प्राजीजनत् । चिकयामक[2]:, पक्षे—अचीचयत् । रमयामक[2]:, पक्षे—अरीरमत् । 'पावयांक्रियात्[2]' इति ण्यन्तात् पूञ्-धातोराम्-प्रत्ययस्तदन्तात् 'क्रियात्' इति लिङि प्रथमैकवचने लिङि परतः कृञ्-धातोरनुप्रयोगः । पक्षे—पाव्यात् । 'विदामक्रन्[3]' इति विदधातोराम्, तदन्ताल्लुङि प्रथमस्य बहुवचने कृञोऽनुप्रयोगः । [पक्षे—अवेदिषु ॥]

'छन्दसि' इति किम् । 'अभ्युदसीषदत्' इति प्रयोगो लोके नित्यं यथा स्यात् ॥

इति-करणः पूर्ववत् प्रकारवाची । एवंप्रकारकाणि रूपाणि निपात्यन्ते [इति] ॥ ४२ ॥

यहां पूर्वसूत्र से 'अन्यतरस्याम्' पद का अनुवर्त्तन है ॥ 'अकः' पद का चार आमन्तों के साथ अनुप्रयोग है ।

---

१. आ० सू० ४४५ ॥

२. अनुपलब्धमूलमिदम् ॥

३. तै० बा० १ । ३ । १० । ३ ॥

[छन्दसि] वैदिक प्रयोगों में [अभ्युत्सादयाम्०] इत्यादि विकल्प से निपातन हैं। 'अभि-उत्' पूर्वक ण्यन्त षदॢ धातु से, 'प्र' पूर्वक ण्यन्त जन धातु से, 'चिकयाम्' में—चिञ् धातु से आम् परे द्विर्वचन अभ्यास से परे चकार को कुत्व, 'रमयाम्' में —रमु ण्यन्त धातु से आम् प्रत्यय निपातन हैं, तथा इन चारों आमन्तों से 'अकः' इस लुङ् लकार प्रथमपुरुष के एकवचन में लुङ् परे कृञ् का अनुप्रयोग होता है ॥

अभ्युत्सादयामकः, पक्ष में—अभ्युदसीषदत् । प्रजनयामकः, पक्ष में—प्राजीजनत् । चिकयामकः, पक्ष में—अचीचयत् । रमयामकः, पक्ष में—अरीरमत् । पावयांक्रियात्—इसमें ण्यन्त पूञ् धातु से आम् प्रत्यय, तथा उससे आगे क्रियात् का अनुप्रयोग होता है, जो लिङ् लकार प्रथमपुरुष एक वचन का रूप है । पक्ष में-पाव्यात् । 'विदामक्रन्' इसमें—आम् प्रत्ययान्त विद् धातु से लुङ् लकार प्रथमपुरुष बहुवचन में लुङ् परे कृञ् का अनुप्रयोग और सिच् का लुक् निपातन है । पक्ष में—अवेदिषुः ऐसा प्रयोग होता है ॥

'छन्दसि' पद का ग्रहण इसलिये है कि—'अभ्युदसीषदत्' इत्यादि प्रयोग लोक में नित्य ही हों । इस सूत्र में भी 'इति' शब्द पूर्वसूत्र के समान प्रकारवाची है, इससे सूत्र का अर्थ यह हुआ कि—'अभ्युत्सादयामकः' इस प्रकार के रूप निपातन से होते हैं ॥ ४२ ॥

च्लि लुङि' ॥ ४३ ॥

च्लि । १ । १ । लुङि । ७ । १ । 'च्लि' इति लुप्तविभक्तिको निर्देशः ॥ लुङि लकारे परतो धातुमात्राच्च्लिः प्रत्ययो भवति । च्लिः प्रत्ययः क्वापि न श्रूयते, किन्त्वस्य स्थाने नित्यं सिजादय एव भवन्ति । यदि क्वापि प्रयोगेष्वस्य श्रवणं न भवति पुनः किमर्थमुपदिश्यते—

भा०—च्लिरुत्सर्गः क्रियते सामान्यग्रहणार्थः । क्व सामान्यग्रहणार्थेनार्थः । 'मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो ले[2]:' इति । तत्रावरतस्त्रयाणां[3] ग्रहणं कर्तव्यं स्यात् । चङडोः सिच इति ॥

इकार उच्चारणार्थः । चकारोऽन्तोदात्तस्वरार्थः । अस्योदाहरणानि वक्ष्यमाणसूत्रे दास्यामः ॥ ४३ ॥

---

१. आ० सू० ८७ ॥

२. अ० २ । ४ । ८० ॥

३. कथमवरतस्त्रयाणां ग्रहणमिति तु भाष्य एव द्रष्टव्यं, विस्तराभिया न लिख्यते ॥

इस सूत्र में 'च्लि' यह विना विभक्ति का प्रयोग है ॥

[लुङि] लुङ् लकार परे होने पर धातुमात्र से [च्लि] च्लि प्रत्यय हो ॥

च्लि प्रत्यय का श्रवण कहीं भी नहीं होता, किन्तु इसके स्थान में सिजादि आदेश नित्य ही हो जाते हैं ॥ (प्र०)—जब च्लि प्रत्यय का प्रयोगों में श्रवण ही नहीं होता, तो फिर इसका उपदेश ही क्यों किया ?

(उ०)—च्लि उत्सर्ग है, इसका निर्देश इसलिये किया है कि–'**मन्त्रे घसह्वर०……लेः**' इस सूत्र में 'लि' के ग्रहण से च्लि के आदेशों का भी सामान्य से ग्रहण हो जाय, अन्यथा 'मन्त्रे घस्०' इत्यादि सूत्र में 'चङ्' 'अङ्' 'सिच्' इन तीनों का ग्रहण अवश्य ही करना पड़ता, अतः लाघवार्थ च्लि उत्सर्ग किया जाता है ॥

च्लि में इकार उच्चारण के लिये है, चकार अन्तोदात्त स्वर के अभिप्राय से है। इस सूत्र के उदाहरण अगले सूत्र में देंगे ॥ ४३ ॥

च्लेः सिच्[1] ॥ ४४ ॥

'लुङि' इत्यनुवर्त्तते । च्लेः । ६ । १ । सिच् । १ । १ ॥ **च्लेः स्थाने** सिज्-आदेशो भवति । अकार्षीत् । अहार्षीत् ॥ अत्र 'सिचि वृद्धिः०[2] ॥' इति वृद्धिः सिद्धा भवति । स्थानिवद्भावेनान्तोदात्तत्वं स्यादेव पुनश्चकारोऽनुबन्धो विशेषणार्थः । **'सिचि वृद्धिः०'[2]** अत्र 'सा वृद्धिः' इत्युच्यमाने 'भवन्' अत्र शत्रन्ते परस्मैपदे सौ[3] विभक्तौ वृद्धिर्मा भूत् । इकार उच्चारणार्थः ॥

---

१. आ० सू० ८८ ॥

२. अ० ७ । २ । १ ॥

३ (क) अत्र भाष्यम्—किमर्थश्चकारः ? । विशेषणार्थः । क्व विशेषणार्थेनार्थः । 'सिचिवृद्धिः परस्मैपदेषु' अ० ७ । २ । १ ॥ इति । सौ वृद्धिरितीयत्युच्यमाने—अग्निर्वायुरित्यत्रापि प्रसज्येत । नैतदस्ति प्रयोजनम् । परस्मैपदेष्वित्युच्यते । न चात्र परस्मैपदं पश्यामः । स्वरार्थस्त० ……॥ 'अर्थवत्तु चित्करणसामर्थ्याद्धीट उदात्तत्वम् *' नैष दोषः । अर्थवत्तु सिचश्चित्करणम् । कोऽर्थः । सिचश्चित्करणसामर्थ्याद्धि इट उदात्तत्वं भविष्यति । नाप्राप्ते प्रत्ययस्वरे आगमानुदात्तत्वमारभ्यते, तद्यथैव प्रत्ययस्वरं बाधते एवं स्थानिवद्भावादपि या प्राप्तिस्तामपि बाधेत । 'तस्माच्चित्करणम् * । तस्माच्चकारः कर्त्तव्यः ॥

(ख) अर्थवत्तु सिचश्चित्करणमित्यादि का सारांश–आगम के अनुदात्त होने से तथा सतिशिष्ट स्वर के बलवान् होने से सब स्वरों को बाध कर आगमानुदात्त ही हो जाता है। वह स्थानिवत् की प्राप्ति को भी बाध लेता है। इसी प्रकार 'आदिः सिचोऽन्य-

वा०—*स्पृश-मृश-कृप-तृप-दृपां च्लेः*[1] *सिज्वा*[2] ॥ १ ॥

स्पृशादिभ्यः शलन्तत्वान्नित्यं क्सः प्राप्तः । स्पृशादिभ्यो विकल्पेन सिज्भवति, पक्षे क्सश्च । तथा तृप-दृप-धातुभ्यां पुषादित्वान्नित्यमङ् प्राप्तः, सिज् विकल्पेन, पक्षेऽङेव भवति । सिच्पक्षे विकल्पेनागमशासनाल्लुङि स्पृशादीनां त्रीणि त्रीणि रूपाणि भवन्ति । तृप-दृप-धातुभ्यां रधादित्वादिडपि विकल्प्यते तेन चत्वारि रूपाणि भवन्ति । स्पृश—अस्पृक्षत्, अस्प्राक्षीत्, अस्पार्क्षीत् । मृश—अमृक्षत्, अम्राक्षीत्, अमार्क्षीत् । कृष्—अकृक्षत्, अक्राक्षीत्, अकार्क्षीत् । तृप—अतृपत्, अतर्पीत्, अत्राप्सीत्, अताप्सीत् । दृप—अदृपत्, अदर्पीत्, अद्राप्सोत् अदार्क्षीत् ॥ ४४ ॥

यहां 'लुङि' इस पद का अनुवर्त्तन है ।

[च्लेः] च्लि के स्थान में [सिच्] सिच् आदेश होता है लुङ् परे रहते ॥

जैसे ...अकार्षीत् । अहार्षीत् यहां 'सिचिवृद्धि०' इस सूत्र से वृद्धि हो जाती है ॥

सिच् को स्थानिवद्भाव से अन्तोदात्त हो ही जाता, पुनः सिच् में चकार का अनुबन्ध विशेषण के लिये है जैसे—'सिचि वृद्धि प०' इसमें यदि 'सौ वृद्धिः' ऐसा कहते तो 'भवन्' इस शत्रन्त उदाहरण में परस्मैपद में सु विभक्ति परे रहते वृद्धि हो जाती, सो न हो ॥ 'सिच्' में 'इकार' उच्चारण के लिये है ॥

१—वा०—'स्पृशमृश०···' 'स्पृश' आदि धातुओं के शलन्त होने से नित्य क्स प्राप्त था, अतः वार्त्तिक से विकल्प करके विधान किया है, पक्ष में क्स प्रत्यय भी होता है । तथा 'तृप्' 'दृप्' धातुओं के पुषादि होने से नित्य 'अङ्' प्राप्त था, इस वार्त्तिक से सिच् विकल्प करके होता है पक्ष में 'अङ्' भी होता है । सिच् पक्ष में 'अनुदात्तस्य चर्दुप०' (अ० ६ । १ । ५९) इस सूत्र से विकल्प करके लुङ् में 'अम्' आगम होने से स्पृशादियों के तीन तीन रूप बनते हैं । तृप-दृप् धातुओं के रधादि में होने से 'रधादिभ्यश्च' (अ० ७ । २ । ४५) से इट् का विकल्प होता है अतः इनके चार चार रूप बनते हैं ॥ जैसे—स्पृश्—अस्पृक्षत्, अस्प्राक्षीत्, अस्पार्क्षीत् । मृश्—अमृक्षत्, अम्राक्षीत्, अमार्क्षीत् । कृष्—अकृक्षत्, अक्राक्षीत्, अकार्क्षीत् । तृप्—अतृपत्, अतर्पीत्, अत्राप्सीत्, अताप्सीत् । दृप्—अदृपत्, अदर्पीत्, अद्राप्सीत्, अदार्प्सीत् ॥ ४४ ॥

तरस्याम्' (अ० ६ । १ । १८७) का भी बाधक हो जाता, अतः आगमानुदात्तत्व को बाधने के लिये सिच् करना ही चाहिये, यतः 'मा हि लाविष्टाम्' इत्यादि प्रयोग सिद्ध हो जावें ॥

१. महाभाष्ये तु-'स्पृश० दृपां च्लेः' इत्यस्य स्थाने 'स्पृश दृपः' इति पाठः ॥

२. (क) आ० वा० २८० ॥
(ख) भाष्ये-अ० ३ । पा० १ । आ० ४ ॥

शल इगुपधादनिटः क्सः[1] ॥ ४५ ॥

'च्लेः' इत्युनुवर्त्तते । च्लेः स्थाने सिच् प्राप्तस्तस्यायमपवादः । शलः । ५ । १ । इगुपधात् । ५ । १ । अनिटः । ५ । १ । क्सः । १ । १ ॥ इक् उपधायां यस्य स इगुपधः, तस्मात् । न विद्यत इट् यस्मात् [सोऽनिट्], तस्मात् । **'शषसर् हल्'** इति शल्-प्रत्याहारः, तदन्तात् ॥

अनिट इगुपधाच्छलन्ताद्धातोः परस्य च्लेः स्थाने क्स आदेशो भवति । **'दुह प्रपूरणे'**[2]—अधुक्षत् । अलिक्षत् । अधिक्षत् । अत्र क्सस्य कित्त्वाद् गुणाभावः । हकारस्य ढत्वं, **'षढोः कः सि'**[3] इति कत्वम् । **'आदेश-प्रत्यययोः'**[4] इति षत्वम् । **'एकाचो बशो भष् झषन्तस्य स्ध्वोः'**[5] इति दुह-दिहोर्दकारस्य धत्वं च । तेनेमानि रूपाणि सिध्यन्ति ॥

'शलः' इति किम् । अरौत्सीत् ॥

'इगुपधात्' इति किम् । अधाक्षीत् ॥

'अनिटः' इति किम् । अकोषीत् । अमोषीत् । अत्र सर्वत्र च्लेः स्थाने क्सो न भवति किन्तु सिजेव ॥ ४५ ॥

---

१. आ० सू० २०७ ।
२. अ०-अदा०-४ ।
३. अ० ८ । २ । ४१ ॥
४. अ० ८ । ३ । ५९ ॥
५. अ० ८ । २ । ३७ ॥

'च्लेः' इस पद का अनुवर्त्तन है । च्लि के स्थान में सिच् प्राप्त था उसका यह अपवाद है । इक् उपधा में हो जिसके वह = इगुपध, इट् नहीं होता जिससे वह अनिट्, 'शषसर् हल्' इससे शल् प्रत्याहार बनता है, सो शल् है अन्त में जिसके सो शलन्त कहाता है ॥ अनिट् जो इगुपध शलन्त धातु उससे परे च्लि के स्थान में क्स आदेश होता है लुङ् लकार परे हो तो ॥

जैसे—'दुह प्रपूरणे'—अधुक्षत् । अलिक्षत् । अधिक्षत् । यहां 'क्स' के कित् होने से गुण नहीं होता, [हो ढः । अ० ८ । २ । ३१] हकार को ढकार होकर 'षढोः कः सि' से ढकार को ककार हुआ 'आदेशप्रत्यययोः' से मूर्द्धन्यादेश होकर तथा 'एकाचो बशो भष्०' से दुह, दिह, धातुओं के दकार को धकार होकर के रूप सिद्ध होते हैं ॥

'शलः' ग्रहण इसलिये है कि—अरौत्सीत् । 'इगुपधात्' ग्रहण इसलिये है कि—अधाक्षीत् । 'अनिटः' ग्रहण इसलिये किया कि—अकोषीत्, अमोषीत् । इन सब प्रत्युदाहरणों में च्लि के स्थान में क्स नहीं होता किन्तु सिच् ही होता है ॥ ४५ ॥

श्लिष आलिङ्गने[1] ॥ ४६ ॥

[श्लिषः । ५ । १ । आलिङ्गने । ७ । १ ।] श्लिष-धातोः सामान्यार्थे पुषादिपाठादङ् प्राप्तः । [2]नियमार्थमिदमुच्यते—आलिङ्गने क्स एव स्यात् । आलिङ्गने वर्त्तमानात् श्लिष-धातोः परस्य च्लेः स्थाने क्सो भवति । आश्लिक्षद् भार्यां देवदत्तः ॥ ४६ ॥

श्लिष धातु के पुषादि में होने से अङ् प्राप्त था, अतः नियमार्थ यह सूत्र है कि आलिङ्गन अर्थ में क्स ही हो ॥

[श्लिषः] श्लिष् धातु से परे च्लि के स्थान में क्स आदेश होता है । [आलिङ्गने] आलिङ्गन अर्थ में ही लुङ् लकार परे हो तो ॥

जैसे—आश्लिक्षत् भार्य्यां देवदत्तः ।

'आलिङ्गने' ग्रहण इसलिये है कि—समाश्लिषत् ब्राह्मणकुलम् । यहां पुषादि होने से अङ् ही होता है ॥ ४६ ॥

न दृशः[3] ॥ ४७ ॥

पूर्वसूत्रेण क्सः प्राप्तः प्रतिषिध्यते । न । दृशः । ५ । १ । दृश-धातोः परस्य च्लेः स्थाने क्स आदेशो न भवति । क्से प्रतिषिद्धे-- अदर्शत् । अद्राक्षीत् । **'इरितो वा'[4]** इति विकल्पेनाङ् पक्षे सिच् । अङ्पक्षे **'ऋदृशोऽङि गुणः'[5]** इति गुण । सिच्पक्षे **'सृजिदृशोर्झल्यमकिति'[6]** इति नित्यमम्-आगमो भवति ॥ ४७ ॥

यहां पूर्व सूत्र से क्स प्राप्त था उसका प्रतिषेध करते हैं ॥

[दृशः] दृश् धातु से परे च्लि के स्थान में क्स आदेश [न] न हो ॥

जैसे—अदर्शत् । अद्राक्षीत् । यहां 'इरितो वा' से विकल्प करके अङ् होता है, पक्ष में सिच् भी होता है । 'अङ्' पक्ष में—'ऋदृशोऽङि गुणः' से गुण होता है तथा सिच् में 'सृजिदृशोर्झल्यमकिति' से नित्य 'अम्' आगम होता है ॥ ४७ ॥

---

१. आ० सू० ४०६ ।
२. योगविभागाद्भाष्ये नियमोऽयं सिद्धः ॥
३. आ० सू० २७९ ॥
४. अ० ३ । १ । ५७ ॥
५. अ० ७ । ४ । १७ ॥
६. अ० ६ । १ । ५८ ॥

णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्[1] ॥ ४८ ॥

अयमपि सिजपवादः। णि-श्रि-द्रु-स्रुभ्यः। ५। ३। कर्तरि। ७। १। चङ्। १। १। **श्रिञ् सेवायाम्**[2]। **द्रु गतौ**[3]। **स्रु प्रस्रवणे**[4]। ण्यन्तेभ्यः श्रि-द्रु-स्रुभ्यश्च धातुभ्यः कर्तृवाचिनि लुङि परतश्च्लेश्चङ्-आदेशो भवति। णि—अचीकरत्। अपीपचत्। अपीपठत्। श्रि—अशिश्रियत्। [द्रु—] अदुद्रुवत्। [स्रु—] असुस्रुवत्। अत्र **'चङि'**[5] इति द्विर्वचनम्॥

'कर्त्तरि' इति किम्। अपाठि विद्या देवदत्तेन। अत्र कर्मणि चङ् मा भूत्॥

वा०—*णि-श्रि-द्रु-स्रुषु कमेरुपसङ्ख्यानम्*[6] ॥ १ ॥

'कमेर्णिङ्'[7] इति सूत्रेणार्द्धधातुकविषये विकल्पेन णिङ् भवति। यदा णिङ् तदा णि-ग्रहणादेव चङ् भविष्यति। यदा तु णिङ् न भवति तदा च्लेः स्थाने सिच् प्राप्तः। स न स्यात्, चङेव स्यादिति वार्त्तिकप्रयोजनम्। णिङ्-पक्षे 'अचीकमत' अन्यथा 'अचकमत' इति रूपद्वयं भवति॥

का०—*नाकमिष्टसुखं यान्ति सुयुक्तैर्वंडवारथैः।*
अथ पत्काषिणो यान्ति येऽचीकमतभाषिणः॥[8] १ ॥

अत्र श्लेषालङ्कारेण[9] द्वावर्थौ भवतः। अकमिष्ट-भाषिणः पुरुषाः सुयुक्तैर्वंडवारथैः सुखं स्वर्गं न यान्ति। कुतः। 'अकमिष्ट' इत्यशुद्धप्रयोगस्योच्चारणात्। तथा—अचकमत-भाषिणः पुरुषाः सुयुक्तैर्वंडवारथैरिष्टसुखं नाकं स्वर्गं यान्ति प्राप्नुवन्ति। कुतः। वार्त्तिकसिद्धस्य 'अचकमत' इति प्रयोगस्योच्चारणात्। 'अथ' इत्यनन्तरं ये जना अचीकमत-भाषिणस्ते 'पत्काषिणः' पद्भ्यामिष्टसुखं स्वर्गं यान्ति प्राप्नुवन्ति। अत्र सूत्रवार्त्तिकानुसारेण यथार्थप्रयोगज्ञस्य वैयाकरणस्य प्रशंसा, अज्ञस्य च निन्दा भवतीति प्रयोजनाय कारिकोक्ता॥ ४८॥

---

१. आ० सू० १७६॥
२. धा०—भ्वा०—८८४॥
३. धा०—भ्वा०—९२९॥
४. धा०—भ्वा०—९२५। वर्त्तमानधातुपाठेषु 'स्रु गतौ' इत्येष पाठः॥
५. अ० ६। १। ११॥
६. (क) अ० ३। पा० १। आ० ४॥
(ख) आ० वा० १८४॥
७. अ० ३। १। ४॥
८. अ० ३। पा० १। आ० ४॥
९. तल्लक्षणन्तु—
अनेकार्थशब्दविन्यासः श्लेषः॥
द्र० ऋग्वे० भूमिकायामलङ्कारविषये॥

यह भी सिच् का अपवाद है। णयन्त, श्रि, द्रु और स्रु धातुओं से परे च्लि के स्थान में चङ् आदेश हो, कर्तृवाची लुङ् परे हो तो ॥

जैसे—णि-अचीकरत्। अपीपचत्। अपीपठत् ॥ श्रि—अशिश्रियत्। द्रु—अदुद्रुवत् ॥ स्रु—असुस्रुवत् ॥ यहां 'चङि' सूत्र से द्विर्वचन होता है ॥ 'कर्त्तरि' ग्रहण इसलिये है कि—अपाठि विद्या देवदत्तेन, यहां कर्म में चङ् न हो ॥

१–वा०–'णि श्रि–द्रु–स्रुपु कमे०' 'कमेर्णिङ्' इस सूत्र से आर्द्धधातुक विषय में णिङ् विकल्प से होता है। णिङ् पक्ष में णि ग्रहण से 'चङ्' हो जाता है, जब 'णिङ्' नहीं होता तब च्लि के स्थान में सिच् प्राप्त था, सो न हो परन्तु 'चङ्' ही हो इसलिये यह वार्त्तिक है ॥ णिङ् पक्ष में—अचीकमत, दूसरे पक्ष में—अचकमत ये दो रूप बनते हैं ॥

का०—नाकमिष्टसुखं यान्ति०..... ॥ १ ॥

यहां श्लेषालङ्कार से कारिका के दो अर्थ होते हैं। यथा—'अकमिष्ट' पद का प्रयोग करने वाले पुरुष 'अकमिष्ट' इस अशुद्ध प्रयोग का उच्चारण करने के कारण अच्छे सुन्दर घोड़ों से युक्त रथों द्वारा स्वर्ग अर्थात् सुख को प्राप्त नहीं होते हैं। तथा—'अचकमत' पद का प्रयोग करने वाले पुरुष अच्छे अच्छे घोड़ों से युक्त रथों द्वारा स्वर्ग अर्थात् इष्ट सुख को पाते हैं, क्योंकि वे वार्त्तिक से शुद्ध इस 'अचकमत' प्रयोग का उच्चारण करते हैं। 'अथ' यहां अनन्तरवाची है, जो पुरुष 'अचीकमत' प्रयोग करते हैं वे 'पत्काषिणः' पैर घिसाते हुए इष्ट सुख अर्थात् स्वर्ग को प्राप्त करते हैं ॥ जो वैयाकरण सूत्र तथा वार्त्तिक से सिद्ध प्रयोगों का यथायोग्य प्रयोग करता है उसकी प्रशंसा तथा अज्ञानी की निन्दा होती है, इत्यादि प्रयोजन के लिये [अर्थवाद रूप से] यह कारिका है ॥ ४८ ॥

विभाषा धेट्श्व्योः[1] ॥ ४९ ॥

'कर्तरि चङ्' इत्यनुवर्तते। अप्राप्तश्चङ् विकल्प्यतेऽतोऽप्राप्तविभाषेयम्। विभाषा। १। १। धेट्-श्व्योः। ६। २। **'धेट् पाने[2], टुओश्वि गतिवृद्ध्योः[3]'** इत्येवं पठिताभ्यां धेट्-श्वि-धातुभ्यां परस्य च्लेः स्थाने कर्तरि लुङि परतो विकल्पेन चङ्-आदेशो भवति। पक्षे सिजेव। श्वि-धातोः सिच्, पक्षे विकल्पेनाङ् विधीयते। धेट्-धातोर्विकल्पेन सिज्लुग् विधीयते। एवं द्वयोस्त्रीणि त्रीणि रूपाणि भवन्ति। अदधत्, अधात्, अधासीत्। अशिश्वियत्, अश्वत्, अश्वयीत्। अत्र चङ्पक्षे **'चङि[4]'** इति द्विर्वचनम् ॥

---

१. आ० २४८ ॥
२. धा०—भ्वा०—८८९ ॥
३. धा०—भ्वा०—९९५ ॥
४. अ० ६। १। ११ ॥

'कर्तरि' इति किम्। अधायि माता बालेन। अश्वायि ग्रामो देवदत्तेन। अत्र चङ् मा भूत्॥ ४६॥

'कर्त्तरि' तथा 'चङ्' का अनुवर्त्तन है॥ यह सूत्र अप्राप्त विभाषा है क्योंकि यहां अप्राप्त चङ् का विकल्प है॥

[धेट्श्व्योः] धेट् श्वि धातु से परे च्लि के स्थान में [विभाषा] विकल्प करके चङ् होता है कर्तृवाची लुङ् परे हो तो, पक्ष में 'सिच्' भी होता है॥

'श्वि' धातु से सिच्, पक्ष में विकल्प [जृस्तम्भु०···श्विभ्यश्च, अ० ३। १। ५८॥ से अङ् होता है, और धेट् धातु से सिच् लुक् [विभाषा घ्राधेट्० अ० २। ४। ७८] विकल्प से होता है इस प्रकार दोनों के तीन तीन रूप बनते हैं—

जैसे—अदधत्, अधात्, अधासीत्॥ अशिश्वियत्, अश्वत्, अश्वयीत्। चङ् पक्ष में 'चङि' से द्विर्वचन होता है॥

'कर्त्तरि' ग्रहण इसलिये है कि—अधायि माता बालेन। अश्वायि ग्रामो देवदत्तेन। यहां चङ् न हो॥ ४९॥

गुपेश्छन्दसि॥ ५०॥

'विभाषा' इत्यनुवर्तते। गुपेः। ५। १। छन्दसि। ७। १। 'गुपू रक्षणे'[1] इत्यस्माद् धातोर्लुङि विकल्पेनाय-प्रत्ययो भवति। तत्रायाभावे चङ् विकल्प्यते॥ छन्दसि=वेदविषये गुप्-धातोः परस्य च्लेः स्थाने कर्तरि लुङि परतो विकल्पेन चङ्-आदेशो भवति। अजूगुपत्। पक्षे सिजेव—अगोपीत्, अगौप्सीत्, अगोपायीत्। अत्र 'आय, चङ्, इट्' इति विकल्पत्रयेण वेदविषये गुपधातोर्लुङि चत्वारः प्रयोगाः। लोके तु चङ् न भवतीति त्रीण्येव रूपाणि॥ ५०॥

यहां 'विभाषा' पद का अनुवर्त्तन है॥ 'गुपू रक्षणे' धातु से लुङ् में विकल्प से आय प्रत्यय होता है जब आय नहीं होता तब विकल्प से चङ् होता है॥

[छन्दसि] वेद विषय में [गुपेः] गुप धातु से परे च्लि के स्थान में विकल्प से चङ् आदेश होता है कर्तृवाची लुङ् लकार परे हो तो॥

जैसे—अजूगुपत्। सिच् पक्ष में—अगोपीत्, अगौप्सीत्, अगोपायीत्॥ वेद विषय में लुङ् लकार परे गुप् धातु के चार रूप होते हैं, क्योंकि 'आय-चङ्-ईट्' ये तीनों विकल्प से होते हैं परन्तु लोक में चङ् न होने से तीन ही रूप बनते हैं॥ ५०॥

---

१. धा०—स्वा०—३९५॥

नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः[1] ॥ ५१ ॥

ऊनयतीनां ण्यन्तत्वात् पूर्वेण चङ् प्राप्तो निषिध्यते । 'छन्दसि' इत्यनुवर्त्तते । न । ऊनयति-ध्वनयति-एलयति-अर्दयतिभ्यः । ५ । ३ ॥ **ऊन परिहाणे**[2] । **ध्वन शब्दे**[3] । **इल प्रेरणे**[4] । **अर्द गतौ**[5] । छन्दसि = वेदविषय ऊनादिण्यन्तेभ्यो धातुभ्यः परस्य च्लेः स्थाने कर्तरि लुङि परतश्चङ्-आदेशो न भवति । ऊनादयः सर्वे चुरादिस्थाः । 'ऊनयीः[6] । ध्वनयीत्[7] । ऐलयीः[8] । अर्दयीत्[9], इति वेदे । लोके तु भवत्येव चङ्— ओननत्[9] । अदिध्वनत् । ऐलिलत् । आर्दिदत् । अत्राभ्यासस्य सन्वत् कार्यमिकारादेशः ॥ ५१ ॥

यहां 'छन्दसि' पद का अनुवर्त्तन है ॥ ऊनयति आदि धातुओं के ण्यन्त होने से पूर्वसूत्र से चङ् प्राप्त था, सो निषेध करते हैं ॥

छन्दसि = वेद विषय में [ऊनयतिध्वनयत्येलयत्यर्दयतिभ्यः] ऊनयति आदि ण्यन्त धातुओं से परे च्लि के स्थान में चङ् आदेश [न] नहीं होता कर्तृवाची लुङ् परे हो तो ॥

ऊनयति आदि सब चुरादि गण के हैं । जैसे—काममूनयीः । मा त्वामग्निर्ध्वनयीत् । काममैलयीः । मैनमर्दयीत् । लोक में चङ् होने से—औननत् । अदिध्वनत् । ऐलिलत् । आर्दिदत् । यहां उदाहरणों में सन्वद्भाव से अभ्यास को 'ईकार' आदेश होता है ॥ ५१ ॥

अस्यतिवक्तिख्यातिभ्योऽङ्[10] ॥ ५२ ॥

चङ् निवर्त्तते । सिजपवादोऽङ् विधीयते । **असु क्षेपणे**[11] । **वच परिभाषणे**[12] । ब्रूआदेशश्च । **ख्या प्रकथने**[13] । ख्याति-ग्रहणेन चक्षिङ्-आदेशस्य ग्रहणं न भवति ।

---

१. आ० सू० ४६४ ॥

२. धा०—चुरा०—३३९ ॥

३. धा०—चुरा०—३४० ॥

४. धा०—चुरा०—११९ ॥

५. धा०—चुरा०—२८० ॥

६. ऋ०—१ । ५३ । ३० ॥

७. ऋ०—१ । १६२ । १५ ॥

८. अनुपलब्धमूलमिदम् ॥

९. यत्त्वत्र काशिकाकारादय 'औनिनत्' इति रूप- माहुः, तदयुक्तम् । अग्लोपित्वात् सन्वद्भावाभावात् । अद्विर्वचनेऽपि णौ स्थानिवद् भवतीति 'ओः पुयण्ज्यपरे' इति ज्ञापकात् अकारलोपस्य स्थानिवत्त्वाद्द्वितीयैकाचो द्विर्वचनम् ॥

१०. आ० सू० ३१६ ॥

११. धा०—दिवा०—१०१ ॥

१२. धा०—अदा०—५३ ॥

१३. धा०—अदा०—५० ॥

'असिद्धे शस्य यवचनं विभाषा'[1] ॥' इति वार्त्तिकेन ख्याऽऽदेशस्यासिद्धत्वात् ।. अस्यति-वक्ति ख्यातिभ्यः । ५ । ३ । अङ् । १ । १ । अस्यति-वक्ति-ख्यातिभ्यो धातुभ्यः परस्य च्लेः स्थाने कर्त्तरि लुङि अङ्-आदेशो भवति । असु-धातोः पुषादिपाठादङ् सिद्धः, पुनरात्मनेपदार्थं आरम्भः । [पुषादिपाठात् परस्मैपदेष्वङ् भविष्यति ।] निरास्थत । निरास्थेताम् । निरास्थन्त । अत्रोपसर्गाद् विकल्पेन वार्त्तिककृतमात्मनेपदम् । **'अस्यतेस्थुक्'[2]** इत्यङि परतस्थुग्-आगमः । वक्ति—अवोचत् । अवोचताम् । अवोचन् । [ख्याति—] अख्यत् । अख्यताम् । अख्यन् । **'वच उम्'[3]** इत्यङि परतो वच-धातोरुम्-आगमः ॥

'कर्त्तरि' इति किम् । निरासि बाणः शूरेण । अत्र कर्मण्यङ् मा भूत् ॥ ५२ ॥

यहां 'चङ्' की अनुवृत्ति नहीं आती । 'अङ्' सिच् का अपवाद है । ख्याति-ग्रहण से चक्षिङ् के आदेश 'ख्याञ्' का ग्रहण नहीं होता क्योंकि—'असिद्धे शस्य यवचनं विभाषा' इस वार्तिक से जो 'ख्शाञ्' को यकार का विधान किया है वह त्रिपादि होने से सपाद सप्ताध्यायी अर्थात् सवा सात अध्याय के कार्यों में 'पूर्वत्रासिद्धम्' (अ० ८ । २ । १) से असिद्ध हो जाता है, अतः उसका 'ख्या' ऐसा रूप ही नहीं रहता इसलिये उसका यहां ग्रहण नहीं होता ॥

[अस्यति वक्ति ख्यातिभ्यः] असु वच और ख्या धातुओं से परे च्लि के स्थान में [अङ्] अङ् आदेश होता है कर्तृवाची लुङ् परे हो तो ॥

'असु' धातु के पुषादि में होने से 'अङ्' सिद्ध ही था पुनः अङ् का विधान आत्मनेपद के लिये है क्योंकि पुषादियों से 'अङ्' परस्मैपद में होता है । जैसे—निरास्थत, निरास्थेताम् । निरास्थन्त। यहां [उपसर्गादस्यत्यूह्योर्वा वचनम् । अ० १ । ३ । २९] इस वार्तिक द्वारा सोपसर्ग अस्यति से विकल्प करके आत्मनेपद होता है । 'अस्यतेस्थुक्' सूत्र से अङ् परे 'थुक्' का आगम होता है । वक्ति—अवोचत् । अवोचताम् । अवोचन् । वच धातु को 'वच उम्' से अङ् परे उम्' का आगम होता है ॥ ख्याति—अख्यत्, अख्यताम्, अख्यन् ॥

'कर्त्तरि' ग्रहण इसलिये है कि—निरासि बाणः शूरेण । यहां कर्म में अङ् नहीं होता ॥ ५२ ॥

---

१. (क) भाष्ये—अ० २ । पा० ४ । आ० १ ॥ २. अ० ७ । ४ । १७ ॥
(ख) आ० वा०—१५ ॥ ३. अ० ७ । ४ । २० ॥

लिपिसिचिह्वश्च[1] ॥ ५३ ॥

'अङ्' इत्यनुवर्त्तते । योगविभाग उत्तरार्थः । उत्तरसूत्रेऽस्यैवानुवृत्तिः स्यात् ॥ लिपि-सिचि-ह्वः । ५ । १ । [च ।] लिप्यादीनां समाहारद्वन्द्वः ॥ **'लिप उपदेहे'[2], षिच क्षरणे'[3], ह्वेञ् स्पर्धायाम्'[4]** इत्येवं पठितेभ्यो लिप्यादि-धातुभ्यः परस्य च्लेः स्थानेऽङ्-आदेशो भवति कर्तरि लुङि परतः । अलिपत् । असिचत् । अह्वत् ॥

'कर्त्तरि' इति किम् । अलेपि देहली कन्यया । अत्राङ् मा भूत् ॥ ५३ ॥

यहां 'अङ्' पद का अनुवर्त्तन है । योगविभाग उत्तर सूत्र में अनुवृत्ति के लिये है ॥ यहां समाहार द्वन्द्व समास है ॥

[लिपिसिचिह्वः] लिप्, सिच्, ह्वेञ्, इन धातुओं से परे च्लि के स्थान में अङ् आदेश होता है कर्तृवाची लुङ् लकार परे हो तो ॥

जैसे—अलिपत् । असिचत् । अह्वत् ॥

'कर्त्तरि' ग्रहण इसलिये है कि—अलेपि देहली कन्यया । यहां कर्म में अङ् न हो ॥५३॥

आत्मनेपदेष्वन्यतरस्याम्[5] ॥ ५४ ॥

प्राप्तविभाषेयम् । पूर्वेण नित्ये प्राप्ते विभाषाऽऽरभ्यते । लिप्यादयोऽनुवर्त्तन्ते । आत्मनेपदेषु । ७ । ३ । अन्यतरस्याम् ॥ कर्तृवाचिषु लुङ्घात्मनेपदसञ्ज्ञकेषु प्रत्ययेषु परतो लिप्यादिधातुभ्यः परस्य च्लेः स्थाने विकल्पेनाङ्-आदेशो भवति । अलिपत, अलिप्त । असिचत, असिक्त । अह्वत, अह्वास्त । लिप्यादय उभयपदिनस्तेषां विकल्पेन द्वौ द्वौ प्रयोगौ भवतः ॥ ५४ ॥

यह प्राप्तविभाषा है क्योंकि पूर्व सूत्र से अङ् की नित्य प्राप्ति में विकल्प किया है । 'लिपिसिचिह्वः' की अनुवृत्ति आ रही है । लिप्-सिच्-ह्वेञ्, धातुओं से परे च्लि के स्थान में [अन्यतरस्याम्] विकल्प से अङ् आदेश होता है [आत्मनेपदेषु] आत्मनेपद में कर्तृवाची लुङ् लकार के प्रत्यय परे हों तो ॥

जैसे—अलिपत, अलिप्त । असिचत, असिक्त । अह्वत, अह्वास्त ॥ लिप आदि धातु उभयपदी हैं अतः दो दो रूप बनते हैं ॥ ५४ ॥

---

१. आ० सू० २९२ ॥
२. धा०—दिवा०—१४९ ॥
३. धा०—तुदा०—१५० ॥
४. धा०—भ्वा०—९९३ ॥
५. आ० सू० २९३ ॥

पुषादिद्युताद्यॢदितःपरस्मैपदेषु[1] ॥ ५५ ॥

सिजपवाद एव । पुषादि-द्युतादि-ॢदितः । ५ । १ । परस्मैपदेषु । ७ । ३ । पुषादीनां समाहारद्वन्द्वः ॥ पुषादिभ्यो द्युतादिभ्य ॢदिद्भ्यश्च धातुभ्यः परस्य च्लेः स्थाने लुङि कर्तृवाचिपरस्मैपदसञ्ज्ञकेषु प्रत्ययेषु परतोऽङ्-आदेशो भवति । पुषादि—अपुषत् । अशुषत् । अतुषत् । अदुषत् ॥ द्युतादि—अद्युतत् । अश्वितत् । ॢदितः—अगमत् । असदत् ॥ पुषादयो दिवादिस्था गृह्यन्ते न तु भ्वादिस्थाः । यदि भ्वादिस्थानां ग्रहणं स्यात्तर्हि पुषादेः पश्चाद् द्युतादयः सन्ति, पुषादिग्रहणेन द्युतादीनामपि ग्रहणं स्यात्, पुनराचार्येण द्युतादिग्रहणं कृतं तेन ज्ञायते दिवादिस्थानामेव पुषादीनां ग्रहणम् ॥

'परस्मैपदेषु' इति किम् । अद्योतिष्ट । अश्वेतिष्ट । अत्राङ् मा भूत् ॥ ५५ ॥

यह सूत्र सिच् का अपवाद है । यहां समाहार द्वन्द्व समास है ॥

[पुषादिद्युताद्यॢदितः] पुषादि और द्युतादि तथा ॢदित् धातुओं से परे च्लि के स्थान में अङ् आदेश होता है लुङ् लकार के कर्तृवाची [परस्मैपदेषु] परस्मैपदसंज्ञक प्रत्यय परे हों तो ॥

जैसे—पुषादि से—अपुषत्[2]। अशुषत् । अतुषत् । अदुषत् । द्युतादि से—अद्युतत् । अश्वितत् ॥ ॢदितों से—अगमत् । असदत् ॥ यहां पुषादि कहने से दिवादि—अन्तर्गत जो पुषादि हैं उनका ही ग्रहण है, भ्वादि गण वालों का नहीं, क्योंकि यदि भ्वादि गण वाले पुषादि का ग्रहण होता तो पुषादि के अनन्तर द्युतादि धातुपाठ में पढ़े ही हैं उनका ग्रहण हो ही जाता, फिर जो आचार्य ने सूत्र में पुषादि के अनन्तर द्युतादि पढ़ा है उससे ज्ञात होता है कि दिवादिस्थ पुषादि का ही ग्रहण है ॥

'परस्मैपदेषु' ग्रहण इसलिये है कि अद्योतिष्ट । अश्वेतिष्ट । यहां आत्मनेपद में अङ् न हो ॥ ५५ ॥

सर्त्तिशास्त्यर्त्तिभ्यश्च[2] ॥ ५६ ॥

'परस्मैपदेषु' इत्यनुवर्त्तते । सर्त्ति-शास्ति-अर्त्तिभ्यः । ५ । ३ । [च ।] **'सृ गतौ[3]' शासु अनुशिष्टौ[4], ऋ गतौ[5]'** इत्येवंपठितेभ्यो धातुभ्यः परस्य च्लेः

---

१. आ० सू० २१७ ॥
२. आ० सू० २५६ ॥
३. धा०—भ्वा०—९२० ॥
४. धा०—अदा०—६५ ॥
५. धा०—भ्वा०—९२१ ॥

स्थानेऽङ्-आदेशो भवति लुङि परस्मैपदप्रत्ययेषु परतः । असरत् । अशिषत् । आरत् । अत्राङि परतोऽर्त्ति-सर्त्योर्गुणः शास इत्वं च ॥

'परस्मैपदेषु' इति किम् । मा समृत । मा समृषाताम् ॥

अत्र **जयादित्यभट्टोजिदीक्षितादिभिर्ऋ**-धातोः परस्य च्लेः स्थानेऽङ्-आदेश आत्मनेपदेष्वपि कृतस्तस्य खण्डनं प्रथमाध्यायस्य तृतीयपादे **'समो गम्यृच्छि'**[1] इत्यत्र लिखितम् ॥ ५६ ॥

यहां 'परस्मैपदेषु' इस पद का अनुवर्त्तन है ॥ [सर्त्तिशास्त्यर्तिभ्यः] सृ-शासु-ऋ, इन धातुओं से परे च्लि के स्थान में अङ् आदेश होता है लुङ् लकार के कर्तृवाची परस्मैपद प्रत्यय परे हों तो ॥

जैसे—असरत् । अशिषत् । आरत् । यहां अङ् परे रहते 'ऋ' तथा 'सृ' धातु को गुण, और 'शासु' धातु को 'इत्व' हो जाता है ॥

'परस्मैपदेषु' ग्रहण इसलिये है कि—मा समृत, मा समृषाताम् । यहां जयादित्य भट्टोजिदीक्षितादि ने 'ऋ' धातु से परे च्लि के स्थान में 'अङ्' आदेश आत्मनेपद में भी माना है उसका खण्डन प्रथमाध्याय तृतीयपाद के ['समोगम्यृच्छि०' अ० १ । ३ । २९] सूत्र में कर दिया है ॥ ५६ ॥

इरितो वा[2] ॥ ५७ ॥

'परस्मैपदेषु' इत्यनुवर्त्तते । इरितः । ५ । १ । वा । इर् इत्सञ्ज्ञो यस्य, तस्मात् । इरिद्धातोः परस्य च्लेः स्थाने लुङि परस्मैपदेषु परतो विकल्पेनाङ्-आदेशो भवति । रुधिर्—अरुधत् । अरौत्सीत् ॥ छिदिर्—अच्छिदत् । अच्छैत्सीत् ॥ भिदिर्—अभिदत् । अभैत्सीत् ॥

'परस्मैपदेषु' इति किम् । अरुद्ध । अच्छित्त । अभित्त । अत्राङ् मा भूत् ॥ ५७ ॥

यहां 'परस्मैपदेषु' की अनुवृत्ति आ रही है ॥ 'इर्' है इत्संज्ञक जिनका वे 'इरित्' कहाते हैं ॥

[इरितः] इरित् धातुओं से परे च्लि के स्थान में अङ् आदेश [वा] विकल्प से होता है लुङ् लकार के कर्तृवाची परस्मैपद प्रत्यय परे हों तो ॥

---

१. अ० १ । ३ । २९ ॥ २. आ० सू० १३८ ॥

जैसे—उधिर्—अरुधत्, अरौत्सीत्। छिदिर्—अच्छिदत्, अच्छैत्सीत्। भिदिर्—अभिदत्, अभैत्सीत्॥

'परस्मैपदेषु' का ग्रहण इसलिये है कि—अरुद्ध। अच्छित्त। अभित्त। यहां अङ् नहीं होता॥ ५७॥

जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च[1] ॥ ५८ ॥

'परस्मैपदेषु' इत्यनुवर्तते। 'वा' इति च। जॄ-स्तम्भु-म्रुचु-म्लुचु-ग्रुचु-ग्लुचु-ग्लुञ्चुश्विभ्यः। ५। ३। च॥ **'जॄष् वयोहानौ'[2]**, स्तम्भुः सौत्रो धातुः, **म्रुचु-म्लुचु गत्यर्थौ[3]**, **ग्रुचु-ग्लुचु स्तेयकरणे[4]**, **ग्लुञ्चु गत्यर्थः[5]**, **टुओश्वि गतिवृद्ध्योः[6]** एवं पठितेभ्यो ऋादिधातुभ्यः परस्य च्लेः स्थाने विकल्पेन लुङि परस्मैपदेषु परतो-ऽङ्-आदेशो भवति। जॄ—अजरत्। अजारीत्॥ [स्तम्भु—] अस्तभत्। अस्तम्भीत्॥ [म्रुचु—] अम्रुचत्। अम्रोचीत्॥ [म्लुचु—] अम्लुचत्। अम्लोचीत्॥ [ग्रुचु—] अग्रुचत्। अग्रोचीत्॥ [ग्लुचु—] अग्लुचत्। अग्लोचीत् [ग्लुञ्चु—] अग्लुचत्[7]। अग्लुञ्चीत्॥ [टुओश्वि—अश्वत्। अश्वयीत्। अशिश्वियत्।] जॄ-धातोरङ्पक्षे **'ऋदृशोऽङि गुणः[8]'** इति गुणः। स्तम्भि-ग्लुञ्च्योरनुनासिकलोपः। म्रुच्यादीनां च गुणाभावः। अङ् विकल्पत्वात् पक्षे सिजुत्सर्गः॥

'परस्मैपदेषु' इति किम्। अम्रोचि पन्थाः स्वयमेव। अत्र कर्मकर्त्तर्यङ् मा भूत्॥ ५८॥

यहां 'परस्मैपदेषु' पद तथा 'वा' पद का अनुवर्त्तन है॥

[जॄ-स्तम्भु म्रुचु म्लुचु ग्रुचु ग्लुञ्चु श्विभ्यश्च] जॄ, स्तम्भु आदि धातुओं से परे च्लि के स्थान में विकल्प से 'अङ्' आदेश होता है लुङ् लकार के कर्त्तृवाची परस्मैपद प्रत्यय परे हों तो॥

---

१. आ० सू० १५४॥
२. धा०—दिवा०—२२॥
३. धा०—भ्वा०—१९७॥
४. धा०—भ्वा०—१९८॥
५. धा०—भ्वा०—२०२॥
६. धा०—भ्वा०—९९५॥
७. यत्तूभयोरुपादानसामर्थ्याद् ग्लुञ्चेरङि 'न लोपो न भवति न्यग्लुञ्चदिति, कैश्चिदभ्यधायि तद्भाष्यविरोधादनादरणीयम्॥
८. अ० ७। ४। १६॥

जैसे—जॄ—अजरत् । अजारीत् ।। स्तम्भु—अस्तभत्, अस्तम्भीत् ।। स्रुचु—अस्रुचत् । अस्रोचीत् ।। म्लुचु—अम्लुचत् । अम्लोचीत् ।। ग्रुचु—अग्रुचत् । अग्रोचीत् ।। ग्लुचु—अग्लुचत् । अग्लोचीत् ।। ग्लुञ्चु—अग्लुचत् । अग्लुञ्चीत् ।। टुओश्वि—अश्वत्, अश्वयीत्, अशिश्वियत् ।। जॄ—धातु को 'अङ्' परे 'ऋदृशोऽङि गुणः' से गुण होता है । स्तम्भु तथा ग्लुञ्चु के अनुनासिक का लोप ['अनिदितां हल०' अ० ६ । ४ । २४ ।] सूत्र से होता है । स्रुचु आदि धातुओं में अङ् परे गुण नहीं होता, अङ् के विकल्प होने से पक्ष में सिच् भी होता है ।।

यहां 'परस्मैपदेषु' ग्रहण इसलिये है कि—अस्रोचि पन्थाः स्वयमेव । यहां कर्मकर्त्ता में 'अङ्' नहीं होता ।। ५८ ।।

कृमृदृरुहिभ्यश्छन्दसि ।। ५९ ।।

अत्र 'परस्मैपदेषु' इति निवर्त्तते । **'डुकृञ् करणे'[1], मृङ् प्राणत्यागे'[2], दृङ् आदरे'[3], रुह बीजजन्मनि प्रादुर्भावे च'[4]** इत्येवं कृतपाठेभ्यः कृञादिधातुभ्यः परस्य च्लेः स्याने छन्दसि=वेदविषयेऽङ्-आदेशो भवति । अकरत्[5] । अकरत[6] । अमरत[6] । अदरत[6] । आरुहत्[7] । अत्र ऋादीनामङि गुणो रुहेर्गुणाभावश्च ।।

'छन्दसि' इति किम् । अकार्षीत् । [अमृत । अदृत । अरुक्षत्] इत्यादिष्वङ् मा भूत् ।। ५९ ।।

यहां 'परस्मैपद' की निवृत्ति हुई ।। [कृमृदृरुहिभ्यः] कृ, मृ, दृ, रुहि धातुओं से परे च्लि के स्थान में [**छन्दसि**] वेदविषय में 'अङ्' आदेश होता है कर्त्तृवाची लुङ् लकार परे हो तो ।।

जैसे—कृ—अकरत्, अकरत । मृ—अमरत । दृ—अदरत । रुह—आरुहत् । यहां अङ् परे 'कृ' आदि धातुओं से गुण, तथा 'रुह' धातु से गुण का अभाव होता है ।।

'छन्दसि' ग्रहण इसलिये है कि—अकार्षीत् । अमृत । अदृत । अरुक्षत् । इत्यादि में अङ् नहीं होता ।।

चिण् ते पदः[8] ।। ६० ।।

चिण । १ । १ । ते । ७ । १ । पदः । ५ । १ । त-शब्दः-परस्मैपदेष्वात्मनेपदेषु च वर्त्तते । तत्रोपदेशे पद-धातोरात्मनेपदित्वादात्मनेपदस्य प्रथमैकवचन-त-शब्दस्यात्र

---

१. धा०—तना०—१० ।। २. धा०—तुदा०—११९ ।।

३. धा०—तुदा०—१२७ ।।

अत्र केचित्—कृमृदृ० इत्यादि सूत्रं पठन्ति, अत एव "अदारीत्" इति प्रत्युदाहरन्ति ।। ह्रस्वपाठपक्षे तु दृङ् इत्येव सम्यक् ।। सूत्रे 'दृ' पठतां 'अदारीत्' इति प्रत्युदाहरणं त्वयुक्तमेव ।।

४. धा०—भ्वा०—८४९ ।। ५. **'सरुपामकरत्'** । अथर्व० १ । २४ । २ ।

६. अनुपलब्धमूलमिदम् ।।

७. अनुपलब्धमूलमिदम्—परन्तु—**'नावमारुहम्'** (ऋ० १० । ४४ । ६) इति मिपि प्रयोगो दृश्यते ।।

८. आ० गृ० ४०५ ।।

ग्रहणम् ।। पद[1]-धातोः परस्य च्लेः स्थाने त-शब्दे परतश्चिणादेशो[2] भवति । समपादि[3] धनं देवदत्तः । प्रापादि विद्यां ब्राह्मणः ।।

'ते' इति किम् । समपत्साताम् । अत्र चिण् मा भूत् ।। ६० ।।

त—शब्द परस्मैपद और आत्मनेपद दोनों में है, उपदेश [अर्थात् धातुपाठ] में पद धातु के आत्मनेपदी होने से यहां "त" शब्द से आत्मनेपद प्रथम पुरुष प्रथमैकवचन का ग्रहण है ।।

[पदः] पद धातु से परे च्लि के स्थान में [चिण्] चिणादेश हो [ते] "त" शब्द परे हो तो ।।

जैसे—समपादि धनं देवदत्तः । प्रापादि विद्यां ब्राह्मणः ।।

'ते' ग्रहण इसलिये है कि—समपत्साताम् यहां 'आताम्' के परे चिण् नहीं होता ।।६०।।

दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्[4] ।। ६१ ।।

'चिण् ते' इत्यनुवर्त्तते । 'कर्तरि' इति च । दीप-जन-बुध-पूरि-तायि-प्यायिभ्यः । ५ । ३ । अन्यतरस्याम् ।। **'दीपी दीप्तौ, जनी प्रादुर्भावे, बुध[5] अवगमने, पूरी आप्यायने, तायृ सन्तानपालनयोः, ओप्यायी वृद्धौ'** एवमुपदिष्टेभ्यो दीपादिधातुभ्यः परस्य च्लेः स्थाने कर्तृवाचि-त-शब्दे परतो विकल्पेन चिण-आदेशो भवति ।। अदीपि, अदीपिष्ट । अजनि, अजनिष्ट । अबोधि, अबुद्ध । अपूरि, अपूरिष्ट । अतायि, अतायिष्ट । अप्यायि, अप्यायिष्ट ।।

दीपादिषु 'कर्तरि' इत्यनुवर्त्तनादप्राप्तविभाषा विज्ञायते । दीपादीनामकर्मत्वात्[6] कर्तृस्थभावकत्वाच्च[7] कर्ता कर्मवन्न भवति । तेन यक्चिणावपि न भवतः । एवमप्राप्तश्चिण[8] विधीयते ।। ६१ ।।

---

१. 'पद गतौ' दैवादिक आत्मनेभाषः ।।

२. **विभाषा मध्ये च ये विधयस्ते नित्या भवन्ति'** (अ० १ । २ । २२ भा० ।। अ० ५ । २ । ९७ भा०) । इति न्यायेन नित्योऽयं विधिः ।।

३. गतेस्त्रयोऽर्थाः, ज्ञानं गमनं प्राप्तिश्च । प्राप्त्यर्थस्यात्र विवक्षितत्वादयं सकर्मक इति ध्येयम् ।।

(ख) 'कर्त्तरि' इत्यनुवर्तनात् कर्त्तर्ययं विधिः सम्पादितवानित्यर्थः ।।

४. आ० सू० १९४ ।।

५. दीपादीनामात्मनेपदिनां साहचर्यात् 'जन जनने, बुध अवगमने' इत्यनयोः परस्मैपदिनोरग्रहणम् । 'बुधिर्' बोधने, इत्यस्य तु निरनुबन्धकग्रहणे न सानुबन्धकस्येत्यग्रहणम् ।।

६. यत्त्वत्र **भट्टोजिदीक्षितादयः** सकर्मकत्वेऽपि भवत्येव चिणादेश इत्याहुस्तद् दीपादीनामकर्मकाणां साहचर्याद् **"अकर्मकाश्च दीपादयः"** (अ० १ । १ । ४३ भा०) इति भाष्यवचनाच्चावद्यम् । यस्य कस्य शब्दप्रयोगस्तु न शब्दानां साधुत्वे प्रमाणम् ।।

७. यत्तु **'अचः कर्तृयकि'** (अ० ६ । १ । १९५) इति सूत्रभाष्ये **'जायते स्वयमेव'** इत्युदाहृतं, तदन्तर्भावितण्यर्थवृत्तिमाश्रित्य कर्मस्थभावकत्वमिति नास्त्यनेन विरोधः ।।

८. विषयोऽयं **'नवेति विभाषा'** इति सूत्रभाष्ये प्राप्ताप्राप्तविवेचनेऽस्यैव सूत्रस्य व्याख्याने निरूपितः । तद्यथा—

चिण्—ते—और कर्त्तरि इनकी अनुवृत्ति आ रही है ॥

[दीप ···प्यायिभ्यः] दीपादि धातुओं से परे च्लि के स्थान में कर्तृवाची "त" शब्द परे हो तो [अन्यतरस्याम्] विकल्प करके चिणादेश हो ॥

जैसे—**अदीपि, अदीपिष्ट । अजनि, अजनिष्ट । अबोधि, अबुद्ध । अपूरि, अपूरिष्ट । अतायि, अतायिष्ट । अप्यायि, अप्यायिष्ट ॥**

दीपादि धातुओं में 'कर्त्तरि' इस पद की अनुवृत्ति होने से यहां अप्राप्त विभाषा है, क्योंकि दीपादि धातुओं के अकर्मक तथा कर्तृस्थभावक होने से कर्त्ता को कर्मवद्भाव प्राप्त ही नहीं होता उसी से यक् और चिण् भी प्राप्त नहीं होते, इस प्रकार यहां अप्राप्त चिण् का विधान है ॥ ६१ ॥

अचः कर्मकर्त्तरि[1] ॥ ६२ ॥

'कर्तरि' इति निवृत्तम् । 'चिण् ते' इत्यनुवर्त्तते । 'अन्यतरस्याम्' इति च । **अचः । ५ । १ । कर्मकर्त्तरि । ७ । १ ॥** अजन्ताद् धातोः परस्य च्लेः स्थाने कर्मकर्त्तरि त-शब्दे परतो विकल्पेन चिण्-आदेशो भवति ॥ **अकारि कटः स्वयमेव । अकृत कटः स्वयमेव । अलावि केदारः स्वयमेव । अलविष्ट केदारः स्वयमेव ॥**

'अचः' इति किम् । अपाठि विद्या स्वयमेव ॥

'कर्मकर्त्तरि' इति किम् । अकारि कटो देवदत्तेन । अत्र कर्मणि नित्यं चिण् भवति ॥

अस्मिन् सूत्रे प्राप्तविभाषा[1] । **'चिण् भावकर्मणोः'**[2] इति नित्यप्राप्तश्चिण् विभाष्यते[3] ॥ ६२ ॥

'कर्त्तरि' पद की अनुवृत्ति समाप्त हुई । चिण् 'ते' इन दोनों पदों की अनुवृत्ति आ रही है, अन्यतरस्याम् की भी ।

[कर्मकर्त्तरि] कर्मकर्ता में त शब्द परे हो तो [अचः] अजन्त धातु से परे च्लि के स्थान में चिण् आदेश विकल्प करके हो ॥

जैसे—**अकारि कटः स्वयमेव । अकृत कटः स्वयमेव ॥ अलावि केदारः स्वयमेव । अलविष्ट केदारः स्वयमेव ॥**

"·· ·····अप्राप्ते । कर्तरीति हि वर्त्तते ॥ नास्ति संदेहः, सकर्मकस्य कर्त्ता कर्मवद्भवति, अकर्मकाश्च दीपादयः ॥ अकर्मका अपि वै सोपसर्गाः सकर्मका भवन्ति ॥ कर्मापदिष्टा विधयः कर्मस्थ-भावकानां कर्मस्थक्रियाणां वा भवन्ति, कर्तृस्थभावकाश्च दीपादयः" ॥

१. आ० सू० ७३२ ॥

२. **'कर्मवत् कर्मणा तुल्यक्रियः'** (अ० ३ । १ । ८७) इत्यनेन कर्मकर्त्तरि कर्मवद्भावप्राप्तौ **'चिण् भावकर्मणोः'** (अ० ३ । १ । ६६) इति चिण प्राप्तिरिति भावः ॥

३. कृषीवलः केदारं लुनीते, लुनतस्तस्य केदारः स्वयमेव लूयते [अलावि केदारः स्वयमेव] अलविष्ट केदारः स्वयमेव ॥ इत्याख्यातिकसूत्रे (७३२)ऽधिकम् ॥

'अचः'—ग्रहण इसलिये है कि—अपाठि विद्या स्वयमेव । यहां पठ् धातु के हलन्त होने से नित्य चिण् हुआ ॥

'कर्मकर्त्तरि'—ग्रहण इसलिये है कि—अपाठि विद्या स्वयमेव । यहां कर्म में नित्य चिण् होता है ॥

इस सूत्र में प्राप्तविभाषा है "चिण् भावकर्मणोः" इस सूत्र से नित्य प्राप्त चिण् विकल्प से होता है ॥ ६२ ॥

दुहश्च[1] ॥ ६३ ॥

'अन्यतरस्याम्' इति 'कर्मकर्त्तरि' इति चानुवर्त्तते । दुहः । ५ । १ । च ॥ **'दुह प्रपूरणे'**[2] इत्यस्मात् **'न दुहस्नुनमां यक्चिणौ'**[3] इति प्रतिषिद्धश्चिण् विकल्पेन विधीयते । दुह-धातोः परस्य च्लेः स्थाने कर्मकर्त्तरि त-शब्दे परतो विकल्पेन चिण्-आदेशो भवति ॥ अदोहि गौः स्वयमेव । अदुग्ध [अधुक्षत वा] गौः स्वयमेव ॥

'कर्मकर्त्तरि' इति किम् । अदोहि गौर्गोपालेन अत्र कर्मणि [विकल्पो] मा भूत् ॥ ६३ ॥

'अन्यतरस्याम्' और "कर्म कर्त्तरि" का अनुवर्त्तन है ।

'दुह प्रपूरणे' इस धातु से **"न दुहस्नुनमां यक्चिणौ"** सूत्र द्वारा निषेध किया हुआ चिण् यहां विकल्प से विधान किया गया है ॥

[दुहः] 'दुह' धातु से परे च्लि के स्थान में कर्मकर्तृवाची त शब्द परे हो तो विकल्प करके चिणादेश होता है ॥

जैसे—अदोहि गौः स्वयमेव । अदुग्ध [अधुक्षत वा] गौः स्वयमेव ॥

कर्मकर्त्तरि—ग्रहण इसलिये है कि—अदोहि गौर्गोपालेन, यहां कर्म में चिण विकल्प से न हो ॥ ६३ ॥

न रुधः[4] ॥ ६४ ॥

'चिण् भावकर्मणोः'[5] इति चिण् प्राप्तः[6] प्रतिषिध्यते । 'कर्मकर्त्तरि' इत्यनुवर्त्तते ॥ न [अ०] । रुधः । ५ । १ ॥ रुध-धातोः परस्य च्लेः स्थाने कर्मकर्त्तरि त-शब्दे परतश्चिण्-आदेशो न भवति । अन्ववारुद्ध गौः स्वयमेव ॥

'कर्मकर्त्तरि' इति किम् । अन्ववारोधि गौर्गोपालेन । अत्र प्रतिषेधो न प्रवर्त्तते । **'चिण् भावकर्मणोः'**[5] इति चिण् भवत्येव ॥ ६४ ॥

चिण् भावकर्मणोः इस सूत्र से प्राप्त चिण् का प्रतिषेध करते हैं ॥

कर्मकर्तरि की अनुवृत्ति आ रही है ॥

---

१. आ० सू० ७३६ ॥
२. धा०—अदा० उ० ४ ॥
३. अ० ३ । १ । ८९ ॥
४. आ० सू० ७३३ ॥
५. अ० ३ । १ । ६६ ॥
६. कर्मवद्भावे सतीति भावः ॥

[रुधः] रुध धातु से परे च्लि के स्थान में कर्मकर्तृवाची त शब्द परे रहते चिण् आदेश नहीं होता ॥

जैसे--अन्ववारुद्ध गौः स्वयमेव ॥

कर्मकर्तरि—ग्रहण इसलिये है कि—अन्ववारोधि गौर्गोपालेन, इस में प्रतिषेध नहीं होता परन्तु "चिण् भावकर्मणोः" इस सूत्र से चिण् होता ही है ॥ ६४ ॥

तपोऽनुतापे च[1] ॥ ६५ ॥

'कर्मकर्तरि' इत्यनुवर्त्तते, निषेधश्च ॥ तपः । ५ । १ । अनुतापे । ७ । १ । च [अ०] । अनुतापः=पश्चात्तापः, तस्मिन् । अनुतापेऽर्थे कर्तृस्थभावकोऽकर्मकस्तस्य कर्ता कर्मवन्न भवति ॥ तस्य ग्रहणं भावकर्मणोश्चिण् प्रतिषेधार्थम् । कर्मकर्तरि वर्तमानादनुतापे च त[प]-धातोः परस्य च्लेः स्थाने चिण्-आदेशो न भवति त-शब्दे परतः । अतप्त तपः स्वयमेव । अन्वतप्त दुष्टेन कर्मणा । उभयत्र चिण् न स्यात् ॥ ६५ ॥

यहां भी "कर्मकर्तरि" और "न" का अनुवर्त्तन है ॥

अनुताप पश्चात्ताप को कहते हैं —अनुताप अर्थ में कर्तृस्थभावक अकर्मक का कर्त्ता कर्मवत् नहीं होता । अनुताप पद का ग्रहण "भावकर्मणोः" से प्राप्त चिण् के निषेध करने के लिये है ॥

[च] कर्मकर्त्ता में तथा [अनुतापे] अनुताप में वर्त्तमान जो [तपः] तप धातु उससे परे च्लि के स्थान में चिणादेश नहीं होता त शब्द परे हो तो ॥

जैसे--अतप्त तपः स्वयमेव । अन्वतप्त दुष्टेन कर्मणा । यहां दोनों स्थानों में चिण न हुआ ॥ ६५ ॥

चिण् भावकर्मणोः[2] ॥ ६६ ॥

'चिण्' इति वर्तमाने पुनश्चिण् ग्रहणं नियमार्थम्, चिण्विषये यदन्यत् प्राप्नोति तन्मा भूत् ॥ 'च्लेस्ते' इत्यनुवर्त्ततेऽन्यत् सर्वं निवृत्तम् ॥

चिण् । १ । १ । भाव-कर्मणोः । ७ । २ । भावकर्मणोर्वर्त्तमानाद् धातोः परस्य च्लेः स्थाने त-शब्दे परतश्चिण्-आदेशो ॥ भवति ॥ भावे—अशायि भवता । अस्वापि भवता कर्मणि—अपाठि विद्या शिष्येण । अवादि शास्त्रं ब्राह्मणेन । कर्मापदिष्टा विधयः कर्मकर्त्तर्यपि भवन्ति । अभेदि काष्ठं स्वयमेव । अभोज्योदनः स्वयमेव ॥

'चिण्' इति किम् । उपाश्लेषि कन्या देवदत्तेन । अत्र '**श्लिष आलिङ्गने**[3]' इति विशेषबाधकः क्सो न भवति ॥ ६६ ॥

चिण् का अनुवर्तन होते हुए पुनः चिण का ग्रहण नियम के लिये है, चिण् के विषय में और भी जो कुछ प्राप्त होता है वह न हो अर्थात् केवल चिण् हो हो ॥

यहां 'च्लेः' 'त' इनका अनुवर्तन है और सब की निवृत्ति हो जाती है ॥

---

१. आ० सू० ७२३ ॥ २. आ० सू० ७२१ ॥

३. अ० ३ । १ । ४६ ॥

[भावकर्मणोः] भाव तथा कर्म में वर्त्तमान जो धातु उससे परे च्लि के स्थान में [चिण्] चिणादेश हो त शब्द परे हो तो ॥

भावे—**अशायि भवता । अस्वापि भवता ॥** कर्मणि—**अपाठि विद्या शिष्येण । अवादि शास्त्रं ब्राह्मणेन ॥**

कर्म में विहित विधियें कर्मकर्ता में भी होती हैं, जैसे—**अभेदि काष्ठं स्वयमेव । अभोज्योदनः स्वयमेव ॥**

चिण् ग्रहण इसलिये है कि—**उपाश्लेषि कन्या देवदत्तेन ।** यहां "श्लिष आलिङ्गने" इस सूत्र से विशेष बाधक "क्स" पाता था वह नहीं हुआ ॥ ६६ ॥

सार्वधातुके यक्[1] ॥ ६७ ॥

'भावकर्मणोः' इत्यनुवर्त्तते ॥ सार्वधातुके । ७ । १ । यक् १ । १ । उत्सर्गसूत्रमिदम् ॥ भावकर्मणोर्विहितेषु सार्वधातुकसञ्ज्ञकप्रत्ययेषु परेषु धातोर्यक् प्रत्ययो भवति । भावे—**आस्यते भवता । शय्यते भवता ॥** कर्मणि—**गम्यते ग्रामो देवदत्तेन । पच्यत ओदनः ॥** कर्मकर्त्तर्यपि कर्मापदिष्टो यग् भवति **लूयते केदारः स्वयमेव । क्रियते कटः स्वयमेव ॥**

अत्र कर्मकर्तरि कर्मापदिष्टाश्च विधयो भवन्ति । तत्र परत्वात् कर्मकर्तरि शप् प्राप्नोति । सा शप्प्राप्तिर्ज्ञापकान्निवार्यते । '**न दुहस्नु०**[2]' इति सूत्रेण कर्मकर्तरि यक्-चिणोः प्रतिषेधं शास्ति, तेन ज्ञायते कर्मकर्त्तरि यक्-चिणौ भवत इति । यदि परत्वाच्छप् स्यात् तर्हि यक्-चिणोः प्रतिषेधोऽनर्थकः स्यात् ॥

> **भा०—इह पश्यामः कर्मणि द्विवचनबहुवचनान्युदाह्रियन्ते—पच्येते ओदनौ, पच्यन्त ओदना इति । भावे पुनरेकवचनमेव आस्यते भवता, आस्यते भवद्भ्याम्, आस्यते भवद्भिरिति । केनैतदेवं भवति । कर्मानेकं, तस्यानेकत्वाद् द्विवचनबहुवचनानि भवन्ति । भावः पुनरेक एव । कथं तर्हीह द्विवचनबहुवचनानि भवन्ति पाकौ, पाका इति । आश्रयभेदात् । यदसौ द्रव्यं श्रितो भवति भावस्तस्य भेदाद् द्विवचनबहुवचनानि भवन्ति ।**

'इह' इति व्याकरणशास्त्रनिर्देशः । व्याकरणशास्त्रे किमपि लक्षणं न दृश्यते यद्भाव एकवचनं स्यात् कर्मणि च सर्वाणि । तत् स्पष्टीकृतम् । पक्ववस्तुवाची पाकशब्दः, तस्मात् सर्वाणि वचनानि । भावाश्रिते त्वेकवचनमेव ॥

---

१. आ० सू० ७।१९ ॥ २. अ० ३ । १ । ८९ ॥

भा०—इदं विचार्यते—भावकर्मकर्त्तारः सार्वधातुकार्था वा स्युर्विकरणार्था वेति ॥

यदा भावकर्मणोर्लस्तदा कर्त्तरि विकरणाः, यदा कर्त्तरि लस्तदा भावकर्मणोर्विकरणाः । इदमस्य यद्येव स्वाभाविकमथापि वाचनिकं प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इति । न चास्ति सम्भवो यदेकस्याः प्रकृतेर्द्वयोर्नानार्थयोर्युगपदनुसहायीभावः स्यात् । एवं च कृत्वैकपक्षीभूतमेवेदं भवति—सार्वधातुकार्था एवेति[1] ॥

'सार्वधातुके यक्' इति सूत्रे यदि भावकर्मणी सार्वधातुकार्थौ तदाऽयमर्थः—भावकर्मणोर्विहिते सार्वधातुके परतो यग् भवति । यदि विकरणार्थौ तर्ह्ययमर्थः—सार्वधातुके परतो भावकर्मणोर्यग् भवति ॥

एवमग्रे पूर्वं च सर्वस्मिन् विकरणप्रकरणे विचार्य्यते । 'स्वाभाविकाः' येषु प्रकृतिप्रत्ययभेदः सूत्रैर्नोच्यतेऽर्थाद् रूढयः, ये च प्रकृतिप्रत्ययभेदेन सूत्रैः सिध्यन्ति ते 'वाचनिकाः' शब्दाः । उभयत्र प्रकृतिप्रत्ययौ मिलित्वा प्रत्ययार्थमेव ब्रूतः । अत्र सर्वस्मिन् विकरणप्रकरणे विकरणसार्वधातुकौ प्रकृतिश्चैतत् त्रयं मिलित्वैकं तिङन्तं पदं भवति । तत्रैकस्मिन् पदे सार्वधातुको विकरणश्च भिन्नार्थौ स्वस्वप्रधानार्थौ स्यातामिति नास्ति सम्भवः । प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इत्युच्यते । अत्र भिन्नार्थौ द्वौ प्रत्ययौ प्रकृतिश्चैका कस्यार्थं ब्रूयादित्यसम्भवत्वादप्रयोगः स्यात् । अर्थादेकस्मिन् पदे युगपदेक एव प्रधानार्थो भवति । अतो यदुक्तं—यदा भावकर्मणोर्लस्तदा कर्तरि विकरणाः यदा कर्तरि लस्तदा भावकर्मणोर्विकरणाः, तत् पक्षद्वयं खण्डितं भवति । भावकर्मकर्त्तारः सार्वधातुकार्था एवेति पक्षः सिद्धो भवति ॥ ६७ ॥

पूर्व सूत्र से 'भावकर्मणोः' का अनुवर्तन है ॥ यह उत्सर्ग सूत्र है ।

भाव और कर्म में विहित [**सार्वधातुके**] सार्वधातुक प्रत्यय परे हों तो धातुमात्र से [**यक्**] यक् प्रत्यय हो ॥

भाव में—**आस्यते भवता । शय्यते भवता ॥** कर्म में—**गम्यते ग्रामो देवदत्तेन । पच्यत ओदनो देवदत्तेन ॥**

कर्म में विहित यक् प्रत्यय कर्मकर्ता में भी होता है । जैसे—**लूयते केदारः स्वयमेव । क्रियते कटः स्वयमेव ।** कर्मकर्ता में—कर्म तथा कर्त्ता दोनों में विहित विधियें प्राप्त होती है ॥ कर्मकर्त्ता में परत्व से शप् प्राप्त होता है । उसकी प्राप्ति ज्ञापक से निवृत्त होती है । ज्ञापक इस प्रकार है—**"न दुहस्नुनमां यक्चिणौ"** इस सूत्र मे कर्मकर्त्ता में यक् और चिण् का प्रतिषेध होता है—यदि परत्व से यक् को बाध करके शप् होता, तो इस सूत्र से यक् और चिण् का प्रतिषेध अनर्थक हो जाता, अतः इस प्रतिषेध से यह जाना जाता है कि कर्मकर्त्ता में यक् चिण् होते है ॥

---

१. यत्त्वाख्यातिकभूमिकायामस्य सूत्रस्य विषय उक्तं तदपूर्णम्, अत्राष्टाध्यायी भाष्ये विस्पष्टमेव सिद्धान्तोत्तरस्योक्तत्वात् ॥

(प्रश्न) व्याकरणशास्त्र में देखा जाता है कि—कर्म में द्विवचनान्त और बहुवचनान्त उदाहरण दिये जाते हैं, जैसे—**पच्येते ओदनौ । पच्यन्त ओदना** इति । परन्तु भाव में एकवचन ही देखा जाता है । जैसे—**आस्यते भवता । आस्यते भवद्भ्याम् । आस्यते भवद्भिः ।** ऐसा क्यों होता है ?

(उ०)--यतः कर्म अनेक हैं अतः उन कर्मों के अनेक होने से कर्म में द्विवचन तथा बहुवचन तो हो जाते हैं । परन्तु भाव एक ही होता है इसलिये भाव में सर्वत्र एकवचन ही होता है ॥

(प्र०)—भला यह तो बताइये "पाकौ, पाकाः" यहां भाव में द्विवचन और बहुवचन किस प्रकार होते हैं ?

(उ०)—अधिकरणों की भिन्नता के कारण; जब वह भाव किसी द्रव्य (पदार्थ) विशेष के आश्रित होता है तब उस पदार्थ के भिन्न भिन्न होने के कारण द्विवचन तथा बहुवचन होते हैं भाव तो अपने रूप में एक ही है इसलिये भाव में द्विवचन बहुवचन नहीं होते ॥

"**सार्वधातुके यक्**" इस सूत्र में यदि भाव और कर्म यह सार्वधातुक के अर्थ हों तो सूत्रार्थ इस प्रकार होगा—भाव कर्म में विहित सार्वधातुक प्रत्यय परे हों तो धातु से यक् प्रत्यय होता है । और जब भावकर्म विकरणार्थ हैं तब इस पक्ष में सूत्र का अर्थ इस प्रकार होगा—सार्वधातुक प्रत्यय परे हों तो भाव-कर्म अर्थ में धातु से यक् होता है ॥

इसी प्रकार पूर्व सूत्रों में और अगले विकरण प्रकरण में भी समझना चाहिये । स्वाभाविक अर्थात् 'रूढि' शब्द उन्हें कहते हैं कि जिनका सूत्रों द्वारा प्रकृति प्रत्यय का भेद न कहा हो । और जो शब्द प्रकृति प्रत्यय का भेद करके सूत्रों से सिद्ध किये जाते हैं उन्हें 'वाचनिक' कहते हैं । इन दोनों प्रकार के शब्दों में प्रकृति और प्रत्यय मिल करके ही प्रत्ययार्थ अर्थात् अभिधेयार्थ को कहते हैं । इस सारे विकरण प्रकरण में विकरण, सार्वधातुक और प्रकृति यह तीनों मिल करके ही एक तिङन्त पद बनता है । इस हेतु से सार्वधातुक प्रत्यय और विकरण यह एक तिङन्त पद में अपने अपने भिन्न भिन्न अर्थ की प्रधानता को लिये रहें यह सम्भव नहीं । इसलिये भगवान् पतञ्जलि मुनि कहते हैं कि— प्रकृति और प्रत्यय मिल कर के प्रत्ययार्थ को कहते हैं, क्यों कि यदि ऐसा न मानें तो सार्वधातुक और विकरण प्रत्ययों के भिन्न अर्थ होने से प्रकृति किस अर्थ को कहेगी और किस अर्थ को न कहेगी ? इस प्रकार असम्भव होने से शब्द का प्रयोग ही न होगा । इससे यह सिद्ध हुआ कि— एक पद में सबका मिल करके एक ही प्रधानार्थ होता है । इसीलिये "जब भाव-कर्म में लकार आता है तब विकरण कर्त्ता में होते हैं, और जब कर्त्ता में लकार होता है तब भाव-कर्म में विकरण आते हैं" यह दोनों ही पक्ष खण्डित हो जाते हैं भाव-कर्म-कर्त्ता यह सार्वधातुकार्थ होते हैं यह पक्ष सिद्ध रहता है । अर्थात् भाव-कर्म-अर्थ में विहित सार्वधातुक परे हो तो धातु से यक् होता है यही स्थित पक्ष है ॥ ६७ ॥

कर्तरि शप्[1] ॥ ६८ ॥

'सार्वधातुके' इत्यनुवर्तते । कर्तरि । ७ । १ । शप् । १ । १ ॥

१. आ० सू० १९ ॥

कर्तरि विहितेषु सार्वधातुकप्रत्ययेषु परतो धातोः शप् प्रत्ययो भवति । भवति । पठति । पचति ।। धातुमात्रात् कर्तरि सार्वधातुके शप्, तस्य स्थाने श्यन्नादय आदेशा वक्ष्यन्ते । शकारः सार्वधातुकार्थः । पकारोऽनुदात्तस्वरार्थः ।। ६८ ।।

यहां सार्वधातुक की अनुवृत्ति है ।

[**कर्त्तरि**] कर्त्ता में विहित सार्वधातुक प्रत्यय परे हों तो धातु से [शप्] शप् प्रत्यय होता है । जैसे—**भवति । पठति । पचति ।।**

धातुमात्र से कर्तृवाची सार्वधातुक परे शप् प्रत्यय कहा है और आगे इस शप् के स्थान में श्यन् आदि आदेश कहेंगे ।।

शकार अनुबन्ध सार्वधातुक संज्ञा के लिये है । और पकार अनुबन्ध अनुदात्त स्वर के लिये है ।। ६८ ।।

दिवादिभ्यः श्यन्[1] ।। ६९ ।।

'कर्तरि सार्वधातुके' इति सर्वत्रानुवर्तते । कर्तरि सार्वधातुके परतो दिवादिभ्य परस्य शपः स्थाने श्यन् भवति । दीव्यति । सीव्यति । नृत्यति ।। नकारः स्वरार्थः, शकारः सार्वधातुकार्थः ।। ६९ ।।

'कर्त्तरि' 'सार्वधातुके' इनकी अनुवृत्ति आगे जा रही है ।।

कर्त्ता में विहित सार्वधातुक प्रत्यय परे हो तो [दिवादिभ्यः] दिवादियों से शप् के स्थान में [श्यन्] श्यन् होता है ।।

जैसे—**दीव्यति । सीव्यति । नृत्यति ।।**

श्यन् प्रत्यय में नकार अनुबन्ध स्वर के लिये है । और शकार अनुबन्ध सार्वधातुकसंज्ञा करने के लिये है ।। ६९ ।।

वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः[2] ।। ७० ।।

उभयत्रविभाषेयम् । ये धातवोऽत्र दिवादिस्थास्तेभ्यो नित्ये प्राप्तेऽन्यत्राप्राप्ते श्यन् विभाष्यते ।। वा [अ०] । भ्राश० लषः । ५ । १ । भ्राशादीनां समाहारद्वन्द्वः ।। **'टुभ्राशृ टुभ्लाशृ दीप्तौ । भ्रमु चलने । भ्रमु अनवस्थाने । क्रमु पादविक्षेपे । क्लमु ग्लानौ । त्रसी उद्वेगे । त्रुट छेदने । लष कान्तौ'** इत्येवं गणोपदिष्टेभ्यो भ्राशादिधातुभ्यः परस्य शपः स्थाने कर्तरि सार्वधातुके परतो विकल्पेन श्यन् भवति । पक्षे शबेव भवति ।। भ्राश्यते, भ्राशते । भ्लाश्यते, भ्लाशते । [भ्रम्यति, भ्रमति] भ्राम्यति । अत्र **'शमामष्टानां दीर्घः श्यनि[3]'** इति दीर्घः । भ्रमति । क्राम्यति, क्रामति । क्लाम्यति,

१. आ० सू० ३९६ ।। २. आ० सू० १८८ ।।
३. अ० ७ । ३ । ७४ ।।

क्लामति । अत्रोभयत्र शिति दीर्घः[1] । त्रस्यति, त्रसति । त्रुट्यति, त्रुटति । त्रुट-धातोस्तुदादिपाठात् पक्षे श-विकरणो भवति । लष्यति, लषति ।। ७० ।।

यह उभयत्रविभाषा है । जो धातु दिवादिगण मे पठित हैं उनसे श्यन् की नित्य प्राप्ति में तथा अन्य धातुओं से अप्राप्ति में श्यन् का विकल्प किया है ।। भ्राशादियों में समाहार द्वन्द्व समास है

[भ्राश····लषः] भ्राशादि धातुओं से परे कर्तृवाची सार्वधातुक परे हो तो शप् के स्थान में [वा] विकल्प करके श्यन् होता है, पक्ष में शप् भी होता है ।।

जैसे—भ्राश्यते-भ्राशते । भ्लाश्यते-भ्लाशते । भ्रम्यति-भ्रमति । भ्राम्यति यहां "शमामष्टानां दीर्घः श्यनि" इस सूत्र से दीर्घ होता है । भ्रमति । क्राम्यति-क्रामति । क्लाम्यति-क्लामति । यहां दोनों में शित् परे रहते दीर्घ होता है । त्रस्यति-त्रसति । त्रुट्यति-त्रुटति । त्रुट धातु के तुदादि में पठित होने से पक्ष में श-विकरण होता है । लष्यति-लषति ।। ७० ।।

यसोऽनुपसर्गात्[2] ।। ७१ ।।

'वा' इत्यनुवर्तते । यसः । ५ । १ । अनुपसर्गात् । ५ । १ ।। यसु प्रयत्ने दि[वा]दिः । तस्मान्नित्यं श्यन् प्राप्तस्तस्य विकल्पात् प्राप्तविभाषाऽत्र ।। उपसर्ग-रहिताद् यसु-धातोः परस्य शपः स्थाने विकल्पेन श्यन् भवति कर्तरि सार्वधातुके परतः ।। यस्यति, यसति । अत्र श्यनः शबादेशत्वात् पक्षे शबेव भवति ।। ७१ ।।

यहां 'वा' का अनुवर्तन है ।। यसु प्रयत्ने दिवादिगण का है इस हेतु से नित्य श्यन् प्राप्त था उसका विकल्प होने से यहां प्राप्तविभाषा है ।।

[अनुपसर्गात्] उपसर्ग रहित [यसः] यस् धातु से परे शप् के स्थान में विकल्प से श्यन् होता है कर्तृवाची सार्वधातुक परे हो तो । जैसे—यसति-यस्यति ।।

यहां शप् के स्थान में श्यन् आदेश होने से पक्ष में शप् भी होता है ।। ७१ ।।

संयसश्च[3] ।। ७२ ।।

'अनुपसर्गाद्' इति प्रतिषेधे प्राप्ते सोपसर्गार्थ आरभ्यते । विकल्पोऽनुवर्तते । अत्रापि प्राप्तविभाषा पूर्ववत् ।। सं-पूर्वाद् यस-धातोः परस्य शपः स्थाने कर्तरि सार्वधातुके परतो विकल्पेन श्यन् भवति । पक्षे शबेव । संयस्यति, संयसति ।। ७२ ।।

सोपसर्ग से श्यन् का प्रतिषेध किया है अतः उपसर्ग सहित से श्यन् का विधान करते हैं ।। यहां विकल्प की अनुवृत्ति आती है । यहां भी पूर्ववत् प्राप्तविभाषा है ।।

[संयसः] सम् पूर्वक यसु धातु से परे शप् के स्थान में कर्तृवाची सार्वधातुक प्रत्यय परे हो तो विकल्प करके श्यन् होता है [च] पक्ष में शप् भी होता है ।।

जैसे—संयस्यति-संयसति ।। ७२ ।।

१. अ० ७ । ३ । ७५, ७६ से ।। २. आ० सू० ४१३ ।।
३. आ० सू० ४१४ ।।

स्वादिभ्यः श्नुः[1] ॥ ७३ ॥

विकल्पग्रहणं निवृत्तम् । स्वादिभ्यः । ५ । ३ । श्नुः । १ । १ ॥ **'षुञ् अभिषवे'** इत्यादिपठितेभ्यो धातुभ्यः परस्य शपः स्थाने कर्त्तरि सार्वधातुके श्नुरादेशो भवति । सुनोति । सिनोति । चिनोति । अत्र श्नोर्ङित्त्वाद् धातोर्गुणाभावः ॥ ७३ ॥

विकल्प ग्रहण निवृत्त हुआ । [**स्वादिभ्यः**] षुञ् अभिषवे इत्यादि गणपठित धातुओं से परे शप् के स्थान में [**श्नुः**] श्नु: आदेश होता है, कर्तृवाची सार्वधातुक प्रत्यय परे हो तो ॥

जैसे—सुनोति-सिनोति-चिनोति ॥

यहां श्नु प्रत्यय के "सार्वधातुकमपित्" सूत्र से ङित् होने के कारण धातु को गुण नहीं होता ॥ ७३ ॥

श्रुवः शृ च[2] ॥ ७४ ॥

'श्नुः' इत्यनुवर्तते । श्रुवः । ५ । १ । शृ । १ । १ । लुप्तविभक्तिको निर्देशः । च [अ०] ॥ **'श्रु श्रवणे'** इत्यस्मात् परस्य शपः स्थाने कर्तरि सार्वधातुके श्नु-विकरणो भवति, श्रु-धातोश्च 'शृ' इत्ययमादेशः । शृणोति । शृणुतः । शृण्वन्ति ॥ ७४ ॥

श्नु का अनुवर्त्तन है ॥ इस सूत्र में "शृ" यह लुप्तविभक्तिक निर्देश है ॥

[**श्रुवः**] श्रु श्रवणे इस धातु से परे शप् के स्थान में कर्तृवाची सार्वधातुक प्रत्यय परे हो तो श्नु-विकरण होता है, और साथ ही श्रु धातु के स्थान में [**शृ च**] शृ आदेश भी हो जाता है ॥

जैसे—शृणोति-शृणुतः-शृण्वन्ति ॥ ७४ ॥

अक्षोऽन्यतरस्याम्[3] ॥ ७५ ॥

अक्षू भ्वादिस्थस्तस्मादप्राप्तः श्नुर्विधीयत इत्यप्राप्तविभाषा । अक्षः । ५ । १ । अन्यतरस्याम् [अ०] ॥ **'अक्षू व्याप्तौ'** इत्यस्माद् धातोः परस्य शपः स्थाने कर्तरि सार्वधातुके परतो विकल्पेन श्नु-विकरणो भवति, पक्षे शबेव । अक्ष्णोति । अक्ष्णुतः । अक्ष्णुवन्ति ॥ अत्र संयोगपूर्वत्वादुवङ्[4]-आदेशः । अक्षति । [अक्षतः । अक्षन्ति] ॥७५॥

अक्षू भ्वादिगण का धातु है । अतः इससे अप्राप्त श्नु का विधान करने से यह अप्राप्त विभाषा है ॥

[**अक्षः**] अक्षू व्याप्तौ इस धातु से परे शप् के स्थान में कर्तृवाची सार्वधातुक प्रत्यय परे हो तो [**अन्यतरस्याम्**] विकल्प करके श्नु विकरण होता है, पक्ष में शप् होता है ॥

---

१. आ० सू० ४१६ ॥ २. आ० सू० २६० ॥

३. आ० सू० २०९ ॥

४. **हुश्नुवोः सार्वधातुके'** (अ० ६ । ४ । ८७) इत्यत्राऽसंयोगपूर्वस्येत्यनुवर्त्तनाद् यणभावे **'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ'** (अ० ६ । ४ । ७७) । इति सूत्रेण 'उवङ्' इति भावः ॥

जसे—अक्ष्णोति । अक्ष्णुतः । अक्ष्णुवन्ति ।। "हुश्नुवोः सार्वधातुके" इस सूत्र से असंयोगपूर्व श्नु को यण् आदेश कहा है यहां संयोगपूर्वक होने से "अचि श्नुधातुभ्रुवां य्वोरियङुवङौ" से उवङ् आदेश होता है। पक्ष में शप्—अक्षति ।। ७५ ।।

तनूकरणे तक्षः[1] ।। ७६ ।।

'अन्यतरस्याम्' इत्यनुवर्तते। अत्रापि तक्षू-धातोर्भ्वादिस्थत्वादप्राप्तविभाषैव । तनूकरणे । ७ । १ । तक्षः । ५ । १ ।। तनूकरणं सूक्ष्मीकरणं, तत्र वर्तमानात्तक्षू-धातोः परस्य शपः स्थाने विकल्पेन श्नु-विकरणः, पक्षे शप् भवति कर्तरि सार्वधातुके परतः। तक्ष्णोति तक्षति वा काष्ठम् ।। **अनेकार्था[2] अपि धातवो भवन्तीति** मत्वा विशेषार्थ उपदिष्टः ।।

'तनूकरणे' इति किम् । शास्त्रे धियं सन्तक्षति ।। ७६ ।।

अन्यतरस्याम् का अनुवर्त्तन है ।। इस सूत्र में तक्षू धातु के भ्वादि पठित होने से अप्राप्त श्नु का विधायक होने से यह भी अप्राप्त विभाषा है। तनूकरण सूक्ष्म करने को कहते हैं ।।

[तनूकरणे] तनूकरण अर्थ में वर्त्तमान [तक्षः] तक्षू धातु से परे शप् के स्थान में विकल्प करके श्नु विकरण होता है, कर्त्तृवाची सार्वधातुक परे हो तो, पक्ष में शप् होता है ।।

जैसे—**तक्ष्णोति काष्ठम् । तक्षति काष्ठम् ।।**

धातु के अनेक अर्थ होते हैं इससे यहां तक्षू धातु का विशेष अर्थ कहा है ।।

तनूकरण-ग्रहण इसलिये है कि—**शास्त्रे धियं संतक्षति**—यहां बुद्धि में छीलना रूप तनूकरण असम्भव है अतः नित्य शप् ही हुआ ।। ७६ ।।

तुदादिभ्यः शः[3] ।। ७७ ।।

श्नुनिवृत्तो विकल्पश्च । तुदादिभ्यः । ५ । ३ । शः । १ । १ ।। **'तुद व्यथने'** इत्यादिधातुभ्यः परस्य शपः स्थाने कर्तरि सार्वधातुके परतः श-विकरणो भवति । तुदति । नुदति ।। अत्रापित्सार्वधातुकस्य ङित्त्वाद् गुणो न भवति ।। ७७ ।।

यहां श्नु और विकल्प का निवर्त्तन है ।।

[तुदादिभ्यः] तुद व्यथने इत्यादि धातुओं से परे शप् के स्थान में [शः] श विकरण होता है कर्त्तृवाची सार्वधातुक परे हो तो ।।

जैसे—तुदति-नुदति ।। यहां श विकरण 'अपित् सार्वधातुक' है अतः उसके ङिद्वत् होने से गुण नहीं होता ।। ७७ ।।

---

१. आ० सू० २११ ।।

२. द्रष्टव्यं भाष्ये—अ० १ । ३ । १ ।। ३ । १ । १३१ ।। ६ । १ । १२ ।। ८ । २ । ४८ ।।

३. आ० सू० ४२६ ।।

रुधादिभ्यः श्नम्[1] ॥ ७८ ॥

रुधादिभ्यः ५ । ३ । श्नम् । १ । १ । श्नमि मित्करणं **'मिदचोऽन्त्यात् परः'**[2] इति धातोर्मध्ये श्नम् यथा स्यात् । **'रुधिर् आवरणे'** इत्यादिधातुभ्यः परस्य शपः स्थाने कर्तरि सार्वधातुके श्नम् विकरणो भवति । रुणद्धि । भिनत्ति । छिनत्ति ॥ शकारोऽनुबन्धः **'श्नान्नलोपः'**[3] इति विशेषणार्थः ॥ ७८ ॥

श्नम् में मित् करने का प्रयोजन यह है कि 'मिदचोन्त्यात्परः" इस सूत्र से धातु के मध्य में श्नम् हो ।

[रुधादिभ्यः] इत्यादि धातुओं से परे शप् के स्थान में कर्तृवाची सार्वधातुक परे हो तो [श्नम्] श्नम् विकरण होता है ॥

जैसे—रुणद्धि । भिनत्ति । छिनत्ति ॥

श्नम् में शकार का अनुबन्ध 'श्नान्न लोपः' इस सूत्र में 'श्नम्' का ग्रहण करने के लिये है ॥ ७८ ॥

तनादिकृञ्भ्य उः[4] ॥ ७९ ॥

तनादि-कृञ्भ्यः । ५ । ३ । उः । १ । १ ॥ तनादिभ्यः कृञ्- धातोश्च परस्य शपः स्थाने कर्त्तरि सार्वधातुके परत उ-विकरणो भवति । तनोति । तनुते । सनोति । सनुते । करोति । कुरुते ॥

कृञ्-धातोस्तनादिपाठाद्-उ-विकरणः सिद्धः, पुनः पृथङ् निर्देशस्यैतत् प्रयोजनम्—अन्यत् सामान्यतनादिकार्यं कृञ्-धातोर्मा भूत् । अकृत । अकृथाः । अत्र **'तनादिभ्यस्तथासोः'**[5] इति विकल्पेन सिज्लुङ् मा भूत्, किन्तु नित्यमेव स्यात् ॥

का०—तनादित्वात् कृञः सिद्धं सिज्लोपे च न दुष्यति ।
चिण्वद्भावे न दोषः स्यात् सोऽपि प्रोक्तो विभाषया ॥ १ ॥

अनया कारिकया महाभाष्यकारेण किमपि प्रयोजनं न निस्सार्यते किन्तु कृञ्-ग्रहणं व्यर्थमस्तीति साधितम् ॥ ७९ ॥

[तनादिकृञ्भ्यः] तनादि धातुओं से और कृञ् धातु से परे शप् के स्थान में [उः] उ-विकरण होता है कर्तृवाची सार्वधातुक परे हो तो ॥

जैसे—तनोति-तनुते । सनोति-सनुते । करोति-कुरुते ॥

---

१. आ० सू० ४३५ ॥
२. अ० १ । १ । ४७ ।
३. अ० ६ । ४ । २३ ॥
४. आ० सू० ४३९ ॥
५. अ० २ । ४ । ७९ ॥

कृञ् धातु के तनादि गण में पठित होने से उ-विकरण सिद्ध ही था फिर पृथक् निर्देश करने का यह प्रयोजन है कि–तनादि का सामान्यकार्य कृञ् धातु से न हो। जैसे–अकृत अकृथाः। यहां "तनादिभ्यस्तथासोः" इस सूत्र से सिच् का लुक् विकल्प से न हो, किन्तु नित्य ही हो जावे ॥

का०–तनादित्वात् कृञः सिद्धम्०.....इत्यादि कारिका से महाभाष्यकार पतञ्जलि मुनि ने कृञ् ग्रहण का कोई प्रयोजन नहीं बतलाया परन्तु कृञ् ग्रहण व्यर्थ है यह ही दर्शाया है ॥

[व्यर्थ होकर गणकार्य की अनित्यता का ज्ञापक हो सकता है, पर अन्य कई सूत्रों से यह ज्ञापक सिद्ध होने के कारण भाष्यकार ने नहीं दिया यह भी कह सकते हैं] ॥ ७९ ॥

धिन्विकृण्व्योर च[1] ॥ ८० ॥

'उः' इत्यनुवर्तते। धिन्वि-कृण्व्योः। ६।२।अ।१।१। च [अ०] अप्राप्तविधानमेतत्। धिवि प्रीणनार्थः। कृवि हिंसाकरणयोश्च। धिवि-कृवी भ्वादिस्थौ, तयोर्नुमनुषक्तयोर्ग्रहणं क्रियते। धिवि-कृवि-धातुभ्यां परस्य शपः स्थाने कर्तरि सार्वधातुके परत उ-विकरणो भवति, धिवि-कृव्योश्चाकारादेशः ॥

'अलोऽन्त्यस्य'[2] इति वकारस्य स्थानेऽत्वं भवति। तस्य च उ-प्रत्ययस्यार्द्धधातुकत्वाद् 'अतो लोपः'[3] इति लोपः। धिनोति। कृणोति। अकारलोपस्य स्थानिवद्भावाद गुणो न भवति ॥ ८० ॥

यहां "उ" का अनुवर्तन है ॥ यह सूत्र अप्राप्त 'उ' का विधायक है ॥ नुम् आगम युक्त भ्वादि गण में पठित धिवि-कृवि का यहां ग्रहण है ॥

[धिन्विकृण्व्योः] धिवि-कृवि धातु से परे शप् के स्थान में उ विकरण हो कर्तृवाची सार्वधातुक परे हो तो, [च] साथ ही धिवि तथा कृवि धातुओं को [अः] अकारादेश हो ॥

"अलोऽन्त्यस्य" इस नियम से वकार के स्थान में 'अ' होता है, और उस अकार का 'उ' प्रत्यय के आर्द्धधातुक होने से "अतो लोपः" इस सूत्र से लोप हो जाता है ॥

जैसे—धिनोति-कृणोति। यहां अकार लोप के स्थानिवत् होने से गुण नहीं होता ॥८०॥

क्र्यादिभ्यः श्ना[4] ॥ ८१ ॥

क्र्यादिभ्यः ५।३। श्ना। १।१॥ 'डुक्रीञ् द्रव्यविनिमये' इत्यादिधातुभ्यः परस्य शपः स्थाने कर्तरि सार्वधातुके श्ना-विकरणो भवति। क्रीणाति। क्रीणीते। प्रीणाति। प्रीणीते। अत्रात्मनेपदे ङित्त्वाद् श्ना-विकरणस्येत्त्वम्[5] ॥ ८१ ॥

---

१. आ० सू० १९९ ॥　　२. अ० १।१।५२ ॥
३. अ० ६।४।४८ ॥　　४. आ० सू० ४४६ ॥
५. अ० ६।४।११३ से ॥

[क्र्यादिभ्यः] डुक्रीञ् द्रव्यविनिमये इत्यादि धातुओं से परे शप् के स्थान में [श्ना] श्ना-विकरण होता है कर्तृवाची सार्वधातुक परे हो तो ॥

जैसे—क्रीणाति-क्रीणीते । प्रीणाति-प्रीणीते । इन उदाहरणों में आत्मनेपद के ङित् होने से "ई हल्यघोः[1]" इस सूत्र से श्ना विकरण के आकार को 'ईत्व' होता है ॥ ८१ ॥

स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च[2] ॥ ८२ ॥

'श्ना' इत्यनुवर्तते । स्तम्भु० स्कुञ्भ्यः । ५ । ३ । श्नुः । १ । १ । च । स्तम्भादयश्चत्वारः सौत्रा धातवः । **स्कुञ् आप्रवणे** । स्कुञ् क्र्यादिषु पठ्यते, तस्य पुनर्ग्रहणं श्नुविधानार्थम् । स्तम्भादिधातुभ्यः परस्य शपः स्थाने कर्तरि सार्वधातुके परतः श्ना-विकरणः श्नुश्चेति विकरणद्वयं भवति ॥

स्तभ्नाति, स्तभ्नोति । स्तुभ्नाति, स्तुभ्नोति । स्कभ्नाति, स्कभ्नोति । स्कुभ्नाति, स्कुभ्नोति । स्कुनाति स्कुनोति ॥ श्नः श्नोश्च ङित्त्वात् स्तम्भादीनामनुनासिकलोपः[3] । स्तम्भादिषु सर्वेषु सौत्रधातुपूकाराद्यनुबन्धकरणेन ज्ञायते सर्वाणि सामान्यधातुकार्याणि सौत्रधातूनामपि भवन्ति ॥ ८२ ॥

श्ना का अनुवर्त्तन है ॥ स्तम्भादि चार सौत्र धातु हैं, स्कुञ् आप्रवणे का क्र्यादि में पाठ है फिर इस सूत्र में श्नु विधानार्थ स्कुञ् ग्रहण किया है ॥

[स्तम्भुस्तुम्भु० भ्यः] स्तम्भादि धातुओं से परे शप् के स्थान में श्ना और [श्नुश्च] श्नु ये दो विकरण होते हैं कर्तृवाची सार्वधातुक परे हो तो ॥

जैसे—स्तभ्नाति-स्तभ्नोति । स्तुभ्नाति-स्तुभ्नोति । स्कभ्नाति-स्कभ्नोति । स्कुभ्नाति-स्कुभ्नोति । स्कुनाति-स्कुनोति ॥

श्ना और श्नु के ङित् होने से स्तम्भादि धातुओं के अनुनासिक का लोप "अनिदितां हल उपधायाः क्ङिति" इस सूत्र से होता है ॥

स्तम्भादि सब सौत्र धातुओं में उकारादि अनुबन्ध करने से यह जाना जाता है कि गणोपदिष्ट धातुओं के सब कार्य सौत्रधातुओं से भी होते हैं ॥ ८२ ॥

हलः श्नः शानज्झौ[4] ॥ ८३ ॥

हलः । ५ । १ । श्नः । ६ । १ । शानच् । १ । १ । झौ । ७ । १ । हलः=हलन्ताद्धातोः परो यः श्ना-विकरणस्तस्य स्थाने झौ=लोण्मध्यमैकवचने परतः शानच्-आदेशो भवति ॥ मुषाण रत्नानि । पुषाण ॥

'हलः' इति किम् । क्रीणीहि ।

'झौ' इति किम् । पुष्णाति । अत्रोभयत्र शानज् मा भूत् ।

---

१. अ० ६ । ४ । ११३ ॥ २. आ० सू० ४४७ ॥
३. अ० ६ । ४ । २४ से ॥ ४. आ० सू० ४४८ ॥

शानचि शित्करणेन ज्ञायते सार्वधातुकादेशेऽनुबन्धा स्थानिवन्न भवन्तीति । तेन पूर्वविकरणेषु शबादेशपक्षे शित्करणानि सार्थानि भवन्ति ॥ ८३ ॥

[हलः] हलन्त धातुओं से परे जो [श्नः] श्ना विकरण उसके स्थान में [शानच्] शानच् आदेश होता है [हौ] लोट् लकार के मध्यम पुरुष का एक वचन "हि" परे हो तो ॥

जैसे—मुषाण रत्नानि । पुषाण ॥

'हलः'—ग्रहण इसलिये है कि—क्रीणीहि । यहां अजन्त होने से शानच् न हुआ ॥

"हौ"—ग्रहण इसलिये है कि—पुष्णाति—यहां शानच् न हो ॥

शानच् में शित् करने से यह जाना जाता है कि सार्वधातुक प्रत्यय के आदेश में अनुबन्ध स्थानिवत् नहीं होते, इसलिये पूर्व विकरणों में शबादेश पक्ष में शित्करण सार्थक होता है ॥ ८३ ॥

छन्दसि शायजपि[1] ॥ ८४ ॥

पूर्वं सूत्रं सर्वमनुवर्तते । छन्दसि । ७ । १ । शायच् । १ । १ । अपि ॥ छन्दसि = वेदविषये हलन्ताद् धातोः परस्य श्ना-विकरणस्य स्थाने शानच् शायजप्यादेशो भवति हौ परतः । गृभाय जिह्वया मधु[2] । स्तभाय । स्कभाय । स्तभान पृथिवीमुत द्याम्[3] । बधान देव सवितः[4] ॥ शानचि शायचि च चकारः स्वरार्थः ।

वा०—शायच् छन्दसि सर्वत्र ॥

क्व सर्वत्र । हौ चाहौ च । किं प्रयोजनम्—महो अस्कभायत्[5] । यो अस्कभायत्[6] । उद्गृभायत्[7] । उन्मथायत[8] **इत्येवमर्थम् ॥**

'सर्वत्र' सामान्यसार्वधातुके परतः शायच्-आदेशो भवति । 'अस्कभायद्' इति लङि तिपि परतः शायच्-आदेशः ॥ ८४ ॥

यहां पूर्वसूत्र सब आ रहा है ।

[छन्दसि] छन्दसि अर्थात् वेदविषय में हलन्त धातुओं से परे श्ना विकरण के स्थान में [शायच्] शायच् [अपि] और शानच् दोनों आदेश होते हैं लोट् लकार का मध्यमपुरुष का एकवचन "हि" परे हो तो ॥

जैसे गृभाय जिह्वया मधु । स्तभाय । स्कभाय । स्तभान पृथिवीमुत द्याम् । बधान देव सवितः ॥

---

१. आ० सू० ४४९ ॥ २. ऋ० ८ । १७ । ५ ॥
३. अथ० ९ । ५ । १५ ॥ ४. य० १ । २५ । २६ ॥
५. अथ० ४ । १ । ४ ॥
६. ऋ० १ । १५४ । १ ॥ अथ० ७ । २६ । १ ॥ य० ५ । १८ ॥
७. अनुपलब्धमूलमिदम् ॥

वा—शायच् छन्दसि सर्वत्र—छन्दः में सब जगह शायच् आदेश होता है। सब जगह कहां ? "हि" परे तथा "हि" से भिन्न प्रत्यय परे होने पर भी ॥ इसका प्रयोजन—**महो अस्कभायत्**। यो **अस्कभायत्**। **उद्गृभायत**। **उन्मथायत**। इत्यादि ॥

यहां सब जगह सामान्य सार्वधातुक परे रहने पर 'शायच्' आदेश होता है। अस्कभायत् यहां लङ् लकार में तिप् परे रहने पर 'शायच्' आदेश हुआ है ॥ ८४ ॥

व्यत्ययो बहुलम् ॥ ८५ ॥

'छन्दसि' इत्यनुवर्तते। व्यत्ययः। १। १। बहुलम्। १। १। **'स्यतासी लृलुटोः'**[1] इत्यारभ्य विकरणप्रकरणमिदम्। तत्र यथायथं विकरणा विहितास्तेषां स्यादिविकरणानां व्यत्यय उच्यते। व्यतिगतिः=व्यत्ययः। विपरीतभावो वा। यस्य प्राप्तिः स न स्यादन्य एव स्याद्. अथ वा कोऽपि न स्यात् ॥

स्यादिविकरणानां बहुलं=बहुप्रकारेण व्यत्ययो भवति। **आण्डा शुष्णस्य भेदति**[2]। भिनत्तीति प्राप्ते ॥ **स च न मरति**[3]। म्रियत इति प्राप्ते ॥ भिद-धातोः श्नम् विकरणः प्राप्तः स न भवति। मृङ्-धातोः श-विकरणः प्राप्त आत्मनेपदं च, तत्र भवति, उभयत्र शप्, मरतीति परस्मैपदं च ॥

का०—*सुप्तिङुपग्रह*[4]*निङ्ननराणां कालहल*[5]*च्स्व*[6]*रक*[7]*तृंयङां*[8] *च।*
व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेन ॥ १ ॥

---

१. अ० ३। १। ३३ ॥ २. ऋ० ८। ४०। ११ ॥

३. यद्यप्यनुपलब्धमूलमिदं, तथापि वेदे परस्मैपदप्रयोगो दृश्यते, यथा—

"सो चिन्नु न मराति नो वयं मरामारे०। तथा च—**ताश्चिन्नु न मरन्ति नो वयं मरामारे० ॥"** ऋ० १। १९१। ११-१२ ॥

४. उपग्रहशब्देनात्मनेपदपरस्मैपदयोरत्र ग्रहणम् ॥

५. अचां व्यत्ययः—"उपगायन्तु मां पत्नयो गर्भिणयः" (अनुपलब्धमूलमिदम्) पत्न्यो गर्भिण्य इति प्राप्ते ॥

६. स्वर-व्यत्ययः—**'परादिश्छन्दसि बहुलम्'** (अ० ६। २। १९९) इत्याद्युक्तो वेदितव्यः ॥

७. कर्तृपदेन कारकमात्रं गृह्यते, यथा—'आसादयद्भिरुभयोर्वेदाः'। आसादयद्भ्य इति प्राप्ते, अत्र संप्रदानस्य व्यत्ययेन करणत्वम् ॥

८. यङिति नेदं प्रत्ययग्रहणम्। किं तर्हि ? प्रत्याहार ग्रहणम्। **सार्वधातुके यक्** (अ० ३। १। ६७) इति यकारमारभ्य **'लिङ्याशिष्यङ्'** (अ० ३। १। ८६) इति ङकारान्तं, तेन सर्वेषां विकरणानां व्यत्ययः सिद्धो भवति यथा—आण्डा शुष्णस्य भेदति, भिनत्तीति प्राप्ते ॥

भा०—**सुपां व्यत्ययः । तिङां व्यत्ययः । वर्णव्यत्ययः । लिङ्ग-व्यत्ययः । पुरुषव्यत्ययः । कालव्यत्ययः । आत्मनेपद-व्यत्ययः । परस्मैपदव्यत्ययः ॥**

सुपां व्यत्ययः—*युक्ता मातासीद् धुरि दक्षिणायाः*[1] । **दक्षिणायामिति प्राप्ते । तिङां व्यत्ययः**—*चषालं ये अश्वयूपाय तक्षति*[2] । **तक्षन्तीति प्राप्ते । वर्णव्यत्ययः** *त्रिष्टुभौजः शुभितमुग्रवीरम्*[3] । **शुधितमिति**[4] **प्राप्ते । लिङ्गव्यत्ययः**—[5]*मधोस्तृप्ता इवासते*[6] । **मधुन इति प्राप्ते । पुरुषव्यत्ययः**—*अधा स वीरैर्दशभिर्वियूयाः*[7] । **वियूयादिति प्राप्ते । कालव्यत्ययः**—*श्वोऽग्नीनाधास्यमानेन*[8], *श्वः सोमेन यक्ष्यमाणेन* । **आधाता, यष्टेति प्राप्ते । आत्मनेपद-व्यत्ययः**—*ब्रह्मचारणमिच्छते*[9] । **इच्छतीति प्राप्ते । परस्मैपद-व्यत्ययः**—*प्रतीपमन्य ऊर्मियुं धयति*[10] । **युध्यत इति प्राप्ते ॥**

एतत् सर्वं कारिकाया एव व्याख्यानम् । 'शास्त्रकृत्' व्याकरणशास्त्रस्य कर्ता पाणिनिः पूर्वोक्तानां सुबादीनां व्यत्ययमिच्छति । स व्यत्ययो 'बाहुलकेन' बहुलग्रहणेन सिध्यति । अन्यथा विकरणानामेव व्यत्ययः स्यात् ॥ ८५ ॥

छन्दसि पद का अनुवर्तन है ॥ "स्यतासी लृलुटोः" से लेकर यह विकरण प्रकरण है । इस विकरण प्रकरण में जिससे जो विकरण इष्ट था उसका विधान किया, अब इन विकरणों का व्यत्यय कहते हैं । अनियम से होना व्यत्यय है, अर्थात् जिस प्रत्यय या जिस विधि की प्राप्ति हो वह न हो, कुछ और प्रत्यय या विधि हो जावे, अथवा कोई भी न हो ॥

स्यादि विकरणों का [**बहुलम्**] बहुल अर्थात् विविध प्रकार से [**व्यत्ययः**] व्यत्यय होता है ॥ जैसे—**आण्डा शुष्णस्य भेदति,** भिनत्ति प्राप्त था । **स च न मरति,** म्रियते प्राप्त था । "भिद" धातु से श्नम् विकरण प्राप्त था वह न हुआ, "मृङ्" धातु से "श" विकरण-तथा आत्मनेपद प्राप्त था वह न हुआ । किन्तु दोनों उदाहरणों में शप् हुआ, "मरति" प्रयोग में परस्मैपद भी हो गया ॥

का०—"सुप्तिङुपग्रह०....."

---

१. ऋ० १ । १६४ । ९ ॥ २. ऋ० १ । १६२ । ६ ॥
३. अनुपलब्धमूलमिदम् ॥ ४. महाभाष्ये तु—सुहितमिति ॥
५. महाभाष्येऽतः पूर्वं—मधोर्गृह्णाति ॥
६. वेदे—मधोर्मदाय (ऋ० २ । ३४ । ५) इति तूपलभ्यते ॥
७. ऋ० ७ । १०४ । १५ ॥ ८. अनुपलब्धमूलमिदम् ॥
९. अथ० ११ । ५ । १७ ॥ १०. अनुपलब्धमूलमिदम् ॥

सुपों का व्यत्यय । तिङों का व्यत्यय । उपग्रह = आत्मनेपद-परस्मैपद का व्यत्यय । लिङ्ग का व्यत्यय । पुरुष का व्यत्यय । काल का व्यत्यय । हल् = वर्ण का व्यत्यय । अचों का व्यत्यय । स्वर का व्यत्यय । कर्तृ = कारकों का व्यत्यय । षट् = षट् प्रत्याहार का व्यत्यय । ये व्यत्यय के स्थान हैं ॥

जैसे—सुपों का व्यत्यय पुत्रो मातोऽऽसीद्धुरि दक्षिणायाः । यहां "दक्षिणायाम्" ऐसा प्राप्त था ।

तिङ् व्यत्यय—चषालं ये अश्वयूपाय तक्षति यहां "तक्षन्ति" ऐसा प्राप्त था ॥

आत्मनेपद व्य०—ब्रह्मचारिणमिच्छते । यहां "इच्छति" ऐसा प्राप्त था ॥

परस्मैपद व्य०—प्रतीपमन्य ऊर्मिर्युध्यति । यहां "युध्यते" ऐसा प्राप्त था ॥

लिङ्ग व्य०—मधोस्तृप्ता इवासते । यहां "मधुनः" ऐसा प्राप्त था ॥

पुरुष व्य०—अधा स वीरैर्दशभिर्वियूयाः । यहां "वियूयात्" ऐसा प्राप्त था । सो प्रथम पुरुष के स्थान में मध्य पुरुष का व्यत्यय से प्रयोग हुआ है ॥

काल व्य०—श्वोऽग्नीना धास्यमानेन । श्वः सोमेन यक्ष्यमाणेन ॥ इन में अनद्यतन भविष्यत् के स्थान में सामान्य भविष्यत् का प्रयोग हुआ है ॥

वर्ण व्य०—त्रिष्टुभौजः शुभितमुग्रवीरम् ॥ यहां "शुधितं" ऐसा प्राप्त था ॥

अच् व्य०—उपगायन्तु मां पत्नयो गर्भिणयः ॥ यहां "पत्न्यः, गर्भिण्यः" ऐसा प्राप्त था ।

स्वर व्य०—"परादिश्छन्दसि" के उदाहरण जानना चाहिये ॥

कारक व्य०—आसादयद्भिरुभयोर्वेदाः ॥ यहां "आसादयद्भ्यः" ऐसा संप्रदान कारक प्राप्त था ॥

विकरण व्य०—तांश्चिन्नु न मरन्ति ॥ यहां "म्रियन्ते" प्राप्त था ॥

व्याकरण शास्त्र के कर्त्ता भगवान् पाणिनि वेद में सुप् तिङ् आदि का व्यत्यय मानते हैं, उसे बतलाने के लिये उन्होंने इस सूत्र में बहुलपद पढ़ा है अन्यथा "व्यत्ययः" इतना सूत्र पढ़ने से प्रकरण के अनुरोध से विकरण प्रत्ययों का ही व्यत्यय होता सब का नहीं ॥ ८५ ॥

लिङ्याशिष्यङ्[1] ॥ ८६ ॥

'छन्दसि' इत्यनुवर्तते लिङि । ७ । १ । आशिषि । ७ । १ । अङ् । १ । १ ॥ छन्दसि = वैदिकप्रयोगविषय आशिषि यो लिङ् विधीयते तस्मिन् परतोऽङ्-विकरणो भवति ।

भा०—अयमाशिष्यङ् विधीयते । तस्य किं प्रयोजनम् । प्रयोजनं स्थागागमिवचिविदयः[2] । स्था— *उपस्थेयं वृषभं तुग्रियाणाम्*[3] । **गा—** *अञ्जसा सत्यमुपगेयम्*[4] ॥ **गमि—** *यज्ञेन प्रतिष्ठां गमेयम्* ।

---

१. आ० सू० ३३६ ॥

२. महाभाष्ये तु वार्त्तिकमिदम्—आशिष्यङः प्रयोजनं स्थागागमिवचिविदयः ॥

३. अनुपलब्धमूलमिदम् ॥ ४. यजु० ५ । ५ ॥

वचि—*मन्त्र वोचेमाग्नये*[1] । **विदि**—*विदेयमेनां मनसि प्रविष्टाम्*[2] ॥ *शकिरुह्योश्च*[3] ॥ *व्रतं चरिष्यामि तच्छकेयम्*[4] । *अस्रवन्तीमा रुहेमा स्वस्तये*[5] ॥

इमानि सूत्रस्यैवोदाहरणानि सन्ति , सर्वाणि लिङुत्तमस्यैकवचनान्तानि । 'वोचेम, रुहेम' इति द्वौ प्रयोगौ लिङुत्तमस्य बहुवचनान्तौ । 'उपस्थेयम्, उपगेयम्' इत्युभयत्राङि परत आकारलोपः । 'वोचेम' इत्यत्र '**वच उम्**[6]' इत्यङि परत उम् । सर्वेषु प्रयोगेषु '**छन्दस्युभयथा**[7]' इति सार्वधातुकत्वाद् '**अतो येयः**[8]' इतीय्-आदेशः । सलोपश्च ॥

वा० —*दृशेरग् वक्तव्यः* ॥

पितरं च दृशेयं मातरं च दृशेयम्[9] । 'दृशेयम्' इत्यत्र यद्यङ् स्यात्तर्हि '**ऋदृशोऽङि गुणः**[10]' इत्यङि परतो गुणः प्रसज्येत । कित्करणेन '**किङति च**[11]' इति गुणस्य प्रतिषेधः ॥

'उपस्थेयाम[12]' इति कश्चिद् वैदिकप्रयोगः । उप-स्था-अङ्-यासुट्-मस् । एवं स्थितौ सत्यां **वा छन्दसि सर्वे विधयो भवन्तीति** स्थ आकारस्य लोपाभावः । पश्चादेकादेशे कृते परस्यैकादेशः स्था-धातोरन्तवद् भवति । तस्य स्था-ग्रहणेन ग्रहणाल्लिङ आर्धधातुकत्वाच्च '**एर्लिङि**[13]' इति स्था-धातोरेत्त्वम् । सार्वधातुकत्वाद् यासुटः सलोपः । एवम् 'उपस्थेयाम[14]' इति सिध्यति ॥ ८६ ॥

[इति विकरण प्रकरणम्]

---

१ यजु० ३ । ११ ॥ २. अथ० १९ । ४ । २ ॥

३. महाभाष्ये—शकिरुह्योश्चेति वक्तव्यम् ॥

४. महाभाष्ये तु—शकेम त्वा समिधं साधवा धियः (ऋ० १ । ९४ । ३) ॥

५. ऋ० १० । ६३ । १० ॥ ६. अ० ७ । ४ । २० ॥

७. अ० ३ । ४ । ११७ ॥ ८. अ० ७ । २ । ८० ॥

९. तुलना—ऋ० १ । २४ । १-२ ॥ १०. अ० ७ । ४ । १६ ॥

११. अ० १ । १ । ५ ॥

१२. 'उपस्थेयाम शरणा बृहन्ता' (ऋ० ६ । ४७ । ८, तै० ब्रा० २ । ७ । १३ । ४) ॥

१३. अ० ६ । ४ । ६७ ॥

१४. इह **"उपस्थेयाम्" इत्यत्राडपि वक्तव्यः । न ह्याडेव सिध्यति (न वक्तव्यः । सार्वधातुकत्वाल्लिङः स लोपः आर्द्धधातुकत्वादेत्वम्, तत्रोभयलिङ्गत्वात्सिद्धम् ॥** अ० ३ । १ । ८६ भाष्ये ॥

यहां छन्दसि पद का अनुवर्त्तन है ॥

वैदिक प्रयोग विषय में [लिङ्याशिषि] आशिषि लिङ् में [अङ्] अङ् विकरण होता है ।

आशिषि लिङ् में अङ् के विधान करने का क्या प्रयोजन है ?

वा—"प्रयोजनं स्थागा०"—स्था- गा- गमि-वचि- विदि इन धातुओं में अङ् का प्रयोजन है—जैसे—स्था- **उपस्थेयं वृषभं तुग्रियाणाम्** । गा—**अञ्जसा सत्यमुपगेयम्** । गमि—**यज्ञेन प्रतिष्ठां गमेयम्** । वचि—**मन्त्रं वोचेमाग्नये** । विदि—**विदेयमेनां मनसि प्रविष्टाम्** । और भी प्रयोजन हैं—जैसे—वा०—शकिरुह्यो० ॥ २ ॥ शकि—**व्रतं चरिष्यामि तच्छकेयम्** । रुहि—**दैवीं नावं स्वरित्रामनागसमस्रवन्तीमारुहेमा स्वस्तये** ॥

ये उदाहरण इस सूत्र के ही जानने चाहियें । सब उदाहरण लिङ् लकार उत्तम पुरुष एकवचन के हैं । परन्तु "वोचेम" और "आरुहेम" यह दोनों पद लिङ् लकार उत्तम पुरुष बहुवचन के हैं । "उपस्थेयम्" और "उपगेयम्" यहां दोनों ही स्थानों में अङ् परे आकार का लोप हुआ है । "वोचेम" इस उदाहरण में अङ् परे रहते "**वच उम्**" इस से "उम्" आगम हुआ है । सब वैदिक प्रयोगों में '**छन्दस्युभयथा**" से सार्वधातुक संज्ञा मान कर "**अतो येयः**" से "इय्" आदेश और '**नित्यं ङितः**' से सलोप होता है ॥

३—वा०—**दृशेरग्वक्तव्यः** ॥ **पितरञ्च दृशेयं मातरञ्च** । इस उदाहरण में यदि "अङ्" ही होता तो "**ऋदृशोऽङि गुणः**" से गुण प्राप्त होता; परन्तु अब "अक्" के कित् होने से "**किदति च**" सूत्र से गुण का निषेध हो जाता है ॥

"**उपस्थेयाम**" इस वैदिक प्रयोग में—उप+स्था×अङ्+यासुट्+मस् इस स्थिति अर्थात् अलौकिक विग्रह में "**वाच्छन्दसि सर्वे विधयो भवन्तीति**" अर्थात् छन्दः में सब विधियें विकल्प करके होती हैं इस नियम से "स्था" धातु के आकार का लोप न हुआ, पुनः आकार तथा अङ् को एकादेश हो कर अन्तवद्भाव होने से स्था के ग्रहण से गृहीत होता है और लिङ् के आर्द्धधातुक होने से "**एर्लिङि**" से स्था धातु के आकार को "एकार" आदेश हुआ, और लिङ् के सार्वधातुक होने से यासुट् के सकार का लोप हो कर "उपस्थेयाम" ऐसा प्रयोग होता है ॥ ८६ ॥

[अथ कर्मवद्भावप्रकरणम्]

कर्मवत् कर्मणा तुल्यक्रियः[1] ॥ ८७ ॥

कर्मवत् [अ०] । कर्मणा । ३ । १ । तुल्यक्रियः । १ । १ । कर्मणीवेति कर्मवत् । **'तत्र तस्येव'**[2] इति सप्तमीसमर्थाद् वतिः ॥ कर्मणा तुल्या क्रिया यस्य अर्थात् कर्मस्था[3] क्रिया यस्य स तुल्यक्रियः कर्ता ॥ कर्मणा तुल्यक्रियः[4] कर्ता कर्मवद्[5] भवति । यदा कर्तुरविवक्षा भवति, स्वतन्त्रं[6] च कर्म, तदा कर्म कर्तृत्वमापद्यते । अर्थात् कर्म स्वयं कर्ता भवति । तदा तेनैव तुल्यक्रियः स एव कर्तृत्वमापन्नः कर्ता कर्मवद् भवति, कर्मापदिष्टानि[7] कार्याणि प्राप्नोतीत्यर्थः ॥ भिद्यते[8] काष्ठं स्वयमेव । लूयते केदारः स्वयमेव ॥ अत्र कर्मवद्भावेन यगात्मनेपदं च भवति । अभेदि काष्ठं स्वयमेव । अत्र कर्मवद्भावेन चिण् भवति । कारिष्यते कटः स्वयमेव । अत्र कर्मवद्भावेन कर्मापदिष्टं चिण्वत्कार्यं वृद्धिर्भवति ॥

यावन्तो धातवः सन्ति ते सर्वे चतुर्विधाः—कर्मस्थभावकाः, कर्मस्थक्रियाः, कर्तृस्थभावकाः, कर्तृस्थक्रियाः । इमे भेदा अस्मादेव सूत्रान्निस्सरन्ति ॥ अस्मिन् सूत्रे कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्ता कर्मवद् भवति । कर्मस्थभावकानाम्—आसयति देवदत्तम् । शाययति देवदत्तम् । अत्र देवदत्त-कर्मणि शयनं स्थितम् । आस्यते शाय्यते वा देवदत्तः स्वयमेव ॥ **कर्मस्थक्रियाणाम्**—भिनत्ति काष्ठम् । भिद्यते काष्ठं स्वयमेव । अत्र भेदनक्रिया काष्ठस्था । एवम्भूता ये धातव[9]स्तेषामेव कर्ता कर्मवद् भवति ॥

---

१. आ० सू० ७३० ॥ २. अ० ५ । १ । ११६ ॥

३. यस्मिन् कर्मणि कर्तृभूतेऽपि तद्वत् क्रिया लक्ष्यते यथा कर्मणि स कर्मणा तुल्यक्रियः कर्ता कर्मवद्भवति ॥

४. **कर्तरि शप्** (अ० ३ । १ । ६८) इतः 'कर्तरि' इत्यनुवर्त्तते, स एवात्र प्रथमया विपरिणम्यते ॥

५. कार्य्यातिदेशोऽयमित्याख्यातिके ॥ ६. सौकर्य्यातिशयादिति भावः ॥

७. यगात्मनेपदचिण् चिण्वद्भावाः प्रयोजनमित्याख्यातिके सू० ७३० ॥

८. देवदत्तः काष्ठं भिनत्ति, भिन्दतो देवदत्तस्य काष्ठं स्वयमेव भिद्यते । देवदत्त ओदनं पचति, पचतो देवदत्तस्यौदनः स्वयमेव पच्यते । इत्यधिकमाख्यातिके ॥

९. इदमप्यत्रावधेयम्—**"भिन्नः कुसूलः"** इत्यादौ कर्मवद्भावः प्रायः स **'तत्र लान्तस्य कर्मवदनुदेशः'** इति वार्त्तिकेन **'लिङ्याशिष्यङ्'** (अ० ३ । १ । ८६) इति 'ङिलकारको निर्देश' इति भाष्यवचनेन वा प्रतिषिध्यते ॥

कर्तृस्थभावकानाम्—चिन्तयति । मन्त्रयते । कर्तृस्थक्रियाणाम्—गच्छति । हसति । धावति । एषां कर्ता कर्मवन्न[1] भवति ॥

वत्करणं किमर्थम् । स्वाश्रयमपि यथा स्यात् । भिद्यते कुसूलेन । अत्र कर्त्राश्रया[2] तृतीया भवति ॥

'कर्मणा' इति किमर्थम् । करणाधिकरणाभ्यां तुल्यक्रियः कर्ता कर्मवन्मा भूत् । साध्वसिश्छिनत्ति । अत्रासेः करणस्य स्वतन्त्रं कर्तृत्वं, तस्य **कर्मवत्त्वं** न भवति । साधु स्थाली[3] पचति । अत्राधिकरणेन तुल्यक्रियस्य कर्तुः कर्मवद्भावो न स्यात्[4] ॥

अथ वार्त्तिकानि—

दुहिपच्योर्बहुलं सकर्मकयोः[5] ॥ १ ॥

दुग्धे गौः पयः स्वयमेव । तस्मादुदुम्बरः सलोहितं फलं पच्यते । यत् स्वतन्त्रं कर्म कर्तृत्वमापन्नं, अर्थात् कर्तैव भवति कर्मणो गन्धोऽपि न तस्यैव कर्मवद्भा[वो] भवति ॥ अत्र पयःफले कर्मणो वर्तेते, तस्मादप्राप्तं क[र्म]वत्त्वं विधीयते ॥ १ ॥

सृजियुज्योः श्यंस्तु[6] ॥ २ ॥

सृजियुज्योः सकर्मकयोः कर्मणा सह वर्तमानयोर्धात्वोः कर्ता [बहुलं] कर्मवद् भवति, [श्यंस्तु भवति] ।

सृजेः श्रद्धोपपन्ने कर्तरि कर्मवद्भावो वाच्यः चिणात्मनेपदार्थः ।[7]

सृज-धातोः श्रद्धामापन्नो यः कर्ता स कर्मवद् भवति । सृज्यतेमालाम् । असर्जि मालाम् ॥ अत्र कर्मवत्त्वादात्मनेपदम्, च्लेः स्थाने चिण् भवति । 'श्यंस्तु' इति वचनाच्छ्यन् भवति यङ् न भवति ॥

---

१. तथा हि भाष्ये—"**न च कर्तृस्थभावकानां कर्तृस्थक्रियाणां वा कर्मणि क्रियायाः प्रवृत्तिरस्ति ॥**"

२. अत्र भाष्यम्—**वत्करणं किमर्थम् । स्वाश्रयमपि यथा स्यात् "भिद्यते कुसूलेनेति । अकर्मकाणां भावे लो यथा स्यात्"** भावे तस्मिद्धो भवतीति लादेशेन कर्तुरनभिधानात् तृतीया भवतीत्यर्थः ॥

३. कादाचित्कस्वातन्त्र्यविवक्षाश्रया च कर्तृसंज्ञा भविष्यति । यथा हि—कारके (अ० १ । ४ । २३) इति सूत्रभाष्ये "·····**स्वतन्त्रपरतन्त्रत्वात् तयोः पर्यायेण वचनं वचनाश्रया च संज्ञा" तद्यथा—वलाहकाद् विद्योतते । वलाहके विद्योतते । वलाहको विद्योतत** इति ॥

४. 'तुल्यक्रियः' इति किमर्थम्—पचत्योदनं देवदत्तः, राध्यत्योदनः स्वयमेव ॥ **अत्र कर्मवद्भावो मा भूत्** ॥

५. आ० वा० ७३४ ॥ ६. आ० वा० ७३७ ॥

७. आ० वा० ७३८ । अ० ३ । १ । ८७ भाष्ये ॥

युजेस्तु न्याय्ये कर्मकर्तरि यकोऽभावाय । युज्यते ब्रह्मचारी योगम्[1] ॥

अत्रापि पूर्ववत् प्रयोजनम् । ब्रह्मचारिणं योगो युनक्ति । एवं प्राप्तौ प्रयुज्यते ॥२॥

करणेन तुल्यक्रियः कर्ता बहुलम् ॥ ३ ॥

'कर्मणा' इति ग्रहणात् सूत्रेण न प्राप्तं कर्मवत्त्वं विधीयते । करणेन तुल्यक्रियः कर्ता बहुलं कर्मवद् भवति । परिवारयन्ति कण्टकैर्वृक्षम् । परिवारयन्ते कण्टका वृक्षम् ॥ पशुखादनभयाल्लघुवृक्षं कण्टकैः परिवारयन्ति=आच्छादयन्ति । अत्र यस्मिन् पक्षे कर्मवद्भावस्तत्र कण्टक-शब्दे तृतीया न भवति । आत्मनेपदं भवत्येव । यक् च न भवति । अस्मिन् वार्तिके बहुलग्रहणात् 'साध्वसिश्छिनत्ति' इत्यत्र कर्मवद्भावो न दृश्यते ॥ ३ ॥

भूषाकर्म-किरादि-सनां चान्यत्रात्मनेपदात् प्रतिषेधो[2] वक्तव्यः ॥ ४ ॥

सूत्रेण सामान्यप्राप्तः कर्मवद्भावो विशेषत्वेन प्रतिषिध्यते । भूषाकर्मणां किरादीनां सन्नन्तानां च धातूनां कर्मणा तुल्यक्रियः कर्ता [आत्मनेपदादन्यत्र] कर्मवन्न भवति । अर्थादात्मनेपदार्थं कर्मणोत्यात्मनेपदं यथा स्यादिति प्रयोजनाय कर्मवद्भावो भवति । अन्यानि यक् चिणादिकार्याणि मा भूवन्निति प्रतिषिध्यते ॥

भूषाकर्मणाम्—भूषयते कन्या स्वयमेव[3], अबुभूषत कन्या स्वयमेव । मण्डयते कन्या स्वयमेव, अममण्डत कन्या स्वयमेव । अलङ्कुरुते कन्या स्वयमेव, अलमकृत

१. आ० वा० ७३८ । अ० ३ । १ । ८७ भाष्ये ॥

२. आ० वा० ७३९ ॥

३. अत्र महाभाष्यकारेण—**भूषयते कन्या स्वयमेव**'' इत्याद्युदाहृत्य भूषार्थकाणां स्वार्थणिच्यपि कर्मवद्भावस्य प्रतिषेध उच्यते । कुतः । यक्चिणोः प्रतिषेधो हेतुमण्णिश्चि० इति वार्त्तिकेन तु हेतुमण्णिच एव प्रतिषेध उक्तो भवति । यत्तु भारद्वाजीयानां णिमात्रे प्रतिषेध उच्यते तदपि तेषामेव मतम्. अतो भूषाकर्मकिरादिसनामित्यादिवार्त्तिके ण्यन्ताण्यन्तानामुभयेषामपि भूषाकर्मकाणां सर्वसम्मत्या ग्रहणं क्रियते । अन्यथा—'भूषयते स्वयमेव' इत्यादिभाष्योदाहरणमसङ्गतं स्यात् । (द्रष्टव्यमाख्यातिके सू० ७३०) ॥

किञ्च—

यदा तु भारद्वाजीयानां मतमाश्रीयते तदापि चिण्वद्भावप्रतिषेधार्थं ण्यन्तानां प्रतिषेधः कर्त्तव्य एव भवति, अन्यथा ''भूषयिष्यते'' इत्यत्र चिण्वद्भाव इटोऽसिद्धत्वाण्णिचो लुक् च स्यात् । अतो ण्यन्तार्थमण्यन्तार्थञ्च भूषाकर्मग्रहणम् । यत्तु ''अण्यन्तार्थं भूषा—ग्रहणमिति कैय्यट आह तच्चिन्त्यम् ।

इस प्रकरण में यह बात और ध्यान देने योग्य है कि कर्म—करण—अधिकरण आदि कारकों की विवक्षा (यथेष्ट अर्थात् इच्छानुसार कह सकना) वक्ता के अधीन बात को महामुनि पतञ्जलि ने **''कारके''** सूत्र के भाष्य में निम्न प्रकार दिखाया है—

कन्या स्वयमेव ।। किरादीनाम्—अवकिरते हस्ती स्वयमेव, अवाकीर्ष्ट हस्ती स्वयमेव । गिरते ग्रासः स्वयमेव, अगीर्ष्ट ग्रासः स्वयमेव ।। सनाम्—चिकीर्षते कटः स्वयमेव, अचिकीर्षिष्ट कटः स्वयमेव । अत्र सर्वत्र यक्चिणौ न भवत इति ।। ८७ ।।

कर्मवत् यहां सप्तमीसमर्थ कर्म शब्द से "तत्र तस्येव" सूत्र से 'वति' होता है ।।

जिस कर्म के कर्त्ता हो जाने पर भी क्रिया वैसी की वैसी जानी जावे जैसी कि कर्मावस्था में थी उस [कर्मणा] कर्म के साथ [तुल्यक्रियः] तुल्य क्रिया वाले कर्त्ता को [कर्मवत्] कर्मवद्भाव होता है ।।

यहां "कर्त्तरि शप्" से कर्त्तरि पद का अनुवर्त्तन होने के कारण 'तुल्यक्रियः' शब्द कर्त्ता का विशेषण है ।।

"वचनाश्रया च संज्ञा" (अ० १ । ४ । २३ । भाष्य) इस वचन से जब कर्त्ता को अविवक्षा हो, और सौकर्यातिशय (अपने आप प्रवृत्त होने) से कर्म के स्वातन्त्र्य की विवक्षा हो तब वह कर्म कर्तृभाव को प्राप्त होता है । उसको कर्मवद्भाव के अतिदेश से कर्म में विहित जो यक्, आत्मनेपद, चिण्, चिण्वद्भाव हैं वे उपर्युक्त कर्ता में भी हो जाते हैं ।।

जैसे—**देवदत्तः काष्ठं भिनत्ति, भिन्दतो देवदत्तस्य काष्ठं स्वयमेव भिद्यते । देवदत्तः केदारं लुनाति, लुनतो देवदत्तस्य केदारः स्वयमेव लूयते ।।** यहां कर्मवद्भाव से यक् और आत्मनेपद होता है । **अभेदि काष्ठं स्वयमेव । अलावि केदारः स्वयमेव ।** यहां कर्मवद्भाव से चिण् होता है । **कारिष्यते कटः स्वयमेव ।** यहां कर्मवद्भाव से कर्म में विहित चिण्वत् कार्य 'वृद्धि' हुई ।।

धातु चार प्रकार के होते हैं और यह चार प्रकार का भेद भी इसी सूत्र से जाना जाता है । ये चार भेद इस प्रकार हैं—**कर्मस्थभावकाः । कर्मस्थक्रियाः । कर्तृस्थभावकाः । कर्तृस्थक्रियाः ।।**

इस सूत्र से कर्मस्थभावक और कर्मस्थक्रिय धातुओं का ही कर्त्ता कर्मवत् होता है । कर्तृस्थभावक तथा कर्तृस्थक्रिय धातुओं का नहीं, क्योंकि इन के कर्म में क्रिया की इस प्रकार की प्रवृत्ति ही नहीं होती ।।

"स्वतन्त्रपरतन्त्रत्वात्तयोः पर्यायेण वचनं, वचनाश्रया च संज्ञा" तद्यथा—बलाहकाद्विद्योतते । बलाहके विद्योतते । बलाहको विद्योतते । यहां बलाहक (बादल) से बिजली चमक रही है, या बादल में बिजली चमक रही है, अथवा बादल चमक रहा है । वक्ता इन तीनों वाक्यों को अपनी इच्छानुसार बोल सकता है अर्थ तीनों का एक ही है पर तीनों में "बादल से" "बादल में" "बादल" यह तीनों कारक भिन्न भिन्न हैं । इसी नियम से इस प्रकृत सूत्र में भी कर्मकारक को कर्तृकारक की विवक्षा हो जाती है, यद्यपि "स्थाली पचति" आदि में स्थाली = बटलोई अधिकरण-कारक ही है क्योंकि उसी में डालकर पकाया जाता है पर वक्ता उसे कर्त्ता ही कहना चाहता है—'बटलोई पका रही है' सो कह सकता है यह यहां के इस प्रकरण का अभिप्राय है ।।

(सम्पादक)

जैसे—कर्मस्थभावकानाम्—**आसयति देवदत्तम् । शाययति देवदत्तम्,** यहां देवदत्त कर्म है उस में शयन स्थित है, अतः **आस्यते शय्यते वा देवदत्तः स्वयमेव**—यहां देवदत्त कर्म की कर्तृ विवक्षा होने पर भी भाव वैसा का वैसा लक्षित हो रहा है अतः यहां कर्मवद्भाव हो जाता है ॥

कर्मस्थक्रियाणाम्—**भिनत्ति काष्ठं, भिद्यते काष्ठं स्वयमेव ।** यहां भेदन क्रिया काष्ठ में स्थित है, अतः ऐसे धातुओं में कर्मवद्भाव होता है ॥

कर्तृस्थभावकानाम्—चिन्तयति मन्त्रयते ॥

कर्तृस्थक्रियाणाम्—गच्छति । हसति । धावति ॥ इन धातुओं का कर्त्ता कर्मवत् नहीं होता ॥

"वत्करण" इसलिये है कि—**भिद्यते** कुसूलेन—यहां स्वाश्रय-कार्य भाव में लकार हो जाता है, यदि कर्त्ता कर्म ही हो जावे तो अकर्मक न होने से भाव में लकार हो ही कैसे । उस लकार के द्वारा कर्त्ता के अनभिहित होने से यहां तृतीया विभक्ति हो जाती है ॥

कर्मणा—ग्रहण इसलिये है कि—करण और अधिकरण के साथ तुल्य क्रिया वाले कर्त्ता को कर्मवद्भाव नहीं होता ।

जैसे—**साध्वसिश्छिनत्ति** यहां असि करण की कर्तृत्व विवक्षा है अतः यहां कर्मवद्भाव नहीं होता ॥

साधु स्थाली पचति—यहां भी अधिकरण के साथ तुल्यक्रिया वाले कर्त्ता को कर्मवद्भाव नहीं होता ॥

'तुल्यक्रियः" ग्रहण इसलिये है कि—**पचत्योदनं देवदत्तः, राध्यत्योदनः स्वयमेव ।** यहां पचनक्रिया तथा राधनक्रिया के भिन्न भिन्न होने से कर्मवद्भाव नहीं होता

इस सूत्र पर निम्नवार्त्तिक हैं—

१—"**दुहिपच्योर्व०**"—सकर्मक दुह और पच धातुओं का कर्त्ता बहुल करके कर्मवत् हो । जैसे—**दुग्धे गौः पयः स्वयमेव । तस्मादुदुम्बरः सलोहितं फलं पच्यते ।** जहां कर्म स्वतन्त्रता की विवक्षा से कर्तृभाव को प्राप्त हो जाता है वहां ही कर्मवद्भाव होता है । अर्थात् जहां कर्त्ता ही हो कर्म का गन्धमात्र भी न हो वहीं कर्मवद्भाव होता है परन्तु यहां "**पयः**" और "**फलम्**" यह दोनों कर्म विद्यमान हैं अतः सूत्र से अप्राप्त कर्मवद्भाव का वार्त्तिक ने विधान किया । यहां "दुहि" धातु के द्विकर्मक होने से कर्मस्थभावक होने पर भी सकर्मक होने के कारण "**सकर्मकाणां प्रतिषेधो०**" भाष्य के इस वचन से इसमें कर्मवद्भाव प्राप्त नहीं था सो विधान करते हैं । "पच" भी इस विषय में द्विकर्मक है अकथित कर्म की कर्त्ता विवक्षा होने पर कर्मवत् होता है जो उक्त विषय में ही होगा "ओदनं पचति" आदि में नहीं होगा ॥

२—**वा०**—"**सृजियुज्योः०**" सकर्मक सृज और युज, धातुओं का कर्त्ता बहुल करके कर्मवत् हो और श्यन् भी हो, यहां 'श्यन्' यक् का अपवाद है ॥

सृजेः श्रद्धो०—श्रद्धायुक्त कर्त्ता में सृज धातु को चिण् और आत्मनेपद होने के लिये कर्मवद्भाव हो। जैसे—**सृज्यते मालाम्। असर्जि मालाम्।** यहां कर्मवद्भाव से आत्मनेपद, च्लि के स्थान में चिण् तथा "श्यंस्तु" इस वचन से यक् को बाध कर श्यन् होता है।

युज धातु के न्याय्य कर्मकर्त्ता में श्यन् होता है। जैसे—**"ब्रह्मचारिणं योगो युनक्ति"** इसके कर्मकर्त्ता में **"युज्यते ब्रह्मचारी योगम्"** ऐसा प्रयोग होता है।

३—वा०—**"करणेन तुल्यक्रियः०"**—इस सूत्र में कर्मणा ग्रहण से कर्मवद्भाव नहीं प्राप्त था, अतः इस वार्त्तिक से करण के साथ तुल्यक्रिया वाले कर्त्ता को भी बहुल करके कर्मवद्भाव का विधान किया। जैसे—**"परिवारयति कण्टकैर्वृक्षम्–परिवारयन्ते कण्टका वृक्षम्"।** पशु खा न जावें इस भय से छोटे वृक्ष को कांटों से ढांपता है। यहां कर्मवद्भाव पक्ष में कण्टक शब्द से तृतीया नहीं होती। यक् भी नहीं होता, आत्मनेपद हो जाता है। इस वार्त्तिक में बहुल ग्रहण करने से **"साध्वसिश्छिनत्ति"** यहां कर्मवद्भाव न हुआ ॥ ४ ॥

४—वा०—**"भूषाकर्म०"** सूत्र से कर्मवद्भाव सामान्य प्राप्त था सो विशेष अवस्था में कर्मवद्भाव का प्रतिषेध वार्त्तिक से किया है।

भूषण अर्थ वाले, किरादि तथा सन्नन्त धातुओं के कर्म के साथ तुल्यक्रिय कर्त्ता को आत्मनेपद को छोड़कर कर्मवद्भाव का प्रतिषेध होता है। अर्थात् इनको यक् चिण् और चिण्वद्भाव न हो, केवल आत्मनेपद ही हो ॥

भूषाकर्मकाणाम्—**भूषयते कन्या स्वयमेव। माता कन्यां भूषयति, कन्यां भूषयित्र्याः मातुः कन्या स्वयमेव भूषयते। अबुभूषत कन्या स्वयमेव। मण्डयते कन्या स्वयमेव। अममण्डत कन्या स्वयमेव। अलङ्कुरुते कन्या स्वयमेव। अलमकृत कन्या स्वयमेव ॥**

किरादीनाम्—**अवकिरते हस्ती स्वयमेव। अवाकीर्ष्ट हस्ती स्वयमेव। गिरते ग्रासः स्वयमेव। अगीर्ष्ट ग्रासः स्वयमेव ॥**

सन्—**चिकीर्षते कटः स्वयमेव। अचिकीर्षिष्ट कटः स्वयमेव।** यहां इच्छा कर्त्तृस्थ भी है तथापि करोति क्रिया की अपेक्षा से कर्मस्थ क्रिया जाननी चाहिये क्योंकि यहां "करोति" प्रधान है, इच्छा तो करोति के आधीन है स्वतन्त्र नहीं ॥ ८७ ॥

तपस्तपःकर्मकस्यैव[1] ॥ ८८ ॥

'कर्मवद्' इत्यनुवर्तते। तपः। ६। १। तपःकर्मकस्य। ६। १। एव। [अ०]। **'सत्यं तपो दमस्तपः[2]'** इत्यादीनि तपसो लक्षणानि तैत्तिरीयशाखायां सन्ति। तपः=सत्याचरणादिकर्म यस्य स तपःकर्मकस्तस्य। तपः[3]कर्मकस्यैव तप[4]- धातोः कर्ता कर्मवद् भवति नान्यकर्मकस्य। द्वितीयोऽपि नियमोऽस्मात् सूत्रान्निस्सरति, यदि सकर्मस्य

१. आ० सू० ७३१ ॥
२. तै० आ० प्र० १०। अ० ८ ॥
३. सकर्मकेष्विति भावः ॥
४. तप सन्तापे [भ्वा० प० अ०] ॥

कर्ता कर्मवत् भवेत्तर्हि तप एव ।। तप्यते तपः स्वर्गाय ब्रह्मचारी[1] । अत्र कर्मवद्भावेन यग् यथा स्यात् । अतप्त तपः स्वर्गाय । अत्र कर्मकर्तरि चिण् प्रतिषिध्यते[2] ।

'तपःकर्मकस्यैव' इति किम् । उत्तपति सुवर्णं सुवर्णकारः ।। ८८ ।।

यहां "कर्मवत्" का अनुवर्तन है । "सत्यं तपो दमस्तपः" इत्यादि तपके लक्षण तैत्तिरीय शाखा में किये हैं

[तपः कर्मकस्य] तप अर्थात् सत्याचरणादि कर्म हैं जिसके, ऐसा जो तपः कर्म वाला [तपः] तप धातु उसका ही कर्त्ता कर्मवत् हो अन्य कर्म वाले का नहीं, अर्थात् सकर्मकों में तप कर्म वाले ही तप का कर्त्ता कर्मवत् हो ।।

यह सूत्र नियमार्थ हैं कि सकर्मक धातुओं को कर्मवद्भाव हो तो तप ही को हो, सो भी तप कर्म वाले ही तप धातु को हो अन्य कर्म वाले को न हो ।।

जैसे—वेद व्रतादीनि तपांसि तापसं तपन्ति, स तापसस्त्वगस्थिभूतः स्वर्गाय तपस्तप्यते । तप्यते तपः स्वर्गाय ब्रह्मचारी ।।

वेदव्रतादि तप तापस अर्थात् तप करने वाले को कष्ट देते हैं वह तापस कृश होता हुआ भी भावी सुख की इच्छा से तप तपता है ।

पिछले सूत्र से कर्मवद्भाव प्राप्त नहीं था इस से विधान किया । अतप्त तपः स्वर्गाय । अन्वतप्त तपस्तापसः । यहां "तपोऽनुतापे च" सूत्र से चिण् का निषेध होकर सिच् हो जाता है ।।

तपः कर्मकस्यैव—ग्रहण इसलिये है कि—उत्तपति सुवर्णं सुवर्णकारः । यहां तपःकर्म के न होने से कर्मवद्भाव नहीं हुआ ।।

न दुहस्नुनमां यक्चिणौ[3] ।। ८९ ।।

'कर्मवद्[4]' इत्यनुवर्तते । न [अ०] । दुह-स्नु-नमाम् । ६ । ३ । यक्-चिणौ । १ । २ । [पूर्वेण] दुहादीनां कर्ता कर्मवद् भवति, परन्तु कर्मापदिष्टौ यक्चिणौ दुहादिभ्यो न भवत इति । दुह—दुग्धे गौः पयः स्वयमेव । अत्र कर्मवत्त्वादात्मनेपदं भवति, यग् न भवति । अदोहि गौः स्वयमेव, अदुग्ध गौः स्वयमेव । अत्र 'दुहश्च[5]' इति कर्मकर्तरि विकल्पेन चिण् भवति । तस्मादनेन सूत्रेण दुह-धातोर्यगेव प्रतिषिध्यते । स्नु—प्रस्नुते शोणितं स्वयमेव, प्रास्नोष्ट शोणितं स्वयमेव । नम्—नमते दण्डः स्वयमेव, अनंस्त दण्डः स्वयमेव । अत्रोभयत्र कर्मवद्भावादात्मनेपदमेव भवति । यक्चिणौ निवार्येते ।

---

१. वेदव्रतादीनि तपांसि तापसं तपन्ति, स तापसस्त्वगस्थिभूतः स्वर्गाय तपस्तप्यते, इत्यधिकमाख्यातिके ।।

२. तपोऽनुतापे च (अ० ३ । १ । ६५) इति सूत्रेणेति भावः ।।

३. आ० सू० ७३५ ।। ४. कर्मवद्भाव इत्यर्थः ।।

५. अ० ३ । १ । ६३ ।।

वा०—यक्चिणोः प्रतिषेधे णि-श्रि[1]-श्रन्थि-ग्रन्थि-ब्रूआमात्मनेपदाकर्मकाणा-मुपसङ्ख्यानम् ॥

ण्यन्तानां श्रि-श्रन्थि-ग्रन्थि-ब्रूआमात्मनेपदविधौ येऽकर्मकास्तेषां च कर्ता कर्मवद् भवति । कर्मापदिष्टौ यक्चिणौ न भवत इति । णि—कारयते कटः स्वयमेव, अचीकरत कटः स्वयमेव । उत्पुच्छयते गौः स्वयमेव, उदपुपुच्छत गौः स्वयमेव । श्रि—उच्छ्रयते दण्डः स्वयमेव, उदशिश्रियत दण्डः स्वयमेव । श्रन्थि—श्रथ्नीते ग्रन्थः स्वयमेव, अश्रन्थिष्ट ग्रन्थः स्वयमेव । ग्रन्थि—ग्रथ्नीते श्लोकः स्वयमेव, अग्रन्थिष्ट श्लोकः स्वयमेव । ब्रूआ—ब्रूते कथा स्वयमेव, अवोचत कथा स्वयमेव । आत्मनेपदाकर्मकाणाम्—आहते माणवकः स्वयमेव[2] आवधिष्ट माणवकः स्वयमेव । **'आङो यमहनः'**[3] इत्यात्मनेपदविधानम-कर्मकाद्धनः । अत्र यक्चिणौ वार्त्तिकेन निषिध्येते । आत्मनेपदं च विधीयत एव । तत्र कर्मवद्भावस्यैकमपरं प्रयोजनम्—आधानिष्यते माणवकः स्वयमेव । विकारिष्यते[4] सैन्धवः स्वयमेव । अत्र कर्मवद्भावेन चिण्वत् कार्यमपि यथा स्यात् ॥ ८९ ॥

[दुहस्नुनमाम्] दुह स्नु और नम इन धातुओं के कर्मवद्भाव में [यक्चिणौ] यक् और चिण् [न] न हों ।

दुह—दुग्धे गौः पयः स्वयमेव । यहां कर्मवत् होने से आत्मनेपद होता है परन्तु यक् नहीं होता । अदोहि गौः स्वयमेव । अदुग्ध गौः स्वयमेव । यहां "दुहश्च" इससे विकल्प करके चिण् होता है सो इस सूत्र ने दुह धातु से यक् का निषेध किया ॥ स्नु—प्रस्नुते शोणितं स्वयमेव । प्रास्नोष्ट शोणितं स्वयमेव । नम—नमते दण्डः स्वयमेव । अनँस्त दण्डः स्वयमेव ॥ यहां स्नु और नम में कर्मवत् होने से आत्मनेपद होता है, परन्तु यक् चिण् का निषेध इस सूत्र से हो जाता है ॥

---

१. अत्र भाष्ये त्वेवं पठ्यते—

यक्चिणोः प्रतिषेधे णिश्रिब्रूआमुपसंख्यानम् ॥ १ ॥ भारद्वाजीयाः पठन्ति—यक्चिणोः प्रतिषेधे णिश्रन्थिग्रन्थिब्रूआमात्मनेपदाकर्मकाणामुपसंख्यानम् ॥ २ ॥

तथैव चाख्यातिके वा० ७४० । ७४१ ॥

२. इदमत्रावधेयम्—सकर्मकस्यापि हन्तेर्यदा कर्मणोऽविवक्षायामकर्मकत्वं भवति, तदा 'आङो यमहनः [अ० १ । ३ । २८] इत्यात्मनेपदं विधीयते । यदा तु कर्मणः स्वातन्त्र्यविवक्षायां कर्तृत्वं, तदा कर्मवद्भावे सत्यात्मनेपदादयः प्राप्नुवन्ति । तत्र यक्चिणौ वार्त्तिकेन प्रतिषिध्येते । आत्मनेपदं चिण्वद्भावश्च भवत्येव ॥

विकुर्वत सैन्धवा इत्यत्र तु विपूर्वस्य करोतेरकर्मकत्वाद्यदान्तर्भावितण्यर्थं सकर्मकत्वं भवति तदा तस्य सौकर्यातिशयविवक्षायां कर्तृत्वे कर्मवद्भावः प्राप्नोति । यथा विकुर्वते सैन्धवाः वल्गन्ति इत्यर्थः । तान् यदाऽन्यो वल्गयति तदा तेषां कर्मत्वम्, पुनः सौकर्यत्वविवक्षायां कर्तृत्वे विकुर्वते सैन्धवाः स्वयमेव इत्यादि भवति ॥

३. अ० १ । ३ । २८ ॥ ४. अ० १ । ३ । ३५ ॥

१—वा०—यक्चिणोः प्रतिषेधे णिथिश्रन्थि० ।।

यक् और चिण् के प्रतिषेध प्रकरण में ण्यन्तों से—थि—श्रन्थि—ग्रन्थि—ब्रूञ् तथा आत्मनेपद में जो अकर्मक हैं उनका कर्त्ता कर्मवत् होता है, पर उनसे यक् चिण् नहीं होते ।

जैसे—णि—कारयते कटः स्वयमेव । अचीकरत कटः स्वयमेव ।।
उत्पुच्छयते गौः स्वयमेव । उदपुपुच्छत गौः स्वयमेव ।।
थि—उच्छ्रयते दण्डः स्वयमेव । उदशिश्रियत दण्डः स्वयमेव ।।
श्रन्थि—श्रथ्नीते ग्रन्थः स्वयमेव । अश्रन्थिष्ट ग्रन्थः स्वयमेव ।
ग्रन्थि—ग्रथ्नीते श्लोकः स्वयमेव । अग्रन्थिष्ट श्लोकः स्वयमेव ।।

ग्रन्थ और ग्रन्थ के "आधृषीय" होने से णिच् के अभाव पक्ष के लिये चुरादिकों का भी ग्रहण है । ग्रन्थते ग्रन्थमाचार्यः । श्रन्थते मेखलां देवदत्तः । ग्रन्थते ग्रन्थः स्वयमेव । श्रन्थते मेखला स्वयमेव । अश्रन्थिष्ट । अग्रन्थिष्ट ।

ब्रूञ्—ब्रते कथा स्वयमेव । अवोचत कथा स्वयमेव ।।

आत्मनेपदविधान में अकर्मक—आहते माणवकः स्वयमेव । आवधिष्ट माणवकः स्वयमेव, आघानिष्यते माणवकः स्वयमेव । जब 'हन' धातु के कर्म की अविवक्षा होती है तब "आङो यमहनः" इस सूत्र से आहते माणवकः में आत्मनेपद होता है अर्थात् अकर्मक हन धातु से आत्मनेपद होता है, जब हन्ति का कर्म स्वातन्त्र्य की विवक्षा से कर्त्ता बन जाता है तब उसको कर्मवद्भाव होने से आत्मनेपद, यक्, चिण्, और चिण्वद्भाव ये कार्य्य प्राप्त होते हैं उनमें से यक् और चिण् का इस वार्त्तिक से प्रतिषेध हो जाता है अर्थात् उक्त उदाहरणों में आत्मनेपद और चिण्वद्भाव ये दो ही कार्य्य होते हैं ।

विकुर्वते सैन्धवाः स्वयमेव । व्यकारिषत सैन्धवाः स्वयमेव । व्यकारिष्यत सैन्धवः स्वयमेव । वि पूर्वक करोति धातु जब अकर्मक होता है तब 'अकर्मकाच्च' सूत्र से आत्मनेपद होता है किन्तु जब उसमें अन्तर्भावित ण्यर्थ की कल्पना की जाती है तब वही वि-पूर्वक करोति धातु सकर्मक बन जाता है, जब सौकर्य्यातिशय की विवक्षा से कर्म कर्त्ता बन जाता है तब उसको कर्मवद्भाव के अतिदेश से आत्मनेपदादि प्राप्त होते हैं । उनमें से यक् और चिण् का इस वार्त्तिक से प्रतिषेध हो जाता है ।।

कुषिरजोः प्राचां श्यन् परस्मैपदं च[1] ।। ६० ।।

अत्र 'सार्वधातुके यक्'[2] इति सूत्रात् सार्वधातुक-ग्रहणमनुवर्तते । [कुषिरजोः । ६ । २ । प्राचाम् । ६ । ३ । श्यन् । १ । १ । परस्मैपदम् । १ । १ । च अ० ।] कुषि-रजोर्धात्वोः कर्ता कर्मवद् भवति । एताभ्यां श्यन् प्रत्ययः परस्मैपदं च भवति प्राचामाचार्याणां मतेन । कर्मवद्भावेन यक् प्राप्तस्तस्यापवादः श्यन् । आत्मनेपदस्यापवादः परस्मैपदम् ।।

१. आ० सू० ७४२ ।। २. अ० ३ । १ । ६७ ।।

कुष्यति पादः स्वयमेव । रज्यति वस्त्रं स्वयमेव । अत्र 'प्राचाम्' इति ग्रहणं विकल्पार्थम् । तेन कुष्यते पादः स्वयमेव । रज्यते वस्त्रं स्वयमेव ॥

अत्र 'सार्वधातुके' इत्यनुवर्तनात् स्यादीन् विकरणान् श्यन् विकरणो न बाधते । तत्रात्मनेपदमेव भवति । लकारावस्थायां विहितत्वात् स्यादयोऽन्तरङ्गाः । लकारादेशानां सार्वधातुक-सञ्ज्ञा, तदा श्यन्-परस्मैपदयोः प्राप्तिः, अतः श्यन्-परस्मैपदे बहिरङ्गे । **असिद्धं बहिरङ्गमन्तरङ्गे**[1] इति स्यादय एव भवन्ति । चुकुषे पादः स्वयमेव । ररञ्जे वस्त्रं स्वयमेव । कोषिष्यते पादः स्वयमेव । रङ्क्ष्यते वस्त्रं स्वयमेव । कोषिष्ट पादः स्वयमेव । रङ्क्षीष्ट वस्त्रं स्वयमेव । अकोषि पादः स्वयमेव । अरञ्जि वस्त्रं स्वयमेव । अत्र सर्वत्र स्यादयो विकरणा आत्मनेपदं च भवति, किन्त्वस्य सूत्रस्य प्रवृत्तिर्न भवतीति ॥ ९० ॥

॥ इति कर्मवद्भावप्रकरणम् ॥

इस सूत्र में "**सार्वधातुके यक्**" सूत्र से सार्वधातुक का अनुवर्त्तन है ।

[**प्राचाम्**] प्राग्देशीय आचार्यों के मत में [**कुपिरजोः**] कुप और रज धातु को कर्मवद्भाव में [**श्यन् परस्मैपदञ्च**] श्यन् और परस्मैपद हो, यक् और आत्मनेपद नहीं होते ॥

जैसे—कुष्यति, कुष्यते वा पादः स्वयमेव । रज्यति, रज्यते वा **वस्त्रं स्वयमेव** । यहां "प्राचाम्" ग्रहण विकल्प के लिये है और वह व्यवस्था से माना जाता है इससे लिङ् लिट् और स्यादि विषय में यह सूत्र नहीं प्रवृत्त होता । चुकुषे पादः स्वयमेव । **ररञ्जे वस्त्रं स्वयमेव** । कोषिषीष्ट पादः स्वयमेव । रङ्क्षीष्ट वस्त्रं स्वयमेव । कोषिष्यते पादः स्वयमेव । रङ्क्ष्यते वस्त्रं स्वयमेव । अकोषि पादः स्वयमेव । अरञ्जि-वस्त्रं स्वयमेव ॥

[यह कर्मवद्भाव का प्रकरण समाप्त हुआ ॥]

---

१. पा० ४३ ॥ अ० ८ । ३ । १४ ॥

धातोः[1] ॥ ९१ ॥

धातोः । ५ । १ ॥ अधिकारसूत्रमिदम् ॥

तृतीयाध्यायपर्यन्तं यत्कार्यं विधीयते धातोरेव तद्वेदितव्यम् ॥ तव्यदादयः प्रत्यया धातोः पर एव स्युः ॥ कर्त्तव्यम् । करणीयम् ॥

यह अधिकार सूत्र है ॥

तीसरे अध्याय के अन्त तक जो कार्य कहेंगे वे धातु से ही होते हैं ऐसा जानना चाहिये ॥

'तव्यत्' आदि प्रत्यय धातु से परे होते हैं ॥

जैसे—**कर्त्तव्यम् । करणीयम् ॥ ९१ ॥**

तत्रोपपदं सप्तमीस्थम् ॥ ९२ ॥

तत्र [अ०] उपपदम् । १ । १ । सप्तमीस्थम् । १ । १ ॥ उपपदमित्यन्वर्था संज्ञेयम् ॥ उप=समीपोच्चारितं पदमुपपदम् ॥ सप्तम्यां विभक्तौ तिष्ठतीति सप्तमीस्थम् ॥

तत्रैतस्मिन् धात्वधिकारे सप्तमीस्थं सप्तमीनिर्दिष्टं पदमुपपदसंज्ञं भवति ॥

'**कर्मण्यण्**[2]' कुम्भकारो-नगरकारः । अत्र कुम्भनगरशब्दयोरुपपदसंज्ञा, तत 'उपपदमतिङ्[3]' इति समासः ॥

'तत्र' इति किम्—तद्धित उपपदसंज्ञा मा भूत् ॥ अन्वर्थसंज्ञा किमर्था—'आहर कुम्भं करोति कटम्' अत्रोपपदसंज्ञा मा भूत् ॥ 'स्थ' ग्रहणं किमर्थम्—अक्रियमाणे स्थग्रहणे यत्र सूत्रेषु प्रयोगेष्वपि सप्तमी श्रूयते तत्रैवोपपदसंज्ञा स्यात्—स्तम्बेरमः, कर्णेजपः । इह न स्यात्—कुम्भकारो नगरकार इति, अत्र प्रयोगेषु सप्तमी न श्रूयते, स्थ-ग्रहणेन सूत्रेषु निर्दिष्टं सप्तम्यन्तमुपपदसंज्ञं भवति ॥ ९२ ॥

'उपपदम्' यह अन्वर्थसंज्ञा है । उप=समीप में उच्चारित जो पद वह 'उपपद' कहाता है । सप्तमी विभक्ति में स्थित जो पद वह सप्तमीस्थ कहाता है ॥

[तत्र] इस धातु के अधिकार में [**सप्तमीस्थम्**] सप्तमी निर्दिष्ट पद [**उपपदम्**] उपपद संज्ञक होता है ॥

जैसे—'**कर्मण्यण्**' इस सूत्र में कर्मपद सप्तम्यन्त होने से **कुम्भकारः** और **नगरकारः** इत्यादि उदाहरणों में कुम्भ और नगर पदों की इस सूत्र से उपपद संज्ञा होकर '**उपपदमतिङ्**' सूत्र से समास हो जाता है ॥

'तत्र' ग्रहण इसलिये है कि—तद्धित अधिकार में उपपद संज्ञा न हो ।

अन्वर्थसंज्ञा का यह प्रयोजन है कि—'**आहर कुम्भं करोति कटम्**' यहां कुम्भ-पद की उपपदसंज्ञा नहीं होती, क्योंकि 'कुम्भ' पूर्व के साथ सम्बद्ध है, और 'करोति' आगे के साथ, अतः दोनों परस्पर असमर्थ हैं, इसलिये यहां समास भी नहीं होता ॥

---

१. आ० सू० २ ॥ २. अ० ३ । २ । १ ॥
३. अ० २ । २ । १९ ॥

'सप्तमीस्थम्' इस पद में 'स्थ' ग्रहण का यह प्रयोजन है कि जहां सप्तमी का श्रवण हो या न हो वहां पर भी उपपद संज्ञा हो जाय। यदि 'स्थ' ग्रहण न करते तो जहां जहां सूत्र में और प्रयोगों में 'सप्तमी, तथा 'सप्तम्यन्त' का श्रवण होता, वहीं वहीं उपपद संज्ञा होकर 'स्तम्बेरमः', 'कर्णेजपः' इत्यादि में ही उपपद संज्ञा होती, परन्तु 'कुम्भकारः' और 'नगरकारः' इत्यादि में उपपदसंज्ञा नहीं होती, क्योंकि इन प्रयोगों में सप्तमी विभक्ति का श्रवण नहीं होता, स्थग्रहण से सूत्रों में जो सप्तमीनिर्दिष्ट है उसकी ही उपपद संज्ञा होती है ॥ ९२ ॥

कृदतिङ्[1] ॥ ९३ ॥

कृत् । १ । १ । अतिङ् । १ । १ ॥ धातोर्विहितास्तिङ्भिन्नाः प्रत्ययाः कृत्संज्ञा भवन्ति ॥ कर्त्ता । कारकः । कर्त्तव्यम् । अत्र कृत्संज्ञाश्रया **'कृत्तद्धितसमासाश्च'[2]** इति प्रातिपदिकसंज्ञा, ततः स्वाद्युत्पत्तिः ॥

'अतिङ्' इति किम्—पचति । पठति । अत्र कृत्प्रातिपदिकसंज्ञाभ्यां स्वाद्युत्पत्ति र्मा भूत् ॥ ९३ ॥

धातु से विहित [अतिङ्] तिङ् भिन्न प्रत्यय [कृत्] कृत्संज्ञक होते हैं।

जैसे—**कर्त्ता । कारकः । कर्त्तव्यम् ।** यहां तृच्-ण्वुल्-तव्यत् प्रत्ययों की 'कृत्' संज्ञा होने से **'कृत्तद्धितसमासाश्च'** इस सूत्र से कृदन्त की प्रातिपदिक संज्ञा हुई, और प्रातिपदिक संज्ञा होने से स्वादि की उत्पत्ति हुई ॥

'अतिङ्' ग्रहण इसलिये है कि—पचति । पठति । यहां तिङन्त पदों की कृत् संज्ञा होने से स्वादि की उत्पत्ति न हो ॥ ९६ ॥

वाऽसरूपोऽस्त्रियाम्[3] ॥ ९४ ॥

वा [अ०] असरूपः । १ । १ । अस्त्रियाम् । ७ । १ ॥ समानं रूपमस्य स सरूपो न सरूपोऽसरूपः, भिन्नरूपो विरुद्धरूपो वा ॥

अस्मिन् धात्वधिकारेऽसरूपः, प्रत्ययो विकल्पेन भवति स्त्र्यधिकारं विहाय ॥ सर्वत्रापवादेनोत्सर्गा बाध्यन्ते तत्रासरूपोऽपवादो विकल्पेन बाधकः स्यादिति प्रयोजनाय सूत्रमिदमारभ्यते, पक्ष उत्सर्गस्य प्रवृत्तिः । यथा—**'ण्वुल् तृचौ'[4]** उत्सर्गौ **'इगुपधज्ञा-प्रीकिरः कः'[5]** इति तयोरपवादः । तत्र विक्षिप इति कः । पक्षे तावपि भवतः विक्षेपकः, विक्षेप्ता ॥

---

१. आ० सू० ३ ॥
२. अ० १ । २ । ४६ ॥
३. आ० सू० ९११ ॥
४. अ० ३ । १ । १३३ ॥
५. अ० ३ । १ । १३५ ॥

'असरूप' इति किम्—उत्पत्तौ ये प्रत्यया विरूपाः प्रयोगे च सरूपा अर्थात् सानुबन्धका विरूपा, निरनुबन्धकाश्च सरूपास्तत्रोत्सर्गापवादौ विकल्पेन मा भूताम् ; यथा—'**कर्मण्यण्**[1]' इत्युत्सर्गः। '**आतोऽनुपसर्गे कः**[2]' इति तस्यापवादः स नित्यं बाधको भवति। गोदः। कम्बलदः। अत्रोत्सर्गकृतोऽण् न भवति ॥

'अस्त्रियाम्' इति किमर्थम्—'**स्त्रियां क्तिन्**[3]' इत्युत्सर्गः। '**अ प्रत्ययात्**[4]' इति तस्यापवादः स नित्यं बाधको भवति। जुगुप्सा। तितिक्षा। मीमांसा। अत्रोत्सर्गकृतः क्तिन्न भवतीति ॥ ९४ ॥

जिन का रूप परस्पर समान हो वह सरूप कहाते हैं, सरूप से विपरीत अर्थात् भिन्न रूप वाले 'असरूप' कहाते हैं ॥

इस धात्वधिकार में [**अस्त्रियाम्**] स्त्री अधिकार के प्रत्ययों को छोड़कर [असरूपः] असमानरूप प्रत्यय [वा] विकल्प कर के होते हैं ॥ सब जगह अपवाद उत्सर्ग को बाध लेते हैं, इस अधिकार में असमान रूप वाले प्रत्यय अपवाद होने पर उत्सर्ग का विकल्प से बाधन करें इस प्रयोजन के लिये यह सूत्र है। दूसरे पक्ष में उत्सर्ग की भी प्रवृत्ति होती है ॥

जैसे—'ण्वुल् तृचौ' यह उत्सर्ग सूत्र, और 'इगुपधज्ञाप्रीकिरः कः' यह इस का अपवाद है, अतः विक्षिपः—यहां 'क' प्रत्यय हुआ, पक्ष में विक्षेप्ता, विक्षेपकः यहां तृच् और ण्वुल् भी हो जाते हैं ॥

'असरूप' ग्रहण इसलिये हैं कि—जो प्रत्यय उत्पत्ति अवस्था में अनुबन्धों की भिन्नता से विरूप हैं, तथा प्रयोग में निरनुबन्ध होने से सरूप हैं, वह प्रत्यय विकल्प करके न हों।

जैसे—'कर्मण्यण्' इस सूत्र से विहित अण् प्रत्यय उत्सर्ग है और 'आतोऽनुपसर्गे कः' इस सूत्र से विहित 'क' प्रत्यय अण् का अपवाद है, अतः 'क' प्रत्यय 'अण्' का अपवाद नित्य ही होता है ॥

जैसे—गोदः। कम्बलदः। यहां उत्सर्ग अण् नहीं होता ॥

'अस्त्रियाम्' ग्रहण इसलिये है कि—'स्त्रियां क्तिन्' इस सूत्र से विहित क्तिन् प्रत्यय उत्सर्ग है सो उसका 'अ प्रत्ययात्' सूत्र से विहित 'अ' प्रत्यय नित्य बाधक होता है ॥

जैसे—जुगुप्सा। तितिक्षा। मीमांसा। यहां उत्सर्ग क्तिन् प्रत्यय नहीं होता ॥ ९४ ॥

कृत्याः[5] ॥ ९५ ॥

कृत्याः। १। ३ ॥ अधिकारसूत्रमिदम् ॥
इतोऽग्रे ये प्रत्यया विधास्यन्ते कृत्यसंज्ञा तेषां विज्ञेया ॥

---

१. अ० ३। २। १ ॥
२. अ० ३। २। ३ ॥
३. अ० ३। ३। ९४ ॥
४. अ० ३। ३। १०२ ॥
५. आ० सू० ९१२ ॥

क्व पर्यन्तं कृत्यसंज्ञेति ? । उच्यते ! **'अर्हेकृत्यतृचश्च'**[1] इत्यस्मिन् सूत्रे तृज्ग्रहणेन ज्ञायते 'ण्वुल् तृचौ' इति सूत्रात्पूर्वमियं संज्ञा भवति । यदि तृचोऽपि कृत्यसंज्ञा स्यात् तृज्ग्रहणमनर्थकं स्यात् ।। गन्तव्यो ग्रामो देवदत्तस्य देवदत्तेन वा । अत्र कृत्यसंज्ञया **'कृत्यानां कर्त्तरि वा'**[2] इति विकल्पेन कर्त्तरि षष्ठी ।। ९५ ।।

यह अधिकार सूत्र है ।।

यहां से आगे जिन प्रत्ययों को कहेंगे उन की [कृत्याः] कृत्य संज्ञा जाननी चाहिये ।।

कृत्य संज्ञा कहां तक है यह बात 'अर्हे कृत्यतृचश्च' इस सूत्र में कृत्य के साथ तृच् प्रत्यय के ग्रहण करने से जानी जाती है कि "ण्वुल् तृचौ' सूत्र से पूर्व पूर्व कृत्य संज्ञा होती है, यदि तृच् की भी कृत्यसंज्ञा होती तो तृच् का पृथक् ग्रहण अनर्थक होता है, अतः अनर्थक होकर यह जताता है कि 'ण्वुल् तृचौ' से पूर्व कृत्य संज्ञा होती है ।।

जैसे—**गन्तव्यो ग्रामो देवदत्तस्य देवदत्तेन वा** । यहां कृत्य संज्ञा के होने से 'कृत्यानां कर्त्तरि वा' इस सूत्र से विकल्प करके कर्त्ता में षष्ठी होती है, पक्ष में तृतीया भी होती है ।। ९५ ।।

तव्यत्तव्यानीयरः[3] ।। ९६ ।।

प्रत्यय इति धातोरिति चानुवर्तते ।। तव्यत्तव्यानीयरः । १ । ३ ।।

धातोः परे तव्यत्-तव्य--अनीयर्-इत्येते प्रत्यया भवन्ति ।। तकारोऽनुबन्धः स्वरितार्थः । अनीयरि रेफानुबन्धः स्वरार्थः[4] । **भवितव्यम् । भवितव्यम् ।** अत्र स्वरे भेदः । **भवनीयम् ।।**

१—वा०—*केलिमर उपसंख्यानम्*[5] ।।

तव्यदादिषु धातोः केलिमर्[6] प्रत्ययो भवति । अत्रापि रेफानुबन्धः स्वरार्थः । पचेलिमा माषाः, पक्तव्या इत्यर्थः । भिदेलिमाः सरलाः, भेत्तव्या इत्यर्थः । ककारानुबन्धेन भिदेलिमा इत्यत्र गुणो न भवति ।। १ ।।

२—वा०—*वसेस्तव्यत् कर्त्तरि णिच्च*[7] ।।

---

१. अ० ३ । ३ । १६९ ।। २. अ० २ । ३ । ७१ ।।

३. आ० सू० ९१५ ।।

४. 'उपोत्तमं रिति' (अ० ६ । १ । २१७) स्वरार्थः ।।

५. आ० वा० ११६ ।। (ख) भा ३ । १ । ९६ ।।

६. यदत्र जयादित्येन 'कर्मकर्त्तरि चायमिष्यते' इत्युक्तं तद्भाष्यविरुद्धम्, भाष्ये कर्मण्युदाहृतत्वात्, यथाहि—'पचेलिमा माषाः, पक्तव्या इत्यर्थः' इत्यादि ।।

७. आ० वा० ९१७ ।। अ० ३ । १ । ९६ भा० ।।

'**तयोरेव कृत्यक्तखलर्थाः**'[1] इति भावकर्मणोः कृत्या विधीयन्ते । अतः 'कर्त्तरि' इत्युच्यते । 'वस' धातोः कर्त्तरि तव्यत् प्रत्ययो भवति णिद्वच्च । वसतीति वास्तव्यः । णित्वादत्र वृद्धिः ॥ ९६ ॥

यहां 'प्रत्यय' तथा 'धातु' का अनुवर्त्तन है ॥

धातु से [तव्यत्तव्यानीयरः] तव्यत् तव्य और अनीयर् प्रत्यय हों ॥ तकार का अनुबन्ध स्वरित के लिये है और अनीयर् में रेफ का अनुबन्ध स्वर के लिये है । जैसे—**भवितव्यम् । भवितव्यम् ।** यहां स्वर में भेद हो जाता है । **भवनीयम् ॥**

१—वा०—'**केलिमर उप०**' धातु से कर्म में केलिमर् प्रत्यय हो । यहां भी रेफानुबन्ध स्वर के लिये है ॥ जैसे पक्वेलिमा माषाः पक्तव्या इत्यर्थः, भिदेलिमाः सरलाः, भेत्तव्या इत्यर्थः । ककार के अनुबन्ध करने से भिदेलिमा इसमें '**पुगन्तलघूपधस्य च**' (अ० ७ । ३ । ८६) इस सूत्र से गुण प्राप्त था वह न हुआ ॥

२—वा०—"**वसेस्तव्यत् कर्त्तरि०**" वस धातु से कर्त्ता में तव्यत् प्रत्यय और वह णिद्वत् भी हो यह कहना चाहिये ॥ '**तयोरेव कृत्यक्तखलर्थाः**' इस नियम से कृत्यप्रत्ययों का विधान भाव और कर्म में होता है अतः कर्त्ता में विधान किया ॥

जैसे—**वसतीति वास्तव्यः** । यहां णिद्वत् होने से **अत उपधायाः** (अ० ७ । २ । ११६) सूत्र से वृद्धि हुई ॥ ९६ ॥

अचो यत्[2] ॥ ९७ ॥

अचः । ५ । १ । यत् । १ । १ ॥ अजन्ताद्धातोर्यत् प्रत्ययो भवति ॥

देयम् । धेयम् । गेयम् । अध्येयम् ॥

'**अचः**' इति किम्—अजन्तभूतपूर्वादपि यद् यथा स्यात् । दित्स्यम् । धित्स्यम् । अत्र दित्सधित्सधात्वोरार्द्धधातुकविषये[3] ऽकारलोपे कृते हलन्तत्वाण्ण्यन्मा भूत् ॥

१—वा०—*तकिशसिचतियतिजनीनामुपसंख्यानम्*[4] ॥

तक्यादिभ्योऽपि यत् प्रत्ययो भवति । हलन्तत्वान्न प्राप्तः । तक्यम् । शस्यम् । चत्यम् । यत्यम् । जन्यम् ॥ १ ॥

२—वा०—**हनो वा वध च**[5] ॥

हन् धातोर्विकल्पेन यत् प्रत्ययस्तत्सन्नियोगेन वधादेशश्च भवति पक्षे हलन्तत्वाण्ण्यदेव । वध्यम् । घात्यम् ॥ ९७ ॥

---

१. अ० ३ । ४ । ७० ॥ २. आ० सू० ११९ ॥
३. आर्द्धधातुके [अ० ६ । ४ । ४६] इति विषयसप्तमीमाश्रित्य समाधानमिदम् ।
४. (क) आ० वा० ९२१ ॥ (ख) अ० ३ । १ । ९७ भा० ॥
५. (क) अ० ३ । १ । ९७ भा० ॥ (ख) आ० वा० ९२२ ॥

[अचः] अजन्त धातु से [यत्] यत् प्रत्यय हो ॥

जैसे—देयम् । धेयम् । गेयम् । अध्येयम् ॥

'अचः' ग्रहण इसलिये है कि—जो धातु प्रथम तो अजन्त हों पुनः हलन्त हो जायें उन से भी यत् प्रत्यय हो जावे । जैसे—दित्स्यम् । धित्स्यम् यहां 'दित्स-धित्स' धातु आर्द्धधातुक विषय में अकार लोप करने के अनन्तर हलन्त हो जाते हैं, उनसे भी ण्यत् को बाध कर यत् ही हो ॥

१—वा०—"तकिशसिचति०" तकि आदि धातुओं से यत् प्रत्यय हो, हलन्त होने से ण्यत् प्राप्त था वह न हुआ ॥

जैसे—तक्यम् । शस्यम् । चत्यम् । यत्यम् । जन्यम् ॥ १ ॥

यहां जन धातु से यत् प्रत्यय का विधान केवल स्वर के लिये है, क्योंकि ण्यत् पक्ष में भी 'जनिवध्योश्च' (अ० ७ । ३ । ३५) इस सूत्र से वृद्धि का प्रतिषेध होने पर 'जन्यम्' रूप सिद्ध हो ही जाता है ॥

२—वा०—'हनो वा वध च' हन धातु से यत् प्रत्यय और हन को 'वध' आदेश विकल्प से होता है ॥

जैसे—वध्यम् । पक्ष में ण्यत्—घात्यम् ॥ ९७ ॥

पोरदुपधात्[1] ॥ ९८ ॥

'यत्' इत्यनुवर्त्तते । हलन्तत्वाण्ण्यतोऽपवादः । पोः । ५ । १ । अदुपधात् । ५ । १ ॥ अत्=अकार उपधायां यस्य तस्मात् । अदुपधात् पवर्गान्ता द्व धातोर्यत् प्रत्ययो भवति ॥ शप[2] आक्रोशे—शप्यम् । जप्यम् । रभ्यम् । लभ्यम् । जम्यम् ॥

पोः' इति किम्—पाठ्यम् ॥ 'अदुपधात्' इति किम्—गोप्यम् । धूप्यम् । अत्र यन्न भवेत् ॥ ९८ ॥

यहां 'यत्' का अनुवर्त्तन है ॥ हलन्त होने से ण्यत् का अपवाद है ॥

[अदुपधात्] अकार जिस की उपधा में हो ऐसे [पोः [पवर्गान्त धातु से यत् प्रत्यय हो ॥

जैसे—शप आक्रोशे—शप्यम् । जप्यम् । रभ्यम् । लभ्यम् । जम्यम् ॥

'पोः' ग्रहण इसलिये है कि—पाठ्यम् । यहां यत् प्रत्यय नहीं होता ॥ 'अदुपधात्' ग्रहण इसलिये है कि—गोप्यम् । धूप्यम् । यहां यत् न हो ॥ ९८ ॥

शकिसहोश्च[3] ॥ ९९ ॥

अयमपि ण्यत एवापवादः ॥ शकिसहोः । ६ । २ । च [अ०] ॥ प्रातिपदिक-निर्देशो[4]ऽयं तत्र यया कयाचिद्विभक्त्या निर्देशः कृतः । शक्लृ[5] शक्तौ । षह[6] मर्षणे इत्येताभ्यां यत् प्रत्ययो भवति ॥ शक्यम् । सह्यम् ॥ ९९ ॥

---

१. आ० सू० ९२३ ॥
२. धा०—भ्वा०—९८५ ॥
३. आ० सू० ९२४ ॥
४. द्र० स्थानिवत्(१ । १ । ५६) सूत्रभाष्ये ।
५. धा०—स्वा०—१५ ॥
६. धा०—भ्वा०—८४२ ॥

यह भी ण्यत् का अपवाद है। प्रत्ययविधि में पञ्चमीविभक्ति के द्वारा ही निर्देश होता है परन्तु यहां षष्ठीविभक्ति इस कारण है कि प्रातिपदिकनिर्देश में विभक्ति अविवक्षित होती है ॥

[शकिसहोः] शक्ल और सह धातु से यत् प्रत्यय हो ॥

जैसे—शक्यम् । सह्यम् ॥

गदमदचरयमश्चानुपसर्गे[1] ॥ १०० ॥

'यत्' इत्यनुवर्त्तते । अत्रापि गदादिभ्यो हलन्तत्वाण्यत् प्राप्तस्तस्यापवादः । 'यम्,—धातोश्च **पोरदुपधा**[2]दिति सामान्येन प्राप्तो यद विशेषत्वेन विधीयते ॥ गदमदचरयमः । ५ । १ । च [अ०] अनुपसर्गे । ७ । १ ॥ गदादीनां समाहारद्वन्द्वः ॥ **गद**[3] **व्यक्तायां वाचि । मदी**[4] **हर्षे । चर**[5] **गतिभक्षणयोः । यम**[6] **उपरमे ।** उपसर्गरहितेभ्यो गदादिभ्यः परो यत् प्रत्ययो भवति ॥ गद्यम् । मद्यम् । चर्य्यम् । यम्यम् ॥

'अनुपसर्गे' इति किम्—प्रगाद्यम् । प्रमाद्यम् । प्रचार्य्यम् । नियाम्यम् । अत्र ण्यदेव यथा स्यात् ॥

१—वा०—*उपसर्गाच्चरेराङि चागुरौ*[7] ॥

आङुपसर्गपूर्वाच्चरधातोर्यत् प्रत्ययो भवति अगुरौ=गुरोरितरेऽर्थे वाच्ये । आचर्यो देशः ॥

'अगुरौ' इति किम्—आचार्य्य उपनयमान[8] अत्रापि ण्यदेव भवति ॥ १०० ॥

'यत्' का अनुवर्त्तन है । गदादि धातुओं के हलन्त होने के कारण 'ण्यत्' प्राप्त था उसका यह अपवाद है । यम धातु का ग्रहण केवल अनुपसर्ग के लिये है; क्योंकि यम धातु से यत् प्रत्यय तो 'पोरदुपधात्' सूत्र से सिद्ध ही था ॥ गदादियों में समाहार द्वन्द्व समास है ॥

[अनुपसर्गे] उपसर्ग पूर्व न हो तो [गदमदचरयमः] गद मद चर और यम धातु से यत् प्रत्यय हो ॥

जैसे—गद्यम् । मद्यम् । चर्य्यम् । यम्यम् ॥

'अनुपसर्गे' ग्रहण इसलिये है कि—प्रगाद्यम् । प्रमाद्यम् । प्रचार्य्यम् । नियाम्यम् । यहां सोपसर्गों से ण्यत् ही हो ॥

---

१. आ० सू० ९२५ ॥ २. अ० ३ । १ । ९८ ॥
३. धा०—भ्वा०—५३ ॥ ४. धा०—दिवा०—१०० ॥
५. धा०—भ्वा०—५५० ॥ ६. धा०—भ्वा०—९६९ ॥
७. आ० वा० ९२६ ॥ (ख) भा०—३ । १ । १०० ॥
८. अथ० ११ । ५ । ३ ॥

१—वा०—"उपसर्गाच्चरेराङि०"—सूत्र में अनुपसर्ग चर धातु से यत् किया है, परन्तु आङ् पूर्वक चर धातु से भी यत् प्रत्यय का विधान करना चाहिये यदि गुरु अभिधेय न हो तो ॥

जैसे—आचरितुं योग्य आचर्यो देशः ॥

'अगुरौ' ग्रहण इसलिये है कि—'आचार्य उपनयमानः' यहां ण्यत् ही हो ॥ १०० ॥

अवद्यपण्यवर्य्या गर्ह्यपणितव्यानिरोधेषु[1] ॥ १०१ ॥

ण्यत एवापवादः । अवद्यपण्यवर्य्याः । १ । ३ । गर्ह्यपणितव्याऽनिरोधेषु । ७ । ३ ॥ गर्ह्य=निन्द्यम्, पणितव्यं=क्रयणीयम्, अनिरोधोऽप्रतिबन्धः, एतेषु त्रिष्वर्थेषु यथाक्रममवद्यपण्यवर्य्या इति यत् प्रत्ययान्तास्त्रयः शब्दा निपात्यन्ते ॥ अवद्यं वाक्यम् । पण्यः कम्बलः । पण्या शाटी । वर्य्या ब्राह्मणी, स्वतन्त्रा इत्यर्थः ॥

गर्ह्यादिष्विति किम्—अनुद्यम् । अत्र 'वदः सुपि [क्यपि[2]]' ति क्यप् । पाण्यो ब्राह्मणः, स्तुत्य इत्यर्थः । अत्र हलन्तत्वाण्ण्यदेव भवति । वार्य्या ऋत्विजः, वरणीया इत्यर्थः, अत्रापि ऋकारान्तत्वाण्ण्यदेव ॥ १०१ ॥

यह सूत्र भी ण्यत् का अपवाद है ॥

[गर्ह्यपणितव्यानिरोधेषु] गर्ह्य=निन्दा के योग्य, पणितव्य=व्यवहार के योग्य, अनिरोध=न रोकना, इन अर्थों में क्रम से [अवद्यपण्यवर्या] अवद्य-पण्य-वर्य्या ये यत् प्रत्ययान्त निपातन है ॥

जैसे—अवद्यं वाक्यम् । अवद्यं पापम् । पण्यः कम्बलः । पण्या शाटी । पण्यं वस्त्रम् । वर्य्या ब्राह्मणी अर्थात् स्वतन्त्र है ॥

'गर्ह्यपणितव्यानिरोधेषु' ग्रहण इसलिये है कि—अनुद्यं मनोदुःखम् । यहाँ[3] 'वदः सुपि क्यप् च' सूत्र से क्यप् प्रत्यय हो कर ,वचिस्वपियजादीनां किति' सूत्र से संप्रसारण हो जाता है ॥ पाण्यो ब्राह्मणः अर्थात् स्तुति करने योग्य है । यहां हलन्त होने से ण्यत् ही होता है ॥ वार्य्या ऋत्विजः अर्थात् ऋत्विक् वरण करने के योग्य हैं, यहां ऋकारान्त होने से ण्यत् ही होता है ॥ १०१ ॥

वह्यं करणम्[3] ॥ १०२ ॥

भावकर्मणोः कृत्या विधीयन्ते, करणार्थं सूत्रमिदम् ॥ वह्यम् । १ । १ । करणम् । १ । १ ॥ वह्यमिति वहधातोः करणे यत् प्रत्ययो निपात्यते ॥ वहत्यनेन वह्यं शकटम् । वह्यं शिरः ॥

---

१. आ० सू० ९२७ ॥ २. अ० ३ । १ । १०६ ॥
३. आ० सू० ९२८ ॥

'करणम्' इति किम—वाह्यो भारः । अत्र ण्यदेव भवति ।। १०२ ।।

कृत्य प्रत्ययों का विधान भाव और कर्म में होता है, अत्र यह सूत्र करणकारक में यत् का विधायक है ।।

[वह्यम्] 'वह' धातु से [करणम्] करणकारक में यत् प्रत्यय का निपातन है ।।

जैसे—वहत्यनेन वह्यं शकटम् । वह्यं शिरः ।।

'करणम्' ग्रहण इसलिये है कि—अन्य कारक में 'वाह्यो भारः' ण्यत् प्रत्यय ही हो ।। १०२ ।।

अर्य्यः स्वामिवैश्ययोः[1] ।। १०३ ।।

अयमपि विशेषार्थे ण्यतोऽपवादः । अर्यः । १ । १ ।। स्वामिवैश्ययोः । ७ । २ ।। स्वामी=अधिष्ठाता, वैश्यो वर्णः । स्वामिवैश्ययोरभिधेययोः सतोः **'ऋ[2] गतौ'** इत्यस्माद्धातोर्यत् प्रत्ययान्तोऽर्य्य-शब्दो निपात्यते ।। **अर्य्यः** स्वामी । **अर्यो** वैश्यः ।।

'स्वामिवैश्ययोः' इति किम्—आर्य्यो वैयाकरणः। श्रेष्ठ इत्यर्थः ।। अत्र ण्यदेव भवति ।।

१—वा०—*स्वामिन्यन्तोदात्तत्वञ्च*[3] ।।

स्वामिवाचिन्यर्यशब्देऽन्तोदात्तस्वरो भवति' **'यतोऽनावः'**[4] इत्याद्युदात्तं प्राप्तं तदनेन वार्त्तिकेन निवार्य्यते ।। १०३ ।।

यह भी विशेष अर्थ में ण्यत् का ही अपवाद सूत्र है ।।

[स्वामिवैश्ययोः] स्वामी और वैश्य अभिधेय हों तो [अर्य्यः] 'ऋ गतौ' इस धातु से यत् प्रत्यय का निपातन है ।।

जैसे—**अर्य्यः स्वामी । अर्यो वैश्यः ।।**

'स्वामिवैश्ययोः' ग्रहण इसलिये है कि—**आर्यो वैयाकरणः ।** यहां आर्य्य शब्द श्रेष्ठ का वाचक है, अतः यहां ण्यत् ही होता है ।।

१—वा०—"स्वामिन्यन्तोदा०" स्वामी अभिधेय हो तो 'अर्य्य' शब्द को अन्तोदात्तत्व भी होता है क्योंकि **'यतोऽनावः'** से आद्युदात्त प्राप्त था अतः वार्त्तिक ने अन्तोदात्त निपातन किया ।। १०३ ।।

---

१. आ० सू० ९२९ ।। २. धा०—जुहो०—५६ ।।
३. आख्या० ९२९ सूत्रे वचनमिदम् ।। (ख) श० ३ । १ । १०३ भाष्ये ।।
४. अ० ६ । १ । २१३ ।।

उपसर्य्या काल्या प्रजने[1] ॥ १०४ ॥

अयमपि ण्यत एवापवादः ॥ उपसर्य्या । १ । १ । काल्या १ । १ । प्रजने । ७ । १ ॥ कालः प्राप्तोऽस्याः सा काल्या । प्रजन इति भावे घञ् । 'प्र' शब्दोऽत्राऽऽदिकर्मणि । आद्यं जननं प्रजनस्तस्मिन् । प्रजनेऽर्थे उपसर्येति '**सृगतौ**[2]' इत्यस्य धातोर्यत् प्रत्ययान्तः स्त्रीलिङ्गः शब्दो निपात्यते काल्या चेत् सा भवति ॥ उपसर्य्या गौः । उपसर्य्या महिषी । उपसर्य्या वृषली ॥

'काल्या प्रजने' इति किम्—उपसार्य्या शरदि [मधुरा] । अत्र—ऋकारान्तत्वाण्ण्यदेव भवति ॥ १०४ ॥

यह भी ण्यत् का अपवाद है ॥

[प्रजने] प्रजनन = प्रथम गर्भ ग्रहण में जो] काल्या] काल्या = समय को प्राप्त हुई, वह अभिधेय हो तो [उपसर्य्या] 'उपसर्य्या' यह उप पूर्वक 'सृ गतौ' धातु से यत् प्रत्ययान्त तथा स्त्रीलिङ्ग में निपातन है ॥

जैसे—**उपसर्य्या गौः । उपसर्य्या महिषी । उपसर्य्या वृषली ॥**

'काल्या' 'प्रजने' ग्रहण इसलिये है कि—**उपसार्य्या शरदि मधुरा,** [उपसार्य्या वसन्ते वाटिका ।] यहां ण्यत् ही होता है ॥ १०४ ॥

अजर्यं सङ्गतम्[3] ॥ १०५ ॥

अजर्यम् । १ । १ । सङ्गतम् । १ । १ ॥ सङ्गतमिति '**गत्यर्थाकर्मक०**[4]' इत्यादिसूत्रेण कर्त्तरि क्तः । सङ्गतमित्यस्य कर्त्तृवाचित्वादजर्यमपि कर्त्तर्येव निपात्यते ॥

नञ् पूर्वात् '**जॄष्**[5] **वयोहानौ**' इत्यस्माद्धातोः कर्त्तरि सङ्गतविशेष्ये यत् प्रत्ययो निपात्यते ॥ न जीर्यतीत्यजर्यमार्यसङ्गतम् ॥

'सङ्गतम्' इति किम्—अजरः कम्बलः । अत्र यन्मा भूत् ॥ १०५ ॥

[सङ्गतम्] सङ्गत विशेष्य हो तो [अजर्यम्] नञ् पूर्वक जॄष् धातु से कर्त्ता में यत् प्रत्यय का निपातन है ॥

'सङ्गतम्'—इस में 'गत्यर्थाकर्मक०' इत्यादि सूत्र से कर्त्ता में 'क्त' है, अतः 'सङ्गतं' शब्द के कर्त्तावाची होने से 'अजर्यम्' का निपातन भी कर्त्ता में ही है ॥

---

१. आ० सू० ९३० ॥
२. धा०—भ्वा०—९२० ॥
३. आ० सू० ९३१ ॥
४. अ० ३ । ४ । ७२ ॥
५. धा०—दिवा०—२२ ॥

जैसे—न जीर्यति=अजर्य्यम् । अजर्य्यमार्य्यसङ्गतम् ॥

'सङ्गतम्' ग्रहण इसलिये है कि—**अजरः कम्बलः** । यहां यत् नहीं होता ॥ १०५ ॥

वदः सुपि क्यप् च[1] ॥ १०६ ॥

गदमदेति सूत्रादनुपसर्ग[2]ग्रहणमनुवर्त्तते, यदिति च । हलन्ताण्ण्यत्प्राप्तस्तस्यायमपवादः ॥ वदः । ५ । १ । सुपि । ७ । १ । क्यप् । १ । १ । च [अ०] ॥ उपसर्गरहिते सुप्युपपदे वदधातोः क्यप् चकाराद्यच्च प्रत्ययो भवति ॥ ब्रह्मोद्यम् । ब्रह्मवद्यम् । शास्त्रोद्यम् । शास्त्रवद्यम् । अत्र क्यप् पक्षे कित्वात् '**वचिस्वपियजादीनां [किति[3]]** इति संप्रसारणम् ।'

'सुपि' इति किम्—वाद्यम् ॥ 'अनुपसर्गे' इति किम्—प्रवाद्यम् । अत्र ण्यदेव भवति ॥ १०७ ॥

'गदमद०' इत्यादि सूत्र से 'अनुपसर्गे' पद का अनुवर्त्तन है, यत् का भी । हलन्त होने से ण्यत् प्राप्त था उसका अपवाद है ॥

अनुपसर्ग [सुपि] सुबन्त उपपद हो तो [वदः] वद धातु से [क्यप्] क्यप् [च] और यत् प्रत्यय हो ॥

जैसे—ब्रह्मोद्यम् । ब्रह्मवद्यम् । शास्त्रोद्यम् । शास्त्रवद्यम् । [सत्योद्यम् । सत्यवद्यम् ।] यहां क्यप् पक्ष में 'वचिस्वपियजादीनां किति' से सम्प्रसारण होता है ॥

'सुपि' ग्रहण इसलिये है कि—**वाद्यम्** ॥

'अनुपसर्गे' ग्रहण इसलिये है कि—**प्रवाद्यम्** । यहां भी ण्यत् हो ॥ १०६ ॥

भुवो भावे च[4] ॥ १०७ ॥

अनुपसर्गे, सुपीत्यनुवर्त्तते, 'यत्' निवृत्तः ॥ भुवः । ५ । १ । भावे । ७ । १ ॥ उपसर्गरहिते सुप्युपपदे भूधातोर्भावे क्यप् प्रत्ययो भवति ॥ ब्रह्मभूयं प्राप्तः । ब्राह्मणत्वं प्राप्त इत्यर्थः । पण्डितभूयं प्राप्तः । पाण्डित्यं प्राप्त इत्यर्थः ॥ भावकर्मणोः कृत्या विधीयन्ते तत्राकर्मकाद् भूधातोर्भाव एव क्यप् स्यात् पुनर्भावग्रहणमुत्तरार्थम् ॥

'सुपि' इति किम्—भव्यम् । 'अनुपसर्गे' इति किम्—प्रभव्यम् । अत्राऽजन्तत्वाद्यदेव भवति ॥ १०७ ॥

यहां 'अनुपसर्गे' और 'सुपि' पदों का अनुवर्त्तन है, यत् निवृत्त हुआ ॥

---

१. आ० सू० ९३२ ॥

२. **सत्सूद्विष०** (अ० ३ । २ । ६१) इत्यादि सूत्रे **'उपसर्गेऽपीति'** वचनेन ज्ञाप्यते 'अन्यत्र सुब्ग्रहण उपसर्गग्रहणं न भवति' इति, तेन—**'वदः सुप्यनुपसर्गग्रहणं चोदितं तन्न वक्तव्यं भवति'** (अ० ३ । २ । ६१ । भाष्ये) ॥

३. अ० ६ । १ । १५ ॥

४. आ० सू० ९३३ ॥

अनुपसर्गे सुबन्त उपपद हो तो [भुवः] 'भू' धातु से [भावे] भाव में क्यप् प्रत्यय हो ॥

जैसे—**ब्रह्मभूयं प्राप्तः । देवभूयं गतः । पण्डितभूयं प्राप्तः ।** अर्थात् ब्राह्मणत्व देवत्व तथा पण्डित्य को प्राप्त हुआ ॥

'भावे' ग्रहण अगले सूत्रों के लिये है क्योंकि सत्तार्थक 'भू' धातु के अकर्मक होने से भाव में क्यप् हो ही जाता ॥

'सुपि' ग्रहण इसलिये है कि—**भव्यम् ॥** 'अनुपसर्गे' ग्रहण इसलिये है कि—**प्रभव्यम् ।** यहां दोनों में अजन्त होने से यत् हुआ ॥ १०७ ॥

हनस्त च[1] ॥ १०८ ॥

'अनुपसर्गे-सुपि' इत्यनुवर्त्तते, भाव इति च ॥ हनः । ५ । १ । त । १ । १ । च । अ० ॥ **अनुपसर्गे सुप्युपपदे भावेऽर्थे वर्त्तमानाद् हन् धातोः परः क्यप् प्रत्ययो भवति, नकारस्य च तकारः ॥ श्वहत्या वर्त्तते । दस्युहत्या ॥ हन्-धातोः सकर्मकत्वात् कर्मणि क्यप् प्राप्तो भावे विधीयते ॥**

'अनुपसर्गे' इति किम्—प्रघातो वर्त्तते ॥ **'सुपि'** इति किम्—घातः ॥ **'भावे'** इति किम्—घात्यश्वोरः ॥

१—वा०—*हनस्तश्चित् स्त्रियां छन्दसि*[2] ॥

हन्-धातोर्यः क्यप् प्रत्ययो विधीयते स वेदविषये चित् स्त्रियाम् ॥ तां भ्रूणहत्यां[3] निगृह्यानुचरणम् । अस्यै त्वा भ्रूणहत्यायै[4] चतुर्थं प्रतिगृह्णते ॥

'स्त्रियाम्' इति किम्—आघ्नते दस्युहत्याय । **अत्र नपुंसकलिङ्गे चित्त्वेनान्तोदात्तत्वं न भवति । अत्र लिङ्गव्यत्ययेन नपुंसकत्वम् । लोके तु नित्यं स्त्रीत्वमेव भवति ॥ 'छन्दसि' इति किम्—श्वहत्या, दस्युहत्या वर्त्तते । अत्र चित्स्वरो न भवति ॥ १०८ ॥**

'अनुपसर्गे' 'सुपि' और 'भावे' का अनुवर्त्तन है ।

उपसर्गरहित सुबन्त उपपद हो तो [**हनः**] हन् धातु से भाव में क्यप् प्रत्यय और 'हन्' को [**त च**] तकार अन्तादेश हो ॥

जैसे—**श्वहत्या । दस्युहत्या ।** [ब्रह्मणो हननं ब्रह्महत्या, गोहत्या ।] हन् धातु के सकर्मक होने से कर्म में क्यप् प्राप्त था सो भाव में विधान किया ॥

'अनुपसर्गे' ग्रहण इसलिये है कि—**प्रघातो वर्त्तते ॥** 'सुपि' ग्रहण इसलिये है कि—घातः ॥ 'भावे' ग्रहण इसलिये है कि—**घात्यो वृषलः । घात्यश्वोरः** यहां ण्यत् हो ॥

---

१. आ० सू० ९३४ ॥

२. आ० वा० ९३५ ॥ (ख) अ० ३ । १ । १८ भाष्ये ॥

३. अनुपलब्धमूलमिदम् ॥ परन्तु 'भ्रूणहत्याम्' शब्दस्तु—तै० ३ । ८ । २० । १ ॥ ९ । १५ । २ ॥ तै० आ० १० । ४९ । १ ॥

४. भ्रूणहत्यायै तै०—३ । ९ । १५ । २ ॥

१—वा०—हनस्तश्चित्० हन् धातु से जो क्यप् प्रत्यय ['हनस्त च' इससे] विहित है सो वह वेदविषय में चित् हो और स्त्रीलिङ्ग वाची हो ॥

जैसे—**तां भ्रूणहत्यां निगृह्यानुचरणम् । अस्यै त्वा भ्रूणहत्यायै चतुर्थं प्रतिगृह्यते ॥**

'स्त्रियाम्' ग्रहण इसलिये है कि—**आध्नते दस्युहत्याय ।** यहां नपुंसलिङ्ग में अन्तोदात्त नहीं होता, यहां लिङ्गव्यत्यय से नपुंसकत्व होता है, लोक में तो नित्य स्त्रीलिङ्ग ही होता है ॥ 'छन्दसि' ग्रहण इसलिये है कि—**श्वहत्या । दस्युहत्या वर्त्तते ।** यहां चित्स्वर नहीं होता ॥१०८॥

एतिस्तुशास्वृदृजुषः क्यप्[1] ॥ १०९ ॥

'अनुपसर्गे-सुपि-भाव' इति सर्वं निवृत्तम् । एति० जुषः । ५ । १ । क्यप् । १ । १ ॥ एत्यादीनां समाहारद्वन्द्वः ॥ एति-स्तु-शासु-वृ दृ-जुष् । **इण्[2] गतौ, ष्टुञ्[3] स्तुतौ, शासु[4] अनुशिष्टौ, वृञ्[5] वरणे, दृङ्[6] आदरे, जुषी[7] प्रीतिसेवनयोः ।** इत्येवं गणोपदिष्टेभ्य एत्यादिभ्यः क्यप् प्रत्ययो भवति ॥ इत्यः । स्तुत्यः । शिष्यः । वृत्यः । आदृत्यः । जुष्यः । **अत्र चत्वारोऽजन्तास्तेषां क्यपि तुग्भवति । 'शासु' धातोरित्वं, जुषेर्गुणाभाव एव ॥**

अजन्तेभ्यो यत् प्राप्तो हलन्ताभ्यां शासिजुषिभ्यां च ण्यत्, तयोरपवादः ॥

क्यबित्यनुवर्तमाने पुनः **क्यब्ग्रहणं** विशेषण्यद्बाधनार्थम् । **अवश्यस्तुत्यः** अत्र **'ओरावश्यके'**[8] इति विशेषबाधको ण्यन्मा भूत् ॥

१—वा०—*क्यब्विधौ वृञ् ग्रहणम्*[9] ॥

निरनुबन्धक-ग्रहणे सामान्यसानुबन्धकस्य ग्रहणं भवतीति वृञोऽपि क्यप् प्राप्तः स मा भूत् ॥

२—वा०—*अञ्जेश्चोपसंख्यानं संज्ञायाम्*[10] ॥

---

१. आ० सू० ९३६ ॥ २. धा०—अदा०—३६ ॥
३. धा०—अदा०—३४ ॥ ४. धा०—अदा०—६५ ॥
५. धा०—स्वादि० ८ ॥ ६. धा०—तुदा०—१२७ ॥
७. धा०—तुदा०—८ ॥ ८. अ० ३ । १ । १२५ ॥

९. निरनुबन्धकस्य 'वृ' धातोरभावात् सामान्येन द्वयोरपि वृङ्वृञोर्ग्रहणे प्राप्ते वार्त्तिकेन नियमः क्रियते ॥

यत्त्वस्मिन् सूत्रे काशिकाकारेण **'शंसिदुहिगुहिभ्यो वेति वक्तव्यम्'** इति वार्त्तिकं पठ्यते तद्भाष्यानारूढत्वादुपेक्षितव्यं, 'शंसु' धातोः क्यब्विकल्पस्तु—**'प्रशस्यस्य श्रः'** (अ० ५ । ३ । ६०) **'ईडवन्दवृशंसदुहां ण्यतः'** (अ० ६ । १ । २१४) सूत्राभ्यां सिध्यत्येव, अन्ययोर्मूलं मृग्यम् ॥

१०. अ० ३ । १ । १०९ भा० ॥ (ख) आ० वा० ९३७ ॥

अञ्जूषातोः संज्ञायां क्यप् प्रत्ययो भवति । आज्यं घृतम् । अत्राङ् पूर्वादञ्जू-धातोः क्यप्यनुनासिकलोपः ॥ १०९ ॥

'अनुपसर्गे' 'सुपि' तथा 'भावे' इन पदों का निवर्त्तन हुआ ॥ सूत्र में समाहारद्वन्द्व समास है ॥

[एतिस्तुशास्वृदृजुषः] इण्-स्तु-शासु-वृ-दृ-जुष् धातुओं से [**क्यप्**] क्यप् प्रत्यय हो ॥

जैसे—इत्यः । स्तुत्यः । शिष्यः । वृत्यः । आदृत्यः । जुष्यः ॥ यहां चार [इण्-स्तु-वृ-दृ] धातु अजन्त हैं इन को क्यप् परे तुक् हो जाता है तथा 'शासु' को इत्व और 'जुष' को गुण का अभाव क्यप् परे रहते होता है । अजन्तों से यत् प्राप्त था और शासि तथा जुष् इन हलन्तों से ण्यत्, सो यह इन दोनों का अपवाद है ॥

'क्यप्' इतना पद अनुवर्त्तमान ही था पुनः क्यप् के ग्रहण का यह प्रयोजन है कि—**अवश्यस्तुत्यः** । यहां विशेष अर्थात् आवश्यक अर्थ में वक्ष्यमाण ण्यत् को बाध कर क्यप् ही हो ॥

१—वा०—"**क्यब्विधौ वृञ्०**" निरनुबन्धक ग्रहण में सामान्य अनुबन्ध वाले का ग्रहण हो जाने से 'वृङ्' को भी क्यप् प्राप्त था वह न हो इसलिये यह वार्त्तिक है । जैसे—**वार्य्या ऋत्विजः** । यहां वृङ् धातु से ण्यत् ही होता है ॥

२—वा०—"**अञ्जेश्चो०**" संज्ञा गम्यमान हो तो 'अञ्चू' धातु से क्यप् प्रत्यय का उपसंख्यान करना चाहिये ॥ अनक्त्यनेनेति **आज्यं घृतम्** । [यहां करण में क्यप् है ।] यह क्यप् आङ्पूर्वक से ही होता है, क्योंकि महाभाष्य में "**आङ्पूर्वस्य प्रयोगो भविष्यति**" (अ० ३ । १ । १०९) ऐसा वचन है । यहां आङ्पूर्वक अञ्चू धातु के अनुनासिक का लोप क्यप् को मान कर हो जाता है ॥ १०९ ॥

ऋदुपधाच्चाक्लृपिचृतेः' ॥ ११० ॥

ऋदुपधानां हलन्तत्वाण्ण्यत्प्राप्तः सोऽनेन बाध्यते ॥ ऋदुपधात् । ५ । १ । च [अ०] । अक्लृपिचृतेः । ५ । १ ॥ ऋकार उपधायां यस्य स ऋदुपधस्तस्मात् । ऋदुपधधातोः क्यप् प्रत्ययो भवति क्लृपिचृती धातू वर्जयित्वा ॥ वृत्यम् । वृध्यम् । छृद्यम् । तृद्यम् ॥

'अक्लृपिचृतेः' इति किम्—**कल्प्यम्** । **चर्त्यम्** । अत्र ण्यदेव भवति ॥

ऋदिति तपरकरणं[2] किमर्थम्—'**कृत**[3] **संशब्दने**' **कीर्त्यम्** । अस्माद्दीर्घोपधाण्ण्य-देव भवति ॥ ११० ॥

---

१. आ० सू० ९३८ ॥

२. **'ऋदुपधाच्चाक्लृपिचृतेः'** इत्यत्र तपरकरणं दीर्घोपधस्य **'कृत संशब्दने'** इत्यस्य व्यावृत्यर्थम्, स च चुरादित्वाण्णिचि सति ऋकारोपध एव न भवति, क्रियते चात्र तपरकरणं तेन णिचोऽनित्यत्वं ज्ञाप्यते, तस्मात् 'कीर्त्तति' इत्यादि च सिध्यति ॥

३. धा०—चुरा०—११२ ॥

ऋकार-उपध धातुओं के हलन्त होने से ण्यत् प्राप्त था सो इस सूत्र से प्रतिषेध करते हैं ॥ [अक्लृपिचृतेः] क्लृपि और चृति धातुओं को छोड़ कर [ऋदुपधात्] ऋकारोपध धातुओं से क्यप् प्रत्यय होता ॥

जैसे—वृत्यम् । वृध्यम् । छृद्यम् । तृद्यम् ॥

'अक्लृपिचृतेः' ग्रहण इसलिये है कि—कल्प्यम् । चर्त्यम् । कीर्त्यम् । यहां ण्यत् ही होता है ॥ 'ऋकार' तपर इसलिये है कि—कीर्त्यम् । इस में 'कॄत संशब्दने' के दीर्घ ऋकार-उपध होने से ण्यत् ही होता है ॥ ११० ॥

ई च खनः[1] ॥ १११ ॥

ण्यतोऽपवादः । ई । १ । १ । च [अ०] । खनः [६ । १ ।] ॥ खन धातोः क्यप् प्रत्ययो भवति नकारस्य च 'ई' इत्ययमादेशः ॥ खेयम् ॥

आदृगुण[2] इति गुणे कृते खेयमिति सेत्स्यति पुनर्दीर्घ 'ई' कारस्येतत् प्रयोजनं ह्रस्वे कृते **'षत्वतुकोरसिद्धः'**[3] इत्येकादेशस्यासिद्धत्वात् तुक् प्राप्नोति, क्यपि परतस्तुङ् मा भूदिति[4] ॥ १११ ॥

यह भी ण्यत् का अपवाद है ॥ [खनः] खन् धातु से क्यप् प्रत्यय हो और नकार के स्थान में [ई च] 'ई' आदेश हो ॥

जैसे—खेयम् ॥

---

१. आ० सू० ९३९ ॥ २. अ० ६ । १ । ८७ ॥

३. अ० ६ । १ । ८६ ॥

४. यदा तु पदान्तपदाद्योरेकादेशोऽसिद्धो भवति तदाऽसिद्धत्वाभावे तुगभावः सिद्ध एव, अस्मिन् पक्षे ह्रस्वपाठेऽपि खेयमिति सिध्यत्येव ॥

अत्र भाष्यम्—**"नैतदस्ति—पदान्तपदाद्योरेकादेशोऽसिद्धो न चैष पदान्तपदाद्योरेकादेशस्तस्मात् 'इ च खनः' इत्येव वक्तव्यम् ॥"**

'ये विभाषा' (अ० ६ । ४ । ४३) इति परसप्तम्यामीत्वस्य बहिरङ्गत्वात् क्यप् सन्नियोगेन ईत्वस्यान्तरङ्गत्वादेव तद्बाधः, इति दीर्घोच्चारणम् । परञ्च—एकपक्षीभूतमिदं भाष्यकारस्य वचनं, कुतः ? **'अचः कर्त्तृयकि'** (अ० ६ । १ । १९५) इति सूत्रभाष्ये उपदेशवचने जनादीनां स्वरो न सिध्यति—**जायते स्वयमेव, जायते** स्वयमेव, इत्याद्युक्तं, तद् वार्त्तिकविधानं **'ये विभाषा'** (अ० ६ । ४ । ४३) इत्यत्र विषयसप्तम्यामाश्रीयमाणायां सम्भवति न तु परसप्तम्याम्, अन्यथा परसप्तम्यां 'जायते स्वयमेव' इत्यादावजन्तानां यकि स्वरप्राप्तिरेव नास्ति, कुतः वार्त्तिकविधानम् ?, विषयसप्तम्यान्त्वात्वस्यान्तरङ्गत्वात् तद्बाधनार्थं दीर्घोच्चारणं कल्पेत ॥

यद्वा—व्यवस्थितविभाषाया आश्रीयमाणत्वात्, विधानसामर्थ्याद्वा, ह्रस्वविधानमपि सर्वेष्टसाधकम् ॥

खेयम्—यहां 'आद्गुणः' इससे पूर्वापर के स्थान में गुण एकादेश करने पर 'खेयम्' ऐसा रूप सिद्ध हो जाता, पुनः सूत्र में दीर्घ ईकार का यह प्रयोजन है कि यदि ह्रस्व 'इ' ऐसा पढ़ते तो 'पत्वतुकोरसिद्धः' इससे एकादेश के असिद्ध हो जाने से क्यप् परे तुक् प्राप्त था, वह तुक् न होवे इस लिये दीर्घोच्चारण किया है ॥ १११ ॥

भृञोऽसंज्ञायाम्[1] ॥ ११२ ॥

ऋकारान्तत्वाण्ण्यतोऽपवादः । भृञः । ५ । १ । असंज्ञायाम् । ७ । १ ॥ असंज्ञायां विषये भृञ् धातोः परः क्यप् प्रत्ययो भवति ॥ भृत्याः प्रेष्याः । ह्रस्वस्य पिति क्यपि तुगागमः ॥

'असंज्ञायाम्' इति किम्—भार्य्या नाम क्षत्रियाः । अत्र केषाञ्चित् क्षत्रियाणां भार्य्यसंज्ञा तत्र ण्यदेव भवति ।

का०—संज्ञायां पुंसि दृष्टत्वान्न ते भार्य्या प्रसिद्ध्यति ।
स्त्रियां भावाधिकारोऽस्ति तेन भार्य्या प्रसिद्ध्यति ॥ १ ॥
अथवा बहुलं कृत्याः संज्ञायामिति तत्स्मृतम् ।
यथा यत्यं यथा जन्यं यथा भित्तिस्तथैव सा[2] ॥ २ ॥

संज्ञायां क्यपः प्रतिषिद्धत्वाण्ण्यङ्भवति तत्र क्षत्रियवाची भार्य्यशब्दः पुल्लिङ्गो दृश्यते, अतस्तेतव भार्य्या शब्दो न सिध्यति । वैयाकरणौ परस्परं वदतः—'**स्त्रियां क्तिन्**[3]' इति प्रकरणे '**संज्ञायां समज०**[4]' इति सूत्रे भावग्रहणमनुवर्त्तते, कर्मसाधनश्चा [यं] भार्य्या शब्दः अतः स्त्रीप्रकरणेऽपि भार्य्या शब्दो न सिध्यति ॥ १ ॥

भाववाची तु भृत्याशब्दः स्त्रीप्रकरणे सिध्यत्येव । अथवा '**कृत्यल्युटो बहुलम्**[5]' इति सूत्रेण बहुलं कृत्यसंज्ञकाः प्रत्यया भवन्ति । तेनाऽत्र भार्य्या शब्दे स्त्रीलिङ्गेऽपि ण्यङ्भविष्यति । यथा 'यत्यम्' 'जन्यम्' इत्यत्राजन्ताद्विधीयमानो यद् बहुलग्रहणाद् भवति, तथा भावाधिकारे '**षिद्भिदादिभ्योऽङ्**[6]' इति अङ्-विषये भित्ति-शब्दे बहुलग्रहणात् क्तिन् दृश्यते, एवं क्यप्प्रसङ्गे भार्य्याशब्देऽपि बहुलवचनाद्वेह ण्यद् भविष्यति ॥ २ ॥

१—वा० —*समश्च बहुलमुपसंख्यानम्*[7] ॥

'सम्' पूर्वाद् 'भृञ्' धातोर्बहुलं क्यप्ण्यतौ भवतः । संभृत्या एव संभाराः । संभार्या एव संभाराः ॥ ११२ ॥

---

१. आ० सू० ९४० ॥
२. अ० ३ । १ । ११२ भा० ॥
३. अ० ३ । ३ । ९४ ॥
४. अ० ३ । ३ । ९९ ॥
५. अ० ३ । ३ । ११३ ॥
६. अ० ३ । ३ । १०४ ॥
७. अ० ३ । १ । ११२ भा० ॥

ऋकारान्त होने से ण्यत् का अपवाद है।

[असंज्ञायाम्] असंज्ञा विषय में [भृञः] भृञ् धातु से क्यप् प्रत्यय हो ॥

जैसे—**भृत्या**· प्रेष्याः। **भृत्याः** कर्मकराः ॥ यहां **'ह्रस्वस्य पिति कृति तुक्'** (अ० ६। १। ७१) इस सूत्र से क्यप् परे रहने पर तुक् आगम हो जाता है ॥

'असंज्ञायाम्' ग्रहण इसलिये है कि **भार्य्या नाम क्षत्रियाः** ॥ यहां 'भार्य्यः किन्हीं क्षत्रियों का नाम है इसलिये यहां ण्यत् ही होता है ॥

का०—संज्ञायां पुंसि०.....॥ १ ॥

अथवा बहुलं कृत्याः२.....॥ २ ॥

संज्ञा विषय में क्यप् के प्रतिषेध होने से **'भार्य्या नाम क्षत्रियाः'** यहां पर क्षत्रियवाची भार्य्य शब्द ण्यत् प्रत्ययान्त पुल्लिङ्ग में देखा जाता है, इसलिये स्त्रीलिङ्ग में **'संज्ञायां समज०'** इस सूत्र से क्यप् प्रत्यय हो जाने पर संज्ञावाची भार्य्या शब्द सिद्ध नहीं होता ? । इसका उत्तर यह है कि—**'संज्ञायां समज०'** इस सूत्र में भाव का अनुवर्त्तन होने से क्यप् प्रत्यय भाव में ही होगा और भार्य्या शब्द में कर्म में प्रत्यय है, इसलिये **'ऋहलोर्ण्यत्'** इससे ण्यत् हो जायगा। अथवा **'कृत्य-ल्युटो बहुलम्'** इस सूत्र में बहुल ग्रहण से, जैसे **'जन्यम्' 'यत्यम्'** यहां पर अजन्त धातु से विहित यत् प्रत्यय हलन्तों से और "भित्ति" शब्द में 'भिद' धातु से 'अङ्' न होकर क्तिन् ही होता है, वैसे ही **'संज्ञायां समज०'** इसमें भावाधिकार न होने पर भी क्यप् न होकर ण्यत् ही होता है ॥११२॥

मृजेर्विभाषा' ॥ ११३ ॥

प्राप्तविभाषेयम् ॥ **'ऋदुपधाच्च०'**[1] इति ण्यतोऽपवादः क्यप् नित्यं प्राप्तोऽनेन विभाष्यते ॥ मृजेः। ५। १। विभाषा [अ०] ॥ **'मृजूष् शुद्धौ'**[3] इत्यस्माद् धातो-र्विकल्पेन क्यप् प्रत्ययो भवति पक्षे ण्यदेव ॥ परिमृज्यः। परिमार्ग्यः। अत्र ण्यत्पक्षे वृद्धिकुत्वे भवतः ॥ ११३ ॥

यह सूत्र प्राप्तविभाषा है। 'ऋदुपधाच्चा०' इत्यादि सूत्र से ण्यत् का अपवाद क्यप् नित्य प्राप्त था उसका यहां विकल्प कहा ॥

[मृजेः] मृजूष् धातु से [विभाषा] विकल्प करके क्यप् प्रत्यय हो पक्ष में ण्यत् भी हो ॥

जैसे—परिमृज्यः। परिमार्ग्यः ॥ ण्यत् पक्ष में 'मृजेर्वृद्धिः' (अ० ७। २। ११४) इस सूत्र से वृद्धि तथा 'चजोः कुः घिण्ण्यतोः' (अ० ७। ३। ५२) से कुत्व होता है ॥ ११३ ॥

राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः[4] ॥ ११४ ॥

राजसूयसूर्य० व्यथ्याः। १। ३ ॥ ण्यद्यतोरपवादः ॥

---

१. आ० सू० ९४२ ॥ २. अ० ३। १। ११० ॥

३. धा०—अदा०—५६ ॥ ४. आ० सू० ९४४ ॥

राजसूय-सूर्य-मृषोद्य-रुच्य-कुप्य-कृष्टपच्य-अव्यथ्य इत्येते शब्दाः क्यप् प्रत्ययान्ता निपात्यन्ते । **राजसूयेति** राज-शब्दपूर्वात् **[षुञ् अभिषवे**[1]] इत्यस्माद् धातोः क्यप्, राज्ञा सोतव्यो **राजसूयो नाम यज्ञः** ।। सूर्येति द्वाभ्यां धातुभ्यां कर्त्तरि क्यप् निपात्यते । **'सृ गतौ**[2]' इत्यस्माद् धातोः क्यपि परत उत्वम् । अथवा **'षू प्रेरणे**[3]' इत्यस्मात् क्यपि रुडागमः । सरति निरन्तरं लोकैः सह गच्छति स सूर्यः, अथवा कर्मणि सुवति प्रेरयतीति स सूर्यः ।। मृषोद्येति मृषोपपदाद् वदधातोः क्यप् **'वदः सुपि०**[4]' इति यत्क्यपौ प्राप्नुतः' मृषोपपदात् क्यबेव स्यादिति निपातनम्-मृषोद्यं वाक्यम् ।। रुच्येति ण्यतोऽपवादो रुच-धातोः कर्त्तरि क्यप् । रोचतेऽसौ रुच्यः ।। कुप्यमिति गुपधातोः संज्ञायां क्यप् । गकारस्य च कादेशो निपात्यते, कुप्यं संज्ञा चेत् । अन्यत्र गोप्यम् ।। कृष्टपच्या इति कृष्टोपपदात् पच-धातोः कर्मकर्त्तरि क्यप् । कृष्टे पच्यन्ते स्वयमेव । **कृष्टपच्याश्च मे**[5] ।। अव्यथ्येति नञ् पूर्वात् व्यथधातोः कर्त्तरि क्यप्, न व्यथत इत्यव्यथ्यः ।।

भा०—वा०—*सूर्यरुच्याव्यथ्याः कर्त्तरि*[6] ।। *एते त्रयः शब्दा अत्र कर्त्तरि निपात्यन्ते* ।।

२—वा—*कुप्यं संज्ञायाम्*[6] ।। *गोप्यमन्यत्* ।।

३—वा०—*कृष्टपच्यस्यान्तोदात्तत्वञ्च कर्मकर्त्तरि*[6] ।।

कृष्टपच्य-शब्दस्य क्यबन्तत्वादन्तोदात्तत्वमप्राप्तं विधीयते । **यो हि कृष्टे पक्तव्यः स कृष्टपाक्यो भवति** । अत्र कर्मकर्त्तुरभावाण्ण्यदेव भवति । अन्यत् सर्वं व्याख्यानं महाभाष्यानुसारेणैव पूर्वं कृतम् ।। ११४ ।।

यह ण्यत् और यत् का अपवाद है ।।

[राजसूयसूर्य० अव्यथ्याः] राजसूय-सूर्य-मृषोद्य-रुच्य-कुप्य-कृष्टपच्य-अव्यथ्य ये क्यप् प्रत्ययान्त निपातन हैं ।।

जैसे—राज्ञा सोतव्यो **राजसूयो नाम यज्ञः** । यहां राज शब्दपूर्वक 'षुञ्' धातु से क्यप् प्रत्यय का निपातन है ।। सरति निरन्तरं लोकैः सह गच्छति स **सूर्यः**, अथवा कर्मणि सुवति प्रेरयति स **सूर्यः** । यहां दो धातुओं से कर्त्ता में क्यप् निपातन है । 'सृ गतौ' वा 'षू प्रेरणे' धातु से क्यप् प्रत्यय और सृ को 'उकार' अन्त आदेश होता है, अथवा 'षू' को रुट् का आगम निपातन है ।। मृषा उद्यत इति मृषोद्यम् । यहां 'मृषा' उपपद 'वद' धातु से 'वदः सुपि क्यप् च' से यत् और क्यप् की प्राप्ति में क्यप् का निपातन है अर्थात् 'मृषा' उपपद होने पर 'वद' धातु से क्यप् ही हो जैसे—मृषोद्यं वाक्यम् ।। रोचतेऽसौ **रुच्यः** । यहां 'रुच' धातु से ण्यत् का अपवाद कर्त्ता में क्यप्

१. धा०—स्वा०—१ ।। २. धा०—भ्वा०—९२० ।।
३. धा०—तुदा०—१२४ ।। ४. अ० ३ । १ । १०६ ।।
५. यजु० १८ । १४ ।। ६. अ० ३ । १ । ११४ भा० ।।

निपातन है ॥ **कुप्यम्** । यहां संज्ञा में 'गुप' धातु से क्यप् तथा गकार का निपातन है ॥ अन्यत्र **'गोप्यम्'** होगा ॥ कृष्टे स्वयमेव पच्यन्ते इति **कृष्टपच्याः** । यहां कृष्ट उपपद होने पर कर्मकर्त्ता में 'पच्' से क्यप् का निपातन है ॥

जैसे—कृष्टपच्याश्च मे ॥ कर्मकर्त्ता से भिन्न—यो हि कृष्टे पक्तव्यः **'कृष्टपाक्यः'** ऐसा बनेगा ॥ न व्यथत इति **अव्यथ्यः** । यहां नञ् पूर्वक 'व्यथ' से कर्त्ता में क्यप् निपातन है ॥ **"सूर्य-रुच्याव्यथ्याः कर्त्तरि । कुप्यं संज्ञायाम् । कृष्टपच्यस्यान्तोदात्तत्वञ्च कर्मकर्त्तरि ॥"** भाष्य के उपर्युक्त वचन तथा वार्त्तिकों से सूर्य-रुच्य-अव्यथ्य इन शब्दों का कर्त्ता में निपातन होता है, 'कुप्यम्' संज्ञा में होता है, अन्यत्र 'गोप्यम्' होता है । 'कृष्टपच्य' में अन्तोदात्तत्व और कर्मकर्त्ता अर्थ भी निपातन से होता है । **कृष्टपच्य** शब्द के क्यबन्त होने से अन्तोदात्तत्व की प्राप्ति नहीं थी सो अन्तोदात्त विधान किया । कर्म में—'कृष्टपाक्यः' ऐसा बनता है यहां कर्मकर्त्ता के न होने से ण्यत् ही होता है । शेष सब व्याख्यान महाभाष्य के अनुसार कर ही चुके हैं ॥ ११४ ॥

भिद्योद्ध्यौ नदे[1] ॥ ११५ ॥

भिद्योद्ध्यौ । १ । २ । **नदे** । ७ । १ ॥ नद-शब्दो नदीपर्य्यायः पुल्लिङ्गः ॥ **भिद्योद्ध्यौ शब्दौ नदे** वाच्ये **क्यप्** प्रत्ययान्तौ कर्त्तरि निपात्येते ॥ भिद्य इति 'भिद्' **धातोः कर्त्तरि क्यप्** । कूलानि भिनत्तीति **भिद्यः** । उद्ध्य इति **'उन्दी क्लेदने'**[2] इत्यस्मात् कर्त्तरि क्यप् । निपातनाद् दकारस्य धत्वमनुनासिकलोपश्च । उनत्ति क्लिन्दति तटानि स **उद्ध्यो नदः** । अथवा **'उज्झ उत्सर्गे'**[3] इत्यस्मात् क्यपि झकारस्य धत्वम् । उज्झति उत्सृजति जलानीत्युद्ध्यो नदः ॥

'नदे' इति किम्—**भेत्ता । उन्दिता** । अत्र कर्त्तरि तृजेव भवति ॥ ११५ ॥

नद शब्द नदी का पर्य्यायवाची पुल्लिङ्ग है ॥ [**नदे**] नद अभिधेय हो तो [भिद्योद्ध्यौ] भिद्य-उद्ध्य ये क्यप् प्रत्ययान्त कर्त्ता में निपातन हैं ॥

जैसे—भिनत्ति कूलमिति **भिद्यः** । भिद् धातु से कर्त्ता में क्यप् है । उनत्ति क्लिन्दति तटानि **स उद्ध्यो नदः** । यहां **'उन्दी क्लेदने'** से कर्त्ता में क्यप् तथा दकार को धकार और अनुनासिक का लोप निपातन से है । अथवा **'उज्झ उत्सर्गे'** से भी कर्त्ता में क्यप्, झकार को धकार निपातन से होकर **'उद्ध्यः'** ऐसा बनता है । उज्झति उत्सृजति जलानि इति **उद्ध्यो नदः** ॥

'नदे' ग्रहण इसलिये है कि—**भेत्ता-उन्दिता** । यहां कर्त्ता में तृच् ही होता है ॥ ११५ ॥

पुष्यसिद्ध्यौ नक्षत्रे[4] ॥ ११६ ॥

पुष्यसिद्ध्यौ । १ । २ । **नक्षत्रे** । ७ । १ ॥ नक्षत्रस्य कालेन सह युक्तत्वादधिकरणमत्र लभ्यते ॥ नक्षत्रे वाच्ये पुष्यसिद्ध्यशब्दौ क्यबन्तावधिकरणे निपात्येते ॥

---

१. आ० सू० ९४५ ॥
२. धा०—रुधा०—२० ॥
३. धा०—तुदा०—२४ ॥
४. आ० सू० ९४६ ॥

पुष्यन्त्यस्मिन् कार्य्याणि स पुष्यः । सिध्यन्त्यस्मिन् कार्य्याणि स सिद्ध्यः, नक्षत्रम् ।। 'नक्षत्रे' इति किम्—पोषणम् । सेधनम् । अत्र '**करणाधिकरणयो [श्च[1]]** इत्यधिकरणे ल्युडेव भवति ।। ११६ ।।

[**नक्षत्रे**] नक्षत्र अभिधेय हो तो [पुष्यसिद्ध्यौ] पुष्य, सिद्ध्य ये अधिकरण में निपातन हैं । नक्षत्र का काल के साथ सम्बन्ध होने से यहां अधिकरण में निपातन है ऐसा समझना चाहिये ॥

जैसे पुष्यन्त्यस्मिन् कार्य्याणीति स पुष्यः । सिद्ध्यन्त्यस्मिन् कार्य्याणीति स सिद्ध्यः । नक्षत्रम् ॥

'नक्षत्रे' ग्रहण इसलिये है कि—पोषणम् । सेधनम् । यहां 'करणाधिकरणयोश्च' से अधिकरण में ल्युट् ही होता है ॥ ११६ ॥

विपूयविनीयजित्या मुञ्जकल्कहलिषु[2] ।। ११७ ।।

विपूयविनीयजित्याः । १ । ३ । मुञ्जकल्कहलिषु । ७ । ३ ।। यतोऽपवादः । विपूय इति विपूर्वात् '**पूञ् पवने**[3]' इत्यस्माद्धातोः क्यप्, विपूर्न्नयतेः क्यप्, '**जि जये**[4]' इत्यस्माच्च क्यप् ।। विपूयविनीयजित्या इति क्यप् प्रत्ययान्ता मुञ्जकल्कहलिषु यथासंख्यं निपात्यन्ते ।। विपूयो मुञ्जः । विपव्यमन्यत् । विनीयः कल्कः । विनेयमन्यत् । जित्यो हलिः । जेयमन्यत् ।। यत्र मुञ्जादयोऽर्था न सन्ति तत्राजन्तत्वाद् यदेव भवति ।। ११७ ।।

यह यत् का अपवाद है ॥

[**मुञ्जकल्कहलिषु**] मुञ्ज-कल्क-हलि इन अर्थों में [विपूयविनीयजित्याः] विपूय, विनीय, जित्य ये शब्द यथासंख्य निपातन हैं ॥

विपूर्वक 'पूञ्', विपूर्वक 'णीञ्' तथा 'जि जये' से क्यप् प्रत्यय निपातन है । जैसे—विपूयः-मुञ्जः । रज्वादि कर्म के लिये शोधने योग्य है । अन्यत्र विपव्यम् ।। विनेतुं योग्यो विनीयः-कल्कः । अन्यत्र 'विनेयम्' ।। जित्यः—हलिः ।। अन्यत्र जेयम् ।। ११७ ।।

प्रत्यपिभ्यां ग्रहेः[5] ।। ११८ ।।

हलन्तत्वाण्ण्यतोऽपवादः ।। 'क्यप्' इत्यनुवर्त्तते ।। प्रत्यपिभ्याम् । ५ । २ । ग्रहेः । ५ । १ ।।

१—वा०—*प्रत्यपिभ्यां ग्रहेश्छन्दसि*[6] ॥

प्रति-अपि—इत्युपसर्गद्वयपूर्वाद् ग्रहधातोश्छन्दसि-वेदविषये क्यप् प्रत्ययो भवति ।। मत्तस्य न प्रतिगृह्यम्[7] । अनृतं हि मत्तो वदति तस्मान्नापिगृह्यम्[8] ।। अत्र प्रतिगृह्यमपिगृह्यमिति वैदिकौ प्रयोगौ ।।

---

१. अ० ३ । ३ । ११७ ॥
२. आ० सू०—९४७ ॥
३. धा०—क्रया०—१० ॥
४. धा०—भ्वा०—५५२ ॥
५. आ० सू० ९४८ ॥
६. अ० ३ । १ । ११८ भा० ॥
७. तै० ब्रा० १ । ३ । २ । ७ ॥
८. का० सं० १४ । ५ ॥

'छन्दसि' इति किम्—प्रतिग्राह्यमपिग्राह्यम् । अत्र ण्यदेव ॥ ११८ ॥

हलन्त होने से ण्यत् का अपवाद है ॥ क्यप् की अनुवृत्ति आ रही है ॥

[प्रत्यपिभ्यां] प्रति और अपि से परे [ग्रहेः] 'ग्रह' धातु से क्यप् प्रत्यय हो [छन्दसि] वेदविषय में ॥

जैसे—**मत्तस्य न प्रतिगृह्यम् । अनृतं हि मत्तो वदति तस्मान्नापिगृह्यम् ॥** यहां 'प्रतिगृह्य' और 'अपिगृह्य' यह दोनों वैदिक प्रयोग हैं ॥

१–वा०–"प्रत्यपिभ्यां ग्रहेश्छन्दसि" इस वार्त्तिक से छन्द में निपातन हैं ॥ 'छन्दसि' ग्रहण इसलिये है कि—भाषा में प्रतिग्राह्यम् । अपिग्राह्यम् । यहां ण्यत् हो जाता है ॥ ११८ ॥

पदास्वैरिबाह्यापक्ष्येषु च[1] ॥ ११९ ॥

ण्यत एवापवादः ॥ पदा० पक्ष्येषु । ७ । ३ ॥ च [अ०] ॥ पदम्, सुबन्तम् । स्वैरी स्वतन्त्रस्तत्प्रतिषेधः परतन्त्रः । बाह्या बहिर्भूताः । पक्षे भवः पक्ष्यस्तस्मिन् **दिगादि**[2]त्वाद्यत् ॥ पदादिषु चतुर्षु वाच्यार्थेषु ग्रहधातोः क्यप् प्रत्ययो भवति ॥ प्रगृह्यं पदम् । यस्य पदस्य प्रगृह्यसंज्ञा भवति ॥ अस्वैरीति वाच्यार्थस्य कर्त्तृत्वात् कर्त्तर्येव क्यप् । प्रतिगृह्योऽयं ब्राह्मणः । परतन्त्रो याचनप्रतिग्रहेण जीवति ॥ ग्रामगृह्या सेना । ग्रामाद्बहिर्भूतेत्यर्थः ॥ युधिष्ठिरगृह्या राजानः । तत्पक्षाश्रिता इत्यर्थः । क्यपः कित्वात् सर्वत्र संप्रसारणम् ॥ ११९ ॥

यह सूत्र भी ण्यत् का ही अपवाद है ॥ पद से यहां सुबन्त का ग्रहण है 'अस्वैरि' शब्द परतन्त्र का वाचक है । 'बाह्या' शब्द का अर्थ बहिर्भूत है । पक्ष में होने वाला 'पक्ष्यः' कहाता है । इसमें '**दिगादिभ्यो यत्**' सूत्र से यत् प्रत्यय होता है ॥

[**पदास्वैरिबाह्यापक्ष्येषु**] पदादि चार वाच्यार्थ अभिधेय हों तो [**च**] भी ग्रह धातु से क्यप् प्रत्यय होता है ॥

जैसे—**प्रगृह्यं पदम्** । जिस पद की कि प्रगृह्य संज्ञा की है । 'अस्वैरि' इस वाच्यार्थ के कर्त्ता में होने के कारण यहां क्यप् भी कर्त्ता में ही है । 'प्रतिगृह्योऽयं ब्राह्मणः' परतन्त्र है, क्योंकि भिक्षावृत्ति तथा दान से जीता है ॥ 'ग्रामगृह्या सेना' अर्थात् सेना ग्राम से बाहर है ॥ 'युधिष्ठिरगृह्या राजानः' अर्थात् युधिष्ठिर के पक्ष वाले हैं ॥ यहां क्यप् के कित् होने से सर्वत्र [ग्रहिज्या० ६ । १ । १६] इस सूत्र से संप्रसारण होता है ॥ ११९ ॥

विभाषा कृवृषोः[3] ॥ १२० ॥

प्राप्तप्राप्तविभाषेयम् ॥ कृधातोर्ऋकारान्तत्वात् 'ण्यत्' प्राप्तस्तत्राप्राप्तविभाषा । वृषधातोर्ऋदुपधत्वात् क्यप् नित्यं प्राप्तस्तत्र [प्राप्त] विभाषा ॥ विभाषा [अ०]

१. आ० सू० १४९ ॥ २. अ० ४ । ३ । ५४ ॥
३. आ० सू० १५० ॥

कृवृषोः । ६ । २ ।। कृवृषधातुभ्यां विकल्पेन क्यप् प्रत्ययो भवति पक्षे ण्यदेव ।। कृत्यम् । कार्य्यम् । वृष्यम् । वर्ष्यम् ।। ण्यत् पक्षे वृद्धिगुणौ, क्यपि तुगागमो गुणाभावश्च ।।१२०।।

यह 'प्राप्ताप्राप्तविभाषा' है । क्योंकि 'कृ' धातु के ऋकारान्त होने से ण्यत् प्राप्त था, वहां अप्राप्त क्यप् को विकल्प से कहा, तथा 'वृष' धातु के ऋकार उपधा में होने से क्यप् नित्य प्राप्त था वहां प्राप्त को विकल्प से कहा ॥

[कृवृषोः] कृ तथा वृष धातु से [विभाषा] विकल्प से क्यप् प्रत्यय होता है, पक्ष में ण्यत् होता है ॥

जैसे—कृत्यम् । कार्य्यम् । वृष्यम् । वर्ष्यम् । ण्यत् पक्ष में वृद्धि तथा गुण होते हैं । क्यप् परे 'तुक्' का आगम तथा गुण का अभाव होता है ॥ १२० ॥

युग्यं च पत्रे[1] ॥ १२१ ॥

हलन्ताण्ण्यत् प्राप्तः स बाध्यते । युग्यम् । १ । १ । च [अ०] पत्रे । ७ । १ ।। पतति गच्छत्यनेन तत्पत्रं वाहनम् ।। पत्रे वाच्ये युग्यमिति युजधातोः क्यप्, जकारस्य च कुत्वं निपात्यते ।। योक्तुमर्हो युग्यो हस्ती । युग्यो बलीवर्दः । युग्योऽश्वः ।। तद्धितेष्ये[2]-तत् सिध्यति—युगं वहतीति युग्यः ।। 'पत्रे' इति किम्—योग्यं पठनम् । अत्र ण्यदेव भवति ।। १२१ ।।

हलन्त होने से ण्यत् प्राप्त था उसका यह अपवाद है ।। 'पत्रम्' शब्द का अर्थ वाहन है ।।

[पत्रे] पत्र=वाहन अभिधेय हो तो [युग्यम्] युज धातु से क्यप् और जकार को कुत्व का निपातन होता हैं ।।

जैसे—योक्तुमर्हो युग्यो हस्ती । युग्यो बलीवर्दः । युग्योऽश्वः । तद्धित में भी 'युग्यम्' सिद्ध होता है ।। जैसे—युगं वहतीति युग्यः ।।

'पत्रे' ग्रहण इसलिये है कि—योग्यं पठनम् । यहां ण्यत् ही होता है ।। १२१ ।।

अमावस्यदन्यतरस्याम्[3] ॥ १२२ ॥

अमावस्यत् । १ । १ । अन्तरस्याम् [अ०] । अप्राप्तविभाषेयम् । ण्यति परतो नित्यं वृद्धिः प्राप्ता विकल्प्यते ।। अमापूर्वात् कालेऽधिकरणे वर्त्तमानाद् 'वस' धातोर्ण्यति परतो विभाषा वृद्धयभावो भवति ।। अमावसत्यन्तर्धत्ते चन्द्रोऽस्मिन् काले—अमावस्या । अमावास्या ।।

का०—अमावसोरहं ण्यतोर्निपातयाम्यवृद्धिताम् ।
तथैकवृत्तिता तयोः स्वरश्च मे प्रसिध्यति[4] ॥ १ ॥

---

१. आ० सू० ९५१ ॥
२. **'तद्वहति रथयुगप्रासङ्गम्'** (अ० ४ । ४ । ७६) इति यत्, युगं वहतीति युग्यः ॥
३. आ० सू० ९५२ ॥ ४. अ० ३ । १ । १२२ भा० ॥

ण्यतोर्ण्यत् प्रत्ययान्तयोरमावसोर्हृस्वापचारयोरमावस्याऽमावास्याशब्दयोरनेन सूत्रेण वृद्धयभावा विभाषाऽहं निपातयामि। तथैवंकरणेन तयोः शब्दयोरेकस्य कार्यमुच्यमानं द्वयोरपि भविष्यति। अर्थात् '**अमावास्याया वा**[1]' इति तद्धितप्रत्ययविधानेऽमावास्याग्रहणेनामावस्याशब्दादपि तद्धितोत्पत्तिः स्यात्। यद्यमावस्या शब्दो यदन्तः स्यात्तर्हि प्रत्ययान्तरेण शब्दान्तरत्वात् '**एकदेशविकृतमनन्यव[द्भवति][2]**' इति परिभाषायाः प्रवृत्तिरेव न स्यात्, यदि चामावस्या शब्दे यत् स्यात् तर्हि [उत्तरपदप्रकृतिस्वरत्वे] '**यतोऽनावः**[3]' इत्याद्युदात्तत्वं स्यात्, इष्यते च द्वयोः शब्दयोरन्तस्वरितः। ण्यति कृते '**तित्स्वरितम्**[4]' इत्युभयत्र स्वरितत्वं सिध्यति ॥ १२२ ॥

यह 'अप्राप्त विभाषा' है ॥ ण्यत् परे नित्य वृद्धि प्राप्त थी उसका विकल्प किया है ॥

'अमा' पूर्वक काल अधिकरण में वर्तमान 'वस' धातु से ण्यत् परे रहते विकल्प से वृद्धि का अभाव निपातन है ॥

जैसे—अमावसत्यन्तर्वते चन्द्रोऽस्मिन् काले—**अमावस्या** । **अमावास्या** ॥

का०—**अमावसोरहं ण्यतो०**.....**मे प्रसिद्ध्यति** ॥ १ ॥

ण्यत् प्रत्ययान्त अमावस्या, अमावास्या, शब्दों में इस सूत्र से मैं वृद्धि का अभाव विकल्प करके निपातन करता हूँ। ऐसा करने से इन दोनों में किसी एक को भी कहा हुआ काम दोनों को ही हो जायगा। जैसे—'अमावास्याया वा' यहां तद्धित 'वुन्' प्रत्यय के विधान में अमावास्या ग्रहण से अमावस्या शब्द से भी तद्धित की उत्पत्ति हो जाती है। यदि अमावस्या शब्द यत् प्रत्ययान्त ही हो तो प्रत्ययान्तर होने के कारण शब्दान्तर होने से यहां 'एकदेशविकृतमनन्यवद्भवति' इस परिभाषा की प्रवृत्ति नहीं हो सकती तथा यह भी कारण है कि—यदि अमावस्या शब्द यत् प्रत्ययान्त ही हो तो उत्तरपदप्रकृतिस्वर में 'यतोऽनावः' से उत्तरपदाद्युदात्तस्वर ही होगा, परन्तु इन दोनों प्रयोगों में अन्त स्वरित ही इष्ट है, सो ण्यत् करने पर ही 'तित्स्वरितम्' सूत्र से दोनों स्थान में स्वरितत्व हो जाता है ॥ १२२ ॥

छन्दसि निष्टर्क्यादेवहूयप्रणीयोन्नीयोच्छिष्यमर्य्यस्तर्य्याध्वर्य्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषोव्यब्रह्मवाद्यभाव्यस्तोव्योपचाय्यपृडानि[5] ॥ १२३ ॥

छन्दसि । ७ । १ । निष्टर्क्य० पृडानि । १ । ३ ॥ छन्दसि वेदविषये निष्टर्क्यादयः शब्दा निपात्यन्ते ॥

१. अ० ४ । ३ । ३० ॥
२. अ० ४ । १ । ८३ भा० ॥ पा० ३७ ॥
३. अ० ६ । १ । २१३ ॥
४. अ० ६ । १ । १८५ ॥
५. आ० सू० ९५३ ॥

अथ द्वाभ्यां कारिकाभ्यां निष्टक्र्यादिशब्देषु निपातनानि [प्र दर्श्यन्ते महाभाष्यकारेण—

निष्टक्र्ये व्यत्ययं विद्यान्निसः षत्वं निपातनात् ।
ण्यदायादेश इत्येतावुपचाय्ये निपातितौ ॥ १ ॥

ण्यदेकस्माच्चतुर्भ्यः क्यप् चतुर्भ्यश्च यतो विधिः ।
ण्यदेकस्माद्यशब्दश्च द्वौ क्यपौ ण्यद्विधिश्चतुः[1] ॥ २ ॥

निष्टक्र्यशब्दे निस्पूर्वात् '**कृती छेदने**[2]' इत्यस्माद्धातोर्ण्यत् । आद्यन्तविपर्ययस्तकारस्थाने ककारः, ककारस्थाने तकारश्च, निस उपसर्गस्य सकारस्य निपातनान्मूर्द्धन्य आदेशः, एवं निष्टक्र्यसिद्धिः । **ण्यदेकस्मादिति** निष्टक्र्यशब्देऽस्ति[3] । अत्र कृती धातोर्हलन्तत्वाण्ण्यत्तु प्राप्त एवान्यानि कार्य्याणि निपातनाद् भवन्ति ॥ **चतुर्भ्यः क्यप्**—देवपूर्वो ह्वेञ्-प्रपूर्वक-उत्पूर्वकश्च णीञ्, उत्पूर्वकः शासुः इत्येतेभ्यश्चतुर्भ्यः क्यप् प्रत्ययो निपात्यते । देवहूयः[4]—अत्र कित्त्वात् संप्रसारणम्[5] । प्रणीयः[6] । उन्नीयः[7] । उच्छिष्यः[8] ॥ **चतुर्भ्यश्च यतो विधिः**—'**मृङ्**[9] प्राणत्यागे' '**स्तृञ्**[10] आच्छादने' **धृ**[11] '**हूर्छने**' '**खनु**[12] **अवदारणे**' इति चतुर्भ्यो यत् प्रत्ययो निपात्यते । मर्य्यः[13] । स्तर्य्यः[14] । ध्वर्य्यः[8] । खन्यः[8] । इति चत्वारो यदन्ताः । **ण्यदेकस्मात्**—एकस्मात् खनधातोर्ण्यदपि भवति । खान्यः[8], इत्येको ण्यदन्तः ॥ **य-शब्दश्च**—एकस्मात् पुनर्यत् । देवोपपदाद्

---

१. अ० ३ । १ । १२३ भा० आ० ६ ॥ २. धा०—तुदा०—१५१ ॥
३. ऐत० आ० ५ । १ । ३ ॥
४. श०—२ । १ । ३ ॥ का० श०—१ । १ । ३ । १ ॥
५. अ० ६ । १ । १५ ॥
६. श०—३ । १ । ३ । १ ॥ का० श०—२ । १ । १ । १४ । तै०—३ । २ । ४ । १ ॥ ३ । ११ । ९ । ९ ॥ तै०—१ । २२ । ९ । २६ ॥ १ । २ । १८ । १ ॥ गो०—१ । ३ । १३ ॥
७. श०—४ । ३ । ५ । १९ ॥ १२ । ४ । २ । ८ ॥
८. अनुपलब्धमूलमिदम् ॥ ९. धा०—तुदा०—११९ ॥
१०. धा०—क्र्या०—१२ ॥ ११. धा०—भ्वा०—९२४ ॥
१२. धा०—भ्वा०—८६७ ॥ १३. तै०—२ । ८ । ७ । १ ॥
१४. 'स्तर्या' इत्यस्य यत्प्रत्ययान्तस्य स्त्रीलिङ्गे निपातनमतन्त्रम् । तथा हि—**स्तर्य्या भूत्वा स्तर्य्यान्सपत्नान्** (श० २ । २ । २ । १० ।) इत्यत्र पुल्लिङ्गे यत्प्रत्ययान्तस्य प्रयोगो दृश्यते ।

यजधातोर्यन्निपात्यते । देवयज्या[1], इति स्त्रीलिङ्गे यदन्त एकः ॥ **द्वौ क्यपौ**—प्रच्छ[2] ज्ञीप्सायाम्, षिवु[3] तन्तुसन्ताने, आङ्पूर्वात् प्रच्छेः, प्रतिपूर्वाच्च सीव्यतेः क्यप् प्रत्ययो निपात्यते । आपृच्छ्यः[4] । प्रतिषीव्यः* । इति द्वौ क्यबन्तौ ॥ **ण्यद्विधिश्चतुः**—ब्रह्मपूर्वाद् वदधातोर्ण्यत् । ब्रह्मवाद्यः[5] । भूस्तुभ्यां ण्यत् । भाव्यः* । स्ताव्यः ॥ उपपूर्वाच्चित्र् धातोर्ण्यद् वृद्धौ कृतायामायादेशश्च निपातनात् । उपचाय्यपृडं[6] हिरण्यम् ॥

१—*वा०—हिरण्य इति च वक्तव्यम्*[7] ।

उपचेयपृडमित्येवान्यत्र । यदा हिरण्यवाची उपचाय्यपृडशब्दस्तदा निपातनमन्यथा यदेव भवति ॥ १३३ ॥

[छन्दसि] वेद विषय में [निष्टक्यदेव० पृडानि] निष्टक्यादि शब्द निपातन किये हैं ॥

इन में किस में क्या क्या निपातन है सो यह कारिकाओं से महाभाष्यकार स्पष्ट दर्शाते हैं—

का०—निष्टक्यें व्यत्य० ···· ·····निपातितौ ॥ १ ॥
ण्यदेकस्मात्० ····· ····ण्यद्विधिश्चतुः ॥ २ ॥

[निष्टक्यं चिन्वीत पशुकामः] निष्टक्य शब्द में 'निस्' पूर्वक 'कृती छेदने' इस धातु से ण्यत् तथा आद्यन्त का विपर्यय अर्थात् तकार के स्थान में ककार और ककार के स्थान में तकार, 'निस्' उपसर्ग के सकार को मूर्द्धन्य आदेश निपातन होकर 'निष्टक्यं' रूप सिद्ध होता है ॥ कारिका में 'ण्यदेकस्मात्' इतने वचन से निष्टक्यं का ग्रहण किया है । यहां 'कृती' -धातु के हलन्त होने से ण्यत् प्राप्त ही था निपातन अन्य कार्यों के लिये है ॥

चार से क्यप् होता है—[**स्पर्द्धन्ते वा उ देवहूये**] यहां देवपूर्वक 'ह्वेञ्' तथा ['हु' से], 'प्र' पूर्वक-'उत्' पूर्वक णीञ् तथा 'उत्' पूर्वक शासु इन चारों से क्यप् प्रत्यय का निपातन है । 'देवहूयः' इस में क्यप् के कित् होने से संप्रसारण होता है ॥

---

१. ऐ०—२ । २० ॥ शां०—१० । ६ ॥ १२ । १ ॥ श०—१ । ८ । १ । ३१, ९ । १ । १३ ॥ ३ । १ । १ । ३ ॥ ८ । ६ । ३ । १६ ॥ ९ । ५ । १ । ६१ ॥

२. धा०—तुदा०—१२९ ॥ ३. धा०—दिवा०—२ ॥

४. ऋ० ९ । १०७ । ५ ॥ * अनुपलब्धमूलमिदम् ॥

५. जै० उ०—३ । २ । ३ । २ ॥ यद्यपि छन्दसि **'वदः सुपि क्यप् च'** (अ० ३ । १ । १०६) इति प्राप्तयोर्यत्क्यपोरपवादो ण्यन्निपात्यते तथापि **'ब्रह्मोद्यमाह्वयामहे'** (श०—११ । ६ । २ । ५ ।) इत्यादिषु क्यपि प्रयोग उपलभ्यते । न च वासरूपविधिना भविष्यतीति वाच्यम्, **'नानुबन्धकृतमसारूप्यमिति** परिभाषाया विद्यमानत्वात्, ब्रह्मोद्यं नाम निर्गुणस्य ब्रह्मणो निरूपणम् । तदुक्तम्—**'ब्रह्मोद्यं वदन्ति प्रजापतेरगुणाख्यानम्'** (का० श्रौ० सू०—१२ । ४ । १९ । २० ॥

६. **'उपचाय्यपृडं हिरण्यं दक्षिणा'** ॥ का० सं० ११ । १ ॥

७. अ०—३ । १ । १२३ भा० ॥

प्रणीयः उन्नीयः । उच्छिष्यः ॥

चार शब्दों में यत् प्रत्यय है—मृङ्-स्तृञ्-ध्वृ-खनु इन चार धातुओं से यत् प्रत्यय निपातन है । जैसे—मर्य्यः । स्तर्य्या । ध्वर्यः । खन्यः । ये चार यत्-प्रत्ययान्त हैं ॥

एक 'खन्' धातु से ण्यत् भी होता है । जैसे —**खान्यः** । यह एक ण्यदन्त है ॥ **'यशब्दश्च'**—अर्थात् एक शब्द यत् प्रत्ययान्त है 'देव' उपपद 'यज' धातु से यत् निपातन है । **देवयज्या** यह एक यत् प्रत्ययान्त स्त्रीलिङ्ग में है ॥

'द्वौ क्यपौ'—अर्थात् दो क्यप् प्रत्ययान्त हैं । आङ्पूर्वक 'प्रच्छ' धातु से तथा प्रतिपूर्वक 'सिवु' धातु से क्यप् प्रत्यय निपातन है । जैसे—**आपृच्छ्यः** । **प्रतिषीव्यः** । यह दो क्यप् प्रत्ययान्त हैं ॥

'ण्यद्विधिश्चतुः'—अर्थात् चार शब्द ण्यत् प्रत्ययान्त हैं—ब्रह्मपूर्वक 'वद' धातु से ण्यत् प्रत्यय होता है । **ब्रह्मवाद्यः** । 'भू' तथा 'स्तु' धातु से ण्यत् प्रत्यय होता है । **भाव्यः** । **स्ताव्यः** । 'उप' पूर्वक 'चिञ्' धातु से ण्यत् प्रत्यय होने पर 'आय्' आदेश निपातन से होता है । **उपचाय्यपृडं हिरण्यम् ॥**

१—वा०—**"हिरण्य इति वक्त०"** इस वार्त्तिक का अभिप्राय यह है कि—'उपचाय्यपृडम्' यह जब हिरण्यवाची होगा तब ही 'ण्यत् और 'आय्' आदेश निपातन से होता है । अन्यथा यत् प्रयत्य होने से **'उपचेयपृडम्'** ऐसा ही होता है ॥ १२३ ॥

ऋहलोर्ण्यत् ॥[1] १२४ ॥

ऋहलोः । ६ । २ । ण्यत् । १ । १ ॥ ऋवर्णान्ताद्धलन्ताच्च[2] धातोर्ण्यत् प्रत्ययो भवति । स्मार्य्यम् । धार्य्यम् । विदार्य्यम् ॥ हलन्त—पाठ्यम् । पाक्यम् । सेध्यम् । चेत्यम् ॥

१—वा०—*[पाणौ] सृजेर्ण्यद्विधिः*[3] *॥ पाणिसर्य्या रज्जुः ॥*

२—वा०—*समवपूर्वाच्च*[4] ॥

समवपूर्वाच्च 'सृज' धातोर्ण्यत् स्यात् । समवसर्य्या रज्जुः । अत्र सृज-धातोर्ऋदुपधत्वात् क्यप् प्राप्तः सोऽनेन बाध्यते ॥ २ ॥

३ – वा०—*दभेश्च*[5] ॥

---

१. आ० सू० ९५४ ॥

२. ऋकारान्तेभ्यो ण्यद्विधिः, नत्वर्त्तेः । कुतः ? हलः साहचर्यात्—**ईडवन्दवृशंसदुहां ण्यतः** (अ० ६ । १ । २१४) इति सूत्रे 'वृ' ग्रहणात्, **विप्रतिषेधे परं कार्यम्** (अ० १ । ४ । २) इति सूत्रे कार्यशब्दस्य ण्यत्प्रत्ययान्तस्य प्रयोगाच्च ॥

३. (क) अ० ३ । १ । १२४ भा० ॥ (ख) आ० वा०—९५५ ॥

४. (क) अ० ३ । १ । १२४ भा० ॥ (ख) आ० वा०—९५६ ॥

५. (क) अ० ३ । १ । १२४ भा० ॥ (ख) आ० वा०—९५७ ॥

'दभ' धातोरपि ण्यद् भवति । अपदाभ्यम् ॥ अत्र "**पोरदुपधात्**[1]" इति यत् प्राप्तः स बाध्यते ॥ अत्र तृतीयवार्त्तिके लपधातोरपि ग्रहणं तत्तु वक्ष्यमाणसूत्रेणैव सिध्यति । पुनर्लेखमुद्रणदोषेण पुस्तकेषु लिखितमिति विज्ञायते ॥ १२४ ॥

[**ऋहलोः**] ऋवर्णान्त और हलन्त धातुओं से [**ण्यत्**] ण्यत् प्रत्यय होता है ॥

जैसे—स्मार्य्यम् । धार्य्यम् । विदार्य्यम् ॥ हल—पाठ्यम् । पाक्यम् । सेध्यम् । चेत्यम् ॥

१—वा०—"**पाणौ सृजेर्ण्य०**" पाणि शब्द उपपद हो तो सृज धातु से ण्यत् प्रत्यय का विधान करना चाहिये ।

जैसे—**पाणिसर्ग्या रज्जुः** ॥

२—वा०—"**समवपूर्वाच्च**"—'सम्' 'अव्' पूर्वक भी सृज धातु से ण्यत् प्रत्यय होता है ॥

जैसे—**समवसर्ग्या रज्जुः** ॥ यहां सृज धातु के ऋकार उपधा में होने से क्यप् प्राप्त था, उसका यह अपवाद है ॥

३—वा०—"**दभेश्च**"—दभ धातु से भी ण्यत् होता है ॥

जैसे—**अपदाभ्यम्** ॥ 'दभ' में '**पोरदुपधात्०**' से यत् प्राप्त था सो वार्त्तिक ने बाध कर ण्यत् किया । इस तीसरी वार्त्तिक में लप धातु का भी ग्रहण है । परन्तु लप से ण्यत् तो '**आसुयुवपि-रपिलपि०**' सूत्र से ही सिद्ध है, पुन इस वार्त्तिक में 'लप' का पाठ पुस्तकों में लेखन और मुद्रण के दोष से चला आता है ॥ १२४ ॥

ओरावश्यके[2] ॥ १२५ ॥

उवर्णान्तानामजन्तत्वाद् यत् प्राप्तस्तस्यायमपवादः ॥ ओः । ५ । १ । आवश्यके । ७ । १ ॥ अवश्यंभाव आवश्यकम् । आवश्यके द्योत्ये सत्युवर्णान्ताद्धातोर्ण्यत् प्रत्ययो भवति ॥ अवश्यलाव्यम् । अवश्यपाव्यम् । लाव्यम् । पाव्यम् । अवश्यलाव्यमित्यादिषु "**मयूरव्यंसका**[3]" दित्वात् समासः ॥

['आवश्यके' इति किम्—लव्यम् । पव्यम् । अत्र यदेव भवति] ॥ १२५ ॥

उवर्णान्तों के अजन्त होने से यत् प्राप्त था उसका यह अपवाद है ॥

[**आवश्यके**] आवश्यक अर्थ अभिधेय होने पर [**ओः**] उवर्णान्त धातु से ण्यत् प्रत्यय हो ॥

जैसे—**अवश्यलाव्यम्** । अवश्यपाव्यम् । लाव्यम् । पाव्यम् ॥ अवश्यलाव्यम्, इस प्रकार के उदाहरणों में **मयूरव्यंसकादयश्च**' से समास होता है ॥

'आवश्यके' ग्रहण इसलिये है कि—**लव्यम्** । **पव्यम्** । यहां यत् ही होता है ॥ १२५ ॥

---

१. अ० ३ । १ । ९८ ॥ २. आ० सू० ९६५ ॥
३. अ० २ । १ । ७२ ॥

आसुयुवपिरपिलपित्रपिचमश्च[1] ॥ १२६ ॥

सुयुभ्यामजन्तत्वादन्येभ्यः **पोरदुपधा**[2]दिति यत् प्राप्तस्तस्यायमपवादः ॥ आसुयु० चमः । ५ । १ । च [अ०] ॥ आङ्पूर्वात् सुनोतेः-यु-वपि-रपि-लपि-त्रपि-चम इत्येतेभ्यो धातुभ्यो ण्यत् प्रत्ययो भवति ॥ आसाव्यम् । याव्यम् । वाप्यम् । राप्यम् । लाप्यम् । त्राप्यम् । आचाम्यम् । आङ्पूर्वादेव चमधातोर्वृद्धिर्भवति । चम्यमित्येवान्यत्र ॥ १२६ ॥

सु-यु धातुओं के अजन्त होने से तथा अन्य धातुओं से 'पोरदुपधात्०' सूत्र से यत् प्राप्त था उसका यह अपवाद है ॥

[आसुयु० चमः] आङ्पूर्वक षुञ्-यु-वप्-रप्-लप्-त्रप् और चम् धातु से ण्यत् प्रत्यय होता है ॥

जैसे—आसाव्यम् । याव्यम् । वाप्यम् । राप्यम् । लाप्यम् । त्राप्यम् । आचाम्यम् ॥ आङ्पूर्वक चम् धातु से ण्यत् परे वृद्धि होती है । आङ् उपसर्ग के विना 'चम्यम्' होता है ॥ १२६ ॥

आनाय्योऽनित्ये[3] ॥ १२७ ॥

आनाय्यः । १ । १ । अनित्ये । ७ । १ ॥ अत्र यत्प्राप्तौ बाधकत्वेन ण्यत् निपात्यते ॥ अनित्येऽनित्यस्थितौ सत्यामानाय्य इत्याङ् पूर्वान्नियतेर्ण्यन्निपात्यते ॥

१—वा०—दक्षिणाग्नाविति वक्तव्यम्[4] ॥

दक्षिणाग्निवाच्यानाय्यशब्दो निपात्यत इत्यर्थः ॥ १ ॥

का०—आनाय्योऽनित्य इति चेद्दक्षिणाग्नौ कृतं भवेत् ।
एकयोनौ तु तं विद्याद् 'आनेयो' ह्यन्यथा भवेत्[5] ॥ १ ॥

अनित्यपदार्थवाच्यानाय्यशब्दो निपात्यते तत्र दक्षिणाग्नेर्ग्रहणं स्यात् ॥ एका चासौ योनिः कारणमेकयोनिस्तस्यामेकयोनौ दक्षिणाग्नि विद्यात्, अर्थादाहवनीयादिक्रमेण सेवितो दक्षिणाग्निः स्यात् । यदा "वैश्यकुलाद्वा[6]" इत्याद्यवस्थायां दक्षिणाग्निः सेव्यते तत्र आनेय इति यदेव भविष्यति ॥ १२७ ॥

यहां यत् की प्राप्ति में ण्यत् अपवाद रूप से निपातन है ॥

[अनित्ये] अनित्य अर्थ अभिधेय हो तो [आनाय्यः] आङ्पूर्वक 'णीञ्' धातु से ण्यत् निपातन है ॥

१—वा०—"दक्षिणाग्ना०"—'आनाय्य' यह दक्षिणाग्निवाची निपातन है ॥

का०—आनाय्योऽनित्य०···· ·····आनेयो ह्यन्यथा भवेत् ॥ १ ॥

---

१. आ० सू० ९६६ ॥
२. अ० ३ । १ । ९८ ॥
३. आ० सू० ९६७ ॥
४. अ० ३ । १ । १२७ भा० ॥
५. अ० ३ । १ । १२७ भा० ॥
६. द्र०—पार० गृ० १ । २ । ३ ॥

अनित्यपदार्थवाची आनाय्य शब्द का निपातन दक्षिणाग्नि में किया है एक योनि अर्थात् कारण है जिस का उस दक्षिणाग्नि में **'आनाय्य'** होता है ऐसा समझना चाहिये, अर्थात् आहवनीयादिक्रम से सेवित दक्षिणाग्नि होती है। जब 'वैश्यकुलाद्वा' इस प्रकार की व्यवस्था में दक्षिणाग्नि सेवन की जावे तो उसमें **'आनेय'** ऐसा यत् प्रत्ययान्त ही होता है ॥ १२७ ॥

प्रणाय्योऽसम्मतौ[1] ॥ १२८ ॥

प्रणाय्यः । १ । १ । असम्मतौ । ७ । १ ॥ अत्रापि यत्प्राप्तौ ण्यन्निपात्यते ॥

सम्मननं सम्मानो वा सम्मतिः सत्कारः, सा न विद्यते यस्मिन्, तस्मिन् असम्मतावभिधेये सति प्रपूर्वाण्णीञ्-धातोर्ण्यदायादेशौ निपात्येते ॥ प्रणाय्यो दुष्टः । प्रणाय्यो मूर्खः । [प्रणाय्यो[2]ऽन्तेवासी, भोगविषयेऽनादरबुद्धिरित्यर्थः] ॥

'असम्मतौ' इति किम्—प्रणेयः । अन्यत्र यदेव भवति ॥ १२८ ॥

इस सूत्र में भी यत् की प्राप्ति में ण्यत् निपातन है ॥ सम्मति [प्रीति का विषय और भोग में आदर बुद्धि] जिसमें न हो वह 'असम्मति' कहाता है ॥

[**असम्मतौ**] असम्मति अभिधेय हो तो [**प्रणाय्यः**] प्रणाय्य यहां प्रपूर्वक णीञ् धातु से ण्यत् प्रत्यय तथा 'आय्' आदेश निपातन से होता है ॥

जैसे—**प्रणाय्यो दुष्टः । प्रणाय्यो मूर्खः ।**

'असम्मतौ' ग्रहण इसलिये है कि—**प्रणेयः ।** यहां यत् ही होता है ॥ १२८ ॥

पाय्यसांनाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु[3] ॥ १२९ ॥

पाय्य० धाय्याः । १ । ३ । मान० धेनीषु । ७ । ३ ॥ पाय्यादयश्चत्वारः शब्दा मानादिषु चतुर्ष्वर्थेषु यथासंख्यं निपात्यन्ते ।

१—वा०—*पाय्यनिकाय्ययोरादिपत्वकत्वनिपातनम्*[4] ॥

'माङ् माने'[5] इत्यस्माद्धातोर्ण्यत्, निपातनान्मकारस्य पकारादेश इति पाय्ये निपातनम् । पाय्यं मानम् । मेयमित्यन्यत्र । सान्नाय्य इति सम्पूर्वान्नयतेर्ण्यत्, ण्यत्याया-

---

१. आ० सू० ९६८ ॥

२. सम्मतिरभिलाषोऽप्युच्यते, तेनाऽसम्मतावनभिलाषेऽपि प्रणाय्यशब्दप्रयोगो दृश्यते—**ज्येष्ठाय पुत्राय ब्रह्म प्रब्रूयात् प्रणाय्यायान्तेवासिने नान्यस्मै कस्मैचनेति** (छान्दो० प्र० ३ । खं० ११ । प्रवाक ५-६) निष्कामतयाऽसम्मतिरन्तेवासी भवति । तस्मै निष्कामाय मोक्षार्थं यतमानायान्तेवासिने प्रणाय्याय ब्रह्मप्रब्रूयादिति युज्यते ॥

३. आ० सू० ९६९ ॥

४. वा०—अ० ३ । १ । १२९ भा० ॥

५. धा०—दिवा०—३४ ॥

देश उपसर्गस्य च दीर्घत्वं निपात्यते । साऽन्नाय्यं[1] हविः । सन्नेयमित्यन्यत्र ॥ निकाय्य इति निपूर्वाच्चिनोतेर्ण्यत् तस्मिन्नायादेशश्चकारस्य च कुत्वं निपात्यते निकाय्यो निवासः । निचेयमित्यन्यत्र ॥ धाय्येति ड्वुधाञ्-धातोर्ण्यत् प्रत्ययो निपात्यते । धाय्या[2] सामिधेनी । धेयमित्यन्यत्र । सर्वत्राजन्तत्वाद् यत् प्राप्तः स बाध्यते । १२९ ॥

अजन्त होने से यत् प्राप्त था उसका यह अपवाद है ॥

[पाय्यसान्नाय्यनिकाय्यधाय्या] पाय्यादि चार शब्द [मानहविर्निवाससामिधेनीषु] मानादि चार अर्थों में यथासंख्य निपातन हैं ॥

१ – वा०—"पाय्यनिकाय्ययोरा०" 'माङ् माने' इस धातु से ण्यत् निपातन से मकार को पकार आदेश 'पाय्य' शब्द में निपातन है । जैसे—**पाय्यं मानम्** । अन्यत्र—**'मेयम्'** ऐसा होता है ॥ 'सान्नाय्य' इसमें 'सम्' पूर्वक 'णीञ्' धातु से ण्यत्, परे रहते 'आय्' आदेश उपसर्ग को दीर्घ निपातन से होता है । जैसे—**सान्नाय्यं हविः** ॥ अन्यत्र—**'सन्नेयम्'** ऐसा प्रयोग होता है ॥ 'निकाय्य' इसमें निपूर्वक 'चिञ्' धातु से ण्यत्, ण्यत् परे 'आय्' आदेश, चकार को कुत्व निपातन से होता है ॥ जैसे—**निकाय्यो निवासः** ॥ अन्यत्र—**'निचेयम्'** ऐसा प्रयोग होता है ॥ 'धाय्या' इसमें ड्वुधाञ् धातु से ण्यत् प्रत्यय का निपातन है ॥ जैसे—**धाय्या सामिधेनी** । अन्यत्र—**'धेयम्'** ऐसा प्रयोग होता है ॥ १२९ ॥

---

१. निपातनादयं शब्दः **'ऐन्द्रं दध्यमावास्यायाम्'** (तै० सं० कां० २ । प्र० ५ । अ० ४ ।) **'ऐन्द्रं पयोऽमावास्यायामि'**ति वचनाभ्यां विहिते हविर्विशेष एव सन्तिष्ठते, न तु हविर्मात्रे । यत्तु माधवेन—**'हुतमयमवलीढे साधुसान्नाय्यमग्निः'** (मा० का० ११-४१) इति हविः सामान्ये सान्नाय्यशब्दः प्रयुक्तस्तत्तस्याज्ञानमूलमेव, यद्वा लक्षणया कथञ्चिदुन्नेयः ॥

सान्नाय्यपदनिर्वचनम्—**'यत् समनयन् तत्सान्नाय्यस्य सान्नाय्यत्वम्'** (तै० सं० २ । ५ । ३) ॥

२. **'प्रवोवाजा अभिद्यव'** इत्येवमादिकाः प्रकृतिषु पठ्यमाना एकादशर्चोऽग्नेः समिन्धनकार्ये विनियुक्तत्वात् सामिधेन्य इत्युच्यन्ते, तत्रापि न सर्वा सामिधेन्यो धाय्या उच्यन्ते, किन्तु **'एकविंशतिरनुब्रूयात् प्रतिष्ठाकामस्य'** (तै० सं० कां० २ । प्र० ५ । अ० १०) इत्यादिवचनात् यदा काम्ये नैमित्तिके वा यज्ञे पञ्चदशभ्योऽधिकाः सामिधेन्योऽपेक्ष्यन्ते तदा तत्संख्यापूरणाय **समिध्यमानवतीं समिद्धवतीम्** (श० १ । ४ । १ । ३८) चान्तरेण या ऋचः प्रक्षिप्यन्ते ता एव सामिधेन्यो धाय्या उच्यन्ते, **इयं वै समिध्यमानवती असौ समिद्धवती । यदन्तरा तद्धाय्या इति** वचनात् ॥

जैमिनिरप्याह—**'समिद्ध्यमानवतीं समिद्धवतीञ्चान्तरेण धाय्या स्युः'** (मी० अ० ५ । पा० ३ । सू० ४) इत्यादिना ॥

क्वचित् **'धाय्याः शंसति.....। अग्निर्नेता.....**इति । **त्वं सोम क्रतुभिरिति** (ऐत० ब्रा० १२ । ७ ॥) **यद्वा वनेति धाय्या** (ऐत० आ० ५ । २ । २ ।) इत्येवमादिष्वसामिधेन्यामपि धाय्या शब्दव्यवहारो दृश्यते । वस्तुतस्तु ब्राह्मणेन धाय्यापदविशेषिता ऋच एव धाय्या उच्यन्ते । तस्मात् सूत्रे सामिधेनीग्रहणं प्रयोगविषयप्रदर्शनार्थमेव नत्ववधारणार्थमेतच्च सर्वं निपातनाल्लभ्यते ॥

क्रतौ कुण्डपाय्यसञ्चाय्यौ[1] ॥ १३० ॥

क्रतौ । ७ । १ । कुण्डपाय्यसंचाय्यौ । १ । २ ॥ क्रतौ यज्ञेऽभिधेये सति कुण्डपाय्यसंचाय्यशब्दौ निपात्येते ॥ कुण्डोपपदात् **'पा पाने'**[2] इत्यस्माद्धातोरधिकरणे यत्प्रत्ययः, निपातनाद् युगागमः । ण्यति कृते [उत्तरपदप्रकृतिस्वरे] 'यतोऽनावः'[3] इत्याद्युदात्तत्वं न प्राप्नोति, तस्माद् यद्विधीयते । कुण्डेन[4] पीयतेऽस्मिन्कुण्डपाय्यः क्रतुः[5] । कुण्डपेयमित्यन्यत्र ॥ सञ्चाय्य इति संपूर्वाच्चिनोतेर्ण्यदायादेशो निपातनात् । सञ्चीयते तस्मिन्नग्निरिति सञ्चाय्यः क्रतुः । सञ्चेयमित्यन्यत्र ॥

१—वा०—*कुण्डपाय्ये यद्विधिः*[6] ॥ स्वरार्थ इत्यर्थः ॥ १३० ॥

[क्रतौ] क्रतु अभिधेय हो तो [**कुण्डपाय्यसञ्चाय्यौ**] कुण्डपाय्य और सञ्चाय्य निपातन हैं ॥

कुण्डोपपद 'पा पाने' धातु से अधिकरण में यत् और निपातन से युक् । यहां उत्तरपदप्रकृतिस्वर में 'यतोऽनावः' स्वर की प्राप्ति के लिये ण्यत् को बाध कर यत् का विधान किया॥ जैसे—कुण्डेन पीयतेऽस्मिन्निति—**कुण्डपाय्यः क्रतुः** ॥ अन्यत्र—**'कुण्डपेयम्'** होता है ॥ 'सम्' पूर्वक 'चिञ्' धासु से ण्यत्, आय् आदेश निपातन है । सञ्चीयते तस्मिन्नग्निरिति **सञ्चाय्यः क्रतुः** ॥ अन्यत्र—**'सञ्चेयम्'** ऐसा होगा ॥ १३० ॥

अग्नौ परिचाय्योपचाय्यसमूह्याः[7] ॥ १३१ ॥

अग्नौ । ७ । १ ॥ परिचाय्योपचाय्यसमूह्याः । १ । ३ ॥ अग्नौ[8] वाच्ये सति परिचाय्यादयस्त्रयः शब्दा ण्यदन्ता निपात्यन्ते । परिपूर्वादुपपूर्वाच्च चिनोतेर्ण्यदायादेशश्च । परिचाय्यो[9]ऽग्निः । उपचाय्यो[10]ऽग्निः ॥ परिचेयम्-उपचेयमित्यन्यत्र ॥ संपूर्वाद्

---

१. आ० सू० ९७० ॥ २. धा०—भ्वा० ९११ ॥

३. अ० ६ । १ । २११ ॥

४. **'यदत्सरुकैश्चमसैर्भक्षयन्ति तदेषां कुण्डमिति श्रुतिः'** इति बालमनोरमा ॥

५. क्रतुशब्दः सोमयागेषु रूढ इति प्रसिद्धिः ॥

६. अ० ३ । १ । १३० भा० ॥ ७. आ० सू० ९७१ ॥

८. अग्निशब्दोत्र अग्न्याधारभूत इष्टकारचितस्थण्डिलविशेषे वर्त्तते । **यदिष्टकाभिरग्निं चिनोति** (तै० सं० का० ५ । प्र० ६) इति वचनात् ॥

९. **'परिचाय्यं चिन्वीत सजातकामः'** (का० सं० २१ । ४) । **"परिचाय्यं चिन्वीत ग्रामकामः"** (तै० सं० ५ । ४ । ११) ॥

१०. **'उपचाय्यं चिन्वीत ग्रामकामः'** । (मै० सं० ३ । ४ । ७) ॥ यस्तु मुद्रितपुस्तक उपचान्यमिति पाठः सः प्रकरणानुरोधेनाशुद्धः प्रतिभाति, उपचाय्य इत्येव तत्र भवितव्यम् ॥

वहधातोर्ण्यत् संप्रसारणं दीर्घत्वञ्च निपातनात् । समूह्यो[1]ऽग्निः । संवाह्यमित्यन्यत्र ॥ १३१ ॥

[अग्नौ] अग्नि अभिधेय हो तो [परिचाय्योपचाय्यसमूह्याः] परिचाय्य उपचाय्य और समूह्य ये निपातन हों ॥

'परि' तथा 'उप' पूर्वक 'चिञ्' धातु से ण्यत् तथा 'आय्' आदेश का निपातन है ॥

जैसे—परिचाय्योऽग्निः । उपचाय्योऽग्निः ॥ अन्यत्र—परिचेयम् । उपचेयम् ॥ 'सम्' पूर्वक 'वह' से ण्यत् तथा संप्रसारण और दीर्घ का निपातन है । जैसे—समूह्योऽग्निः ॥ अन्यत्र—संवाह्यम् ॥ १३१ ॥

चित्याग्निचित्ये च[2] ॥ १३२ ॥

'अग्नौ' इत्यनुवर्त्तते । चित्याग्निचित्ये । १ । २ । च [अ०] ॥ चित्यशब्दोऽग्निचित्याशब्दश्चाग्नौ वाच्ये निपात्येते ॥ चिञ्-धातोर्ण्यति वृद्ध्यभावस्तुगागमश्च निपात्यते । चीयतेऽसौ चित्यो[3]ऽग्निः । चेयमित्यन्यत्र ॥ अग्निपूर्वाच्चिनोतेर्भावे यः प्रत्ययो गुणाभावस्तुगागमौ च निपातनात्, तस्मिन् सत्यन्तोदात्त एव भवति । अग्निचयनमेवाग्निचित्या । अग्निचयनमित्यन्यत्र ॥

भा०—अग्निचित्येति भावेऽन्तोदात्तो भवति । अग्निचयनमेवाग्निचित्या ॥ एतदेव पूर्वं व्याख्यातम् ॥ १३२ ॥

[इति कृत्यसंज्ञाधिकारः]

यहां 'अग्नौ' पद का अनुवर्तन है ॥

अग्नि अभिधेय हो तो [चित्याग्निचित्ये] 'चित्य' और 'अग्निचित्या' इन शब्दों का निपातन है ॥

जैसे—चीयतेऽसौ ।चित्योऽग्निः । यहां 'चिञ्' धातु से ण्यत् वृद्धि का अभाव और तुक् का आगम निपातन है ॥ अन्यत्र 'चेयम्' ऐसा होता है ।, अग्निचयनमेवाऽग्निचित्या । यहां अग्निपूर्वक 'चिञ्' धातु से भाव में य प्रत्यय, गुण का अभाव और तुक् का आगम निपातन है ॥ अन्यत्र 'अग्निचयनम्' ऐसा होता है ॥

'अग्निचित्येत्यन्तोदात्तत्वं भावे' अग्निचित्या में य प्रत्यय भाव में हुआ था भाष्य के इस वचन से अन्तोदात्त भी होता है ॥ १३२ ॥

[कृत्यप्रत्ययों का अधिकार समाप्त हुआ ॥]

---

१. **'समूह्यं चिन्वीत पशुकामः'** (तै० सं० ५ । ४ । ११ ।) (मै० सं० ३ । ४ । ७ ॥ (का० सं० २१ । ४) ॥

२. आ० सू० ९७२ ॥

३. **'अग्नौ चित्ये क्रियन्ते'** (का० सं० २१ । ८) ॥

ण्वुल्तृचौ[1] ॥ १३३ ॥

उत्सर्गसूत्रमिदमस्यान्येऽपवादा वक्ष्यन्ते । 'धातोः' इत्यनुवर्त्तते ॥ ण्वुल्तृचौ । १ । २ ॥ धातुमात्राण्ण्वुल्तृचौ[2] प्रत्ययौ भवतः ॥ कारकः । हारकः । कर्त्ता । हर्त्ता ॥

ण्वुलि णित्करणं वृद्ध्यर्थम् । लित्करणश्च स्वरार्थम् । तृचि चित्करणं निरनुबन्धकग्रहणे सामान्यग्रहणार्थम् । **'तुश्छन्दसि[3]'** । **'तुरिष्ठेमेयःसु[4]'** अत्र तृन्-तृचोरुभयोर्ग्रहणं यथा स्यात् ॥ १३३ ॥

यहां 'धातोः' पद का अनुवर्त्तन है ॥ यह उत्सर्ग सूत्र है आगे इसके अपवाद कहेंगे ॥

धातुमात्र से [ण्वुल्तृचौ] ण्वुल् और तृच् प्रत्यय होते हैं ॥

जैसे—कारकः । हारकः । कर्त्ता । हर्त्ता ॥

ण्वुल् में णित्करण वृद्धि के लिये है और लकार का अनुबन्ध [लिति ६ । १ । १९३] स्वर के लिये है । तृच् में—चित्करण निरनुबन्धक के ग्रहण में सामान्यग्रहण के लिये है । जैसे—'तुश्छन्दसि' (अ० ५ । ३ । ५९), 'तुरिष्ठेमेयस्सु' (अ० ६ । ४ । १५४) इत्यादि में तृन्, तृच् दोनों का ग्रहण हो जावे ॥ १३३ ॥

नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः[5] ॥ १३४ ॥

नन्दिग्रहिपचादिभ्यः । ५ । ३ । ल्युणिन्यचः : १ । ३ ॥ आदिशब्दः प्रत्येकं सम्बध्यते, नन्द्यादि-ग्रहादि-पचादिभ्श्च ॥ नन्द्यादिगणत्रयेभ्यो ल्युणिन्यच इति त्रयः प्रत्यया यथासंख्यं भवन्ति । अर्थान्नन्द्यादिभ्यो ल्युः, ग्रह्यादिभ्यो णिनिः, पचादिभ्योऽच् ॥ नन्दनः । वासनः । मदनः ॥ ग्रहि-ग्राही । उत्साही । उद्वासी ॥ पच—पचः । वपः । वदः ॥ णिनि प्रत्यये णित्वाद्वृद्धिः । अचि चित्करणं **'यङोऽचि च[6]'** इति इति विशेषणार्थम् ॥

१—वा—अजपि सर्वधातुभ्यः[7] ॥

धातुमात्रादेव प्रत्ययो विधीयते । इहापि यथा स्यात् । भवः । सवः । तेन पचादिभ्योऽपि स्यादेव पुनर्गणे पठनस्यैतत् प्रयोजनम्—नदट् । चोरट् । इत्यादिषु केषुचिच्छब्देषु टित्करणं क्रियते ङीप् प्रत्ययो यथा स्यात् । गणपठनमन्तरेण नदी, चोरीत्यत्र ङीप्-न भविष्यति । द्वितीयं प्रयोजनम्—'कर्मण्यण्' इति सूत्रमस्य बाधकम् । तत्र कर्मण्युपपदे पचादिभ्योऽजेव स्यात् । श्वानं पचतीति श्वपचः ॥

---

१. आ० सू० ९७४ ॥
२. ण्वुल्प्रत्ययस्त्रिकालविषयो दृष्टः । पाठको भवति । पाठको भविष्यति । पाठकोऽभूत् ॥
३. अ० ५ । ३ । ५९ ॥
४. अ० ६ । ४ । १५४ ॥
५. आ० सू० ९७५ ॥
६. अ० २ । ४ । ७४ ॥
७. अ० ३ । १ । १३४ भा० ॥

अथ नन्द्यादिगणः—नन्दिवासिमदिदूषि[1]साधिवर्द्धिशोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायाम् ॥ नन्दनः [१] वासनः[2] [२] मदनः [३] दूषणः[3] [४] साधनः [५] वर्द्धनः [६] शोभनः [७] रोचनः [८] सहितपिदमेः संज्ञायाम् ॥ सहनः [९] तपनः [१०] दमनः [११] जल्पनः [१२] रमणः[4] [१३] संक्रन्दनः [१४] संकर्षणः [१५] संहर्षणः[5] [१६] जनार्दनः [१७] पवनः[6] [१८] यवनः[7] [१९] मधुसूदनः [२०] विभीषणः [२१] लवणः[8] [२२] चित्तविनाशनः[9] [२३] कुलदमनः [२४] शत्रुदमनः[10] [२५] इति नन्द्यादिगणः ॥

अथ ग्रह्यादिः—ग्राही [१] उत्साही [२] उद्वासी [३] उदासी [४] उद्भासी [५] स्थायी [६] मन्त्री [७] सम्मर्दी [८] रक्षश्रुवसवपशौ नौ ॥ निपूवभ्यो रक्षादिभ्यो णिनिः। निरक्षी [९] निश्रावी [१०] निवासी [११] निवापी [१२] निशायी [१३] याचिव्याहृसंव्याहृव्रजवदवसां प्रतिषिद्धानाम् ॥ अयाची [१४] अव्याहारी [१५] असंव्याहारी[11] [१६] अव्रा।जो [१७] अवादी [१८] अवासी [१९] अचामचित्तकर्तृकाणाम् ॥ प्रतिषिद्धानामित्यनुवर्त्तते। अचित्तकर्तृकेभ्यः प्रतिषिद्धेभ्योऽजन्तेभ्यो धातुभ्यो णिनिः। अकारी [२०] अहारी [२१] अविनायी [२२] अविशायी [२३] अविशयी [२४] विषयी[12] देशे ॥

---

१. 'वाशिमदिभूषि' इति पाठान्तरम् ॥ २. 'वाशनः' इति शब्दकौस्तुभे ॥

३. 'भूषणः' इति क्वाचित्कः पाठः ॥

४. इतोऽग्रे 'दर्पण' इत्यधिकं काशिकाशब्दकौस्तुभगणरत्नावलीषु ॥

५. क्वचिन्नोपलभ्यते ॥ ६. 'पवनः' नास्ति शब्दकौस्तुभे ॥

७. 'जवनः' इति गणरत्नमहोदधौ ॥

८. इतोऽग्रे 'निपातनाण्णत्वम्' इत्यधिकं काशिकागणरत्नमहोदध्योः ॥

९. 'वित्तनाशनः' इति गणरत्नमहोदधौ ॥

१०. नर्दनः, विरोचनः, विकर्त्तनः, तर्दनः, दहनः। असंज्ञायामपि—'रिपुदमनः, पुरार्दनः, रोगनाशनः, अरिसूदनः,' इत्यधिकं गणरत्नमहोदधौ ॥ असंज्ञायामपि—'रिपुदमनः, रोगनाशनः, शत्रुसूदनः' इत्यधिकं गणरत्नावल्याम् ॥

११. 'असंव्यवहारी, असंव्याहारी, शकटाङ्गजवामनाविति गणरत्नमहोदधौ ॥

१२. "शीङ् स्वप्ने 'विशयी' वृद्धयभावो निपातनात्। षिञ् बन्धने 'विषयी' वृद्धयभावः प्राग्वत्। इह षत्वमपि निपातनात्" शब्दकौस्तुभे। 'विशयी, विषयी वा देश' इति गणरत्नमहोदधौ ॥

विषयी देशः [२५] अभिभावी भूते ।। अभिभावी [२६] अपराधी[1] [२७] उपरोधी[2] [२८] परिभावी [२९] परिभवी[3] [३०] इति ग्रह्यादिगणः ।।

अथ पचादिः—पच [१] वच[4] [२] वप [३] वद [४] चल [५] पत[5] [६] तप [७] नदट् [८] भषट् [९] वस [१०] गरट् [११] प्लवट् [१२] चरट्[6] [१३] तरट् [१४] चोरट् [१५] गाहट्[7] [१६] सूदट् [१७] देवट् [१८] मोरट[8] [१९] जर [२०] मर [२१] क्षर[9] [२२] क्षम[9] [२३] सेव[10] [२४] मेष[11] [२५] कोष[12] [२६] क्रोध [२७] मेघानर्त्त[13] [२८] व्रण[14] [२९] दर्श [३०] सर्प[15] [३१] दर्प[15] [३२] दंश[16] [३३] दम्भ[17] [३४] जारभर[17] [३५] श्वपच[18] [३६] ।। आकृतिगणोऽयं पचादिः ।। इति पचादिराकृतिगणः समाप्तः ।। १३४ ।।

यहां आदि शब्द का प्रत्येक के साथ सम्बन्ध है ।।

[नन्दिग्रहिपचादिभ्यो] नन्द्यादिक, ग्रह्यादिक और पचादिक धातुओं से यथाक्रम [ल्युणिन्यचः] ल्यु, णिनि तथा अच् प्रत्यय हों ।। जैसे—[नन्दयतीति] नन्दनः । वासनः । मदनः । [जनानर्दयतीति जनार्दनः] ग्राही । उत्साही । उद्वासी । स्थायी ।। पचतीति पचः । वपः । वदः । [भवतीति भवः] ।।

१—वा०—"अजपि सर्वधातुभ्यः"—इस वार्त्तिक से धातुमात्र से अच् प्रत्यय होता है ।।

जैसे—भवः । सवः । वदः इत्यादि ।।

---

१. इतोऽग्रे 'अवरोधी' इत्यधिकं शब्दकौस्तुभे गणरत्नमहोदधौ ।।

२. 'उपराधी' इति गणरत्नावल्यामधिकम् ।।

३. 'इह पाक्षिको वृद्धचभावः' इति शब्दकौस्तुभे । 'विभर्व-विभावी' इति भोजमतेन इति गणरत्नमहोदधौ ।।

४. नास्ति काशिकायाम् ।।

५. 'तप-पत' इति काशिकायाम् । 'तप' नास्ति प्रक्रियाकौमुद्याम् ।।

६. नास्ति काशिकायाम् ।।

७. 'ग्राहट्' इति काशिकागणरत्नावलीगणरत्नमहोदधिषु ।।

८. नास्ति प्रक्रियाकौमुद्याम् ।।

९. जर-मर-क्षर-क्षभ एतेषां सूदट् शब्दात् पूर्वः पाठः काशिकायाम् ।।

१०. 'सवः' इति क्वचित् ।। ११. 'शेपः' इति प्रक्रियाकौमुद्याम् ।।

१२. 'कोष' इति नास्ति काशिकायाम्, कोप इति पाठान्तरं प्रक्रियाकौमुद्याम् ।।

१३. 'मेघ' 'नर्त्त' इति प्रक्रियाकौमुद्याम् ।। १४. 'व्राण' इति प्रक्रियाकौमुद्याम् ।।

१५. 'सर्प-दर्प' न स्तः काशिकाप्रक्रियाकौमुद्योः ।।

१६. 'पङ्क' इति प्रक्रियाकौमुद्याम् ।। १७. 'दम्भ-जारभर' न स्तः प्रक्रियाकौमुद्याम् ।।

१८. सूरट्-मद-रज-क्षय-क्षप-दोषट् एतेऽत्र गणेऽधिका गणरत्नावल्याम् । वश-रण-वर-गोप-मेघ-देह-प्ररोह-चेल-दर-स्कन्द-शेव-दर्भ-वह एते गणरत्नमहोदधावधिकाः ।।

यह अच् प्रत्यय धातुमात्र से इष्ट है, इससे पचादिगण का कथन शब्दों के साथ अनुबन्ध लगाने और बाधकों को बाधने के लिये है। जैसे—नदट्-चोरट्-देवट् इत्यादि टित् माने हैं, **नदः**। **चोरः**। **देवः**। स्त्रीलिङ्ग में—**नदी**। **चोरी**। **देवी**। यहां इगुपधत्व मानकर दिवु धातु से क प्रत्यय प्राप्त था उसको बाध कर अच् प्रत्यय हुआ॥ जारभरा, श्वपचा इनमें [**'कर्मण्यण्'**] से अण् प्राप्त था॥ १३४॥

इगुपधज्ञाप्रीकिरः कः[1] ॥ १३५ ॥

इगुपधज्ञाप्रीकिरः। ५। १। कः। १। १॥

इक्-उपधायां यस्य तस्मात्, **ज्ञा अवबोधने**[2], **प्रीञ् तर्पणे कान्तौ च**[3], **कॄ विक्षेपे**[4], इत्येतेभ्यो धातुभ्यः कः प्रत्ययो भवति॥ इगुपध—क्षिपः। बुधः। जानातीति ज्ञः। आकारस्य लोपः। प्रीणातीति प्रियः। किरतीति किरः॥ देवादयाः शब्दा इगुपधलक्षणा ये पचादिषु पठ्यन्ते तेभ्योऽजेव भवति॥ १३५॥

[**इगुपधज्ञाप्रीकिरः**] इक् जिसके उपधा में हो और ज्ञा, प्री तथा कॄ धातुओं से [**कः**] क प्रत्यय हो॥

जैसे—इगुपधों से—**क्षिपः**। **बुधः**। जानीतीति **ज्ञः**। यहां आकार का लोप हो जाता है। प्रीणातीति **प्रियः**। किरतीति **किरः**॥ इगुपध जो 'देव' आदि शब्द पचादि में पढ़े हैं, उनसे अच् ही होता है॥ १३५॥

आतश्चोपसर्गे[5] ॥ १३६ ॥

णस्यापवादः। आतः। ५। १। च [अ०] उपसर्गे। ७। १॥ उपसर्गे उपपदे सति आकारान्ताद् धातोः कः प्रत्ययो भवति॥

प्रयातीति प्रः। प्रलातीति प्रलः॥ १३६॥

यह 'ण' प्रत्यय का अपवाद है॥

[**उपसर्गे**] उपसर्ग पूर्व हो तो [**आतः**] आकारान्त धातु से क प्रत्यय हो॥
जैसे—प्रयातीति **प्रः**। प्रलातीति **प्रलः**। [**प्रस्थः**। **प्रवः**। **सुग्लः**। **सुम्लः**]॥१३६॥

पाघ्राध्माधेट्दृशः शः[6] ॥ १३७ ॥

पाघ्रा० दृशः। ५। १। शः। १। १॥ पादीनां समाहारद्वन्द्वः॥ दृशधातोरिगुपधात्वात् कः प्राप्तोऽन्येभ्य आकारान्तत्वात् सोऽनेन बाध्यते॥ पादिभ्यः सोपसर्गनिरुपसर्गेभ्यो धातुभ्यः सर्वत्र शः प्रत्ययो भवति॥

---

१. आ० सू० ९७६॥
२. धा०—क्र्या०—२६॥
३. धा०—क्र्या०—२॥
४. धा०—तुदा०—१२५॥
५. आ० सू० ९७७॥
६. आ० सू० ९७८॥

[पा-] पिबतीति पिबः । प्रपिबतीति प्रपिबः [घ्रा-] जिघ्रतीति जिघ्रः । विजिघ्रः । ध्मा—धमतीति धमः । उद्धमः । विधमः । धेट्—धयतीति धयः । प्रधयः । दृश—पश्यतीति पश्यः[1] उत्पश्यः । विपश्यः ॥ अत्र श-प्रत्ययस्य शित्वात् पादिप्रकृतीनां पिबाद्यादेशा भवन्त्येव ॥

१—वा०—*जिघ्रः संज्ञायां प्रतिषेधः*[2] ॥

सोपसर्गाद् 'घ्रा' धातोः संज्ञायां विषये शः प्रत्ययो न स्यात् ॥

व्याजिघ्रतीति व्याघ्रः, किन्तु कः प्रत्ययो भवति । तत्र कित्त्वादाकारलोपे सिद्धिः ॥ १३७ ॥

यहां समाहारद्वन्द्व समास है ॥ दृश् धातु के इगुपध होने से तथा अन्य धातुओं के आकारान्त होने से क प्राप्त था सो उसका यह अपवाद है ॥

[पाघ्राध्माधेट्दृशः] पादि सोपसर्ग तथा निरुपसर्ग धातुओं से सर्वत्र [शः] श प्रत्यय होता है ॥ जैसे—पा—पिबतीति पिबः । प्रपिबतीति प्रपिबः । घ्रा—जिघ्रतीति जिघ्रः । विजिघ्रः । ध्मा—धमतीति धमः । उद्धमः । विधमः । धेट्—धयतीति धयः । प्रधयः । दृश्—पश्यतीति पश्यः । उत्पश्यः । विपश्यः । यहां श प्रत्यय के शित् होने के कारण पादि धातुओं को पिबादि आदेश हो जाते हैं ॥

१—वा०—"जिघ्रः संज्ञायां प्र०"—सोपसर्ग घ्रा धातु से संज्ञाविषय में श प्रत्यय न हो ॥ जैसे—व्याजिघ्रतीति व्याघ्रः । किन्तु यहां क प्रत्यय होता है ॥ 'क' प्रत्यय के कित् होने से 'घ्रा' के आकार का लोप होता है ॥ १३७ ॥

अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसाति-साहिभ्यश्च[3] ॥ १३८ ॥

अनुपसर्गात् । ५ । १ । लिम्पविन्द० साहिभ्यः । ५ । ३ ॥ [च । अ०] उपसर्गरहितेभ्यो लिम्पादिधातुभ्यः शः प्रत्ययो भवति ॥ लिम्पतीति लिम्पः । विन्दतीति विन्दः । लिम्पिविन्दिभ्यामिगुपधत्वात् कः प्राप्तः । लिपिविद्योः शप्रत्यये परतो मुचादित्वान्नुमागमः[4] । धार्य्यादयो ण्यन्ता धातवः सन्ति । धारयः । पारयः । वेदयः । उदेजयः । चेतयः । सातयः । साहयः ॥

---

१. **यदा पश्यः पश्यते रुक्मवर्णम्** (माण्डू० ३ । १ । ३ ॥) इत्यादि वचनप्रामाण्यात् ज्ञायते-ऽनुपसर्गेप्यत्र शप्रत्यय उत्पद्यत इति । तथा च **न पश्यो मृत्युं पश्यति, सर्वं ह पश्यः पश्यति** (छान्दो० ७ । २६ । २) ॥ पाणिनिरपि—**पश्यार्थैश्चानालोचते** (अ० ८ । १ । २५) इति निपातनाद्भावे श-प्रत्यय इत्याह ॥

२. (क) अ०—३ । १ । १३७ भा० ॥ (ख) आ० वा० ९७९ ॥

३. आ० सू० ९८० ॥ ४. अ० ७ । १ । ५९ ॥

'अनुपसर्गात्' इति किम्—प्रलिपः । प्रविदः । अत्रेगुपधलक्षणः कः ॥

१—वा०—*अनुपसर्गान्नौ लिम्पेः*[1] ॥

'नि' उपसर्ग उपपदे 'लिम्प' धातोः शः प्रत्ययः स्यादेव । निलिम्पा नाम देवाः ॥ १ ॥

१—वा०—*गवादिषु विन्देः संज्ञायामुपसंख्यानम्*[2] ॥

गवादिशब्देषूपपदेषु 'विन्द' धातोः [संज्ञायां] शः प्रत्ययो भवति ॥

गोविन्दः । अरविन्दः ॥ २ ॥

धार्य्यादिषु प्रत्ययस्य सार्वधातुकत्वाण्णेर्लोपो न भवति ॥ १३८ ॥

[अनुपसर्गात्] उपसर्गरहित [लिम्पविन्द० साहिभ्यः] लिम्प-विन्द-धारि-पारि-वेदि- उदेजि-चेति-साति-साहि इन धातुओं से 'श' प्रत्यय हो ॥

जैसे—लिम्पतीति लिम्पः । विन्दतीति विन्दः । लिपि तथा विदि से इगुपध 'क' प्राप्त था, उसका अपवाद 'श' कहा, लिपि, विदि के मुचादि में होने से 'श' परे 'नुम्' का आगम **'शे मुचादीनाम्'** (अ० ७ । १ । ५९) से हो जाता है ॥ 'धारि' आदि ण्यन्तों का ग्रहण है । धारयः । पारयः । वेदयः । उदेजयः । चेतयः । सातयः । साहयः ॥

'अनुपसर्गात्' ग्रहण इसलिये है कि—प्रलिपः । प्रविदः । यहां इगुपधलक्षण 'क' प्रत्यय ही हो ॥

१—वा०—"अनुपसर्गान्नौ लिम्पेः"—अनुपसर्गात् इस विषय में निपूर्वक 'लिम्प' धातु से 'श' प्रत्यय हो ही जाता है ऐसा समझना चाहिये ॥

जैसे—निलिम्पा नाम देवाः ॥

२—वा०—"गवादिषु विन्देः०"—गवादि उपपद हों तो 'विद्लृ' धातु से "श" प्रत्यय संज्ञा में कहना चाहिये ॥

जैसे—गोविन्दः । अरविन्दः ॥

श-प्रत्यय के सार्वधातुक होने से धार्य्यादि ण्यन्तों के 'णि' का लोप नहीं होता ॥ १३८ ॥

ददातिदधात्योर्विभाषा[3] ॥ १३९ ॥

'अनुपसर्गात्' इत्यनुवर्त्तते । अप्राप्त विभाषेयम् । वक्ष्यमाणसूत्रादादन्तत्वाण्णः प्राप्तस्तस्यायमपवादः शः प्रत्ययो विकल्पेन भवति । डुदाञ्, डुधाञ् इत्येताभ्यां शः प्रत्ययो विकल्पेन भवति, पक्षे णश्च ॥ ददः । दधः । दायः । धायः । अत्र शपक्षे शप्रत्य-

१. (क) अ०—३ । १ । १३८ भा० ॥ (ख) आ० वा० सं० ९८१ ॥
२. (क) अ०—३ । १ । १३८ भा० ॥ (ख) आ० वा० ९८२ ॥
३. आ० सू० ९८३ ॥

यस्य सार्वधातुकत्वात् '**श्लौ**[1]' द्विर्वचनम्। '**श्नाभ्यस्तयोरातः**[2]' इत्याकारलोपः। णपक्षे णित्वाद् 'युक्' आगमश्च ॥

'अनुपसर्गात्' इति किम्—प्रदः। प्रधः। अत्र '**आतश्चोपसर्गे**[3]' इति कः प्रत्यय एव भवति ॥ १३९ ॥

यहां 'अनुपसर्गात्' पद का अनुवर्त्तन है ॥ 'श्याद्व्यधा०' इस से 'ण' प्राप्त था उसका अपवाद यह 'श' प्रत्यय विकल्प से होता है ॥

उपसर्गरहित [ददातिदधात्योः] डुदाञ्, डुधाञ् धातुओं से 'श' प्रत्यय [**विभाषा**] विकल्प से होता है, पक्ष में ण भी होता है ॥ जैसे—ददः। दधः। दायः। धायः ॥ श प्रत्यय के सार्वधातुक होने से "श्लौ" इस सूत्र से द्विर्वचन हो जाता है और 'श्नाभ्यस्तयोरातः' इस सूत्र से आकार का लोप होता है और ण पक्ष में वृद्धि और युक् का आगम होता है ॥

'अनुपसर्गात्' ग्रहण इसलिये है कि—प्रदः। प्रधः। यहां 'आतश्चोपसर्गे' (अ० ३। १। १३६) से क प्रत्यय होता है ॥ १३९ ॥

ज्वलितिकसन्तेभ्यो णः[4] ॥ १४० ॥

'अनुपसर्गात्—विभाषा' चानुवर्त्तते। ज्वलितिकसन्तेभ्यः। ५। ३। णः। १। १ ॥ धातुपाठस्यायं[5] निर्देशः। ज्वल इति '**ज्वल**[6] **दीप्तौ**' इत्यारभ्य '**कस**[7] **गतौ**' इत्यन्तेभ्योऽनुपसर्गेभ्यो धातुभ्यो विकल्पेन णः प्रत्ययो भवति, पक्षे सामान्यविहितोऽच् ॥ ज्वलतीति ज्वालः। चालः। ज्वलः। चलः ॥

'अनुपसर्गात्' इति किम्—प्रज्वलः। प्रचलः अत्र नित्यमजेव भवति ॥

१—वा०—तनोतेरुपसंख्यानम्[8] ॥

अवतनोतीत्यवतानः। अत्र। सोपसर्गादपि नित्यं ण एव भवति ॥ १४० ॥

'अनुपसर्गात्' तथा 'विभाषा' पद का अनुवर्त्तन है। [यहां इति शब्द आदि ग्रहण के लिये है] ॥

[ज्वलितिकसन्तेभ्यः] 'ज्वल दीप्तौ' से लेकर 'कस गतौ' तक अनुपसर्ग धातुओं से विकल्प करके ण प्रत्यय हो, पक्ष में सामान्यविहित अच् भी होता है ॥

जैसे—ज्वलतीति ज्वालः। चालः। ज्वलः। चलः ॥

---

१. अ० ६। १। १० ॥ २. अ० ६। ४। ११२ ॥

३. अ० ३। १। १३६ ॥ ४. आ० सू० ९८४ ॥

५. धातुपाठे कसधात्वनन्तरं समाप्त्यर्थो वृच्छब्दः पठ्यते तदेतत् सूत्रे कसन्तग्रहणादनार्षपाठो वृच्छब्दस्येति ज्ञाप्यतेऽन्यथा सूत्रकारो ज्वलादिभ्य इत्येव ब्रूयात् ॥

३. धा०—भ्वा०—७९३ ॥ ७. धा०—भ्वा०—८५० ॥

८. (क) अ० ३। १। १४० भा० ॥ (ख) आ० वा० ९८५ ॥

'अनुपसर्गात्' ग्रहण इसलिये है कि—प्रज्वलः । प्रचलः । यहां नित्य अच् ही होता है ॥

१—वा०—"तनोतेरु०"—तनु धातु से 'ण' प्रत्यय कहना चाहिये । जैसे—अवतनोति-न्यवतानः । यहां सोपसर्ग से भी नित्य 'ण' ही होता है ॥ १४० ॥

श्याद्व्यधास्रु संस्रवतीण्वसावह्लिह्श्लिषश्वसश्च[1] ॥ १४१ ॥

अनुपसर्गादिति, विभाषेति च निवृत्तम् । श्या० श्वसः । ५ । १ । च [अ०] । श्यादीनां समाहारद्वन्द्वः ॥ श्यैङ्-आकारान्त-व्यध-आस्रु-संस्रु-अतीण्-अवसा-अवह्-लिह्-श्लिष-श्वस-इत्येतेभ्यो धातुभ्यो णः प्रत्ययो भवति ॥

आकारान्तत्वाच्छ्यैङ् धातोरपि स्यादेव पुनः पृथग्ग्रहणं सोपसर्गात् 'क' बाधनार्थम् । अर्थात् सोपसर्गान्निरुपसर्गात् सर्वथा ण एव स्यात् । श्यायः । अवश्यायः । प्रतिश्यायः । [दायः । धायः] प्रायः । पायः । लायः । आकारान्तेभ्यः सोपसर्गेभ्यः क एव भविष्यति । प्रघ्रः । प्रपः । प्रलः ॥ व्याधः । आस्रावः । [संस्रावः] अत्ययः । अवसायः । अत्राप्याकारान्तत्वादेव स्यात् पुर्नियमार्थं ग्रहणमवपूर्वादेव णः स्यात् । अवहारः । लेहः । श्लेषः । श्वासः । श्यादिषु णिदाश्रयौ युग्वृद्धी भवत इति ॥ १४१ ॥

यहां 'अनुपसर्गात्' तथा 'विभाषा' पद की निवृत्ति है ॥ सूत्र में समाहारद्वन्द्व समास है ॥ [श्याद्व्यधा० श्वसः] श्यैङ् आकारान्त-व्यध-आस्रु-संस्रु-अतीण्-अवसा-अवह्-लिह्-श्लिष-श्वस इन धातुओं से ण प्रत्यय हो ॥

आकारान्त होने से श्यैङ् धातु से भी हो ही जाता पुनः पृथक् ग्रहण सोपसर्ग के बाधन के लिये है, अर्थात् सोपसर्ग तथा निरुपसर्ग दोनों से 'ण' ही हो ॥

जैसे——श्यायः । अवश्यायः । प्रतिश्यायः । दायः । धायः । प्रायः । लायः । सोपसर्ग आकारान्त धातुओं से क ही होगा । प्रघ्रः । प्रपः । प्रलः । प्रदः । प्रधः । व्याधः । आस्रावः । संस्रावः । अत्ययः । अवसायः । इस उदाहरण में आकारान्त होने से ही हो जाता पुनः ग्रहण करना नियम के लिये है कि 'अव' उपसर्ग पूर्व से ही ण हो ॥ अवहारः । लेहः । श्लेषः । श्वासः ॥ श्यादि में णित् को मानकर युक् का आगम तथा वृद्धि होते हैं ॥ १४१ ॥

दुन्योरनुपसर्गे[2] ॥ १४२ ॥

दुन्योः । ६ । २ । अनुपसर्गे । ७ । १ ॥ 'दु गतौ[3]' 'टुदु उपतापे[4]' 'णीञ् प्रापणे[5]' इत्येताभ्यामुपसर्गरहिताभ्यां धातुभ्यां ण प्रत्ययो भवति ॥

दवति दुनोति वा दावः । नयतीति नायः ॥

'अनुपसर्गे' इति किम्— प्रदवः । प्रणयः, अत्राजेव भवति ॥ १४२ ॥

---

१. आ० सू० ९८६ ॥
२. आ० सू० ९८७ ॥
३. धा०—भ्वा०—९२९ ॥
४. धा०—स्वा०—१० ॥
५. धा०—भ्वा०—८८८ ॥

[अनुपसर्गे] उपसर्गरहित [दुन्योः] 'दु' तथा 'नी' धातु से ण प्रत्यय हो ॥

जैसे—दवति दुनोतीति वा दावः । नयतीति नायः ॥

'अनुपसर्गे' ग्रहण इसलिये है कि—**प्रदवः, प्रणयः** । यहां 'अच्' ही होता है ॥ १४२ ॥

विभाषा ग्रहः[1] ॥ १४३ ॥

[विभाषा । अ० । ग्रहः । ५ । १ ॥] अप्राप्तविभाषेयम् । अच् प्राप्तौ णो विकल्प्यते ॥ ग्रहधातोर्विकल्पेन णः प्रत्ययो भवति ॥ ग्रहः ग्राहः[2] । णपक्षेऽत्र वृद्धिः ॥ १४३ ॥

यहां 'अप्राप्त विभाषा' है । अच् की प्राप्ति में ण का विकल्प से विधान है ॥

[ग्रहः] ग्रह धातु से [विभाषा] विकल्प करके 'ण' प्रत्यय होता है ॥

जैसे—ग्रहः । ग्राहः ॥ ण पक्ष में वृद्धि होती है ॥ १४३ ॥

गेहे कः[3] ॥ १४४ ॥

गेहे । ७ । १ । कः । १ । १ ॥ अचोऽपवादः ॥ ग्रहधातोर्गेहे वेश्माभिधेये सति कः प्रत्ययो भवति ॥ गृह्णातीत गृहं वेश्म । तात्स्थ्योपाधिना गृहस्था दारादयोऽपि गृहा उच्यन्ते ॥ १४४ ॥

यह सूत्र 'अच्' का अपवाद है ॥

[गेहे] गेह (घर) अभिधेय हो तो ग्रह धातु से [कः] क प्रत्यय होता है ॥

जैसे—गृह्णातीति गृहं वेश्म [गृह्णन्ति पदार्थानिति गृहाणि वेश्मानि ।] तात्स्थ्योपाधि से स्त्रीजनों को भी गृह कहते हैं । गृहा दाराः ॥ १४४ ॥

शिल्पिनि ष्वुन्[4] ॥ १४५ ॥

शिल्पिनि । ७ । १ । ष्वुन् । १ । १ ॥ शिल्पिनि कारुण्यभिधेये सति धातोः ष्वुन् प्रत्ययो भवति ॥

१—वा०—*नृतिखनिरञ्जिभ्य इति वक्तव्यम्*[5] ॥

---

१. आ० सू० ९८८ ॥

२. (क) **देवत्रातो गलो ग्राह इति योगे च सद्विधिः ।**
मिथस्ते न विभाष्यन्ते गवाक्षाः संशितव्रताः ॥ (भाष्ये—अ० ३। ३ । १५६ ॥ ७ । ४ । ४१ ॥) इति भाष्यवचनाद् व्यवस्थितविभाषेयम् । तेन—ज्योतिषि 'ग्रहः' एव, जलचरे 'ग्राहः' एव प्रयुज्यते ॥

(ख) अत्र सूत्रे १४३ आख्यातिकटिप्पणमप्यवलोक्यम् ॥

३. आ० सू० ९८९ ॥ ४. आ० सू० ९९० ॥

५. महाभाष्ये तु····· ·····रञ्जिभ्य इति पाठः ॥

सामान्यधातुभ्यः प्राप्तः 'ष्वुन्' नियम्यते । नर्त्तकः । खनकः । रजकः । नर्त्तकी । खनकी । रजकी ।।

रजकशब्दे वार्त्तिकेनानुनासिकलोपः । ष्वुनि षित्करणं ङीषर्थम् । नित्करणश्च स्वरार्थम् ।।

'शिल्पिनि' इति किम्—नृतः । खनः । रञ्जः ।। 'नृत्यादिभ्यः' इति किम्—वायकः । अत्र ण्वुलेव भवति सरूपत्वान्नित्यम् ।। १४५ ।।

[शिल्पिनि] शिल्पी कर्त्ता हो तो धातु से [ष्वुन्] प्रत्यय हो ।।

१—वा०—"नृतिखनिरजिभ्य इति वक्तव्यम्" इस वार्त्तिकवचन से सामान्य धातुओं से ष्वुन् का नियम कर दिया कि इन धातुओं से ही हो ।। जैसे—नर्त्तकः । खनकः । रजकः । नर्त्तकी । खनकी । रजकी ।। रजक शब्द में अनुनासिक का लोप रजकरजनरजस्सूपसंख्यानम् (अ० ६ । ४ । ३३ भा०) इस वार्त्तिक से होता है ।। 'ष्वुन्' में षित् करण ङीष् प्रत्यय के लिये है । तथा नित् करण स्वर के लिये है ।।

'शिल्पिनि' ग्रहण इसलिये है कि—नृतः । खनः । रञ्जः ।। 'नृत्यादि' का ग्रहण वार्त्तिक में इसलिये है कि—वायकः । यहां सरूप होने से नित्य ण्वुल् ही होता है ।। १४५ ।।

गस्थकन्[1] ।। १४६ ।।

'शिल्पिनि' इत्यनुवर्त्तते । **'श्याद्व्यधे'**त्याकारान्तत्वाण्णः प्राप्तस्तस्यायमपवादः । गः । ५ । १ । थकन् । १ । १ ।। गा धातोस्थकन् प्रत्ययो भवति शिल्पिन्यभिधेये । गायतीति गाथकः । गाथिका ।। १४६ ।।

'शिल्पिनि' पद का अनुवर्त्तन है । आकारान्त होने से **'श्याद्व्यधा०'** से 'ण' प्राप्त था इस का यह अपवाद है ।।

शिल्पी कर्त्ता हो तो [गः] 'गै' धातु से [थकन्] थकन् प्रत्यय होता है ।। जैसे—गायतीति गाथकः । स्त्रीलिङ्ग में—गाथिका ।। १४६ ।।

ण्युट् च[2] ।। १४७ ।।

'गः' इत्यनुवर्त्तते शिल्पिनि च [ण्युट् । १ । १ । च । अ०] ।। शिल्पिन्यभिधेये सति गाधातोर्ण्युट् प्रत्ययश्च भवति ।। गायनः । गायनी । टित्करणान्ङीप् । णित्त्वाद्युक् । पृथग्योग उत्तरार्थः ।। १४७ ।।

'गः' तथा 'शिल्पिनि' पद का अनुवर्त्तन है ।।

शिल्पी कर्त्ता में 'गै' धातु से [ण्युट्] ण्युट् प्रत्यय भी हो ।।

---

१. आ० सू० ९९१ ।। २. आ० सू० ९९२ ।।

जैसे—गायतीति **गायनः**। स्त्रीलिङ्ग में **गायनी**। 'टित्' होने से ङीप्, णित् होने से युक् हो जाता है। पृथक् ग्रहण उत्तरार्थ है॥ १४७॥

हश्च व्रीहिकालयोः[1] ॥ १४८ ॥

'ण्युट्' इत्यनुवर्त्तते। हः। ५।१। च [अ०] व्रीहिकालयोः। ७।२। ह इति सामान्यग्रहणात् '**ओहाङ्**[2] **गतौ**' '**ओहाक्**[3] **त्यागे**' इति द्वयोरेव ग्रहणम्॥

व्रीहिकालयोरभिधेययोर्हाधातोर्ण्युट् प्रत्ययो भवति॥ हायनाः व्रीहयः। हायनः संवत्सरः। णित्त्वादत्र युक्॥ १४८॥

'ण्युट्' पद का अनुवर्त्तन है। 'हः' पद से सामान्य करके 'ओहाक् त्यागे' तथा 'ओहाङ् गतौ' दोनों का ही ग्रहण है॥

[**व्रीहिकालयोः**] व्रीहि और काल अभिधेय हों तो [**हः**] ओहाक् और ओहाङ् धातु से 'ण्युट्' प्रत्यय हो॥

जैसे— [जहाति जलं जिहीते प्राप्नोति वा] **हायनः** व्रीहिः। [जहाति भावान् जिहीते प्राप्नोति वा] **हायनः संवत्सरः**॥ णित् होने से यहां 'युक्' हो जाता है॥ १४८॥

प्रुसृल्वः समभिहारे वुन्[4] ॥ १४९ ॥

प्रुसृल्वः ५।१। **समभिहारे** ७।१। **वुन्** १।१॥ सम्यग्विचारेण क्रियाकरणं समभिहारः॥ प्रु-सृ-लू इत्येतेभ्यो धातुभ्यो वुन् प्रत्ययो भवति समभिहारे गम्यमाने। प्रवतीति प्रवकः। सरतीति सरकः। लुनातीति लवकः॥

भा—१—वा०—*प्रुसृल्वः साधुकारिणि वुन् विधानम्*[5]॥

सकृदपि यः सुष्ठु करोति तत्र यथा स्यात्। बहुशोऽपि यो दुष्ठु करोति तत्र मा भूत्॥ १४९॥

अच्छी प्रकार विचारपूर्वक क्रिया करना यहां समभिहार कहाता है॥

प्रु-सृ-लू इन धातुओं से वुन् प्रत्यय हो समभिहार अर्थात् अच्छे प्रकार क्रिया करनेवाला कर्त्ता अभिधेय हो तो॥

जैसे—प्रवतीति **प्रवकः**। सरतीति **सरकः**। लुनातीति लवकः॥

१—वा०—"प्रुसृल्वः साधुकारिणि वुन्०"—इस वार्त्तिक से अच्छा करने में एक बार करने पर भी वुन् होता है, अच्छा न करने में अनेक बार में भी वुन् नहीं होता॥ १४९॥

---

१. आ० सू० ९९३॥
२. धा०—जुहो०—७॥
३. धा०—जुहो०—८॥
४. आ० सू० ९९४॥
५. अ० ३।१।१४९ भा०॥

आशिषि च[1] ॥ १५० ॥

'वुन्' इत्यनुवर्त्तते । आशिषि । ७ । १ । च [अ०] ॥ आशिषि गम्यमानायां धातुमात्राद् वुन् प्रत्ययो भवति ॥ जीवकः शरदः शतम् । पठको निर्विघ्नः । शतं वर्षाणि जीवतु, निर्विघ्नः पठत्वित्यर्थः ॥ १५० ॥

॥ इति तृतीयाऽध्यायस्य प्रथमः पादः ॥

यहां 'वुन्' पद का अनुवर्त्तन है ।

[**आशिषि**] आशीर्वाद अर्थ गम्यमान हो तो धातुमात्र से वुन् प्रत्यय होता है ॥

जैसे—**जीवकः शरदः शतम् । पठको निर्विघ्नः ।** सौ वर्ष तक जीवे और निर्विघ्न पढ़े यह आशीर्वाद है ॥ १५० ॥

[तीसरे अध्याय का प्रथमपाद समाप्त हुआ]

---

१. आ० सू० ९९५ ॥

अथ तृतीयाध्याये द्वितीयः पादः ॥

कर्मण्यण्[1] ॥ १ ॥

[कर्मणि । ७ । १ । अण् । १ । १ ।] ॥ अत्र त्रिविधं कर्म गृह्यते—निर्वर्त्यमानं, विक्रियमाणं, प्राप्यञ्च, तत्र त्रिविधे कर्मण्युपपदे धातुमात्राद् 'अण्' प्रत्ययो भवति ॥

निर्वर्त्यमाने—कुम्भं करोतीति कुम्भकारः । नगरकारः ॥ विक्रियमाणे=विकृत-भाविनि–केदारं लुनातीति केदारलावः । शरलावः । काण्डलावः ॥ प्राप्ये—वेदानधीते वेदाध्यायः । शास्त्राध्यायः ॥

उपपदाधिकारेऽण् विधीयते स उत्सर्गः ॥ 'ग्रामं गच्छति, आदित्यं पश्यति' इत्यादिष्वनभिधानादण् न भवति ॥

वा०—शीलिकामिभक्ष्याचरिभ्यो णः पूर्वपदप्रकृतिस्वरत्वञ्च[2] ॥ १ ॥

मांसशीलः । मांसशीला । मांसकामः । मांसकामा । मांसभक्षः । मांसभक्षाः । आचरि—कल्याणाचारः । कल्याणाचारा ॥ १ ॥

वा०—ईक्षिक्षमिभ्याञ्च[3] ॥ २ ॥

ईक्षिक्षमिभ्यामपि णः प्रत्ययः पूर्वपदप्रकृतिस्वरत्वञ्च भवति ॥ सुखप्रतीक्षः । सुखप्रतीक्षा । कल्याणक्षमः । कल्याणक्षमा ॥ २ ॥

अण्–बाधनार्थं 'ण' विधानम् । यद्यण् स्यात्तर्हि नित्यं ङीप् स्यात्, तत्र टाप् यथा स्यात् । 'गतिकारकोपपदात् कृत्'[4] इत्युत्तरपदप्रकृतिस्वरत्वं प्राप्तं, पूर्वपदप्रकृतिस्वरो यथा स्यात् ॥

वा०—अन्नादायेति च कृतां व्यत्ययश्छन्दसि[5] ॥ ३ ॥

अन्नादायान्नपतये[6] । य आहुतिमन्नादां[6] हुत्वा[7] ॥ अन्नमत्तीति विग्रहेण[द्] 'अण्' प्राप्तस्तस्य प्रसङ्गे ऽच् प्रत्ययो भवति व्यत्ययेन । स्वरसिद्ध्यर्थं व्यत्ययः ॥ १ ॥

---

१. आ० सू० ९९६ ॥
२. अ० ३ । २ । १ भा० ॥ (ख) आ० वा० ९९८ ॥
३. अ० ३ । २ । १ भा० ॥ (ख) आ० वा० ९९९ ॥
४. अ० ६ । २ । १३९ ॥
५. अ० ३ । २ । १ भा० ॥ (ख) आ० वा० ९९७ ॥
६. अनुपलब्धमूलमिदम् ॥ ७. 'कृत्वा' इति तु भाष्ये सार्वत्रिकः पाठः ॥

इस सूत्र में—निर्वर्त्यमान, विक्रियमाण तथा प्राप्य इन तीन प्रकार के कर्म्मों[1] का ग्रहण है ॥

[कर्मणि] त्रिविध कर्म उपपद हो तो धातुमात्र से [अण्] अण् प्रत्यय होता है ॥ जैसे—निर्वर्त्यकर्म में—कुम्भं करोतीति **कुम्भकारः । नगरकारः ॥** विक्रियमाण में—केदारं लुनातीति **केदारलावः । शरलावः । काण्डलावः ॥** प्राप्य में—वेदानधीत इति **वेदाध्यायः । शास्त्राध्यायः ॥**

उपपद के अधिकार में विहित यह अण् उत्सर्ग है ॥ **ग्रामं गच्छति । आदित्यं पश्यति ।** इत्यादि प्रयोगों में अनभिधान से अण् नहीं होता ॥

वा०—शीलकामि०—**माँसशीलः । माँसशीला । माँसकामः । माँसकामा । माँसभक्षः । माँसभक्षा । कल्याणाचारः । कल्याणाचारा ॥ १ ॥**

वा०—ईक्षिक्षमिभ्याञ्च—ईक्ष तथा क्षम इन से 'ण' प्रत्यय होता है तथा पूर्वपद प्रकृति-स्वर भी ॥ जैसे—**सुखप्रतीक्षः । सुखप्रतीक्षा । कल्याणक्षमः । कल्याणक्षमा ॥ २ ॥**

इन वार्त्तिकों से 'ण' विधान 'अण्' बाधन के लिये किया है, क्योंकि यदि 'अण्' होता तो नित्य ङीप् होता, परन्तु अब टाप् होता है ॥

---

१. कर्म के इन तीन भेदों का लक्षण भर्तृहरि ने (वाक्यपदीय—कां० ३ । का० ४५, ४७-४८) निम्न कारिकाओं द्वारा किया है—

निर्वर्त्यलक्षणम्—

सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी । यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते ॥ १ ॥

विकार्य्यल०—

प्रकृत्युच्छेद-सम्भूतं किञ्चित् काष्ठादि-भस्मवत् । किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादि विकारवत् ॥२॥

प्राप्यल०—

क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते । दर्शनादनुमानाद् वा तत्प्राप्यमिति कथ्यते ॥ ३ ॥

इसका भाषार्थ आख्यातिक की टिप्पणी में निम्न प्रकार है—

जिसका उपादान कारण विद्यमान न हो वह निर्वर्त्य कहाता है, जैसे—संयोगं करोति । अथवा जिसका विद्यमान भी उपादान कारण विवक्षित न हो वह भी निर्वर्त्य कहाता है । जैसे—घटं करोति ॥ जब उपादान कारण ही परिणामी माना जाय तो निर्वर्त्य कर्म भी विकारी हो जाता है, जैसे—मृदं घटं करोति । और जब भेदविवक्षा है तब वही निर्वर्त्य कर्म रहता है, जैसे—मृदा घटं करोति । विकार्य्य कर्म दो प्रकार का है अर्थात् एक तो प्रकृति के विनाश से जो कुछ विकार उत्पन्न हो, जैसे—काष्ठादि भस्म और दूसरा गुणान्तर से जो उत्पन्न हो, जैसे—सुवर्णादि विकार कुण्डलादि ॥ जिसमें प्रत्यक्ष वा अनुमान से क्रियाकृत विशेष न पाया जाय अर्थात् प्रथम से न हो वह प्राप्य कर्म कहाता है ॥

'गतिकारकोपपदात् कृत्' इस सूत्र से उत्तरपद प्रकृतिस्वर प्राप्त था, इस वार्त्तिक से पूर्वपद-प्रकृतिस्वर हो जाता है ॥

वा०—अन्नादायेति०—वेद-विषय में 'अन्नादाय' इत्यादि प्रयोगों के लिये कृत्संज्ञक प्रत्ययों का व्यत्यय देखा जाता है ॥ जैसे—**अन्नादायान्नपतये । य आहुतिमन्नादां हुत्वा** इत्यादि में 'अन्नमत्तीति' इस विग्रह में कर्मोपपद 'अद' धातु से 'अण्' की प्राप्ति में 'अच्' प्रत्यय विकल्प से होता है । यहां व्यत्यय स्वर की सिद्धि के लिये है ॥ १ ॥

ह्वावामश्च[1] ॥ २ ॥

ह्वेञ्, वेञ्, माङ् इत्येतेषामशिद्विषये कृतात्त्वानां[2] निरनुबन्धकानां ग्रहणं क्रियते ॥ ह्वावामः । ५ । १ । च [अ०] । ह्वादीनां समाहारद्वन्द्वः । ह्वादिभ्यो वक्ष्यमाणसूत्रेण कर्मण्युपपदे 'कः' प्राप्तस्तस्यायमपवादः ॥

ह्वादिभ्यः कर्मण्युपपदेऽण् प्रत्ययो भवति ॥

पुत्रं ह्वयति पुत्रह्वायः । तन्तुवायः । धान्यं मिमीत इति धान्यमायः ॥

यहां ह्वेञ्, वेञ् तथा माङ् इन अशिद् विषय में 'आत्व' हुए हुए निरनुबन्धों का ग्रहण है ॥ यहां समाहारद्वन्द्व समास है । ह्वादि में अगले "आतोऽनुपसर्गे कः" सूत्र से कर्म उपपद होने पर 'क' प्राप्त था उसका यह अपवाद है ॥

कर्म उपपद हो तो [ह्वावामः] ह्वेञ्, वेञ्, माङ् इन से 'अण्' प्रत्यय होता है ॥

जैसे—पुत्रं ह्वयति पुत्रह्वायः । तन्तुवायः । धान्यं मिमीत इति धान्यमायः ॥ २ ॥

आतोऽनुपसर्गे कः[3] ॥ ३ ॥

[आतः । ५ । १ । अनुपसर्गे । ७ । १ । कः । १ । १ ।]

अणोऽपवादः ॥ कर्मण्युपपद उपसर्गरहितेभ्य आकारान्तधातुभ्यः 'कः' प्रत्ययो भवति ॥

गां ददातीति गोदः । कम्बलदः ॥

'अनुपसर्गे' इति किम्—गोसंदायः । कम्बलसंदायः । अत्राणेव यथा स्यात् ॥ ३ ॥

---

१. आ० सू० १००० ॥

२. ह्वेञः सानुबन्धकस्य साहचर्य्यात् **'वेञ् तन्तुसन्ताने'** इत्येव गृह्यते **'वा गतिगन्धनयोः'** इति तु न गृह्यते, अकर्मकत्वाच्च ॥

'मा' इत्यनेन **गामादाग्रहणेष्वविशेषः** (अ० १ । १ । २० भा०) इत्यनया परिभाषया सर्वेषां ग्रहणं प्राप्तम् । परन्त्विह (**'मेङ् प्रणिदाने'** भ्वा० **'माङ् माने'** जु०) इत्युभयोर्ग्रहणं भवति (**'मा माने'** अदा०) इत्यस्य तु न भवत्यकर्मकत्वात् ॥

३. आ० सू०—१००१ ॥

यह अण् का अपवाद है ॥ [अनुपसर्गे] उपसर्गरहित कर्म उपपद हो तो [आतः] आकारान्त धातुओं से [कः] 'क' प्रत्यय होता है ॥

जैसे—**गोदः । कम्बलदः ॥**

'अनुपसर्गे' ग्रहण इसलिये है कि—**गोसंदायः । कम्बलसंदायः ।** यहां 'अण्' ही होता है ॥ ३ ॥

सुपिस्थः[1] ॥ ४ ॥

सुपि । ७ । १ । स्थः । ५ । १ ॥ सुपि सामान्यकारक उपपदे सति 'स्था' धातोः कः प्रत्ययो भवति ॥

गृहे तिष्ठतीति गृहस्थः । समस्थः । विषमस्थः ॥

भा०—योगविभागः करिष्यते । आतोऽनुपसर्गे कः । ततः 'सुपि' । सुपि चातः को भवति । कच्छेन पिबतीति कच्छपः । कटाहेन पिबतीति कटाहपः । द्वाभ्यां पिबति द्विपः । ततः 'स्थः' । स्थश्च सुपि को भवति । किमर्थमिदं ? भावे यथा स्यात् । आखूत्थो वर्त्तते । श्येनोत्थः । शलभोत्थः ॥

'सुपि' इति योगविभागात् सुप्युपपदे कर्त्तरि प्रत्ययस्तेन 'गृहस्थ' इत्यपि सेत्स्यति । आखूनामुत्थानमिति विग्रहेण भावे 'कः' प्रत्ययो भवति[2] ॥ ४ ॥

[सुपि] सामान्यकारक उपपद हो तो [स्थः] 'स्था' धातु से 'क' प्रत्यय होता है ॥

जैसे—गृहे तिष्ठतीति गृहस्थः । समस्थः । विषमस्थः ॥

'सुपि' इस योग-विभाग से सुबन्त उपपद होने पर कर्त्ता में आकारान्त धातुओं से 'क' प्रत्यय हो जायगा, उसी से 'गृहस्थः' यह उदाहरण भी सिद्ध हो जायगा । 'स्थः' इससे आखूस्थः इस उदाहरण में आखूनामुत्थानम् इस विग्रह से भाव में 'क' प्रत्यय हो जाता है ॥ ४ ॥

तुन्दशोकयोः परिमृजापनुदोः[3] ॥ ५ ॥

तुन्दशोकयोः । ७ । २ । परिमृजापनुदोः । ६ । २ ॥ अणोऽपवादः ॥

तुन्द-शोकयोः कर्मोपपदयोः परिपूर्वात् 'मृज' धातोरपपूर्वाच्च 'नुदः' 'क' प्रत्ययो भवति ॥

तुन्दं परिमार्ष्टि तुन्दपरिमृजः । शोकमपनुदतीति शोकापनुदः ॥

'तुन्दशोकयोः' इति किम्—मुखं परिमार्ष्टि मुखपरिमार्जः[4] । अत्रान्यकर्मण्युपपदेऽणेव भवति ॥

---

१. आ० सू०—१००२ ॥ २. आ० सूत्रे १००२ ॥ टिप्पणमप्यवलोकनीयम् ॥

३. आ० सू०—१००३ ॥

४. 'तुन्दपरिमार्जः' इति प्रत्युदाहरता भाष्यकारेण **'अजादौ संज्ञमे विभाषा वृद्धिमारभन्ते'** इत्येतस्यानित्यत्वं ज्ञापितं भवति ॥

व्यवस्थितविभाषयाऽत्र वृद्धिर्नेति वदन्तस्त्वेतद्भाष्यवचनप्रामाण्यादुपेक्षणीयाः ॥

वा०—आलस्यसुखाहरणयोः[1] ॥ १ ॥

अनयोरभिधेययोः सतोः 'कः' प्रत्ययो भवति ।। तुन्दपरिमृजोऽलसः । शोकापनुदः पुत्रो जातः । यो हि तुन्दं परिमार्ष्टि तुन्द[परि]मार्जः स भवति । यश्च शोकमपनुदति शोकापनोदः स भवति । यत्रोक्तार्थौ न [स्त]स्तत्र तुन्दशोकयोरुपपदयोरपि सतोः 'अण्' एव प्रत्ययो भवति ।। १ ।।

वा०—क—प्रकरणे मूलविभुजादिभ्य उपसंख्यानम्[2] ॥ २ ॥

मूलविभुजो रथः । नखमुचानि धनूँषि । काकगुहास्तिलाः । सरसिरुहं कुमुदम् । मूलविभुजाद्याकृतिगणः[3] ।। २ ।। ५ ।।

यह सूत्र 'अण्' का अपवाद है [तुन्दशोकयोः] 'तुन्द' और 'शोक' कर्म उपपद हों तो [परिमृजापनुदोः] परिपूर्वक 'मृज' तथा अपपूर्वक 'नुद' धातु से 'क' प्रत्यय होता है ॥

जैसे—तुन्दं परिमार्ष्टि तुन्दपरिमृजः । शोकमपनुदतीति शोकापनुदः ।।

'तुन्दशोकयोः' ग्रहण इसलिये है कि—मुखं परिमार्ष्टि मुखपरिमार्जः यहां अन्य कर्म उपपद होने पर 'अण्' ही होता है ॥

वा०—आलस्यसुखा०—आलस्य और सुख अभिधेय हो तो 'क' प्रत्यय होता है ॥ जैसे—तुन्दपरिमृजोऽलसः । शोकापनुदः पुत्रो जातः । अन्यत्र—तुन्दपरिमार्जः । शोकापनोदः ऐसा ही होता है । जहां आलस्य तथा सुखाहरण अर्थ नहीं होते वहां तुन्द और शोक उपपद होने पर भी 'अण्' ही होता है ॥

वा०—क-प्रकरणे मूल०—'क' प्रत्यय के प्रकरण में मूलविभुजादिकों से 'क' प्रत्यय होता है ऐसा कहना चाहिये ॥ जैसे—मूलविभुजो रथः । नखमुचानि धनूंषि । काकगुहास्तिलाः । सरसिरुहं कुमुदम् ॥ मूलविभुजादि आकृतिगण है ॥ ५ ॥

प्रे दाज्ञः[4] ॥ ६ ॥

सोपसर्गात् कः प्रतिषिध्यते तदर्थोऽयमारम्भः । प्रे । ७ । १ । दाज्ञः । ५ । १ ॥

कर्मण्युपपदे प्रोपसृष्टाभ्यां ददाति[5]-जानातिभ्यां धातुभ्यां 'कः' प्रत्ययो भवति । विद्याप्रदः । शास्त्रप्रज्ञः ।।

'प्रे' इति किम्—गोविदायः । अत्राणेव भवति ।। ६ ।।

---

१. अ० ३ । २ । ५ भा० ॥

२. अ० ३ । २ । ५ भा० ॥ (ख) आ० वा०—१००४ ॥

३. आकृतिगणत्वात्—महीं धरति-महीध्रः = पर्वतः । कुध्रः = पर्वतः । शिरोध्रः । शिरोरुहः—इत्यादयः सिध्यन्ति ॥

४. आ० सू० १००५ ॥

५. **'गामादाग्रहणेष्वविशेषः'** (अ० १ । १ । २० भाष्ये) इति वचनात्तु सर्वेऽपि दा-रूपा धातवो गृह्यन्ते ।

उपसर्गसहित से 'क' प्रत्यय प्रतिषिद्ध है उस का पुनः विधान करने के लिये यह सूत्र है ॥

कर्म उपपद हो तो [**प्रे**] प्र-पूर्वक [**दाज्ञः**] 'दा' तथा 'ज्ञा' धातु से 'क' प्रत्यय होता है ॥

जैसे—**विद्याप्रदः । शास्त्रप्रज्ञः ॥**

'प्रे' ग्रहण इसलिये है कि—**गोर्विदायः ।** यहां 'अण्' ही होता है ॥ ६ ॥

समि ख्यः[1] ॥ ७ ॥

अत्रापि सोपसर्गार्थं आरम्भः । समि । ७ । १ । ख्यः । ५ । १ ॥

सम्पूर्वात् 'ख्या'[2] धातोः कर्मण्युपपदे 'कः' प्रत्ययो भवति ॥

गोसंख्यः । अविसंख्यः ॥

'समि' इति किम्—गोप्रख्यायः । अत्रानुपसर्गात् के प्रतिषिद्धेऽणेव भवति । अत एवाणोऽपवादः ॥ ७ ॥

यह भी सोपसर्ग के लिये है ॥ [समि] सम्-पूर्वक [ख्यः] 'ख्या' धातु से कर्म उपपद होने पर 'क' प्रत्यय होता है ॥

जैसे—**गोसंख्यः । अविसंख्यः ॥**

'समि' ग्रहण इसलिये है कि—**गोप्रख्यायः ।** यहां (**आतोऽनुपसर्गे कः**) से 'क' प्रत्यय के प्रतिषेध होने से 'अण्' ही हो जाता है अतः यह सूत्र भी अण् का ही अपवाद है ॥ ७ ॥

गापोष्टक्[3] ॥ ८ ॥

उपसर्गरहितादाकारान्तात् कः प्राप्तस्तस्यायमपवादः । गापोः । ६ । २ । टक् । १ । १ ॥

कर्मण्युपपदे गापाभ्यां[4] धातुभ्यां 'टक्' प्रत्ययो भवति ॥

आत्मानं गायतीति-आत्मगः । ब्रह्मगः । वेदगः । सामगः । आत्मगी । ब्रह्मगी । [वेदगी] । सामगी । सुरापः । सुरापी । अत्र टित्करणान्ङीप् कित्त्वादाकारलोपश्च ॥

---

१. आ० सू०—१००६ ॥

२. सूत्रे 'ख्यः' पदेन **'चक्षिङः ख्याञ्'** (अ० २ । ४ । ५४) इत्यादिष्टस्य ख्याञ एव ग्रहणम् । सं-पूर्वस्य **'ख्या प्रकथने'** (अदा०) इत्यस्य तु न भवति प्रयोगाभावात् ॥

३. आ० सू० १००७ ॥

४. **लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्** (अ० ७ । २ । ४४ भाष्ये) इति परिभाषाबलेन पाग्रहणेन पिबतेरेव ग्रहणम् । तथा च—**गामादाग्रहणेष्वविशेषः** (अ० १ । १ । २० भाष्ये) इति परिभाषया—अविशेषेण सर्वेषां गा-धातूनां ग्रहणं प्राप्तम्, परन्तु—अलुग्विकरणस्य पिबतिना साहचर्य्यात् अनभिधानाच्च **'गै शब्दे'** (भ्वा०) इत्यस्यैव ग्रहणं नान्येषाम् ॥

वा०—सुराशीध्वोः पिबतेः[1] ॥ १ ॥

सुराशीध्वोः कर्मोपपदयोः पा-ग्रहणे पानार्थाद्धातोः 'टक्' प्रत्ययो भवति। सुरापः। सुरापौ। शीधुपः। शीधुपौ ॥

'सुराशीध्वोः' इति किम्—क्षीरपा ब्राह्मणी ॥ 'पिबतेः' इति किम्—या हि सुरां पाति सुरापा सा भवति, अत्रोभयत्र 'कः' प्रत्ययः ॥

वा०—बहुलं तणि[2] ॥ २ ॥

संज्ञायां छन्दसि च पिबतेर्बहुलं 'टक्' प्रत्ययोऽर्थात् पक्षे 'क'-प्रत्ययः। या ब्राह्मणी सुरापो भवति नैनां देवाः पतिलोकं नयन्ति[3]। या ब्राह्मणी सुरापा भवति नैनां देवाः पतिलोकं नयन्ति। अत्र-सुरापी, सुरापेति टक् पक्षे 'ङीप्' अन्यत्र 'टाप्' ॥ ८ ॥

उपसर्गरहित आकारान्तों से 'क' प्राप्त था उसका यह अपवाद है ॥

कर्म उपपद हो तो [**गापोः**] 'गा' और 'पा' धातु से [**टक्**] 'टक्' प्रत्यय होता है ॥ जैसे—आत्मानं गायतीति **आत्मगः। ब्रह्मगः। वेदगः। सामगः। आत्मगी। ब्रह्मगी। वेदगी। सामगी।** यहां प्रत्यय के टित् होने से ङीप् और कित् होने से आकार का लोप हो जाता है ॥

वा०—सुराशीध्वोः०—सुरा तथा शीधु यह कर्म उपपद हों तो पानार्थ वाले 'पा' धातु से 'टक्' प्रत्यय होता है ॥ जैसे—**सुरापः। सुरापौ। शीधुपः। शीधुपौ ॥** 'सुराशीध्वोः' ग्रहण इसलिये है कि—**क्षीरपा** ब्राह्मणी ॥ 'पिबतेः' ग्रहण इसलिये है कि—या हि सुरां पाति सा **सुरापा** यहां दोनों में 'क' प्रत्यय होता है ॥ १ ॥

वा०—बहुलं तणि—संज्ञा और छन्द में 'पिबति' धातु से बहुल करके 'टक्' प्रत्यय होता है पक्ष में 'क' प्रत्यय होता है। जैसे—या ब्राह्मणी **सुरापी** भवति नैनां देवाः पतिलोकं नयन्ति। या ब्राह्मणी **सुरापा** भवति नैनां देवाः पतिलोकं नयन्ति ॥ यहां 'टक्' पक्ष में ङीप् तथा 'क' पक्ष में 'टाप्' होता है ॥ ८ ॥

हरतेरनुद्यमनेऽच्[4] ॥ ९ ॥

अणोऽपवादः। हरतेः। ५। १। अनुद्यमने। ७। १। अच्। १। १ ॥ उद्यमनं=पुरुषार्थेन कार्यसंपादनम्। न उद्यमनमनुद्यमनं तस्मिन्—अनुद्यमने वर्त्तमानाद् 'हृञ्' धातोः कर्मण्युपपदेऽच् प्रत्ययो भवति ॥

भागं हरतीति भागहरः। अंशहरः ॥

'अनुद्यमने' इति किम्—भारं हरतीति भारहारः। अत्राणेव भवति ॥

---

१. अ० ३। २। ८ भा० ॥

२. अ० ३। २। ८ भा० ॥ **(ख) किमिदं तणोति ? संज्ञाछन्दसोर्ग्रहणम्।** अ० ३। २। ८ भा० ॥

३. अनुपलब्धमूलमिदम् ॥ ४. आ० सू०—१००९ ॥

वा०—अच् प्रकरणे शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटीधनुष्षु ग्रहेरुपसंख्यानम्[1] ॥ १ ॥

शक्त्यादिषु कर्मोपपदेषु 'ग्रह' धातोः 'अच्' प्रत्ययो भवति ॥ शक्तिग्रहः । लाङ्गलग्रहः । अङ्कुशं गृह्णातीत्यङ्कुशग्रहः । यष्टिग्रहः । तोमरग्रहः । घटग्रहः । घटीग्रहः । धनुर्ग्रहः ॥ १ ॥

वा०—सूत्रे च धार्य्यर्थे[2] ॥ २ ॥

सूत्रे कर्मण्युपपदे धार्य्यर्थे वर्त्तमानाद् 'ग्रह' धातोः 'अच्' प्रत्ययो भवति ॥ सूत्रं गृह्णाति धारयतीति सूत्रग्रहः ॥

'धार्य्यर्थे' इति किम्—यो हि सूत्रं गृह्णाति सूत्रग्राहः स भवति । अत्रौत्सर्गिको-ऽणेव भवति ॥ ९ ॥

यह सूत्र 'अण्' का अपवाद है । पुरुषार्थ से कार्य संपादन करने को उद्यमन कहते हैं, इससे विपरीत अनुद्यमन कहाता है ॥

[अनुद्यमने] अनुद्यमन अर्थ में वर्त्तमान [हरतेः] 'हृञ्' धातु से कर्म उपपद हो तो 'अच्' प्रत्यय होता है ॥

जैसे—भागं हरतीति **भागहरः । अंशहरः ॥**

'अनुद्यमने' ग्रहण इसलिये है कि—भारं हरतीति **भारहारः** । यहां 'अण्' ही होता है ॥

वा०—**अच् प्रकरणे शक्ति०**—शक्त्यादि कर्म उपपद हों तो 'ग्रह' धातु से 'अच्' प्रत्यय होता है ॥ जैसे—**शक्तिग्रहः । लाङ्गलग्रहः । अङ्कुशं गृह्णातीति- अङ्कुशग्रहः । यष्टिग्रहः । तोमरग्रहः । घटग्रहः । घटीग्रहः । धनुर्ग्रहः ॥ १ ॥**

वा०—**सूत्रे च धार्य्यर्थे**—सूत्रकर्म उपपद हो तो धारणार्थक 'ग्रह' धातु से 'अच्' प्रत्यय होता है ॥ जैसे—सूत्रं गृह्णाति धारयतीति **सूत्रग्रहः ॥** 'धार्य्यर्थे' ग्रहण इसलिये है कि—यो हि सूत्रं गृह्णाति स सूत्रग्राहः । यहां उत्सर्ग (कर्मण्यण्) 'अण्' ही होता है ॥ ९ ॥

वयसि च[3] ॥ १० ॥

उद्यमनार्थ आरम्भः । 'हरतेः-अच्' इत्यनुवर्त्तते । वयसि । ७ । १ । च [अ०] ॥

वयस्यायुषि गम्यमाने कर्मण्युपपदे 'हृञ्' धातोः 'अच्' प्रत्ययो भवति ॥ कवचं हरतीति कवचहरः । शस्त्रहरः कुमारः । कवचं शस्त्राणि [च] धारयितुमस्यावस्था वर्त्तत इत्यर्थः ॥ १० ॥

---

१. अ० ३ । २ । ९ भा० ॥ (ख) आ० वा० १०१० ॥ (ग) वार्त्तिकेऽस्मिन् **'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति'** (अ० ४ । १ । १ भाष्ये) इति परिभाषाबलेन घटग्रहणेनैव घटी—इत्यस्यापि ग्रहणं स्यादेव, पुनर्घटीग्रहणमस्याः परिभाषाया अनित्यत्वज्ञापनार्थम् । तेन 'मद्रराज्ञी' इत्यत्र 'टच्' न भवति ॥

२. अ० ३ । २ । ९ भा० ॥ (ख) आ० वा०—१०११ ॥

३. आ० सू०—१०१२ ॥

यहां 'हरतेः' तथा 'अच्' पद का अनुवर्त्तन है ॥ यह सूत्र उद्यमन अर्थ में 'अच्' करने के लिये है ॥

[वयसि] आयु गम्यमान हो तो कर्म उपपद होने पर 'हृञ्' धातु से 'अच्' प्रत्यय होता है ॥ जैसे—कवचं हरतीति **कवचहरः** । **शस्त्रहरः** कुमारः ॥ अर्थात् इसकी कवच और शस्त्र धारण करने की अवस्था है ॥ १० ॥

आङि ताच्छील्ये[1] ॥ ११ ॥

'हरतेः-अच्' इत्यनुवर्त्तते । आङि । ७ । १ । ताच्छील्ये । ७ । १ ॥ तच्छीलस्य भावस्ताच्छील्यं तस्मिन् ताच्छील्ये प्रत्ययार्थे सति कर्मण्युपपदे आङ्पूर्वाद् हरतेः 'अच्' प्रत्ययो भवति ॥

फलन्याहरतीति फलाहरः । पुष्पाहरः । दुग्धाहरः । फलाहरणस्वभाव इत्यर्थः ।

'ताच्छील्ये' इति किम्—शकटमाहरतीति शकटाहारो वृषभः । अत्राणेव भवति ॥ ११ ॥

यहां 'हरतेः' तथा 'अच्' पद का अनुवर्त्तन है ॥ [ताच्छील्ये] ताच्छील्य = (तत्स्वभावता) अर्थ गम्यमान हो तो [आङि] आङ्पूर्वक 'हृञ्' धातु से 'अच्' प्रत्यय होता है ॥

जैसे—फलान्याहरतीति **फलाहरः** । **पुष्पाहरः** । **दुग्धाहरः** । फलाहरणस्वभाव वाला ॥

'ताच्छील्ये' ग्रहण इसलिये है कि—शकटमाहरतीति **शकटाहारो** वृषभः । यहां 'अण्' ही होता है ॥ ११ ॥

अर्हः[2] ॥ १२ ॥

'अच्' इत्यनुवर्त्तते । अर्हः । ५ । १ ॥

'**अर्ह पूजायाम्**[3]' अस्माद् धातोः कर्मण्युपपदेऽच् प्रत्ययो भवति ॥

अण् प्राप्तस्तस्य बाधनार्थं वचनम् । प्राधान्यमर्हतीति प्राधान्यार्हः । गन्धार्हः । आदरार्हः । अत्र यद्यण् स्यात्तर्हि नित्यं स्त्रीलिङ्गे ङीप् स्यात् । टाबर्थं आरम्भः, आदरार्हा ॥ १२ ॥

यहां 'अच्' पद की अनुवृत्ति है । अण् प्राप्त था उसको बाधने के लिये यह सूत्र है ॥

कर्म उपपद हो तो [अर्हः] 'अर्ह' धातु से 'अच्' प्रत्यय होता है ॥ जैसे—प्राधान्यमर्हतीति प्राधान्यार्हः । गन्धार्हः । आदरार्हः ॥ यदि 'अण्' प्रत्यय हो जाता तो स्त्रीलिङ्ग में नित्य ङीप् होता परन्तु 'टाप्' हो जावे इसलिये सूत्र का आरम्भ है । जिससे कि स्त्रीलिङ्ग में 'आदरार्हा' ऐसा रूप बन जाता है ॥ १२ ॥

---

१. आ० सू०—१०१३ ॥ २. आ० सू० १०१४ ॥

३. धा०—भ्वा०—७२८ ॥

स्तम्बकर्णयो रमिजपोः[1] ॥ १३ ॥

अत्र '**सुपिस्थः**[2]' इति सूत्रात् 'सुपि' इत्यनुवर्त्तते । स्तम्बकर्णौ कर्मणी न स्तः । स्तम्बकर्णयोः । ७ । २ । रमिजपोः । ६ । २ ॥

वा०—हस्तिसूचकयोः[3] ॥ १ ॥

हस्तिसूचकयोरभिधेयप्रत्ययार्थयोः स्तम्बकर्णयोः सुबन्तोपपदयोर्यथासंख्यं रमिजपिधातुभ्यां 'अच्' प्रत्ययो भवति ॥

स्तम्बे रमत इति स्तम्बेरमो हस्ती । कर्णे जपतीति कर्णेजपः सूचकः । अत्र '**हलदन्तात्सप्तम्याः संज्ञायाम्**[4]' इति सप्तम्यलुक् ॥

'हस्तिसूचकयोः' इति किमर्थम्—स्तम्बेरन्ता । कर्णेजपिता । अत्र हस्तिसूचकाभिधेयौ न स्त इत्यण् न भवति, तृजेव ॥ १३ ॥

यहां 'सुपि स्थः' इस सूत्र से 'सुपि' इस पद की अनुवृत्ति है । 'स्तम्ब' तथा 'कर्ण' ये कर्म नहीं हैं ॥

वा०—हस्तिसूचकयोः—हस्ति, सूचक अभिधेय हों तथा [स्तम्बकर्णयोः] स्तम्ब और कर्ण सुबन्त उपपद हों तो यथासंख्य [रमिजपोः] 'रम' तथा 'जप' धातुओं से 'अच्' प्रत्यय होता है ॥

जैसे—स्तम्बे रमत इति **स्तम्बेरमो** हस्ती । कर्णे जपतीति **कर्णेजपः** सूचकः ॥ यहां सप्तमी का अलुक् 'हलदन्तात् सप्तम्याः संज्ञायाम्' इस सूत्र से हो जाता है ॥

'हस्तिसूचकयोः' ग्रहण इसलिये है कि—**स्तम्बेरन्ता** । **कर्णेजपिता** । यहां हस्ती और सूचक अर्थ न होने से 'अण्' नहीं होता परन्तु 'तृच्' प्रत्यय ही होता है ॥ १३ ॥

शमि धातोः संज्ञायाम्[5] ॥ १४ ॥

'अच्' अनुवर्त्तते । शमि । ७ । १ । धातोः । ५ । १ । संज्ञायाम् । ७ । १ ॥

शमित्यव्यय उपपदे धातुमात्रात् संज्ञायां गम्यमानायां 'अच्' प्रत्ययो भवति ॥

शंभवः । शंवदः । शंकरः । इमानि कस्यचिन्नामानि सन्ति ॥

'संज्ञायाम्' इति किम्—शंकारः ॥

'**धातोः**'[6] इत्यधिकारादेव सिद्धे पुनर्धातुग्रहणस्यैतत् प्रयोजनम्—हेत्वाद्यर्थेषु 'कृञ्' धातोः ट' प्रत्ययो विधीयते, तत्र शम्युपपदे संज्ञायां हेत्वादिषु गम्यमानेष्वपि 'कृञ्' धातोः 'अच्' एव यथा स्यात् 'शंकरा' नाम परिव्राजिका=संन्यस्ता स्त्री । शंकरा नाम

१. आ० सू०—१०१५ ॥
२. अ० ३ । २ । ४ ॥
३. अ०—३ । २ । १३ भा० ॥
४. अ० ६ । ३ । ९ ॥
५. आ० सू०—१०१६ ॥
६. अ० ३ । १ । ९१ ॥

शकुनिका । अत्र स्त्रीलिङ्गे विशेषः, यद्यत्र टः स्यात्तर्हि स्त्रियां ङीपा भवितव्यं, टाप् यथा स्यादि[ति] धातुग्रहणस्य प्रयोजनम् ॥ १४ ॥

यहां 'अच्' पद का अनुवर्त्तन है ॥ [**शमि**] शम् यह अव्यय उपपद हो तो [**धातोः**] धातुमात्र से 'अच्' प्रत्यय होता है [**संज्ञायाम्**] संज्ञा अभिधेय होने पर ॥

जैसे—**शङ्करः । शंवदः । शम्भवः ।** ये किन्हीं के नाम हैं ॥

'संज्ञायाम्' ग्रहण इसलिये है कि—**शङ्कारः** ॥

'धातोः' इस अधिकार से ही सिद्ध हो, जाता, पुनः सूत्र में धातुग्रहण का यह प्रयोजन है कि—हेत्वादि अर्थों में 'कृञ् धातु से 'ट' प्रत्यय कहा है परन्तु 'शम्' उपपद होने पर संज्ञा में हेत्वादि अर्थ गम्यमान होने पर भी 'कृञ्' धातु से 'अच्' ही हो। **शङ्करा नाम परिव्राजिका ।** यह किसी संन्यस्ता स्त्री का नाम है। **शङ्करा नाम शकुनिका ।** यहां स्त्रीलिङ्ग में यह विशेष है कि—यदि 'ट' होवे तो स्त्रीलिङ्ग में 'ङीप् होगा, 'टाप्' हो जाय इसलिये धातु ग्रहण है ॥ १४ ॥

अधिकरणे शेतेः[1] ॥ १५ ॥

'अच्' अनुवर्त्तते । अधिकरणे । ७ । १ । शेतेः । ५ । १ ॥

अधिकरणसुबन्त उपपदे 'शीङ्' धातोः 'अच्' प्रत्ययो भवति ॥

'अधिकरणे' इति किम्—खट्वामधिशेत इति खट्वाधिशायः । अत्राणेव भवति ॥

वा०—*[अधिकरणे शेतेः] पार्श्वादिषूपसंख्यानम्*[2] ॥ १ ॥

अनधिकरणार्थ आरम्भः । पार्श्वादिषूपपदेषु शेतेः 'अच्' । पार्श्वाभ्यां शेत इति पार्श्वशयः । पृष्ठेन शेत इति पृष्ठशयः । उदरशयः । आकृतिगणोऽयम् ॥ १ ॥

वा०—*दिग्धसहपूर्वाच्च*[3] ॥ २ ॥

दिग्धसहपूर्वाच्च 'शीङ्' धातोरच् । दिग्धेन सह शेते दिग्धसहशयः ॥ १ ॥

वा०—*उत्तानादिषु कर्तृषु*[4] ॥ ३ ॥

उत्तानादिषु कर्तृवाचिषु शब्दोपपदेषु 'शीङ्' धातोः 'अच्' भवति । उत्तान ऊर्ध्वमुखः शेत उत्तानशयः । अवमूर्द्धशयः । अयमप्याकृतिगणः ॥ ३ ॥

वा०—*गिरौ डश्छन्दसि*[5] ॥ ४ ॥

---

१. आ० सू०—१०१७ ॥
२. अ० ३ । २ । १५ भा० ॥ (ख) आ० वा० १०१८ ॥
३. अ० ३ । २ । १५ भा० ॥ (ख) आ० वा०—१०१९ ॥
४. अ० ३ । २ । १५ भा० ॥ (ख) आ० वा०—१०२० ॥
५. अ० ३ । २ । १५ भा० ॥ (ख) आ० वा०—१०२१ ॥

(ग) शिवेन वचसा त्वा गिरिशाच्छावदामसि ॥ यजु०—१६ । ४ ॥

यो गिरिषु पर्वतेषु मेघेषु वा शेते तत्सम्बुद्धौ = गिरिश । स्वा० द० यजुर्वेदभाष्ये ॥

गिरिशब्द उपपदे वेदविषये 'शीङ्' धातो 'डः' प्रत्ययः। **गिरौ शेते गिरिशः**॥ **डित्करणं टिलोपार्थम्॥ १५॥**

यहां 'अच्' पद का अनुवर्त्तन है॥ [**अधिकरणे**] अधिकरण सुबन्त उपपद हो तो [शेतेः] 'शीङ्' धातु से 'अच्' प्रत्यय होता है॥ जैसे— खट्वायां शेते **खट्वाशयः**। **कटशयः**। **खशयः**॥

'अधिकरणे' ग्रहण इसलिये है कि—खट्वामधिशेत इति **खट्वाधिशायः** यहां 'अण्' ही होता है॥

वा०—पार्श्वादि०—यह वार्त्तिक अनधिकरण के लिये है। पार्श्वादि उपपद हों तो 'शीङ्' धातु से 'अच्' प्रत्यय हो॥ जैसे—पार्श्वाभ्यां शेते **पार्श्वशयः**। पृष्ठेन शेत इति **पृष्ठशयः**। **उदरशयः**। पार्श्वादि आकृतिगण है॥ १॥

वा०—दिग्धस०—दिग्धसह-पूर्वक 'शीङ्' धातु से 'अच्' प्रत्यय होता है॥ जैसे—दिग्धेन सह शेते **दिग्धसहशयः**॥ २॥

वा०—उत्तानादि०—कर्त्तृवाची उत्तानादि शब्द उपपद हों तो 'शीङ्' धातु से 'अच्' प्रत्यय हो॥ जैसे—उत्तान ऊर्ध्वमुखः शेत **उत्तानशयः**। **अवमूर्द्धशयः**। यह भी आकृतिगण है॥ ३॥

वा०—गिरौ डश्छन्दसि—गिरि शब्द उपपद हो तो वेदविषय में 'शीङ्' धातु से 'ड' प्रत्यय होता है॥ जैसे—**गिरौ शेते गिरिशः**॥ डित्करण टिलोप के लिये है॥ ४॥ १५॥

चरेष्टः[1] ॥ १६॥

'अधिकरणे'[2] इत्यनुवर्त्तते। 'अच्' निवृत्तः। चरेः। ५। १। टः [१। १।] अधिकरणसुबन्त उपपदे 'चर' धातोः 'टः' प्रत्ययो भवति॥

व्योम्नि चरतीति व्योमचरः। खचरः॥ 'अच्' इत्यनुवर्त्तमाने ट-प्रत्ययान्तरं ङीबर्थं टित्वात् 'ङीप्' यथा स्यात्। **खचरी शकुनिका॥ १६॥**

यहां 'अधिकरणे' पद का अनुवर्त्तन है, 'अच्' निवृत्त हुआ॥ अधिकरण सुबन्त उपपद हो तो [चरेः] 'चर' धातु से [टः] 'ट' प्रत्यय होता है॥

जैसे—व्योम्नि चरतीति **व्योमचरः। खचरः॥**

'अच्' प्रत्यय के अनुवर्त्तन में 'ट' इस प्रत्ययान्तर के विधान करने का प्रयोजन ङीप् प्रत्यय के लिये है, यतः टित् होने से ङीप् हो जावे। जैसे—**खचरी** शकुनिका॥ १६॥

---

१. आ० सू० १०२२॥

२. अत्र भाष्यम्—**'इह कस्मान्न भवति ? कुरुंश्चरति। पाञ्चालांश्चरतीति। अधिकरण इति वर्त्तते। ननु कर्मणीत्यपि ?। यदयं भिक्षासेनादायेषु च।** (अ० ३। २। १७) **इति चरेर्भिक्षाग्रहणं करोति तज्ज्ञापयत्याचार्य्यो न भवतिकर्मणीति'॥**

(ख) आख्यातिकटिप्पणमप्यत्र द्रष्टव्यम्॥

भिक्षासेनादायेषु च[1] ॥ १६ ॥

अनधिकरणार्थोऽयमारम्भः । 'चरेः-टः' इत्यनुवर्त्तते । भिक्षासेनादायेषु । ७ । ३ । च [अ०] ॥

भिक्षा-सेना-आदाय इत्येतेषूपपदेषु 'चर' धातोः 'टः' प्रत्ययो भवति ॥ भिक्षां चरति भिक्षाचरः । सेनया चरतीति सेनाचरः । आदाय चरतीत्यादायचरः[2] ॥ १७ ॥

यह सूत्र अनधिकरण के लिये है । 'चरेः' तथा 'टः' पद का अनुवर्त्तन है ॥

[भिक्षासेनादायेषु] भिक्षा, सेना, आदाय ये उपपद हों तो 'चर' धातु से 'ट' प्रत्यय होता है ॥

जैसे—भिक्षां चरतीति **भिक्षाचरः** । सेनया चरतीति **सेनाचरः** । आदाय चरतीति **आदायचरः** ॥ १७ ॥

पुरोऽग्रतोऽग्रेषु सर्त्तेः[3] ॥ १८ ॥

'ट' इत्यनुवर्त्तते । पुरोऽग्रतोऽग्रेषु । ७ । ३ । सर्त्तेः । ५ । १ ॥

पुरस्-अग्रतस्-अग्रे इत्येतेष्वव्ययोपपदेषु सृ-धातोः 'टः' प्रत्ययो भवति ॥ पुरः-सरतीति पुरस्सरः । अग्रतस्सरः । अग्रेसरः[4] ॥

'पुर आदिषु' इति किम्—ग्रामं सरतीति ग्रामसारः ॥ १८ ॥

यहां 'ट' पद का अनुवर्त्तन है ॥ [पुरोऽग्रतोऽग्रेषु] पुरस्, अग्रतस्, अग्रे ये उपपद हों तो [सर्त्तेः] 'सृ' धातु से 'ट' प्रत्यय होता है ॥

जैसे—पुरः सरतीति **पुरस्सरः** । **अग्रतस्सरः** । **अग्रेसरः** ॥

'पुरोऽग्रतोऽग्रेषु ग्रहण इसलिये है कि—ग्रामं सरतीति **ग्रामसारः** । यहां अण् ही होता है ॥ १८ ॥

पूर्वे कर्त्तरि[5] ॥ १९ ॥

'सर्तेः' इति वर्त्तते । पूर्वे । ७ । १ । कर्त्तरि । ७ । १ ॥

कर्त्तृवाचिनि पूर्वशब्द उपपदे 'सृ' धातोः 'टः' प्रत्ययो भवति ॥ पूर्वः प्रथमः सरतीति पूर्वसरः ॥

---

१. आ० सू० १०२३ ॥

२. आदायेति ल्यबन्तम् । अत्राऽऽदातव्यकर्मणोऽविवक्षितत्वात् पूर्वकालमात्रविवक्षिते प्रत्ययः, आदानं कृत्वा चरतीत्यर्थः ॥

३. आ० सू० १०२४ ॥

४. 'अग्रेसरः' इत्यत्र निपातनाद् 'एत्वम्' ॥ (ख) 'अग्रसरः' इति बाहुलकात् ॥

५. आ० सू० १०२५ ॥

'कर्त्तरि' इति किम्—पूर्वं देशं सरतीति पूर्वसारः । अत्र कर्मण्युपपदेऽणेव भवति ॥ १९ ॥

यहां 'सर्त्तेः' पद का अनुवर्त्तन है ॥ [कर्त्तरि] कर्त्तृवाची [पूर्वे] पूर्व शब्द उपपद हो तो 'सृ' धातु से 'ट' प्रत्यय होता है ॥

जैसे—पूर्वः = प्रथमः सरतीति पूर्वसरः ॥

'कर्त्तरि' ग्रहण इसलिये है कि—पूर्वं देशं सरतीति पूर्वसारः यहां कर्म उपपद होने से 'अण्' ही होता है ॥ १९ ॥

कृञो हेतुताच्छील्यानुलोम्येषु[1] ॥ २० ॥

कृञः । ५ । १ । हेतु० म्येषु । ७ । ३ ॥ हेतुः कारणम् । ताच्छील्यं तत्स्वभावता । आनुलोम्यमनुकूलता ॥

हेत्वादिषु गम्यमानेषु 'कृञ्'[2] धातोः 'टः' प्रत्ययो भवति ॥ रोगकरो शोकः । रोगकरं कुपथ्यम् । शोकः कुपथ्यं च कारणं रोगस्य । ताच्छील्ये—श्राद्धकरः । पिण्डकरः । आनुलोम्ये—वचनकरः पुत्रः । आज्ञाकरः शिष्यः । अनुकूलं वर्त्तमान इत्यर्थः ॥

'हेत्वादिषु' इति किम्—कुम्भकारः ॥ २० ॥

हेतुः = कारणम् ताच्छील्यम् = तत्स्वभावता । आनुलोम्यम् = अनुकूलता ॥

[हेतु० म्येषु] हेत्वादि गम्यमान हों तो [कृञः] 'कृञ्' धातु से 'ट' प्रत्यय होता है ॥

जैसे—रोगकरो शोकः । रोगकरं कुपथ्यम् । शोक तथा कुपथ्य रोग की उत्पत्ति में कारण हैं ॥ ताच्छील्ये—श्राद्धकरः । पिण्डकरः ॥ आनुलोम्ये—वचनकरः पुत्रः । आज्ञाकरः शिष्यः । अर्थात् अनुकूल आचरण करता है ॥

'हेतुताच्छील्यानुलोम्येषु' ग्रहण इसलिये है कि—कुम्भकारः । यहां 'अण्' ही होता है ॥ २० ॥

दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु[3] ॥ २१ ॥

'कर्मणि' इत्यनुवर्त्तते 'सुपि' इति च, तत्र कर्मणोऽन्यकारके सुपीति सम्बन्धः ॥

---

१. आ० सू०—१०२६ ॥

२. अत्र सूत्रे कृञ्ग्रहणेन द्वयनुबन्धकस्य 'डुकृञः' ग्रहणं भवति । न तु **'कृञ् हिंसायाम्'** इत्यस्य ॥

प्रयोगसामर्थ्यमेवात्र हेतुः । तेन—**'तदनुबन्धकग्रहणे नातदनुबन्धकस्य ग्रहणमिति** परिभाषा न प्रवर्त्तते' ॥

३. आ० सू०—१०२७ ॥

दिवा० रुरुष्षु । ७ । ३ ॥ अहेत्वाद्यर्थोऽयमारम्भः ॥ दिवादिषूपपदे[षु] 'कृञ्' धातोः 'टः' प्रत्ययो भवति ॥

दिवाकरः । विभाकरः । निशाकरः । प्रभाकरः । भाः करोतीति भास्करः । **कस्का**[1]दित्वाद् विसर्जनीयस्य सत्वम्[2] ॥ कारकरः । अन्तकरः । अनन्तकरः । आदिकरः । बहुकरः[3] । नान्दीकरः । किङ्करः । लिपिकरः । लिबिकरः । बलिकरः । भक्तिकरः । कर्तृकरः । चित्रकरः । क्षेत्रकरः ॥ संख्या—एककरः । द्विकरः । त्रिकरः । चतुष्करः ॥ जङ्घाकरः । बाहुकरः । अहस्करः[4] । यत्करः । तत्करः । धनुष्करः[5] । अरुष्करः[5] ॥

वा०—किं यत्तद्बहुषु कृञोऽज्विधानम्[6] *॥ १ ॥*

किंयत्तद्बहुषूपपदेषु 'कृञ्' धातोः 'अच्' प्रत्ययो भवति ॥ किंकरा । यत्करा । तत्करा । बहुकरा । ट-प्रत्यये सति स्त्रीलिङ्गे ङीप् प्रत्ययः, स्यात् [अतः] टाबर्थमिदम् ॥ २१ ॥

यहां 'कर्मणि' तथा 'सुपि' पद का अनुवर्त्तन है । यहां कर्मभिन्न कारक में सुपि का सम्बन्ध होता है । यह सूत्र हेत्वादि से अतिरिक्त अर्थों के लिये है ॥

[दिवा० रुरुष्षु] दिवादि उपपद हों तो 'कृञ्' धातु से 'ट' प्रत्यय होता है ॥

जैसे—**दिवाकरः । विभाकरः । निशाकरः । प्रभाकरः ।** भाः करोतीति **भास्करः ।** **'कस्कादिषु च'** इससे विसर्जनीय को सत्व हो जाता है ॥ **कारकरः । अन्तकरः । अनन्तकरः । आदिकरः । बहुकरः । नान्दीकरः । किंकरः । लिपिकरः । लिबिकरः । बलिकरः । भक्तिकरः । कर्तृकरः । चित्रकरः । क्षेत्रकरः ।** संख्या—**एककरः । द्विकरः । त्रिकरः । चतुष्करः ॥ जङ्घाकरः । बाहुकरः । अहस्करः । यत्करः । तत्करः । धनुष्करः । अरुष्करः ॥**

वा०—किंयत्तद्ब०—किं, यत्, तत्, बहु ये उपपद हों तो 'कृञ्' धातु से 'अच्' प्रत्यय होता है ॥ जैसे—**किंकरा । यत्करा । तत्करा । बहुकरा ॥** 'ट' प्रत्यय होने से स्त्रीलिङ्ग में ङीप् प्रत्यय हो जाता, 'अच्' प्रत्यय इसलिये कहा है कि स्त्रीलिङ्ग में 'टाप्' हो ॥ २१ ॥

---

१. अ०—८ । ३ । ४८ ॥

२. यद्वा—अत्र सूत्रे 'भास्कारान्त' इति निपातनादेव विसर्जनीयजिह्वामूलीयौ न भवतः ॥

३. वैपुल्यवचनोऽत्र 'बहु' शब्दः, संख्यायाः पृथङ् निर्देशात् ॥

४. अ० ८ । ३ । ४१ । इति सत्वम् ॥ ५. अ०—८ । ३ । ४५ । इति षत्वम् ॥

६. अ०—३ । २ । २१ भा० ॥ (ख) 'अथवाऽजादिषु पाठः करिष्यते' इति **जयादित्ये**-नोच्यते तत्तु भाष्ये न दृश्यते ॥

कर्मणि भृतौ[1] ॥ २२ ॥

'ट' एवानुवर्त्तते 'कृञ्' इति च । कर्मणि । ७ । १ । भृतौ । ७ । १ ॥ कर्मणीति शब्दस्य स्वरूपं[2] गृह्यते न तु कारकम् ॥

कर्मणिशब्द उपपदे भृतावभिधेये 'कृञ्' धातोः 'टः' प्रत्ययो भवति ॥ भृतिः= प्रेष्यं कर्म । कर्म करोतीति कर्मकरो भृत्यः ॥

'भृतौ' इति किम्—कर्मकारः । अत्राणेव भवति ॥ २२ ॥

यहां 'ट' तथा 'कृञ्' पद का अनुवर्त्तन है । इस सूत्र में 'कर्मणि' शब्द से 'कर्म' इस पद का स्वरूप ग्रहण है कर्मकारक का नहीं ॥

[कर्मणि] कर्म शब्द उपपद हो तो [भृतौ] भृति अभिधेय में 'कृञ्' धातु से 'ट' प्रत्यय होता है ॥ भृति से यहां नौकरी अभिप्रेत है ॥ जैसे—कर्म करोतीति **कर्मकरो भृत्यः** ॥

'भृतौ' ग्रहण इसलिये है कि—कर्मकारः । यहां अण् ही होता है ॥ २२ ॥

न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु[3] ॥ २३ ॥

हेत्वादिषु टः प्राप्तोऽनेन प्रतिषिध्यते । न [अ०] । शब्द० पदेषु । ७ । ३ ॥

शब्दादिषूपपदेषु 'कृञ्' धातोः 'ट' प्रत्ययो न भवति किन्त्वौत्सर्गिकोऽण्येव ।

शब्दं करोतीति शब्दकारः । श्लोककारः । कलहकारः । गाथाकारः । वैरकारः । चाटुकारः । सूत्रकारः । मन्त्रकारः[4] । पदकारः[5] ॥ २३ ॥

---

१. आ० सू० १०२८ ॥

२. कर्मग्रहणसामर्थ्यादिह पारिभाषिकस्य कर्मणो ग्रहणं न भवति । अन्यथा कर्माधिकारादेव सिद्धे, कर्मग्रहणमनर्थकं स्यात् ॥ ३. आ० सू० १०२९ ॥

४. करोतिधातुर्नावश्यमभूतप्रादुर्भाव एव वर्त्तते, **'गन्धना०'** (अ० १ । ३ । ३२) आदिष्वात्मनेपदं विदधता सूत्रकारेणान्येषामप्यर्थानामङ्गीकरणात्, भाष्यकारेण च **'बह्वर्था अपि धातवो भवन्ति'** इत्युपक्रम्य निक्षेपणनिर्मलीकरणयोस्सद्भावप्रदर्शनाच्च । तेन मन्त्रकारो मन्त्रकृदित्यत्र च करोति-धातुर्नाभूतप्रादुर्भावार्थे द्रष्टव्यः । धातूनां बह्वर्थत्वाद्दर्शनार्थोऽत्र करोतिः । तथा चाह भट्टभास्करः—**'मन्त्रकृद्भ्यो मन्त्राणां द्रष्टृभ्यः, दर्शनमेव कर्तृत्वम्'** (तै० आ० ४ । ११) ॥ सायणोऽपि—**'मन्त्रकृत्, करोति धातुस्तत्र दर्शनार्थः'** (ऐत० ब्रा० ६ । १) इत्याह ॥ **'मन्त्रकृदो मन्त्रदृश इत्युच्यन्ते न हि मन्त्राणां करणं भवति, अनित्यत्वप्रसङ्गात् तेन दर्शनार्थः कृञित्यध्यवसीयते'** इति कर्कोऽप्याह (का० श्रौ० ३ । २ । ९) ॥

अध्ययनार्थेऽपि करोतिर्वर्त्तते । तथा च भाष्यम्—**'प्रत्यक्षकारी ग्रहणं कर्त्तव्यम्'** (अ० ४ । ३ । १०४ भा०) प्रत्यक्षाध्यायी च तदर्थः । तेन मन्त्रकारपदस्य मन्त्राध्यापकार्थेऽपि वृत्तिर्द्रष्टव्या । अत एव च तत्र तत्र श्रौतादिग्रन्थेषु **"मन्त्रकृतोऽध्वर्युर्वृणीते"** (सत्या० श्रौ० २ । १ । १३) ॥ **"दक्षिणत उदङ्मुखो मन्त्रकारः"** (मा० गृ० १ । ८ । २) इत्यादिरूपलभ्यमाने पदे सामाञ्जस्यं लभतः । अन्यथा हि सूत्रकालादतिप्रत्नो मन्त्रकाल इति स्वीकुर्वतां मते सूत्रकाले मन्त्रकाराणामभावात् तद्घटितवाक्यानामसङ्गतिरेव स्यादिति दिक् ।

विस्तरस्तु 'आर्य्यसिद्धान्तविमर्शे' **'क्या ऋषि मन्त्र-रचयिता थे'** इति प्राकृतभाषालेखे द्रष्टव्यः ॥

५. पदं करोतीति पदकारः, विगृह्णातीत्यर्थः ॥

हेत्वादि अर्थों में 'ट' प्राप्त था उसका यह निषेध करता है ॥

[शब्द० पदेषु] शब्दादि उपपद हों तो 'कृञ्' धातु से 'ट' प्रत्यय [न] नहीं होता किन्तु उत्सर्ग 'अण्' ही होता है ॥

जैसे—शब्दं करोतीति शब्दकारः । श्लोककारः । कलहकारः । गाथाकारः । वैरकारः । चाटुकारः । सूत्रकारः । मन्त्रकारः । पदकारः ॥ २३ ॥

स्तम्बशकृतोरिन्[1] ॥ २४ ॥

'कृञः' इत्यनुवर्त्तते, 'टः' निवृत्तः । स्तम्बशकृतोः । ७ । २ । इन् । १ । १ ॥

वा०—ब्रीहिवत्सयोः[2] ॥ १ ॥

स्तम्बशकृतोरुपपदयोः कृधातोर्ब्रीहिवत्सयोरभिधेययोर्यथासंख्यं 'इन्' प्रत्ययो भवति ॥

स्तम्बकरिर्ब्रीहिः । शकृत्करिर्वत्सः ॥

'ब्रीहिवत्सयोः' इति किम्—स्तम्बकारः । शकृत्कारः ॥ २४ ॥

यहां 'कृञ्' पद का अनुवर्त्तन है, 'ट' की निवृत्ति हुई ॥

वा०—ब्रीहिवत्स०—[स्तम्बशकृतोः] स्तम्ब तथा शकृत् उपपद हों तो 'कृञ्' धातु से यथासंख्य ब्रीहि तथा वत्स अभिधेय होने पर [इन्] 'इन्' प्रत्यय होता है ॥

जैसे—**स्तम्बकरिर्ब्रीहिः । शकृत्करिर्वत्सः ॥**

ब्रीहिवत्सयोः' ग्रहण इसलिये है कि—स्तम्बकारः । शकृत्कारः । यहां अण् ही होता है ॥ २४ ॥

हरतेर्दृतिनाथयोः पशौ[3] ॥ २५ ॥

'इन्' इत्यनुवर्त्तते । हरतेः । ५ । १ । दृतिनाथयोः । ७ । २ । पशौ । ७ । १ ॥ दृतिनाथयोः कर्मोपपदयोः 'हृञ्' धातोः पशावभिधेये 'इन्' प्रत्ययो भवति ॥ दृतिं हरतीति दृतिहरिर्वृषभः[4] । नाथहरिर्महिषः[5] ॥

'पशौ' इति किम्—दृतिहारो यवनः । [नाथहारः] ॥ २५ ॥

यहां 'इन्' पद का अनुवर्त्तन है ॥ [दृतिनाथयोः] दृति तथा नाथ ये कर्म उपपद हों तो [हरतेः] 'हृञ्' धातु से 'इन्' प्रत्यय होता है [पशौ] पशु अभिधेय होने पर ॥

जैसे—दृतिं हरतीति **दृतिहरिर्वृषभः । नाथहरिर्महिषः** ॥

---

१. आ० सू०—१०३० ॥ २. अ० ३ । २ । २४ भा० ॥
३. आ० सू०—१०३१ ॥ ४. दृतिः = 'मशक' इति भाषायाम् ॥
५. नाथ इति नासारज्जुः, 'नत्थ, नाथ' वा भाषायाम् ॥

'पशौ' ग्रहण इसलिये है कि—दृतिहारो यवनः । [नाथहारः] यहां 'अण्' ही होता ॥ २५ ॥

फलेग्रहिरात्मम्भरिश्च[1] ॥ २६ ॥

फलेग्रहिः । १ । १ । आत्मम्भरिः । १ । १ । च [अ०] ॥ फलेग्रहिः, आत्मम्भरिः—इत्येतौ शब्दौ 'इन्' प्रत्ययान्तौ निपात्येते ॥ फलशब्दस्योपपदस्य एकारान्तत्वं ग्रहधातोरिन् प्रत्ययश्च निपात्यते ॥ फलानि गृह्णातीति फलेग्रहिः[2] ॥ आत्मशब्दस्य मुमागमो 'डुभृञ्' धातोः 'इन्' प्रत्ययश्च निपात्यते । आत्मानं बिभर्तीत्यात्मम्भरिः ॥

वा०—भृञः कुक्ष्यात्मनोर्मुम्[3] ॥ १ ॥

कुक्ष्यात्मनोरुपपदयोर्मुम्, भृञ् धातोश्च 'इन्' प्रत्ययः । कुक्षिम्भरिः । आत्मम्भरिश्चरति यूथमसेवमानः । वार्त्तिकेन कुक्षिम्भरिरिति विशेषः[4] ॥ २६ ॥

[फलेग्रहिरात्मम्भरिः] फलेग्रहिः और आत्मम्भरिः ये दोनों शब्द 'इन्' प्रत्ययान्त निपातन हैं ॥ जैसे—फलानि गृह्णातीति फलेग्रहिः । यहां उपपद फलशब्द को एकारान्तत्व तथा ग्रह-धातु से 'इन्' निपातन है । आत्मानं बिभर्त्तीत्यात्मम्भरिः । यहां आत्मन् शब्द को 'मुम्' का आगम 'डुभृञ्' धातु से 'इन्' निपातन है ॥

वा०—भृञः कुक्ष्या०—कुक्षि तथा आत्मन् इन उपपद शब्दों को 'मुम्' आगम और 'भृञ्' धातु से 'इन्' प्रत्यय होता है ॥ जैसे—कुक्षिम्भरिः । आत्मम्भरिश्चरति यूथमसेवमानः इस वार्त्तिक से 'कुक्षिम्भरिः' यह सिद्ध हो जाता है ॥ २६ ॥

छन्दसि वनसनरक्षिमथाम्[5] ॥ २७ ॥

छन्दसि । ७ । १ । वनसनरक्षिमथाम् । ६ । ३ ॥ छन्दसि=वेदविषये कर्मण्युपपदे **वन**[6], सन[6], रक्षि, मथ इत्येतेभ्यो धातुभ्य 'इन्' प्रत्ययो भवति ॥

---

१. आ० सू०—१०३२ ॥

२. छन्दसि बहुलवचनात् फलग्रहिः शब्दोऽपि दृश्यते । यथा—**या वनस्पतीनां फलग्रहिः** । तथा च—**पुष्पण्यौ चरतो जङ्घे भूष्णुरात्मा फलग्रहिः** (ऐ० ब्रा० ७ । १५) ॥

३. अ० ३ । २ । २६ । भा० ॥

४. चकारोऽनुक्तसमुच्चयार्थस्तेन 'उदरम्भरिः' इत्यपि सिध्यति । 'तथा च चान्द्रम्—आत्मोदरकुक्षिभ्यः' इति दुर्घटवृत्तिः (पृ० ६०) । चान्द्रसूत्रे तु 'फलेग्रहिरात्मम्भरिः कुक्षिम्भरिः' [१ । २ । १०] इत्येव पाठ उपलभ्यते ॥

५. आ० सू०—१०३३ ॥

६. यद्यपि **'सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्'** । इति नियमात् सहचरितयो-**'वन षण, सम्भक्तौ'** इत्यनयोर्ग्रहणं प्राप्नोति तथापि **'वा छन्दसि सर्वे विधयो भवन्ति'** (अ०—१ । ४ । ९ भा०) इति नियमात् सामान्येन ग्रहणम् ॥

ब्रह्मवनि त्वा[1] । गोसनिम्[2] । पथिरक्षिः[3] । हविर्मथिः[4] ।। अत्र यथादृष्टानि कर्माणि प्रयोक्तव्यानि ।। २७ ।।

[छन्दसि] वेदविषय में कर्म उपपद हो तो [वनसनरक्षिमथाम्] वन, सन, रक्षि, मथ इन धातुओं से 'इन्' प्रत्यय होता है ।।

जैसे—ब्रह्मवनि त्वा । गोसनिम् । पथिरक्षिः । हविर्मथिः । यहां यथादृष्ट कर्मों का प्रयोग करना चाहिये अर्थात् वेद में जिन कर्मवाची उपपदों का प्रयोग दृष्टिगोचर हो उन्हीं उपपदों का उदाहरण समझना चाहिये ।। २७ ।।

एजेः खश्[5] ।। २८ ।।

'इन्' प्रत्ययो निवृत्तः । एजेः । ५ । १ । खश् । १ । १ । **'एजृ कम्पने'**[6] इत्यस्माण्ण्यन्ताद् धातोः कर्मण्युपपदे 'खश्' प्रत्ययो भवति ।। वृक्षानेजयतीति वृक्षमेजयः । जनानेजयतीति जनमेजयः ।। खित्करणात् **'अरुर्द्विषदजन्तस्य मुम्'**[7] इति मुमागमः । शित्करणं सार्वधातुकार्थम् । तेन णेर्लोपो न भवति ।।

वा०—खश् प्रकरणे वातशुनीतिलशर्द्धेष्वजधेट्तुदजहातिभ्यः[8] ।। १ ।।

वातादिषु चतुर्पूपपदेष्वजादिभ्यश्चतुर्भ्यो यथासंख्यं 'खश्' प्रत्ययो भवति ।। वातमजतीति वातमजा मृगाः । शुनीं धयतीति शुनिन्धयः, अत्र खिति ह्रस्वत्वम्, 'मुम्' आगमश्च । तिलन्तुदः । शर्द्धं जहतीति शर्द्धजहा माषाः । अनेन वार्त्तिकेनाप्राप्तः 'खश्' विधीयते ।। २८ ।।

यहां 'इन्' प्रत्यय का निवर्त्तन है ।। [एजेः] एजृ कम्पने इस ण्यन्त धातु से कर्म उपपद हो तो [खश्] 'खश्' प्रत्यय होता है ।।

जैसे—वृक्षानेजयतीति **वृक्षमेजयः** । जनानेजयतीति **जनमेजयः** ।। यहां प्रत्यय के खित् होने से **'अरुर्द्विषदजन्तस्य मुम्'** सूत्र से 'मुम्' आगम होता है । शित् सार्वधातुक संज्ञा के लिये है । इस से 'णि' का लोप नहीं होता ।।

वा०—खश् प्रकरणे०—खश् प्रत्यय के प्रकरण में वात, शुनी, तिल, शर्द्ध ये यथाक्रम उपपद हों तो अज, धेट, तुद और जहाति से 'खश्' प्रत्यय कहना चाहिये ।। जैसे—वातमजा

१. यजु० १ । १७ ।।

२. अथ० ५ । २० । १० ।। ऋ० ६ । ५६ । १० ।। गोसनिः—यजु० ८ । १२ ।।

३. **चतुरक्षौ पथिरक्षी नृचक्षसौ** । ऋ० १० । १४ । ११ ।। **ये पथां पथिरक्षयः** । यजु० १६ । ६० ।। **यौ पथिरक्षी श्वानौ** । अथ० ८ । १ । १० ।।

४. **हविर्मथीनामभ्याविवासताम्** । ऋ० ७ । १०४ । २० ।।

५. आ० सू० १०३४ ।। ६. धा०—भ्वा०—२३५ ।।

७. अ० ६ । ३ । ६७ ।।

८. (क) अ०—३ । २ । २८ भा० ।। (ख) आ० वा०—१०३६ ।।

मृगाः । शुनीन्धयतीति शुनिन्धयः । यहां 'ह्रस्व' तथा 'मुम्' का आगम होता है । तिलन्तुदः । शर्द्धं जहतीति शर्द्धंजहा माषाः । इस वार्त्तिक ने अप्राप्त खश् प्रत्यय का विधान किया है ॥२८॥

नासिकास्तनयोर्ध्मार्धेटोः[1] ॥ २९ ॥

'खश्' इत्यनुवर्त्तते । नासिकास्तनयोः । ७ । २ । ध्माधेटोः । ६ । २ । नासिकास्तनयोः कर्मोपपदयोर्ध्मा-धेट्धातुभ्यां 'खश्' प्रत्ययो भवति ॥ यथासंख्यमत्र[2] न विवक्ष्यते । नासिकोपपदाभ्यां द्वाभ्यां खश्, स्तनोपपदाद् धेट' एव । नासिकन्धमः । नासिकन्धयः । स्तनन्धयः । ध्माधातोः सार्वधातुकाश्रयो 'धम' आदेशः ॥

वा०—नासिकानाडीमुष्टिघटीखरीष्विति वक्तव्यम्[3] ॥ १ ॥

नासिकायामुदाहृतम् । नाडिन्धमः । नाडिन्धयः । मुष्टिन्धमः । मुष्टिन्धयः । घटिन्धमः । घटिन्धयः । खरिन्धमः । खरिन्धयः ॥ वक्ष्यमाण सूत्रस्यात्रोदाहरणानि संख्यातानुदेशनिवारणाय दत्तानि ॥ २९ ॥

यहां 'खश्' का अनुवर्त्तन है ॥ [नासिकास्तनयोः] नासिका तथा स्तन ये कर्म उपपद हों तो [ध्माधेटोः] ध्मा तथा धेट् धातु से 'खश्' प्रत्यय होता है ॥ यहां यथासंख्य विवक्षित नहीं है अतः नासिका उपपद होने पर ध्मा तथा धेट् दोनों से खश् होता है, परन्तु स्तन उपपद होने पर धेट् से ही खश् होता है ॥

जैसे—नासिकन्धमः । नासिकन्धयः । स्तनन्धयः ॥ खश् प्रत्यय को सार्वधातुक मान कर ध्मा धातु को 'धम' आदेश हो जाता है ॥

वा०—नासिकानाडी०—नासिका आदि उपपद हों तो ध्मा तथा धेट् धातु से 'खश्' प्रत्यय कहना चाहिये ॥ जैसे—नासिका के उदाहरण दे चुके हैं । नाडिन्धमः । नाडिन्धयः । मुष्टिन्धमः । मुष्टिन्धयः । घटिन्धमः । घटिन्धयः । खरिन्धमः । खरिन्धयः । यहां अगले सूत्र के उदाहरण भी संख्यातानुदेश के निवारणार्थ हैं ॥ २९ ॥

नाडीमुष्ट्योश्च[4] ॥ ३० ॥

अत्रापि यथासंख्यातानुदेशो[5] नेष्यते । 'ध्मा-धेटोः-खश्' इत्यनुवर्त्तते । नाडीमुष्ट्योः । ७ । २ । [च । अ०] ॥ नाडीमुष्ट्योः कर्मोपपदयोर्ध्मा-धेट्-धातुभ्यां 'खश्' प्रत्ययो भवति ॥ नाडिन्धमः । नाडिन्धयः । मुष्टिन्धमः । मुष्टिन्धयः ॥ ३० ॥

१. आ० सू० १०३८ ॥

२. अल्पाच्तरस्य पूर्वनिपातव्यभिचारात् यथासंख्यमत्र न विवक्ष्यत इति लभ्यते ॥

३. (क) अ०—३ । २ । २८ भा० ॥ (ख) आ० वा०—१०४० ॥

४. आ० सू०—१०३९ ॥

५. अत्रापि ध्यन्तस्यापूर्वनिपातलक्षणव्यभिचारचिह्नेन यथासंख्यं न भवतीति लभ्यते । भाष्यवार्त्तिकप्रामाण्याच्च ॥

इस सूत्र में भी यथासंख्य इष्ट नहीं है। 'ध्मा-धेटोः' तथा 'खश्' पद का अनुवर्त्तन है ॥

[**नाडीमुष्टयोः**] नाडी तथा मुष्टि कर्म उपपद हों तो [**च**] ध्मा तथा धेट् धातु से 'खश्' प्रत्यय होता है ॥

जैसे—**नाडिन्धमः। नाडिन्धयः। मुष्टिन्धमः। मुष्टिन्धयः** ॥ ३० ॥

उदि कूले रुजिवहोः[1] ॥ ३१ ॥

'खश्' इत्यनुवर्त्तते, नान्यत्। **उदि**। ७। १। **कूले**। ७। १। **रुजिवहोः**। ६। २ ॥ **उत्पूर्वाभ्यां**[2] रुजि-वहिधातुभ्यां कूले कर्मण्युपपदे 'खश्' प्रत्ययो भवति ॥ कूलमुद्रुजति [इति कूलमुद्रुजो रथः]। कूलमुद्वहः ॥

'उदि' इति किम्—कूलवाहः ॥ **'कूले' इति किम्**—भारोद्वाहः ॥ ३१ ॥

[**उदि**] उत्-पूर्वक [**रुजिवहोः**] रुज तथा वह धातु से [**कूले**] कूल कर्म उपपद हो तो 'खश्' प्रत्यय होता है ॥

जैसे—कूलमुद्रुजतीति कूलमुद्रुजो रथः। कूलमुद्वहः ॥

'उदि' ग्रहण इसलिये है कि—कूलवाहः ॥ 'कूले' ग्रहण इसलिये है कि—भारोद्वाहः। यहां 'अण्' होता है ॥ ३१ ॥

वहाभ्रे लिहः[3] ॥ ३२ ॥

वहाभ्रे। ७। १। **लिहः**। ५। १ ॥ वह-अभ्र इत्येतयोरुपपदयो 'लिह' धातोः 'खश्' प्रत्ययो भवति ॥ वहमुदकं लेढीति वहंलिहो वृषभः। अभ्रंलिहो वायुः ॥

'वहाभ्रे' इति किम्—दुग्धलेहो[4] बालः ॥

[**वहाभ्रे**] वह, अभ्र उपपद हों तो [**लिहः**] 'लिह' धातु से 'खश्' प्रत्यय होता है ॥

जैसे—वहमुदकं लेढीति वहंलिहो वृषभः। अभ्रंलिहो वायुः ॥

'वहाभ्रे' ग्रहण इसलिये है कि—दुग्धलेहो बालः ॥ ३२ ॥

---

१. आ० सू०—१०४१ ॥

२. **"उदि कूले द्वे। रुजिवहौ द्वौ, तत्र संख्यातानुदेशः प्राप्नोति। नैष दोषः। नोदिरुपपदं, किं तर्हि ? विशेषणम्—रुजिवहोरुत्पूर्वाभ्यां रुजिवहिभ्यां कूल उपपद इति"** (अ० १। ३। १० भा०)। तथा च—**'ते प्राग्धातोः** (अ० १। ४। ८०) **इत्यत्र सूत्रभाष्ये—नैष उदिरुपपदम् ॥'** अ० १। ४। ८०। भा० ॥

अपरञ्च—एषा ह्याचार्य्यस्य शैली दृश्यते यत्र प्रत्येकमुपपदमिच्छति तत्र समुदायात् सप्तमीमुच्चारयति। यथा—**नाडीमुष्टयोश्च** (अ० ३। २। ३०) ॥ ३. आ० सू०—१०४२ ॥

४. अन्यत्राऽण् प्रत्ययः, अवपूर्वात्तु **'श्यादृचधा०'** (अ० ३। १। १४१) इत्यादिना 'ण' एव ॥

परिमाणे पचः[1] ॥ ३३ ॥

परिमाणे । ७ । १ । पचः । ५ । १ ॥ परिमाणवाचिनि कर्मण्युपपदे पच-धातोः 'खश्' प्रत्ययो भवति ॥ प्रस्थं पचतीति प्रस्थंपचा स्थाली । आढकंपचः । द्रोणंपचः ॥

'परिमाणे' इति किम्—ओदनपाचः[2] ॥ ३३ ॥

[**परिमाणे**] परिमाणवाची कर्म उपपद हो तो [**पचः**] 'पच' धातु से 'खश्' प्रत्यय होता है ॥

जैसे—प्रस्थं पचतीति प्रस्थंपचा स्थाली । **आढकंपचः । द्रोणंपचः ॥**

'परिमाणे' ग्रहण इसलिये है कि—ओदनपाचः यहां 'अण्' हो जाता है ॥ ३३ ॥

मितनखे च[3] ॥ ३४ ॥

'पचः' इत्यनुवर्त्तते । अपरिमाणार्थोऽयमारम्भः । मितनखे । ७ । १ । च [अ०] ॥ मित, नख इत्येतयोः कर्मोपपदयोः [पचेः 'खश्' प्रत्ययो भवति ॥] मितं पचतीति मितंपचा[4] ब्राह्मणी । नखानि पचतीति नखंपचा यवागूः ॥ ३४ ॥

यहां 'पचः' पद की अनुवृत्ति है ॥ अपरिमाण के लिये यह सूत्र है ॥

[**मितनखे**] मित तथा नख ये कर्म उपपद हों तो 'पच' धातु से 'खश्' प्रत्यय होता है ॥

जैसे—मितं पचतीति **मितंपचा** ब्राह्मणी । नखानि पचतीति **नखंपचा** यवागूः ॥ ३४ ॥

विध्वरुषोस्तुदः[5] ॥ ३५ ॥

विध्वरुषोः । ७ । २ । तुदः । ५ । १ ॥ विधु, अरुस् इत्येतयोः कर्मणोरुपपदयोस्तुदधातोः 'खश्' प्रत्ययो भवति ॥ विधुन्तुदः । अरुन्तुदः ॥ ३५ ॥

[**विध्वरुषोः**] विधु तथा अरुस् ये कर्म उपपद हों तो [**तुदः**] 'तुद' धातु से 'खश्' प्रत्यय होता है ॥

जैसे—विधुन्तुदः । अरुन्तुदः ॥ ३५ ॥

---

१. आ० सू० १०४३ ॥
२. न्यङ्क्वादीनामाकृतिगणत्वाद् 'ओदनपाकः' इत्यपि सम्भवति ॥
३. आ० सू० १०४४ ॥
४. मितंपचः = कृपणः ॥
५. आ० सू०—१०४५ ॥

असूर्यललाटयोर्दृशितपोः[1] ॥ ३६ ॥

असूर्य्यललाटयोः । ७ । २ । दृशितपोः । ६ । २ ॥ असूर्य्य, ललाट इति कर्मद्वयोपपदाभ्यां दृशितपिधातुभ्यां 'खश्' प्रत्ययो भवति ॥ असूर्य्यंपश्या[2] राजदाराः । एवं भूतानि गृहाणि सन्ति येषु सूर्य्यस्य दर्शनमेव न भवति । ललाटन्तपः सूर्य्यः । अत्र खशः सार्वधातुकत्वात् दृशेः 'पश्य'[3] आदेशः ॥ ३६ ॥

[असूर्य्यललाटयोः] असूर्य्य तथा ललाट ये कर्म उपपद हों तो [दृशितपोः] दृश और तप धातु से 'खश्' प्रत्यय होता है ॥

असूर्य्यंपश्या राजदाराः । अर्थात् गृह ऐसे बने हैं कि जिनमें रहने वाली रानियों को सूर्य ही नहीं दीखता । ललाटन्तपः सूर्य्यः । यहां 'खश्' प्रत्यय के सार्वधातुक होने से 'दृश्' को 'पश्य' आदेश हो जाता है ॥ ३६ ॥

उग्रम्पश्येरम्मदपाणिन्धमाश्च[4] ॥ ३७ ॥

उग्रम्पश्ये० माः । १ । ३ । च [अ०] ॥

उग्रम्पश्य, इरम्मद्, पाणिन्धम इत्येते 'खश्' प्रत्ययान्ता निपात्यन्ते ॥ उग्रं-पश्यतीति उग्रम्पश्यः । इरया माद्यतीति इरम्मदः । पाणौ धमतीति पाणिन्धमः ॥३७॥

[उग्रंपश्येरम्मदपाणिन्धमाः] उग्रम्पश्य, इरम्मद, पाणिन्धम ये शब्द खश्-प्रत्ययान्त निपातन हैं ॥

जैसे—उग्रं पश्यतीति **उग्रम्पश्यः** । इरया माद्यतीति **इरम्मदः** । पाणौ धमतीति **पाणिन्धमः** ॥ ३७ ॥

प्रियवशे वदः खच्[5] ॥ ३८ ॥

प्रियवशे । ७ । १ । वदः । ५ । १ । खच् । १ । १ ॥ प्रिय, वश इत्येतत्कर्मद्वयोपपदाद् 'वद'[6] धातोः 'खच्' प्रत्ययो भवति ॥ प्रियं वदतीति प्रियंवदः । वशंवदः ॥ खचि खकारो मुमर्थः । चकारः **'खचि ह्रस्वः'**[7] [इति] विशेषणार्थः ॥

---

१. आ० सू० १०४६ ॥

२. असूर्य्यंपश्या-इत्यसमर्थसमासोऽयं दृशिना नञः सम्बन्धात्, सूर्यं न पश्यतीत्यसूर्यंपश्या । यथा च भाष्यम्—**अवश्यं कस्यचिन्नञ्समासस्यासमर्थस्य गमकस्य साधुत्वं वक्तव्यम् ॥ असूर्य्यंपश्यानि मुखानि । अपुनर्गेयाः श्लोकाः । अश्राद्धभोजी ब्राह्मण इति ।** अ०—१ । १ । ४३ ॥ २ । १ । १ ॥ ३ । २ । ८० इति भाष्ये ॥

३. अ० ७ । ३ । ७८ ॥ ४. आ० सू०—१०४७ ॥

५. आ० सू०—१०४८ ॥

६. **'वद व्यक्तायां वाचि'** इत्यस्यैव ग्रहणं, **'वद स्थैर्य्ये'** इत्यस्य तु न ॥

७. अ०—६ । ४ । ९४ ॥

वा०—खच्प्रकरणे गमेः सुप्युपसंख्यानम्[1] ॥ १ ॥

मितंगमो हस्ती । मितङ्गमा हस्तिनी ॥ १ ॥

वा०—विहायसो विह च[2] ॥ २ ॥

विहायस्युपपदे 'गम' धातोः 'खच्', विहायस्-शब्दस्य 'विह' इत्ययमादेशः। **विहङ्गमः ॥ २ ॥**

वा०—खच्च डिद्वा[3] ॥ ३ ॥

विहायसो विहादेशे 'गम' धातो परः 'खच्' विकल्पेन डिद्भवति ॥ विहङ्गः। डित्त्वाद् 'गमेः' टिलोपः ॥ ३ ॥

वा०—डे च[4] ॥ ४ ॥

विहायस्युपपदे 'गम' धातो 'डः' प्रत्ययस्तस्मिन्नपि 'विह' इत्यादेशः। विहगः। 'मुम्' आगमप्रतिषेधार्थं डविधानम् ॥ ४ ॥ ३८ ॥

[प्रियवशे] प्रिय तथा वश ये दो कर्म उपपद हों तो [वदः] 'वद' धातु से [खच्] 'खच्' प्रत्यय होता है ॥

जैसे—प्रियं वदतीति **प्रियंवदः । वशंवदः ॥** खच् प्रत्यय में खकार' मुम्' आगम के लिये है और चकार खचि ह्रस्वः' इस में विशेषण के लिये है ॥

वा०—खच्प्रकरणे०—खच् प्रकरण में सुबन्त उपपद होने पर 'गम' धातु से 'खच् होता है ऐसा कहना चाहिये ॥ जैसे—**मितङ्गमो हस्ती । मितङ्गमा हस्तिनी ॥ १ ॥**

वा०—विहायसो०—विहायस् शब्द उपपद हो तो 'गम' धातु से 'खच्' प्रत्यय तथा विहायस् को 'विह' आदेश भी होता है ॥

जैसे—[विहायसाऽऽकाशमार्गेण गच्छति] **विहङ्गमः पक्षी ॥ २ ॥**

वा०....खच्च डिद्वा—'विहायस्' को 'विह' आदेश और 'गम' धातु से विहित 'खच्' प्रत्यय विकल्प करके डिद्वत् होता है ॥ जैसे—**विहङ्गः ।** यहां प्रत्यय के डिद्वत् होने से 'गम' धातु की 'टि' का लोप हो जाता है ॥ ३ ॥

वा०—डे च—विहायस् शब्द उपपद हो तो 'गम' धातु से 'ड' प्रत्यय तथा 'विह' आदेश भी होता है ॥ जैसे—**विहगः ।** ड-प्रत्यय 'मुम्' आगम के प्रतिषेध के लिये है ॥ ३८ ॥

---

१. अ०—३ । ३ । ३८ भा० ॥ आ० वा०—१०४९ ॥
२. अ०—३ । २ । ३८ भा० ॥ आ० वा०—१०५० ॥
३. अ०—३ । २ । ३८ भा० ॥ आ० वा०—१०५१ ॥
४. अ०—३ । २ । ३८ भा० ॥ आ० वा०—१०५२ ॥

द्विषत्परयोस्तापेः[1] ॥ ३९ ॥

'खच्' इत्यनुवर्त्तते । द्विषत्परयोः । ७ । २ । तापेः । ५ । १ ॥ द्विषत्परयोरुप पदयोर्ण्यन्तात्[2] 'तप' धातोः 'खच्' प्रत्ययो भवति ॥ द्विषन्तं तापयति द्विषन्तपः । परन्तपः । अत्र तकारान्तस्य द्विषच्छब्दस्य ग्रहणम् । तेन स्त्रीलिङ्गे 'खच्' न भवति । द्विषतीतापः ॥ ३९ ॥

यहां 'खच्' पद का अनुवर्त्तन है ॥ [द्विषत्परयोः] द्विषत् तथा पर उपपद हों तो [तापेः] ण्यन्त 'तप' धातु से 'खच्' प्रत्यय होता है ॥

जैसे—द्विषन्तं तापयतीति द्विषन्तपः । परन्तपः ॥ यहां तकारान्त द्विषत् शब्द का ग्रहण है, इस कारण से स्त्रीलिङ्ग में 'खच्' प्रत्यय नहीं होता, अतः द्विषतीतापः ऐसा ही प्रयोग होता है ॥ ३९ ॥

वाचि यमो व्रते[3] ॥ ४० ॥

वाचि । ७ । १ । यमः । ५ । १ । व्रते । ७ । १ ॥ वाक्कर्मण्युपपदे व्रते शास्त्र-कृतनियमाभिधेये सति 'यम' धातोः 'खच्' प्रत्ययो भवति ॥ वाचं यच्छति वाचंयम आस्ते । अत्र **वाचंयमपुरन्दरौ च**[4] [इति] निपातनान् मुम् ॥

'व्रते' इति किम्—वाग्यामः[5] । अत्रोत्सर्गत्वाद् 'अण्' एव भवति ॥ ४० ॥

[वाचि] वाक् यह कर्म उपपद हो तो [व्रते] शास्त्रविहित नियम अभिधेय होने पर [यमः] 'यम' धातु से 'खच्' प्रत्यय होता है ॥

जैसे—वाचं यच्छतीति वाचंयम आस्ते । यहां 'वाचंयमपुरंदरौ च' इस निपातन सामर्थ्य से 'मुम्' आगम होता है ॥

'व्रते' ग्रहण इसलिये है कि—वाग्यामः । यहां उत्सर्ग 'अण्' ही होता है ॥ ४० ॥

पूः सर्वयोर्दारिसहोः[6] ॥ ४१ ॥

पूः सर्वयोः । ७ । २ । दारिसहोः । ६ । २ ॥ पुर्, सर्व इत्येतत्कर्मद्वयोपपदाभ्यां दारि-सहधातुभ्यां[7] 'खच्' प्रत्ययो भवति ॥ पुरं दारयतीति पुरन्दरः[8] । अत्रापि

---

१. आ० सू०—१०५३ ॥

२. **'तप दाहे'** (चु० २७०) **'तप सन्तापे'** (भ्वा० ९७०) द्वयोरपि ग्रहणम् ॥

३. आ० सू०—१०५५ ॥ ४. अ०—६ । ३ । ६९ ॥

५. असौ भवति योऽसमर्थः सन्न ब्रवीति ॥ ६. आ० सू०—१०५७ ॥

७. 'दारि' इत्यनेन ण्यन्तस्य **'दृ विदारणे'** इत्यस्य ग्रहणं भवति, **'दृ भये'** भ्वा०—**'दृङ् आदरे'** क्र्या० इत्यनयोस्तु न भवत्यनभिधानात् ॥

सर्वोपपदात् सह-धातोरत्राऽसंज्ञायां खच् भवति, कुतः ? **'संज्ञायां भृतृवृजिधारिसहितपिदमः'** (अ० ३ । २ । ४६) इति संज्ञायां खचो वक्ष्यमाणत्वात् ॥

८. कथं भगन्दरः —

निपातनादेव[1] 'मुम्' आगमः । सर्वंसहा पृथिवी ॥

'पूः सर्वयोः' इति किम्—दुःखसाहः ॥ ४१ ॥

[पूः सर्वयोः] पुर्, सर्व, ये दो कर्म उपपद हों तो [दारिसहोः] 'दारि' तथा 'सह' धातु से 'खच्' प्रत्यय होता है ॥

पुरं दारयतीति **पुरन्दरः** । यहां भी **'वाचंयमपुरन्दरौ च'** इस निपातन से 'मुम्' आगम होता है । **सर्वंसहा** पृथिवी ॥

'पूः सर्वयोः' ग्रहण इसलिये है कि—**दुःखसाहः** ॥ ४१ ॥

सर्वकूलाभ्रकीरषेषु कषः[2] ॥ ४२ ॥

सर्वकूलाभ्रकरीषेषु । ७ । ३ । कषः । ५ । १ ॥ सर्व, कूल, अभ्र, करीष इत्येतेषूपपदेषु 'कष' धातोः 'खच्' प्रत्ययो भवति ॥ सर्वं कषति हिनस्ति सर्वंकषो दुष्टः । कूलंकषा नदी । अभ्रंकषः सूर्यः । करीषंकषा [वात्या] ॥ ४२ ॥

[सर्व० षेषु] सर्व, कूल, अभ्र, करीष ये कर्म उपपद हों तो [कषः] 'कष' धातु से 'खच्' प्रत्यय होता है ॥

जैसे—सर्वं कषति हिनस्ति सर्वंकषो दुष्टः । कूलंकषा नदी । अभ्रंकषः सूर्य्यः । करीषंकषा [वात्या] ॥ ४२ ॥

मेघर्त्तिभयेषु कृञः[3] ॥ ४३ ॥

मेघर्त्तिभयेषु । ७ । ३ । कृञः । ५ । १ ॥ मेघ, ऋति, भय इत्येतेषु कर्मसूपपदेषु 'कृञ्' धातोः 'खच्' प्रत्ययो भवति ॥ मेघंकरो वायुः । ऋतिंकरः । भयङ्करः[4] ॥

एतेषु [मेघर्त्तिभयेषु] इति किम्—शब्दकारः ॥ ४३ ॥

[मेघ० षु] मेघ, ऋति, भय ये कर्म उपपद हों तो [कृञः] 'कृञ्' धातु से 'खच्' प्रत्यय होता है ॥

जैसे—**मेघङ्करो** वायुः । ऋतिङ्करः । भयङ्करः ॥

'मेघर्त्तिभयेषु' ग्रहण इसलिये है कि—**शब्दकारः** ॥ ४३ ॥

भगन्दरविनाशार्थमेतद्योज्यं विशेषतः । एतद्धि स्यन्दनं तैलं मृशं दद्याद्भगन्दरे ।
ततो भगन्दरे दद्यादेतदर्धेन्दुसन्निभम् ॥ (सुश्रुत चि० स्थाने अ० ८)

इत्यादिषु भगन्दरशब्दप्रयोगोऽपि दृश्यते । स च **'कृत्यल्युटो बहुलम्'** (अ० ३ । ३ । ११३) इति वचनाद्भग उपपदेऽपि दारेः खचि द्रष्टव्यः ॥

यत्तु काशिकायाम्—**'भगे च दारेः'** इति वार्त्तिकमुपलभ्यते तद्भाष्येऽदृष्टत्वादुपेक्षणीयम् ॥

१. अ०—६ । ३ । ६९ ॥ २. आ० सू०—१०५८ ॥

३. आ० सू०—१०५९ ॥

४. अस्त्यत्र भयशब्देन तदन्तविधिस्तेन—'अभयङ्कर' इत्यपि सिध्यति । तथा च भाष्यम्—**उपपदविधौ भयाढ्यादिग्रहणं, प्रयोजनम् । भयङ्करः । अभयङ्करः । आढ्यंकरणम् । स्वाढ्यंकरणम् ॥** (अ०—१ । १ । ७२ ॥ भा०) (ख) छन्दसि बहुलवचनात् 'शिवङ्करः' इत्यपि भवति ॥

क्षेमप्रियमद्रेऽण् च[1] ॥ ४४ ॥

'कृञः' इत्यनुवर्त्तते, खच्च । क्षेमप्रियमद्रे । ७ । १ । अण् । १ । १ । च [अ०] ॥ क्षेमादीनां समाहारद्वन्द्वः ॥

क्षेम, प्रिय, मद्र इत्येतेषु कर्मसूपपदेषु 'कृञ्' धातोः 'अण्' प्रत्ययो भवति च[कारा]त् खच्च ॥ क्षेमकारः[2] । क्षेमंकरः । प्रियकारः । प्रियंकरः । मद्रकारः । मद्रंकरः ॥

'क्षेमप्रियमद्रे वा' इति सूत्रकरणेन खचो विकल्पत्वात् पक्षे स्यादेव 'अण्' प्रत्ययः, पुनरणग्रहणस्यैतत् प्रयोजनम् । 'कृञ्' धातोर्हेत्वाद्यर्थेषु टो विधीयते, स मा भूत् । हेत्वादिष्वपि क्षेमाद्युपपदात् कृञोऽणेव स्यात् ॥ ४४ ॥

यहां 'कृञ्' तथा 'खच्' पद का अनुवर्त्तन है । क्षेमादि में समाहारद्वन्द्व समास है ॥

[क्षेमप्रियमद्रे] क्षेम, प्रिय, मद्र ये कर्म उपपद हों तो 'कृञ्' धातु से [अण्] 'अण्' और 'खच्' प्रत्यय होता है ॥

जैसे—क्षेमकारः । क्षेमंकरः । प्रियकारः । प्रियंकरः । मद्रकारः । मद्रंकरः ।

'क्षेमप्रियमद्रे वा' ऐसा सूत्र करने पर 'खच्' प्रत्यय के विकल्प से पक्ष में 'अण्' प्रत्यय हो ही जाता, पुनः अण् ग्रहण का यह प्रयोजन है कि 'कृञ्' धातु से हेत्वादि अर्थों में 'ट' कहा है वह न हो, किन्तु हेत्वादि अर्थों में भी क्षेमादि उपपद होने पर 'कृञ्' धातु से 'अण्' ही हो ॥४४॥

आशिते भुव करणभावयोः[3] ॥ ४५ ॥

'खच्' अनुवर्त्तते, 'अण्' निवृत्तः ॥ आशिते । ७ । १ । भुवः । ५ । १ । करणभावयोः । ७ । २ ॥ भूधातोरकर्मकत्वात् कर्मात्र नास्ति ॥ आशिते सुबन्त उपपदे 'भू' धातोः करणे भावे 'खच्' प्रत्ययो भवति ॥

आशितस्तृप्तो भवत्यनेन आशितंभव[4] ओदनः । आशितस्य भवनमाशितम्भवं वर्त्तते ॥ ४५ ॥

यहां 'खच्' पद की अनुवृत्ति है और 'अण्' का निवर्तन है ॥ भू-धातु के अकर्मक होने से यहां कर्म का सम्बन्ध नहीं होता ॥

[आशिते] 'आशित' सुबन्त उपपद हो तो [भुवः] 'भू' धातु से [करणभावयोः] करण तथा भाव में 'खच्' प्रत्यय होता है ॥

---

१. आ० सू०—१०६० ॥

२. 'अल्पारम्भः क्षेमकरः इत्यादौ तु कर्मणः शेषत्वविवक्षायां कृञः पचाद्यचि सिध्यति ॥

३. आ० सू०—१०६१ ॥

४. **आशितम्भवमन्नादिस्तृप्तिः स्यादाशितम्भवः ॥** वै० कोषे—शेषकाण्डे नानालिङ्गाध्याये श्लो० २५ ॥

जैसे—आशितो भवत्यनेन आशितंभव ओदनः । आशितस्य भवनमाशितंभवं वर्त्तते ॥४५॥

संज्ञायां भृतृवृजिधारिसहितपिदमः[1] ॥ ४६ ॥

संज्ञायाम् । ७ । १ । भृ० दमः । ५ । १ । समाहारद्वन्द्वः ॥ संज्ञायां गम्यमानायां भृत्रादिधातुभ्यः 'खच्' प्रत्ययो भवति कर्मण्युपपदे ॥ विश्वं बिभर्त्तीति विश्वम्भरः । रथन्तरं साम । स्वयंवरा कन्या । धनञ्जयः । कंधरा । शत्रुंसहः । शत्रुन्तपः । अरिन्दमः[2] ॥

'संज्ञायाम्' इति किमर्थम्—कुटुम्बं बिभर्त्तीति कुटुम्बभारः । अत्राणेव भवति ॥ ४६ ॥

सूत्र में समाहारद्वन्द्व समास है ॥ [संज्ञायाम्] संज्ञा गम्यमान हो तो [भृ० दमः] भृत्रादि धातुओं से कर्म उपपद होने पर 'खच्' प्रत्यय होता है ॥

जैसे—विश्वं बिभर्त्तीति विश्वम्भरः । रथन्तरं साम । स्वयंवरा कन्या । धनञ्जयः । कन्धरा । शत्रुंसहः । शत्रुन्तपः । अरिन्दमः ॥

'संज्ञायाम्' ग्रहण इसलिये है कि—कुटुम्बं बिभर्त्तीति कुटुम्बभारः ॥ यहां 'अण्' ही होता है ॥ ४६ ॥

गमश्च[3] ॥ ४७ ॥

संज्ञायामिति वर्त्तते । गमः । ५ । १ । च [अ०] ॥ संज्ञायां सत्यां 'गम' धातोः 'खच्' प्रत्ययो भवति ॥ सुतङ्गमः । कस्यचित् संज्ञेयम् ॥

पृथक्करणमुत्तरार्थम् ॥ ४७ ॥

यहां 'संज्ञायाम्' पद का अनुवर्त्तन है ॥ संज्ञा गम्यमान हो तो [गमः] 'गम' धातु से 'खच्' प्रत्यय होता है ॥

जैसे—सुतङ्गमः । यह किसी का नाम है । पृथक् सूत्र उत्तरार्थ है ॥ ४७ ॥

अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः[4] ॥ ४८ ॥

'गमः' इत्यनुवर्त्तते, संज्ञायामिति निवृत्तम् । [अन्ता० न्तेषु । ७ । ३ । डः । १ । १ ।] ॥

अन्त, अत्यन्त, अध्व, दूर, पार, सर्व, अनन्त इत्येतेषु कर्मसूपपदेषु 'गम' धातो 'डः' प्रत्ययो भवति ॥ अन्तगः । अत्यन्तगः । अध्वानं गच्छतीति अध्वगः । दूरगः । पारगः । सर्वगः । अनन्तगः । डित्करणं टिलोपार्थम् ॥

---

१. आ० सू०—१०६२ ॥

२. अन्तर्भावितण्यर्थत्वात् सकर्मकोऽयं भविष्यति, अरिं दमयतीत्यरिन्दमः ॥

३. आ० सू०—१०६३ ॥ ४. आ० सू०—१०६४ ॥

वा०—डप्रकरणे सर्वत्रपन्नयोरुपसंख्यानम्[1] ॥ १ ॥

सर्वत्र, पन्नेत्युपपदद्वयाद् 'गम' धातो 'ड:' प्रत्ययो भवति । सर्वत्र गच्छतीति सर्वत्रग: । पन्नग: ॥ १ ॥

वा०—उरसो लोपश्च[2] ॥ २ ॥

'उरस्' शब्दोपपदाद् गमधातो 'ड:' प्रत्यय:, उरस: सकारस्य लोप: । उरसा गच्छतीति उरग: ॥ २ ॥

वा०—सुदुरोरधिकरणे[3] ॥ ३ ॥

सु-दुरोरुपपदयो 'गम' धातो 'ड:' प्रत्यय: । सुष्ठु गच्छन्ति यस्मिन् सुग: । दु:खेन गच्छन्त्यस्मिन् दुर्ग: ॥ ३ ॥

वा०—निसो देशे[4] ॥ ४ ॥

निरुपपदाद् देशेऽधिकरणे वाच्ये 'गम' धातो 'ड:' प्रत्ययो भवति ॥ निर्गो देश: । निरन्तरं गच्छन्ति यस्मिन्निति विग्रह: ॥ ४ ॥

वा०—अपर आह—डप्रकरणेऽन्येष्वपि दृश्यते[5] ॥ ५ ॥

अन्येष्वप्युपपदेषु 'गम' धातो 'ड:' प्रत्ययो दृश्यत इति केषाञ्चिदाचार्य्याणां मतम् । स्त्र्यगारग: । ग्रामग: । गुरुतल्पग: ॥ ४८ ॥

यहां 'गम:' पद की अनुवृत्ति है और 'संज्ञायाम्' यह निवृत्त हो जाता है ॥

[अन्ता० न्तेषु] अन्त, अत्यन्त, अध्व, दूर, पार, सर्व, अनन्त ये कर्म उपपद हों तो 'गम' धातु से [ड:] 'ड' प्रत्यय होता है ॥

जैसे—**अन्तग:** । **अत्यन्तग:** । अध्वानं गच्छतीति **अध्वग:** । **दूरग:** । **पारग:** । **सर्वग:** । **अनन्तग:** । डित्करण टिलोप के लिये है ॥

वा०—डप्रकरणे०—सर्वत्र तथा पन्न ये दो उपपद हों तो 'गम' धातु से 'ड' प्रत्यय होता है ॥ जैसे—सर्वत्र गच्छतीति **सर्वत्रग:** । पन्नग: ॥ १ ॥

वा०—उरसो लोप०—उरस् शब्द उपपद हो तो 'गम' धातु से 'ड' प्रत्यय तथा उरस् के सकार का लोप होता है ॥ जैसे—उरसा गच्छतीति **उरग:** ॥ २ ॥

वा०—सुदुरोरधिकरणे—सु तथा दुर् उपपद हो तो 'गम' धातु से 'ड' प्रत्यय होता है ॥ जैसे—सुष्ठु गच्छन्ति यस्मिन् **सुग:** । दु:खेन गच्छन्त्यस्मिन् **दुर्ग:** ॥ ३ ॥

---

१. अ०—३ । २ । ४८ भा० ॥ आ० वा०—१०६५ ॥
२. अ०—३ । २ । ४८ भा० ॥ आ० वा०—१०६६ ॥
३. अ०—३ । २ । ४८ भा० ॥ आ० वा०—१०६७ ॥
४. अ०—३ । २ । ४८ भा० ॥ आ० वा०—१०६८ ॥
५. अ०—३ । २ । ४८ भा० ॥ आ० वा०—१०६९ ॥

वा०—निसो देशे—देश अधिकरण वाच्य हो तो निर् उपपद 'गम' धातु से 'ड' प्रत्यय होता है ॥ जैसे निरन्तरं गच्छन्त्यस्मिन्निति **निर्गो देशः** ॥ ४ ॥

वा०—अपर आह—डप्रकरणे०—अन्य उपपद होने पर भी किन्हीं आचार्यों के मत में 'ड' प्रत्यय देखा जाता है ॥ जैसे——**स्त्र्यगारगः । ग्रामगः । गुरुतल्पगः** ॥ ४८ ॥

आशिषि हनः[1] ॥ ४९ ॥

'ड' इत्यनुवर्त्तते । आशिषि । ७ । १ । हनः । ५ । १ ॥ आशीर्वचने गम्यमाने 'हन' धातोः कर्मण्युपपदे 'डः' प्रत्ययो भवति ॥

शत्रून् हन्तीति शत्रुहस्ते पुत्रो भूयात् । दुःखहस्त्वं भव ॥

'आशिषि' इति किम्—शत्रुघातः । अत्रोत्सर्गत्वादण् ॥

वा०—दारावाहनोऽण्यन्त्यस्य च टः संज्ञायाम्[2] *॥ १ ॥*

दारुशब्दोपपदादाङ्पूर्वाद् 'हन्' धातो 'अण्' प्रत्ययो हन-धातोरन्त्यस्य तकारस्य 'ट' इत्यादेशः संज्ञायां विषये ॥ दार्वाघाटस्ते वनस्पतीनाम्[3] **॥ १ ॥**

वा०—चारौ वा[4] *॥ १ ॥*

चारुशब्दोपपदाद् आङ्पूर्वाद् 'हन्' धातोः 'अण्' प्रत्ययोऽन्त्यस्य च विकल्पेन टकारादेशः संज्ञायामेव ॥ चार्वाघाटः । चार्वाघातः ॥ २ ॥

वा०—कर्मणि समि च[5] *॥ ३ ॥*

कर्मण्युपपदे संपूर्वाद् हन्तेः 'अण्' प्रत्ययोऽन्त्यस्य च विकल्पेन टकारादेशः ॥ वर्णसंघाटः । वर्णसंघातः । अपूर्वमेवेदं विधानं सूत्रात् ॥ ४९ ॥

यहां 'ड' पद का अनुवर्त्तन है ॥ [आशिषि] आशीः कहने में [**हनः**] 'हन' धातु से कर्म उपपद होने पर 'ड' प्रत्यय होता है ॥

जैसे—**शत्रून् हन्तीति शत्रुहस्ते पुत्रो भूयात् । दुःखहस्त्वं भव ॥**

'आशिषि' ग्रहण इसलिये है कि—शत्रुघातः । यहां उत्सर्ग 'अण्' ही होता है ॥

वा०—दारावाहनो०—संज्ञाविषय में दारु शब्द उपपद हो तो आङ्-पूर्वक 'हन' धातु से 'अण्' प्रत्यय तथा 'हन्' के अन्त्य तकार को 'टकार' आदेश होता है जैसे—**दार्वाघाटस्ते वनस्पतीनाम् ॥ १ ॥**

---

१. आ० सू०—१०७० ॥
२. अ०—३ । २ । ४९ भा० ॥ (ख) आ० वा०—१०७१ ॥
३. यजुः २४ । ३५ ॥
४. अ०—३ । २ । ४९ भा० ॥ (ख) आ० वा०—१०७२ ॥
५. अ०—३ । २ । ४९ भा० ॥ (ख) आ० वा०—१०७३ ॥

वा०—चारौ वा—संज्ञा विषय में चारु शब्द उपपद होने पर आङ्-पूर्वक 'हन्' धातु से 'अण्' प्रत्यय तथा अन्त्य को विकल्प से 'टकार' आदेश होता है ॥ जैसे—चार्वाघाटः । चार्वाघातः ॥ २ ॥

वा०—कर्मणि समि च—कर्म उपपद हो तो संपूर्वक 'हन्' धातु से 'अण्' प्रत्यय तथा अन्त्य को विकल्प से टकार आदेश होता है ॥ जैसे—वर्णसंघाटः । वर्णसंघातः । यह वार्त्तिक सूत्र से विशेष विधान करता है ॥ ४९ ॥

अपे क्लेशतमसोः[1] ॥ ५० ॥

अनाशीर्वादार्थोयऽमारम्भः 'डः' इत्यनुवर्त्तते, 'हनः' इति च ॥ अपे । ७ । १ । क्लेशतमसोः । ७ । २ ॥ क्लेशतमसोः कर्मोपपदयोरपपूर्वाद् 'हन्' धातो 'डः' प्रत्ययो भवति ॥ क्लेशमपहन्तीति क्लेशापहः पुत्रः । तमोऽपहः[2] सूर्य्यः ॥ ५० ॥

यह सूत्र आशीर्वाद से भिन्न विषय के लिये है । यहां 'ड' तथा 'हन्' पद का अनुवर्त्तन है ॥

[क्लेशतमसोः] क्लेश, तम ये कर्म उपपद हों तो [अपे] अपपूर्वक 'हन' धातु से 'ड' प्रत्यय होता है ॥

जैसे—क्लेशमपहन्तीति क्लेशापहः पुत्रः । तमोऽपहः सूर्य्यः ॥ ५० ॥

कुमारशीर्षयोर्णिनिः[3] ॥ ५१ ॥

'हनः' इत्यनुवर्त्तते, 'डः' इति निवृत्तम् ॥ कुमारशीर्षयोः । ७ । २ । णिनिः । [१ । १ ।] ॥ कुमारशीर्षयोः कर्मणोरुपपदयो 'हन' धातो 'णिनिः' प्रत्ययो भवति ॥ कुमारं हन्तीति कुमारघाती । शीर्षघाती[4] । अन्त्य इकारो नकाररक्षणार्थः ॥ ५१ ॥

यहां 'हन्' पद का अनुवर्त्तन है और 'ड' का निवर्त्तन है ॥

[कुमारशीर्षयोः] कुमार तथा शीर्ष ये दो कर्म उपपद हों तो 'हन' धातु से [णिनिः] 'णिनि' प्रत्यय होता है ॥

जैसे—कुमारं हन्तीति कुमारघाती । शीर्षघाती । अन्त में इकार नकार की रक्षा के लिये किया है ॥ ५१ ॥

---

१. आ० सू०—१०७४ ॥

२. भयापहः—कफापहः—इत्यादयस्तु **'अन्येष्वपि दृश्यते'** (अ० ३ । २ । १०१) इति डप्रत्यये सिध्यन्ति ॥

३. आ० सू०—१०७५ ॥

४. **'सुप्यजातौ णिनि०'** (अ० ३ । २ । ७८) इति णिनिना सिद्धेऽपि पुनर्वचनं ताच्छील्यआवश्यक-अधमर्ण्याद्यर्थैर्विनाऽपि णिनिर्यथा स्यात् । शीर्षघातीत्यत्र शिरसः शीर्षभावनिपातनार्थञ्च, अन्यथा **'शीर्षश्छन्दसि'** (अ० ६ । १ । ६०) इति वचनात् 'शीर्षघाती' छन्दस्येव स्यात्—पृथ्र भाषायामपि ॥

लक्षणे जायापत्योष्टक्:[1] ॥ ५२ ॥

'हनः' इत्यनुवर्त्तते । लक्षणे । ७ । १ । जायापत्योः । ७ । २ । टक् । १ । १ ॥ लक्षणं चिह्नमस्यास्तीति लक्षणस्तस्मिन्[2] ॥ जायापत्योः कर्मणोरुपपदयो 'हंन' धातोर्लक्षणवति कर्त्तरि वाच्ये 'टक्' प्रत्ययो भवति ॥ जायाघ्नो ब्राह्मणः । पतिघ्नी वृषली । हननहेतुचिह्नवान् ब्राह्मणः, चिह्नवती च वृषली । टकः कित्त्वादुपधालोपः[3] ॥ ५२ ॥

यहां 'हनः' पद का अनुवर्त्तन है ॥ लक्षणे लक्षण अर्थात् चिह्न है जिसमें वह लक्षण कहाता है ॥

[लक्षणे] लक्षणवान् कर्त्ता अभिधेय हो तो [जायापत्योः] जाया तथा पति ये कर्म उपपद हों तो 'हन्' धातु से [टक्] 'टक्' प्रत्यय होता है ॥

जैसे—जायाघ्नो ब्राह्मणः । पतिघ्नी वृषली अर्थात् हनन चिह्न वाला ब्राह्मण तथा वृषली है ॥ 'टक्' प्रत्यय में कित् उपधा लोप के लिये है ॥ ५२ ॥

अमनुष्यकर्तृके च[4] ॥ ५३ ॥

'टक्' इत्यनुवर्त्तते । अमनुष्यकर्तृके । ७ । १ । च [अ०] ॥

मनुष्यभिन्ने कर्त्तर्य्यभिधेये कर्मण्युपपदे 'हन्' धातोः 'टक्' प्रत्ययो भवति ॥

जायाघ्नस्तिलकालकः । पतिघ्नी पाणिरेखा । श्लेष्मघ्नी बीजमती[5] । पित्तघ्नं घृतम् । शशघ्नी शकुनी[6] ॥

'अमनुष्य [कर्तृके]' इति किम्—नकुलघातो वृषलः ॥ इह कस्मान्न 'टक्' भवति, नगरघातो हस्ती, अत्र **'कृत्यल्युटो बहुलम्'**[7] इति बहुलग्रहणात् कृद्वचत्ययेन 'अण्' प्रत्ययः ॥ ५३ ॥

यहां 'टक्' पद का अनुवर्त्तन है ॥ [अमनुष्यकर्तृके] मनुष्यभिन्न कर्त्ता अभिधेय हो तो कर्म उपपद होने पर 'हन' धातु से 'टक्' प्रत्यय होता है ॥

जैसे—जायाघ्नस्तिलकालकः । पतिघ्नी पाणिरेखा । श्लेष्मघ्नी बीजमती । पित्तघ्नं घृतम् । शशघ्नी शकुनी ॥

'अमनुष्यकर्तृके' ग्रहण इसलिये है कि—नकुलघातो वृषलः ॥

(प्र०) नगरघातो हस्ती इस उदाहरण में 'टक्' क्यों नहीं होता ?

---

१. आ० सू०—१०७६ ॥
२. अत्राऽर्शादि (अ० ५ । २ । १२७) त्वान्मतुवर्थेऽच् ॥
३. अ०—६ । ४ । ९८ ॥ ४. आ० सू०—१०७७ ॥
५. यवादेराकृतिगणत्वाद् वत्वं न ॥
६. शत्रुघ्नः, कृतघ्नः, प्रलम्बघ्नः इत्यादयस्तु मूलविभुजादिषु द्रष्टव्याः, बाहुलकाद्वा टक् ॥
७. अ०—३ । ३ । ११३ ॥

(उ०) 'कृत्यल्युटो बहुलम्' इस सूत्र में बहुल ग्रहण होने के कारण कृत्-प्रत्ययों के व्यत्यय होने से यहां 'अण्' हो गया है ॥ ५३ ॥

शक्तौ हस्तिकपाटयोः'॥ ५४ ॥

'हनः, टक्' इत्यनुवर्त्तते । शक्तौ । ७ । १ । हस्तिकपाटयोः । ७ । २ । शक्ति-शब्दे मत्वर्थो गम्यते ॥ हस्तिकपाटयोः कर्मणोरुपपदयोः शक्तिमति कर्त्तरि वाच्ये 'हन्' धातोः 'टक्' प्रत्ययो भवति ॥ हस्तिघ्नो राजपुत्रः । हस्तिनं हन्तुं समर्थ इत्यर्थः । कपाटघ्नश्चौरः । कपाटौ हन्तुं समर्थः ॥

'शक्तौ' इति किम्—विषेण शत्रुं हन्ति—शत्रुघातः ॥ ५४ ॥

यहां 'हनः' तथा 'टक्' पद का अनुवर्त्तन है ॥ शक्तौ शब्द में मत्वर्थ अर्थात् शक्तिवाला ऐसा समझना चाहिये ॥

[हस्तिकपाटयोः] हस्तिन् और कपाट ये दो कर्म उपपद होने पर [शक्तौ] शक्ति-वाला कर्त्ता कहना हो तो 'हन' धातु से 'टक्' प्रत्यय होता है ॥

जैसे—हस्तिघ्नो राजपुत्रः । अर्थात् हाथी को मारने में समर्थ है ॥ कपाटघ्नश्चौरः । अर्थात् कपाट तोड़ने की शक्तिवाला है ॥

'शक्तौ' ग्रहण इसलिये है कि—विषेण शत्रुं हन्ति शत्रुघातः, यहां अण् ही होता है ॥५४॥

पाणिघताडघौ शिल्पिनि[2] ॥ ५५ ॥

पाणिघताडघौ । १ । २ । शिल्पिनि । ७ । १ ॥ पाणिघताडघौ शब्दौ शिल्पिनि कर्त्तरि वाच्ये टक्-प्रत्ययान्तौ निपात्येते ॥ पाणि, ताड इति शब्दद्वयोपपदाद् 'हन्' धातोः 'टक्' प्रत्यये टिलोपो घकारादेशश्च निपात्यते ॥ पाणिघः शिल्पी । ताडघः शिल्पी ॥

'शिल्पिनि' इति किम्—पाणिघातः । ताडघातः ॥

वा०—राजघ उपसंख्यानम्[3] ॥ १ ॥

राजानं हन्तीति राजघः । अत्रापि पूर्ववन्निपात्यते ॥ ५५ ॥

[पाणिघ ताडघौ] पाणिघ और ताडघ ये दोनों शब्द [शिल्पिनि] शिल्पी कर्त्ता अभिधेय हो तो 'टक्' प्रत्ययान्त निपातन हैं ॥

पाणि, ताड इन दो शब्दों के उपपद होने पर 'हन्' धातु से 'टक्' प्रत्यय परे रहते टिलोप तथा घकार आदेश निपातन से होते हैं ॥

जैसे—पाणिघः शिल्पी । ताडघः शिल्पी ॥

---

१. आ० सू०—१०७८ ॥ (ख) मनुष्यकर्तृकार्थ आरम्भः ॥

२. आ० सू०—१०७९ ॥

३. आ०—३ । २ । ५५ भा० ॥ (ख) आ० वा०—१०८० ॥

'शिल्पिनि' ग्रहण इसलिये है कि—पाणिघातः । ताडघातः । यहां 'अण्' हो जाता है ॥

वा०—राजघ उपसंख्यानम्—'राजघ' शब्द का भी निपातन होता है ऐसा कहना चाहिये । जैसे—राजानं हन्तीति राजघः । यहां पर निपातन पूर्ववत् है ॥ ५५ ॥

आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्[1] ॥ ५६ ॥

आढ्य० प्रियेषु । ७ । ३ । च्व्यर्थेषु । ७ । ३ । अच्वौ । ७ । १ । कृञः ५ । १ । करणे । ७ । १ । ख्युन् । १ । १ ॥ आढ्य, सुभग, स्थूल, पलित, नग्न, अन्ध, प्रिय इत्येतेषु च्व्यर्थे वर्त्तमानेषु अच्व्यन्तेषूपपदेषु करणकारके 'कृञ्' धातोः 'ख्युन्' प्रत्ययो भवति ॥ अनाढ्यमाढ्यं कुर्वन्त्यनेन—आढ्यंकरणम्[2] । सुभगंकरणम् । स्थूलंकरणम् । पलितंकरणम् । नग्नंकरणम् । अन्धंकरणम् । प्रियंकरणम् ॥

'च्व्यर्थेषु' इति किम्—तैलेनाढ्यं करोति शरीरम् ॥ 'अच्वौ[3]' इति किम्—आढ्यी करोत्यनेन । 'करणे' इति किम्—विद्याढ्यकारः । पूर्वयोः प्रत्युदाहरणयोर्वाक्यमेव भवति । कर्त्तरि च 'अण्' प्रत्ययः ॥ ५६ ॥

[**आढ्य० प्रियेषु**] आढ्य, सुभग, स्थूल, पलित, नग्न, अन्ध, प्रिय ये [**च्व्यर्थेषु**] च्व्यर्थ में वर्त्तमान [**अच्वौ**] अच्व्यन्त उपपद हों तो [**करणे**] करणकारक में [**कृञः**] 'कृञ्' धातु से [**ख्युन्**] 'ख्युन्' प्रत्यय होता है ॥

जैसे—अनाढ्यमाढ्यं कुर्वन्त्यनेन आढ्यंकरणम् । सुभगंकरणम् । स्थूलंकरणम् । पलितंकरणम् । नग्नंकरणम् । अन्धंकरणम् । प्रियंकरणम् ॥

'च्व्यर्थेषु' ग्रहण इसलिये है कि—तैलेनाढ्यं करोति शरीरम् ॥

'अच्वौ' ग्रहण इसलिये है कि—आढ्यी करोत्यनेन ॥

'करणे' ग्रहण इसलिये है कि—विद्याढ्यकारः । प्रथम दो प्रत्युदाहरणों में वाक्य ही होता है, अन्तिम प्रत्युदाहरण में कर्त्ता में 'अण्' होता है ॥ ५६ ॥

कर्त्तरि भुवः खिष्णुच्खुकञौ[4] ॥ ५७ ॥

'आढ्याद्यच्वौ' इति पर्य्यन्तं सूत्रमनुवर्त्तते ॥ कर्त्तरि । ७ । १ । भुवः । ५ । १ । खिष्णुच्खुकञौ । १ । २ ॥ अच्व्यन्तेषु च्व्यर्थे वर्त्तमानेष्वा[ढ्या]द्युपपदेषु सत्सु कर्त्तरि

---

१. आ० सू०—१०८१ ॥

२. **उपपदविधौ भयाढ्यादिग्रहणं प्रयोजनं—भयङ्करः । अभयङ्करः । आढ्यंकरणम् । स्वाढ्यंकरणम्** (भा०—१ । १ । ७२) ॥

३. यत्त्वत्र **जयादित्येनोक्तम्**—'तेन ल्युटोऽप्ययमर्थतः प्रतिषेधः' इत्यादि तद्भाष्यास्वारस्यादुत्तरार्थमेव च्विप्रतिषेध इति कृत्वोपेक्षणीयम् ॥

४. आ० सू०—१०८२ ॥

कारके 'भू' धातोः खिष्णुच्-खुकञौ प्रत्ययौ भवतः ॥ अनाढ्य आढ्यो भवति आढ्यं-भविष्णुः । आढ्यंभावुकः । सुभगंभविष्णुः । सुभगंभावुकः । स्थूलंभविष्णुः । स्थूल-भावुकः । पलितंभविष्णुः । पलितंभावुकः । नग्नंभविष्णुः । नग्नंभावुकः । अन्धं-भविष्णुः । अन्धंभावुकः । प्रियंभविष्णुः । प्रियंभावुकः ॥ खित्करणात् सर्वत्र 'मुम्' आगमः । ञित्करणाच्च वृद्धिः ॥

कारिका—

इष्णुच इकारादित्वमुदात्तत्वात्कृतं भुवः[1] ।
नञस्तु स्वरमिद्ध्यर्थमिकारादित्वमिष्णुचः ॥ १ ॥

खिष्णुच्प्रत्यये खकारविशिष्ट इकारः किमर्थं प्रतिपाद्यत इति विचार्य्यते । इष्णुच्-प्रत्ययस्येकारादित्वं किमर्थम् ? । **भुवो** भू—धातोरुदात्तत्वात् सेट्त्वाद् भविष्णुरिति रूपं सिद्धम् । ष्णुच् प्रत्यये वलादित्वाद् 'इड्' भविष्यति । पुनरिष्णुच्प्रत्ययस्येकारादित्वं **'कृत्योकेष्णुच्चार्वादयश्च[2]'** इति नञ उत्तरस्येष्णुच्प्रत्ययान्तस्यान्तोदात्तत्वं यथा स्यात् ॥ ५७ ॥

यहां 'आढ्य० च्वौ' तक पूर्वसूत्र का अनुवर्त्तन है ॥ च्व्यर्थ में वर्त्तमान अच्व्यन्त आढ्यादि उपपद हों तो [कर्त्तरि] कर्त्ता कारक में [भुवः] 'भू' धातु से [खिष्णुच्-खुकञौ] 'खिष्णुच्' और 'खुकञ्' प्रत्यय होते हैं ॥

जैसे—अनाढ्य आढ्यो भवति आढ्यंभविष्णुः । आढ्यंभावुकः । सुभगंभविष्णुः । सुभगंभावुकः । स्थूलंभविष्णुः । स्थूलंभावुकः । पलितंभविष्णुः । पलितंभावुकः । नग्नं-भविष्णुः । नग्नंभावुकः । अन्धंभविष्णुः । अन्धंभावुकः । प्रियंभविष्णुः । प्रियंभावुकः ॥ यहां प्रत्यय के कित् होने से सर्वत्र 'मुम्' का आगम तथा ञित् होने से वृद्धि होती है ॥

का०—इष्णुच इकारादित्वम्०—'खिष्णुच्' प्रत्यय में खकार से युक्त इकार क्यों कहा गया है इस विषय में विचारते हैं—

'इष्णुच्' प्रत्यय को इकारादि क्यों पढ़ा ? जब कि भू-धातु के उदात्त अर्थात् सेट् होने से भविष्णु रूप सिद्ध है, कैसे ? 'ष्णुच्' प्रत्यय के वलादि होने से 'इट्' हो ही जायगा । पुनः इष्णुच् प्रत्यय को इकारादि इसलिये पढ़ा है कि—'कृत्योकेष्णुच्चार्वादयश्च' इस सूत्र से नञ् से परे इष्णुच् प्रत्ययान्त को अन्तोदात्त हो जावे ॥ ५७ ॥

स्पृशोऽनुदके क्विन्[3] ॥ ५८ ॥

स्पृशः । ५ । १ । अनुदके । ७ । १ । क्विन् । १ । १ ॥ अनुदके = उदकभिन्ने कर्मण्युपपदे 'स्पृश' धातोः 'क्विन्' प्रत्ययो भवति ॥ घृतं स्पृशती[ति]घृतस्पृक् । तैलस्पृक् । जलस्पृक् ॥

---

१. अ०—३ । २ । ५७ भा० ॥ २. अ०—६ । २ । १६० ॥
३. आ० सू०—१०८३ ॥

'अनुदके' इति किम्—उदकस्पर्शः । नकारोऽनुबन्धः **'क्विन्प्रत्ययस्य कुः'**[1] इति विशेषणार्थः ॥ ५८ ॥

[अनुदके] उदकभिन्न कर्म उपपद हो तो [स्पृशः] 'स्पृश' धातु से [क्विन्] 'क्विन्' प्रत्यय होता है ॥

जैसे—घृतं स्पृशतीति घृतस्पृक् । तैलस्पृक् । जलस्पृक् ॥

'अनुदके' ग्रहण इसलिये है कि —उदकस्पर्शः यहां 'अण्' हो जाता है ॥

नकार का अनुबन्ध 'क्विन्प्रत्ययस्य कुः' इस सूत्र में विशेषण के लिये है ॥ ५८ ॥

ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च[2] ॥ ५९ ॥

'क्विन्' इत्यनुवर्त्तते । ऋत्विग्दधृक्स्रग्दिगुष्णिक् । १ । १ । अञ्चुयुजिक्रुञ्चाम् । ६ । ३ । च [अ०] । ऋत्विगादीनां समाहारद्वन्द्वः ॥ ऋत्विगादय उष्णिक्पर्य्यन्ताः शब्दाः 'क्विन्' प्रत्ययान्ता निपात्यन्ते । अञ्चु, युजि, क्रुञ्च इत्येतेभ्यो धातुभ्यः 'क्विन्' प्रत्ययो भवति ॥ अधिकरण ऋतुशब्द उपपदे 'यज' धातोः 'क्विन्' निपात्यते । ऋतौ यजतीति ऋत्विक् । भा०—**धृषेर्द्विर्वचनमन्तोदात्तत्वञ्च निपात्यते**[3] ॥ धृष्णोतीति दधृक् । स्रक् 'सृज' धातोः कर्मणि 'क्विन्' 'अम्' आगमश्च निपात्यते, सृजन्ति यां सा स्रक् । **'दिश अतिसर्जने'**[4] इत्यस्मादपि कर्मणि क्विन्निपात्यते, दिशन्ति यां सा दिक् । उत्पूर्वात् 'स्निह' धातोः 'क्विन्', उपसर्गस्यान्त्यलोपः षत्वञ्च निपात्यते उष्णिक् । अञ्च्वादिभ्यः 'क्विन्' विधीयते प्राञ्चतीति प्राङ्, प्राञ्चौ, प्राञ्चः । प्रत्यङ् । उदङ् । 'युज' धातोः केवलादेव 'क्विन्' । कुतः ? वक्ष्यमाणसूत्रे सोपपदात् क्विपो विहितत्वात् । युनक्तीति युङ्, युञ्जौ, युञ्जः । अत्र **'युजेरसमासे'**[5] इति 'नुम्' आगमः । क्रुञ्चतीति क्रुङ्, क्रुञ्चौ क्रुञ्चः । अत्र निपातनसाहचर्यादनुनासिकलोपो[6] न भवति ॥ ५९ ॥

यहां 'क्विन्' इस पद का अनुवर्त्तन है । ऋत्विगादि में समाहारद्वन्द्व समास है ॥

[ऋत्वि० उष्णिक्] ऋत्विगादि उष्णिक् पर्य्यन्त शब्द 'क्विन्' प्रत्ययान्त निपातन हैं, तथा [अञ्चु-युजि-क्रुञ्चाम्] अञ्चु, युजि, क्रुञ्च इन धातुओं से 'क्विन्' प्रत्यय होता है ॥

जैसे—ऋत्विक्—अधिकरणवाची ऋतु शब्द उपपद हो तो 'यज' धातु से 'क्विन्' प्रत्यय होता है ॥ ऋतौ यजतीति ऋत्विक् ॥ भा०—धृषेर्द्विर्वचन—'धृष' को 'क्विन्' प्रत्यय परे

---

१. अ०—८ । २ । ६२ ॥ २. आ० सू०—१०८४ ॥
३. अ०—३ । २ । ५९ भा० ॥ ४. धा०—तुदा०—३ ॥
५. अ०—७ । १ । ७१ ॥
६. नकारोपधपक्षे समाधानमिदम् । अकारोपधपक्षे तु—अनुनासिकलोपस्य प्राप्तिरेव नास्ति, यत्तु 'चोः कुः' (अ० ८ । २ । ३०) इति कुत्वं प्राप्नोति तत् **'सञ्जि झलि'** (भा० ८ । २ । २२) इति वचनात्, **'युजिक्रुञ्चाञ्च'** इति निपातनाद्वा न भवति ॥

द्विर्वचन तथा अन्तोदात्तत्व निपातन है। धृष्णोतीति दधक् ।। स्रक्—'सृज' धातु से कर्मकारक में 'क्विन्' प्रत्यय और 'अम्' का आगम निपातन है सृजन्ति यां सा स्रक् ।। 'दिश अतिसर्जने' इससे भी कर्म में 'क्विन्' निपातन है। जैसे—दिशन्ति यां सा दिक् ।। उत्-पूर्वक 'स्निह' धातु से 'क्विन्' प्रत्यय तथा उपसर्ग के अन्त्य का लोप और षत्व निपातन है ।। जैसे—उष्णिक् ।। अञ्चु आदि धातुओं से 'क्विन्' प्रत्यय होता है। जैसे प्राङ्, प्राञ्चौ, प्राञ्चः। प्रत्यङ् उदङ् ।। यहां शुद्ध 'युज' धातु से 'क्विन्' प्रत्यय होता है, क्योंकि अगले 'सत्सूद्विष०' इस सूत्र में सोपपद से 'क्विप्' कहा है जैसे—युनक्तीति युङ्, युञ्जौ, युञ्जः। यहां 'युजेरसमासे' इससे 'नुम्' का आगम हो जाता है ।। क्रुञ्चतीति क्रुङ्, क्रुञ्चौ, क्रुञ्चः। यहां 'क्रुञ्चाम्' इस निपातन के साहचर्य्य से ही अनुनासिक लोप नहीं होता ।। ५९ ।।

त्यदादिषु दृशोऽनालोचने कञ्च[1] ।। ६० ।।

'क्विन्' अप्यनुवर्त्तते। त्यदादिषु। ७। ३। [दृशः। ५। १]। अनालोचने। ७। १। कञ्। १। १। च [अ०]।। आलोचनं दर्शनं तत्प्रतिषेधस्तस्मिन् ।।

त्यदादिशब्देषूपपदेषु सत्स्वनालोचने वर्त्तमानाद् 'दृश' धातोः 'कञ्' प्रत्ययो भवति चकारात् क्विप्श्च ।। त्यादृक् । [त्यादृशः। तादृक्] तादृशः। यादृक्। यादृशः। अत्र 'आ सर्वनाम्नः'[2] इति पूर्वपदस्याकारादेशः। कञ्प्रत्यये ञकारोऽनुबन्धः 'कृञ्क्वरपः'[3] इति ङीब्विधानार्थः। त्यादृशी। तादृशी। यादृशी ।।

'अनालोचने' इति किम्—तं पश्यतीति तद्दर्शः। अत्रोत्सर्गत्वादण् ।।

वा०—दृशेः समानान्ययोश्चोपसंख्यानम्[4] ।। १ ।।

समान, अन्य इत्येतयोरुपपदयो 'दृश' धातोः क्विन्-कञौ भवतोऽनालोचन एव ।। सदृक्। सदृशः। अन्यादृक्। अन्यादृशः ।। समानशब्दस्य सकारादेशः[5]। अन्यशब्दस्याकारश्च। समानान्यौ त्यदादिषु न स्त इत्यप्राप्तौ विधीयेते ।। ६० ।।

यहां 'क्विन्' पद का अनुवर्त्तन है। आलोचन=देखने को कहते हैं। उस के विपरीत अनालोचन अर्थात् जब देखने का विषय न हो ।।

[त्यदादिषु] त्यदादि शब्द उपपद हों तो [अनालोचने] अनालोचन अर्थ में वर्त्तमान [दृशः] 'दृश' धातु से 'कञ्' प्रत्यय होता है [च] और 'क्विन्' भी होता है ।।

जैसे—त्यादृक्। त्यादृशः। तादृक्। तादृशः। यादृक्। यादृशः। यहां 'आ सर्वनाम्नः' इससे पूर्वपद को आकार आदेश होता है। 'कञ्' प्रत्यय में ञकार का अनुबन्ध 'कृञ्क्वरपः' इससे 'ङीप' विधान करने के लिये है। जैसे—त्यादृशी। तादृशी। यादृशी ।।

---

१. आ० सू०—१०८५ ।। २. अ०—६। ३। ९१ ।।
३. अ०—४। १। १५ ।।
४. अ०—३। २। ६० भा० ।। (ख) आ० वा०—१०८६ ।।
५. अ०—६। ३। ८८ ।।

'अनालोचने' ग्रहण इसलिये है कि—तं पश्यतीति तद्दर्शः। यहां उत्सर्ग 'अण्' हो जाता है ॥

वा०—दृशेः समानान्ययो०—समान, अन्य ये उपपद हों तो अनालोचन अर्थ में वर्त्तमान 'दृश' धातु से 'क्विन्' और 'कञ्' प्रत्यय होते हैं ॥ जैसे—सदृक्। सदृशः। अन्यादृक्। अन्यादृशः। समान शब्द को सकार आदेश होता है। और अन्य शब्द को आकार आदेश हो जाता है। समान-अन्य शब्द त्यदादि में नहीं है इस कारण वार्त्तिक ने अप्राप्त विधान किया ॥ ६० ॥

सत्सूद्विषद्रुहदुहयुजविदभिदछिदजिनीराजामुपसर्गेऽपि-क्विप्[1] ॥ ६१ ॥

सत्सू० राजाम्। ६। ३। उपसर्गे। ७। १। अपि [अ०]। क्विप्। १। १ ॥

सद्, सू, द्विष, द्रुह, दुह, युज, विद, भिद, छिद, जि, नी, राज् इत्येतेभ्यः सोपसर्गेभ्यो निरुपसर्गेभ्यश्च धातुभ्यः सुप्युपपदे 'क्विप्' प्रत्ययो भवति ॥

वा०—सदादिषु सुग्ग्रहणम्[2] ॥ १ ॥

अस्यैतत्प्रयोजनम्—अत्र 'सुप्' ग्रहणमुपसर्गेऽपीति च क्रियते। तेनैतज्ज्ञाप्यते **'अन्यत्र सुप्ग्रहण उपसर्गग्रहणं न भवति'**[3]। **'वदः सुपि क्यप् च'**[4] इत्यनुपसर्गस्यानुवृत्तिर्न कर्त्तव्या भवति ॥

होता वेदिषत्, वेद्यां सीदतीति। अतिथिर्दुरोणसत्। प्रसत्। निषत् ॥ वत्सं सूतेऽसौ वत्ससूर्गौः। पुत्रसूर्ब्राह्मणी। प्रसूः। उपसूः ॥ मधु द्वेष्टीति मधुद्विट्। कैटभद्विट्। प्रद्विट् ॥ द्रुह—सुरान् द्रुह्यतीति सुरध्रुक्। प्रध्रुक् ॥ दुह—गां दोग्धीति गोधुक्, गोदुहौ, गोदुहः। उपधुक् ॥ युज—अश्वं युनक्तीति अश्वयुक्। अश्वयुजौ। अश्वयुजः ॥ विद—वेदान् वेत्तीति वेदवित्। धर्मवित्। संवित् ॥ भिद्—काष्ठं भिनत्तीति काष्ठभित्। अपभित् ॥ छिद—वृक्षं छिनत्तीति वृक्षच्छित्। विच्छित् ॥ जि—इन्द्रियाणि जयतीति इन्द्रियजित्। क्रोधजित्। पराजित् ॥ नी—अग्रं नयतीति अग्रणीः। सेनानीः। प्रणीः। उन्नीः ॥ राज्—विश्वं राजयतीति विश्वराट्। राजृधातोरकर्मकत्वाण्ण्यर्थोऽत्र गम्यते। विराट्। सम्राट्। अत्र **'मो राजि समः क्वौ'**[5] इति मकारस्य मकारादेशः ॥ ६१ ॥

[सत्सू० राजाम्] सद्, सू, द्विष, द्रुह, दुह, युज, विद, भिद, छिद, जि, नी, राज् इन धातुओं से [उपसर्गेऽपि] उपसर्ग वा अनुपसर्ग सुबन्त उपपद हो तो [क्विप्] 'क्विप्' प्रत्यय होता है ॥

वा०—सदादिषु०—इसका यह प्रयोजन है कि-इस सूत्र में सुप्-ग्रहण तथा 'उपसर्गेऽपि' यह भी पढ़ा है, उससे यह जाना जाता है कि—**'अन्य सूत्रों में सुप् के ग्रहण से उपसर्ग का ग्रहण**

१. आ० सू०—१०८७ ॥
२. अ०—३। २। ६१। भा० ॥
३. अ०—३। २। ६१ भा० ॥
४. अ०—३। १। १०६ ॥
५. अ०—८। ३। २५ ॥

नहीं होता' अतः 'वदः सुपि क्यप् च' इस सूत्र में 'अनुपसर्गस्य' इस पद की अनुवृत्ति नहीं करनी पड़ती ॥

जैसे—होता वेदिषत् वेद्यां सीदतीति । अतिथिर्दुरोणसत् । प्रसत् । निषत् ॥ सू—वत्सं सूतेऽसौ वत्ससूर्गौः । पुत्रसूर्ब्राह्मणी । प्रसूः । उपसूः ॥ द्विष—मधु द्वेष्टीति मधुद्विट् । कैटभद्विट् । प्रद्विट् ॥ द्रुह—सुरान् द्रुह्यतीति सुरध्रुक् । प्रध्रुक् ॥ दुह—गां दोग्धीति गोधुक्, गौदुहौ, गोदुहः । उपधुक् ॥ युज—अश्वं युनक्तीति अश्वयुक्, अश्वयुजौ, अश्वयुजः ॥ विद—वेदान् वेत्तीति वेदवित् । धर्मवित् । संवित् । भिद—काष्ठं भिनत्तीति काष्ठभित् । अपभित् ॥ छिद—वृक्षं छिनत्तीति वृक्षच्छित् । विच्छित् ॥ जि—इन्द्रियाणि जयतीति इन्द्रियजित् । क्रोधजित् । पराजित् ॥ नी— अग्रं नयतीति अग्रणीः । सेनानीः । प्रणीः । उन्नीः । राजृ–विश्वं राजयतीति विश्वराट् । 'राजृ' धातु के अकर्मक होने से यहां ण्यर्थ समझना चाहिये ॥ विराट् । सम्राट् । यहां 'मो राजि समः क्वौ' इस सूत्र से मकार को 'मकार' आदेश होता है ॥ ६१ ॥

भजो ण्विः[1] ॥ ६२ ॥

उपसर्गे-सुपीत्यनुवर्त्तते ॥ [भजः । ५ । १ । ण्विः । १ । १] सोपसर्गनिरुपसर्गाद् 'भज' धातोः सुबन्त उपपदे 'ण्विः' प्रत्ययो भवति ॥

दायं भजते दायभाक् । अंशभाक् । प्रभाक् । विभाक् ॥ ६२ ॥

यहां 'उपसर्गे' तथा 'सुपि' पद का अनुवर्त्तन है ॥ उपसर्ग वा अनुपसर्ग सुबन्त उपपद हो तो [भजः] 'भज' धातु से [ण्विः] 'ण्वि' प्रत्यय होता है ॥

जैसे—दायं भजते दायभाक् । अंशभाक् । प्रभाक् । विभाक् ॥ ६२ ॥

छन्दसि सहः[2] ॥ ६३ ॥

'ण्विः' इत्यनुवर्त्तते । छन्दसि । ७ । १ । सहः । ५ । १ ॥

सुबन्त उपपदे वेदविषये 'सह' धातोः 'ण्विः' प्रत्ययो भवति ॥

तुराषाट्[3] । अत्र 'सहेः साडः सः'[4] इति मूर्द्धन्यादेशः । 'अन्येषामपि दृश्यते'[5] इति तुराशब्दे दीर्घत्वम् । इतोऽग्रे 'जनसन०'[6] इति पर्य्यन्तं 'छन्दसि' ग्रहणमनुवर्त्तिष्यते ॥ ६३ ॥

यहां 'ण्विः' पद का अनुवर्त्तन है ॥ [छन्दसि] वेदविषय में सुबन्त उपपद हो तो [सहः] 'सह' धातु से 'ण्वि' प्रत्यय होता है ॥ जैसे—तुराषाट् यहां 'सहेः साडः सः' इस सूत्र से मूर्द्धन्य आदेश हो जाता है और तुरा-शब्द में दीर्घत्व 'अन्येषामपि दृश्यते' इससे हो जाता है ॥ यहां से आगे 'छन्दसि' पद का अनुवर्त्तन 'जनसनखन०' इस सूत्र तक है ॥ ६३ ॥

---

१. आ० सू०—१०८८ ॥ २. आ० सू०—१०८९ ॥
३. ऋ०—३ । ४८ । ४ ॥ ४. अ०—८ । ३ । ५६ ॥
५. अ०—६ । ३ । १३७ ॥ ६. अ०—३ । २ । ६७ ॥

वहश्च[1] ॥ ६४ ॥

'छन्दसि' इत्यनुवर्त्तते 'ण्विः' इति च । वहः । ५ । १ । च [अ०] ॥

सुप्युपपदे 'वह' धातोश्छन्दसि 'ण्विः' प्रत्ययो भवति ॥

हव्यवाहमुपब्रुवे[2] । अत्र हव्यवाडिति ण्यन्तस्तस्य द्वितीयैकवचनं प्रयुज्यते । एवं प्रष्ठवाट्[3], दित्यवाडित्यादि[4] ॥ ६४ ॥

यहां 'छन्दसि' पद का अनुवर्त्तन है 'ण्विः' पद का भी ॥ वेदविषय में सुबन्त उपपद होने पर [वहः] 'वह' धातु से 'ण्विः' प्रत्यय होता है ॥

जैसे—हव्यवाहमुपब्रुवे । यहां 'हव्यवाट्' यह ण्विप्रत्ययान्त के द्वितीयैकवचन का प्रयोग है, इसी प्रकार प्रष्ठवाट् । दित्यवाट् । इत्यादि में भी समझना चाहिये ॥ ६४ ॥

कव्यपुरीषपुरीष्येषु ञ्युट्[5] ॥ ६५ ॥

'वहः' इत्यनुवर्त्तते । कव्यपुरीषपुरीष्येषु । ७ । ३ । ञ्युट् । १ । १ ॥

कव्य, पुरीष, पुरीष्य इत्येतेषु सुबन्तेषूपपदेषु 'वह' धातो 'ञ्युट्' प्रत्ययो भवति छन्दसि = वेदविषये ॥

कव्यवाहनः[6] । पुरीषवाहनः[7] । पुरीष्यवाहनः[8] ॥ ६५ ॥

यहां 'वहः' इस पद का अनुवर्त्तन है ॥ वेदविषय में [कव्य० ष्येषु] कव्य, पुरीष, पुरीष्य ये सुबन्त उपपद हों तो 'वह' धातु से [ञ्युट्] 'ञ्युट्' प्रत्यय होता है ॥

जैसे—कव्यवाहनः । पुरीषवाहनः । पुरीष्यवाहनः ॥ ६५ ॥

हव्येऽनन्तः पादम्[9] ॥ ६६ ॥

'वहः' इति 'ञ्युट्' इति चानुवर्त्तते । हव्ये । ७ । १ । अनन्तःपादम् । १ । १ ॥ अन्तर्मध्ये पादस्येत्यन्तःपादं, न अन्तःपादमनन्तःपादम् ॥

हव्यसुबन्त उपपदेऽनन्तःपादं वर्त्तमानाद् 'वह' धातो 'ञ्युट्' प्रत्ययो भवति [छन्दसि = वेदविषये] ॥

दूतश्च हव्यवाहनः[10] ॥

'अनन्तःपादम्' इति किम् - हव्यवाहमुपब्रुवे[11] । अत्र वह-धातुरन्तःपादं तस्मात् 'वहश्च'[12] इति ण्विः ॥ ६६ ॥

---

१. आ० सू०—१०९० ॥
२. यजु०—२२ । १७ ॥
३. अनुपलब्धमूलमिदम् ॥
४. यजु०—१४ । १० ॥
५. आ० सू०—१०९१ ॥
६. यजु०—१९ । ६५ ॥
७. यजु०—११ । ४४ ॥
८. अनुपलब्धमूलमिदम् ॥
९. आ० सू०—१०९२ ॥
१०. ऋ०—६ । १६ । २३ ॥
११. यजु०—२२ । १७ ॥
१२. अ०—३ । २ । ६४ ॥

यहां 'वह' तथा 'ञ्युट्' पद का अनुवर्त्तन है ॥ पाद के अन्तर् अर्थात् मध्य में होने वाला 'अन्तःपादम्', इससे विपरीत 'अनन्तःपादम्' कहाता है ॥

छन्दसि वेदविषय में [हव्ये] हव्य सुबन्त उपपद हो तो [अनन्तःपादम्] जो पाद के मध्य में वर्त्तमान न हो उस 'वह' धातु से 'ञ्युट्' प्रत्यय होता है ॥

जैसे—**दूतश्च हव्यवाहनः** ।

'अनन्तःपादम्' ग्रहण इसलिये है कि—**हव्यवाहमुपब्रुवे** । यहां 'वह' धातु पाद के मध्य में है अतः **'वहश्च'** से 'ण्विः' प्रत्यय होता है ॥ ६६ ॥

जनसनखनक्रमगमो विट्[1] ॥ ६७ ॥

जन० गमः । ५ । १ ॥ विट् । १ । १ ॥ जनादीनां समाहारद्वन्द्वः ॥

जनादिभ्यो धातुभ्यः सुबन्त उपपदे छन्दसि=वेदविषये 'विट्' प्रत्ययो भवति ॥

उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेश[2], प्रथमं सृष्ट्यादौ जायते प्रादुर्भवतीति प्रथमजास्तम् ॥ गोषा इन्द्रो नृषा असि[3], गा इन्द्रियाणि सनोति ददातीति गोषाः । नॄन् सनोतीति नृषाः । अत्र **'सनोतेरनः'**[4] इति मूर्द्धन्यादेशः । कूपं खनतीति कूपखाः[5] । क्लेशखाः । दधि क्रामतीति दधिक्राः[6] । अग्रे गच्छतीति अग्रेगाः[7] । अत्र सर्वेषामनुनासिकान्तानां **'विट्वनोरनुनासिकस्यात्'**[8] इत्यनुनासिकस्याकारादेशः ॥६७॥

सूत्र में समाहारद्वन्द्व समास है ॥ [जन० गमः] जन, सन, खन, क्रम, गम इन धातुओं से सुबन्त उपपद हो तो वेदविषय में [विट्] 'विट्' प्रत्यय होता है ॥

जैसे—**उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेश** । प्रथम अर्थात् सृष्ट्यादि में जो उत्पन्न अर्थात् प्रकट होता है वह 'प्रथमजाः' कहाता है उसका यह 'प्रथमजाम्' द्वितीया का एक वचन है ॥ **'गोषा इन्द्रो नृषा असि'** गोषा उसका नाम है जो इन्द्रियों को शुभकर्म में प्रवृत्त करे ॥ जो मनुष्यों को दान दे उसे 'नृषाः' कहते हैं ॥ यहां **'सनोतेरनः'** इससे 'मूर्द्धन्य' आदेश होता है ॥ कूपं खनतीति **कूपखाः** । क्लेशखाः । दधि क्रामतीति **दधिक्राः** । अग्रे गच्छतीति **अग्रेगाः** । यहां सब अनुनासिकान्तों को **'विड्वनोरनुनासिकस्यात्'** इससे अनुनासिक को 'आकार' आदेश हो जाता है ॥ ६७ ॥

अदोऽनन्ने[9] ॥ ६८ ॥

छन्दसीति निवृत्तम् । अदः । ५ । १ । अनन्ने । ७ । १ ॥

---

१. आ० सू०—१०९३ ॥
२. यजु०—३२ । ११ ॥
३. सा०—उ० ४ । ३ । ९ ॥
४. अ०—८ । ३ । १०८ ॥
५. अनुपलब्धमूलमिदम् ॥
६. ऋ० ४ । ३८ । ९ ॥
७. यजु०—२७ । ३१ ॥
८. अ०—६ । ४ । ४१ ॥
९. आ० सू०—१०९४ ॥

अन्न-शब्दं विहायान्यसुबन्त उपपदे 'अद्' धातो 'विट्' प्रत्ययो भवति ॥ आम-मत्तीति **आमात्**[1] । सस्यमत्तीति सस्यान्मृगः ॥ ६८ ॥

यहां 'छन्दसी' पद का निवर्त्तन है ॥ [**अनन्ने**] अन्न शब्द को छोड़ कर अन्य सुबन्त उपपद हो तो [**अदः**] 'अद' धातु से 'विट्' प्रत्यय होता है ॥

जैसे—आममत्तीति **आमात्** । सस्यमत्तीति सस्यान्मृगः ॥ ६८ ॥

क्रव्ये च[2] ॥ ६९ ॥

'अदः' इत्यनुवर्त्तते । क्रव्ये । ७ । १ । च [अ०] ॥

क्रव्य-शब्द उपपदे 'अद' धातो 'विट्' प्रत्ययो भवति ॥ क्रव्यमत्तीति क्रव्यात्[3] ॥

'अदोऽनन्ने' इत्येव सिद्धे पुनर्वचनं वाऽसरूपविधिनिवृत्त्यर्थम् । क्रव्योपपदाद् 'अद' धातोरण् मा भूत् । कथं तर्हि 'क्रव्यादान् शकुनीन् सर्वान्' इति । अत्राण् नास्ति । कस्तर्हि । अदन्तीत्यदाः क्रव्यस्यादाः क्रव्यादास्तान् । **'अजपि सर्वधातुभ्यः'**[4] इत्यच् । उत्सर्गापवादे च वासरूपविधिर्भवति ॥ ६९ ॥

यहां 'अदः' इस पद का अनुवर्त्तन है ॥

[**क्रव्ये**] क्रव्य शब्द उपपद हो तो 'अद' धातु से 'विट्' प्रत्यय होता है ॥

जैसे—क्रव्यमत्तीति **क्रव्यात्** ॥

'अदोऽनन्ने' इस सूत्र से ही 'क्रव्यात्' यह सिद्ध हो जाता पुनः **'क्रव्ये च'** ऐसा वचन करना **वाऽसरूपविधि** के हटाने के लिये है । क्रव्य उपपद 'अद' धातु से 'अण्' न हो ।

(प्र०)—क्रव्यादान् शकुनीन्सर्वान्' यह कैसे सिद्ध होगा ?

(उ०)—यहां अण् नहीं है । तो क्या है ? 'अदन्तीत्यदाः क्रव्यस्यादाः क्रव्यादास्तान्' **'अजपि सर्वधातुभ्यः'** इस वार्त्तिक से 'अच्' प्रत्यय हो जाता है । क्योंकि—वाऽसरूपविधि उत्सर्ग तथा अपवाद में हुआ करती है ॥ ६९ ॥

दुहः कब्घश्च[5] ॥ ७० ॥

दुहः । ५ । १ । कप् । १ । १ । घः । १ । १ । च [अ०] ॥

सुबन्त उपपदे 'दुह' धातोः 'कप्' प्रत्ययो भवति हकारस्य च घकारादेशः ॥

कामदुघा । सुदुघा ॥ ७० ॥

---

१. **अयं वा** (अग्नि)ऽऽ**माद् येनेदं मनुष्याः पक्त्वाऽश्नन्ति** (श० १ । २ । १ । ४ ॥)
२. आ० सू०—१०९५ ॥
३. **येन** (अग्निना) **पुरुषं दहन्ति स क्रव्यात्** ॥ (श० १ । २१ । ४ ॥)
४. अ०—३ । १ । १३४ भा० ॥ ५. आ० सू०—१०९६ ॥

सुबन्त उपपद हो तो [दुहः] 'दुह' धातु से [कप्] 'कप्' प्रत्यय और हकार को [घश्च] 'घकार' अन्तादेश हो जाता है ॥

जैसे—कामदुघा । सुदुघा ॥ ७० ॥

मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्[1] ॥ ७१ ॥

मन्त्रे । ७ । १ । श्वेतवहोक्थशस्पुरोडाशः । ५ । १ । ण्विन् । १ । १ ॥

उपपदैः सह धातुसमुदाया निपात्यन्ते । पुरस्—पूर्वाद् 'दाश' धातोर्डकारादेशो निपात्यते **मन्त्रे**=वैदिकप्रयोगे ॥ श्वेतपूर्वक-वह, उक्थपूर्वक-शस्, पुरस्-पूर्वक-दाश इत्येतेभ्यो धातुभ्यो 'ण्विन्' प्रत्ययो भवति ॥

वा०—श्वेतवहादीनां डस् पदस्येति [च] वक्तव्यम्[2] *॥ १ ॥*

अजादिष्वसर्वनामस्थानविभक्तिषु पूर्वस्य भसंज्ञा भवति तत्र पदत्वमेव नास्ति, अन्यासु विभक्तिषु परतो 'डस्' प्रत्ययो भवति ॥

श्वेतवा इन्द्रः । श्वेतवाहौ । श्वेतवाहः । श्वेतवाहम् । श्वेतवाहौ । श्वेतौहः । श्वेतौहा । श्वेतवोभ्याम् । श्वेतवोभिः । श्वेतौहे । [श्वेतवोभ्याम् । श्वेतवोभ्यः] श्वेतौहः । [श्वेतवोभ्याम् । श्वेतवोभ्यः । श्वेतौहः ।] श्वेतौहोः । श्वेतौहाम् । श्वेतौहि । श्वेतौहोः । श्वेतवस्सु ॥

उक्थशाः[3] । उक्थशासौ । उक्थशोभ्याम् ॥ पुरोडाः[4] । पुरोडाशौ । पुरोडोभ्याम् । अनयोरपि पूर्ववद् रूपाणि । '**वाह ऊठ्**'[5] इति सूत्रेण 'ऊठ्' ॥

'मन्त्रे' इति किम्—श्वेतवाहः ॥ **'पदस्य'** इति किम्—**श्वेतवाहौ । अत्र [यथासंख्यं] ण्विन्-डसौ न भवतः ॥ ७१ ॥**

'श्वेतवह' इत्यादि में उपपदसहित धातुसमुदाय का निपातन है । और पुरस्-पूर्वक 'दाश' धातु को 'डकार' आदेश निपातन हैं ॥

[**मन्त्रे**] वैदिकप्रयोग में [श्वेत० डाशः] श्वेतपूर्वक 'वह' उक्थपूर्वक 'शस्' पुरस्-पूर्वक 'दाश' इन धातुओं से 'ण्विन्' प्रत्यय होता है ॥

वा०—श्वेतवहादीनाम्०—अजादि असर्वनामस्थान विभक्तियों में पूर्व की भसंज्ञा होने कारण उनमें पदत्व नहीं होता, अतः अन्य विभक्तियों के परे रहते 'डस्' प्रत्यय होता है ॥

जैसे—**श्वेतवा इन्द्रः । श्वेतवाहौ । श्वेतवाहः ॥** सारे शब्दरूप संस्कृत में दे दिये हैं ॥ **उक्थशाः । उक्थशासौ । उक्थशोभ्याम्** इत्यादि । **पुरोडाः । पुरोडाशौ । पुरोडोभ्याम्**

---

१. आ० सू०—१०९७ ॥ २. अ०—३ । २ । ७१ भा० ॥

३. **शुचीदयन्दीधितमुक्थशासः** (ऋ० ४ । २ । १६) ॥

४. पुरोडाः । पुरोडाशम् (ऋ० ३ । २८ । २, ३, ४, ६) ॥

५. अ०—६ । ४ । १३२ ॥

इत्यादि । इन दोनों के रूप भी पूर्ववत् जानने चाहियें ॥ श्वेतौहः इत्यादि में 'वाह ऊठ्' से 'ऊठ्' हो जाता है ॥

'मन्त्रे' ग्रहण इसलिये है कि—श्वेतवाहः ॥ 'पदस्य' ग्रहण इसलिये है—श्वेतवाहौ ॥ यहां प्रत्युदाहरणों में 'ण्विन्' और 'डस्' नहीं होते ॥ ७१ ॥

अवे यजः[1] ॥ ७२ ॥

अत्रापि 'डस्, पदस्य' इत्यनुवर्त्तते । अवे । ७ । १ । यजः । ५ । १ ॥ मन्त्रविषयेऽवोपपदाद् 'यज' धातो 'ण्विन्' प्रत्ययो भवति, पदान्ते च ण्विनः स्थाने डस् ॥

वरुणस्यावया असि[2] । अवयाः । अवयोभ्याम् । अत्र डस् ।

'पदस्य' इति किम्—अवयाजौ ॥ योगविभाग उत्तरार्थः ॥ ७२ ॥

यहां पर भी 'डस्' तथा 'पदस्य' पद का अनुवर्त्तन है ॥

मन्त्रविषय में [अवे] अव उपपद [यजः] 'यज' धातु से 'ण्विन्' प्रत्यय होता है। पदान्त में 'ण्विन्' के स्थान में 'डस्' हो जाता है ॥

जैसे—वरुणस्यावया असि । अवयाः । अवयोभ्याम्—इस में 'डस्' हो जाता है ॥

'पदस्य' ग्रहण इसलिये है कि—**अवयाजौ** यहां 'डस्' नहीं होता ॥ योगविभाग उत्तरसूत्रों में अनुवृत्ति के लिये है ॥ ७२ ॥

विजुपे छन्दसि[3] ॥ ७३ ॥

अत्र 'डस्, पदस्य' इति नानुवर्त्तते ॥ मन्त्र इत्यनुवर्त्तमाने पुनश्छन्दोग्रहणस्येतत् प्रयोजनम्—मन्त्रशब्देन मूलसंहितानां ग्रहणं भवति, तत्र शाखान्तराणामपि ग्रहणं यथा स्यात् ॥

विच् । १ । १ । उपे । ७ । १ । छन्दसि । ७ । १ ॥

उपोपपदाद् 'यज' धातोश्छन्दसि विषये 'विच्' प्रत्ययो भवति ॥

उपयट्, उपयड् । उपयजौ । उपयजः[4] ॥ ७३ ॥

यहां 'डस्, पदस्य' इन पदों की निवृत्ति है । 'मन्त्रे' इस पद का अनुवर्त्तन होने पर पुनः 'छन्द' ग्रहण का यह प्रयोजन है कि—मन्त्र शब्द से केवल मूलसंहिताओं का ग्रहण होता है, परन्तु शाखान्तर का भी ग्रहण हो जाय इस लिये 'छन्दसि' ग्रहण है ॥

---

१. आ० सू०—१०९८ ॥

२. अनुपलब्धमूलमिदम् । परन्तु—**अस्ति हि ष्मा ते शुष्मिन् 'अवयाः'** (ऋ० १ । १७३ । १२ ॥ यजु०—३ । ४६ ॥) **या तेषां 'अवया' दुरिष्टिः** (अथ०—२ । ३५ । १ ॥)

३. आ० सू०—१०९९ ॥

४. उपयड्भ्यः । श०—३ । ८ । ३ । १८ ॥ ४ । ४ ॥ ११ । ८ । २ । १ ॥

[उपे] उप-उपपद 'यज' धातु से [छन्दसि] वैदिकप्रयोग विषय में [विच्] 'विच्' प्रत्यय होता है ॥ जैसे—उपयक् । उपयग् । उपयजौ । उपयजः ॥ ७३ ॥

आतो मनिन्क्वनिब्वनिपश्च[1] ॥ ७४ ॥

'छन्दसि' इत्यनुवर्त्तते विच्च । आतः । ५ । १ । मनिन्क्वनिब्वनिपः । १ । १ । च [अ०] ॥

आकारान्ताद् धातोर्मनिन्-क्वनिप्-वनिपो विच्चेत्येते प्रत्यया भवन्ति छन्दसि विषये ॥

सुदामा[2] । सुधामा । क्वनिप्—सुधीवा । सुपीवा । वनिप्—अन्नदावा । दुग्धपावा । विच्—घृतपाः । दण्डदाः ॥ ७४ ॥

यहां 'छन्दसि' तथा 'विच्' पद का अनुवर्त्तन है ॥ [आतः] 'आकारान्त' धातुओं से [मनिन्क्वनिब्वनिपश्च] मनिन्, क्वनिप्, वनिप् तथा विच् ये प्रत्यय छन्दविषय में होते हैं ॥

जैसे—सुदामा । सुधामा । क्वनिप्—सुधीवा । सुपीवा । वनिप्—अन्नदावा । दुग्धपावा । विच्—घृतपाः । दण्डदाः ॥ ७४ ॥

अन्येभ्योऽपि दृश्यन्ते[3] ॥ ७५ ॥

'छन्दसि' इति नानुवर्त्तते । अन्येभ्यः । ५ । ३ । अपि [अ०] । दृश्यन्ते । [क्रियापदम्] ॥

मनिन्, क्वनिप्, वनिप्, विच् इति चत्वारः प्रत्यया अन्येभ्योऽपि धातुभ्यो दृश्यन्ते ॥

सुशर्म्मा—अत्र 'शृ' धातो 'मनिन्' । क्वनिप्—प्रातरित्वा । अत्र प्रातरुपपदाद् 'इण्' धातोः 'क्वनिप्' ॥ वनिप्—विजावा । प्रजावा । अत्र 'जन' धातो-'वनिप्' **'विड्वनोरि'**[4]त्यनुनासिकस्यात् ॥ रेडसि । अत्र 'रिष' धातो 'विच् ॥

दृश्यन्त इति क्रियया ज्ञायते प्राचीनेषु शिष्ट-ऋषि-मुनि-कृतग्रन्थेषु ये शब्दा उक्तप्रत्ययान्ता दृश्यन्ते तेषु साधुत्वज्ञापनाय वचनम् ॥ ७५ ॥

यहां 'छन्दसि' पद का निवर्त्तन है ॥ मनिन्, क्वनिप्, वनिप् तथा विच् ये चार प्रत्यय [अन्येभ्योऽपि] आकारान्तों से अन्य धातुओं से भी [दृश्यन्ते] देखे जाते हैं ॥

जैसे—सुशर्म्मा यहां 'शृ' धातु से 'मनिन्' प्रत्यय हो जाता है ॥ क्वनिप्—प्रातरित्वा । यहां प्रातर् उपपद होने पर 'इण्' धातु से 'क्वनिप्' प्रत्यय होता है ॥ वनिप्—विजावा । प्रजावा । यहां 'जन' धातु से 'वनिप्' प्रत्यय होता है तथा 'वनिप्' परे रहते 'विड्वनोरनुनासिकस्यात्' से 'आत्व' हो जाता है ॥ रेडसि यहां 'रिष' धातु से 'विच्' प्रत्यय होता है ॥

---

१. आ० सू०—११०० ॥
२. ऋ०—६ । २० । ७ ॥
३. आ० सू०—११०१ ॥
४. अ०—६ । ४ । ४१ ॥

'दृश्यन्ते' इस क्रियापद से यह जाना जाता है कि—प्राचीन शिष्ट-ऋषि-मुनिकृत ग्रन्थों में यदि उक्त प्रत्ययान्त शब्द दीखें तो उन्हें साधु अर्थात् शुद्ध जानना ॥ ७५ ॥

क्विप् च[1] ॥ ७६ ॥

'सुपि' इत्यनुवर्त्तते, उपसर्गेऽपीति च ॥ क्विप् । १ । १ । च [अ०] ॥

सोपसर्गे निरुपसर्गे च सुप्युपपदे धातुमात्रात् 'क्विप्' प्रत्ययो भवति ॥

उखास्रत् । पर्णध्वत् । अत्र स्रंस-ध्वंसधातोरनुनासिकलोपो[2] भवति सकारस्य दकारश्च[3] ॥ ७६ ॥

यहां 'सुपि' तथा 'उपसर्गेऽपि' पद का अनुवर्त्तन है ॥ उपसर्ग वा निरुपसर्ग सुबन्त उपपद हो तो धातुमात्र से [क्विप्] 'क्विप्' प्रत्यय होता है ॥

जैसे—उखास्रत् । पर्णध्वत् । यहां स्रन्सु, ध्वन्सु धातु से अनुनासिक का लोप और सकार को 'दकार' आदेश होता है ॥ ७६ ॥

स्थः क च[4] ॥ ७७ ॥

'क्विप्' अनुवर्त्तते ॥ स्थः । ५ । १ । क । १ । १ । च [अ०] । 'क' इति लुप्तविभक्तिको निर्देशः ॥

'स्था' धातोः सोपसर्गे निरुपसर्गे च सुप्युपपदे क-क्विपौ प्रत्ययौ भवतः ॥

सुखस्थः । सुखस्थाः । क-पक्ष आकारलोपः ॥

'**अन्येभ्योऽपि दृश्यते**'[5] इति क्विपि सिद्धे '**सुपि स्थः**'[6] इति के सिद्धे पुनर्वचनं '**शमि धातोः संज्ञायाम्**'[7] इति 'अच्' बाधनार्थम् । शमि धातोः संज्ञायामित्यत्र धातु-ग्रहणं यथा कृञो हेत्वादिषु टं बाधते एवं क-क्विपावपि बाधेत, पुनरारम्भात् 'क-क्विपौ' एव भवतः । शंस्थः । शंस्थाः ॥ ७७ ॥

यहां 'क्विप्' पद का अनुवर्त्तन है । 'क' इस पद में विभक्ति का लोप है ॥ उपसर्ग वा निरुपसर्ग सुबन्त उपपद हो तो [स्थः] 'स्था' धातु से [कः] 'क' तथा [च] 'क्विप्' प्रत्यय होते हैं ॥

जैसे—सुखस्थः । सुखस्थाः । 'क' पक्ष में आकार का लोप हो जाता है ॥

---

१. आ० सू०—११०३ ॥
२. अ०—६ । ४ । २४ ॥
३. अ०—८ । २ । ७२ ॥
४. आ० सू०—११०८ ॥
५. अ०—३ । २ । १७८ ॥
६. अ०—३ । २ । ४ ॥
७. अ०—३ । २ । १४ ॥

'अन्येभ्योऽपि दृश्यते' इससे 'क्विप्' प्रत्यय तथा 'सुपि स्थः' से 'क' प्रत्यय सिद्ध हो ही जाता, पुनः 'स्थः क च' यह वचन 'शमि धातोः संज्ञायाम्' इससे प्राप्त 'अच्' प्रत्यय को बाधने के लिए है। शमि धातोः संज्ञायाम् इस में किया हुआ धातुग्रहण जिस प्रकार हेत्वादि अर्थों में 'कृञ्' धातु से उत्पन्न 'ट' को बाध लेता है, उसी प्रकार—शंस्थः। शंस्थाः ! यहां पर 'क' और 'क्विप्' को भी बाध लेगा, परन्तु अब सूत्रारम्भ सामर्थ्य से 'क' और 'क्विप्' ही होते हैं ॥ ७७ ॥

सुप्यजातौ णिनिस्ताच्छील्ये[1] ॥ ७८ ॥

सुपि । ७ । १ । अजातौ । ७ । १ । णिनिः । १ । १ । ताच्छील्ये । ७ । १ ॥

अजातिवाचिनि सुबन्त उपपदे ताच्छील्ये गम्यमाने धातुमात्राण्णिनिः प्रत्ययो भवति ॥

उष्णं भोक्तुं शीलमस्य उष्णभोजी । शीतभोजी । प्रियवादी । धर्मोपदेशो ॥

[भाष्यम्—सुपीति वर्त्तमाने पुनः सुब्ग्रहणं किमर्थम् ? अनुपसर्ग इत्येवं तदभूत्, इदं सुम्मात्रे यथा स्यात् । उदासारिण्यः । प्रत्यासारिण्यः[2] ।] ॥

'अजातौ' इति किम्—आम्राणि चूषितुं शीलमस्य ॥

'ताच्छील्ये' इति किम्—उष्णं भुङ्क्ते कदाचित् । अत्रोभयत्र णिनिर्मा भूत् ॥

वा०—णिन्विधौ साधुकारिण्युपसंख्यानम्[3] ॥ १ ॥

साधु करोतीति साधुकारी । साधुदायी । अताच्छील्यार्थ आरम्भः ॥

वा०—ब्रह्मणि वदः[4] ॥ २ ॥

ब्रह्मशब्दोपपदाद् 'वद' धातो 'णिनिः' प्रत्ययो भवति ॥ ब्रह्म वदतीति ब्रह्मवादी । इदमप्यताच्छील्यार्थमेव ॥ ७८ ॥

[अजातौ] अजातिवाची [सुपि] सुबन्त उपपद हो और [ताच्छील्ये] ताच्छील्य अर्थ गम्यमान हो तो धातुमात्र से [णिनिः] 'णिनिः' प्रत्यय होता है ॥

जैसे—उष्णं भोक्तुं शीलमस्य उष्णभोजी । शीतभोजी । प्रियवादी । धर्मोपदेशी ॥

'सुपि' पद के अनुवर्त्तमान होने पर पुनः सुप् ग्रहण इसलिये है कि—यह सुप्-मात्र में हो। जैसे—उदासारिण्यः । प्रत्यासारिण्यः । यहां सोपसर्ग से भी 'णिनि' प्रत्यय हो जाता है ॥

'अजातौ' ग्रहण इसलिये है कि—आम्राणि चूषितुं शीलमस्य ॥ ताच्छील्ये' ग्रहण इसलिये है कि—उष्णं भुङ्क्ते कदाचित् । यहां दोनों उदाहरणों में 'णिनि' नहीं होता ॥

---

१. आ० सू०—११०९ ॥

२. यत्त्वत्र **काशिका**कृदाह—'सुपीति वर्त्तमाने पुनः सुब्ग्रहणमुपसर्गनिवृत्यर्थम्' तद्भाष्य-विरोधादुदाहरणविरोधाच्चाप्रमाणम् । भाष्यन्त्वत्र मूल उदाहृतम् ॥

३. अ०—३ । २ । ७८ भा० ॥ (ख) आ० वा०—१११० ॥

४. अ०—३ । २ । ७८ भा० ॥ (ख)—आ०—वा०—१११९ ॥

वा०—**णिन्विधौ०**—'णिन्' प्रत्यय के विधान में साधुकारी अर्थ में 'णिनि' प्रत्यय होता है ऐसा कहना चाहिये ॥ जैसे—साधु करोतीति **साधुकारी** । **साधुदायी** । यह वार्त्तिक अताच्छील्यार्थ है ॥

वा०—**ब्रह्मणि वदः**—ब्रह्म शब्द उपपद हो तो 'वद' धातु से 'णिनि' प्रत्यय होता है ॥ जैसे—ब्रह्म वदतीति **ब्रह्मवादी** । यह भी अताच्छील्यार्थ ही है ॥ ७८ ॥

कर्त्तर्युपमाने[1] ॥ ७९ ॥

कर्त्तरि । ७ । १ । उपमाने । ७ । १ ॥

उपमानवाचिनि कर्त्तर्य्युपपद उपमेयप्रत्ययार्थे धातुमात्राण्णिनिः प्रत्ययो भवति ॥

उष्ट्र इव यातीति उष्ट्रयायी । काक इव वदतीति काकवादी ॥

'कर्त्तरि' इति किम्—तिलानिव खादति माषान् ॥ 'उपमाने' इति किम्—उष्ट्रो याति । अत्रोभयत्र 'णिनि' र्माभूत् ॥ जात्यर्थोऽताच्छील्याऽर्थो वाऽरम्भः ॥ ७९ ॥

[उपमाने] उपमानवाची [कर्त्तरि] कर्त्ता उपपद हो तो उपमेय अर्थ गम्यमान होने पर धातुमात्र से 'णिनि' प्रत्यय होता है ॥

कैसे—उष्ट्र इव यातीति **उष्ट्रयायी** । काक इव वदतीति **काकवादी** ।

'कर्त्तरि' ग्रहण इस लिये है कि—**तिलानिव खादति माषान्** । 'उपमाने' ग्रहण इसलिये है कि—**उष्ट्रो याति** । यहां दोनों में 'णिनि' नहीं होता ॥ यह सूत्र जाति तथा अताच्छील्य के लिये है ॥ ७९ ॥

व्रते[2] ॥ ८० ॥

'सुपि' इत्यनुवर्त्तते । व्रते । ७ । १ ॥ व्रत-शब्देन शास्त्रकृतो नियम उच्यते ॥

व्रते गम्यमाने सुबन्त उपपदे धातो 'णिनिः' प्रत्ययो भवति ॥

स्थण्डिलशायी । **अश्राद्धभोजी**[3] । कामचारगृहीतोऽयं नियमः ॥

'व्रते' इति किम्—स्थण्डिले शेते देवदत्तः ॥ ८० ॥

यहां 'सुपि' पद का अनुवर्त्तन है । व्रत शब्द से शास्त्रकृत नियम समझना चाहिये ॥

[व्रते] व्रत गम्यमान हो तो सुबन्त उपपद होने पर धातु से 'णिनि' प्रत्यय होता है ॥

जैसे—**स्थण्डिलशायी** । **अश्राद्धभोजी** । नियम से स्थण्डिल पर ही सोता है ॥

'व्रते' ग्रहण इसलिये है कि—स्थण्डिले शेते देवदत्तः ॥ यहां 'णिनि' नहीं होता ॥८०॥

---

१. आ० सू०—१११२ ॥ २. आ० सू०—१११३ ॥

३. अत्र भाष्यम्—**एवं तर्हि नञ एवायं भुजिप्रतिषेधवाचिनः श्राद्ध-शब्देनासमर्थसमासः, न भोजी श्राद्धस्येति** ..... भा० ३ । २ । ८० ॥

बहुलमाभीक्ष्ण्ये[1] ॥ ८१ ॥

बहुलम् । १ । १ । आभीक्ष्ण्ये । ७ । १ ॥ 'आभीक्ष्ण्यमासेवनम् ॥

आभीक्ष्ण्ये गम्यमाने सुबन्त उपपदे धातो[बंहुलं] 'णिनिः' प्रत्ययो भवति ॥

क्षीरं पिबत्यासेवते क्षीरपायी ब्राह्मणः । क्षीरपो ब्राह्मणः । पथ्यां हरीतकीमश्नात्यासेवते पथ्याशी, पथ्याशः ॥ क्षीरप इति पक्ष 'आतोऽनुपसर्गे कः'[2] इति 'क' प्रत्ययः । पथ्याश इत्यण् च ॥ ८१ ॥

आभीक्ष्ण्य = पुनः पुनः करने को कहते हैं ॥ [आभीक्ष्ण्ये] आभीक्ष्ण्य अर्थ गम्यमान हो तो सुबन्त उपपद होने पर धातु से [बहुलम्] बहुल करके 'णिनि' प्रत्यय होता है ॥

जैसे—क्षीरं पिबत्यासेवते क्षीरपायी ब्राह्मणः । क्षीरपो ब्राह्मणः । पथ्यां हरीतकीमश्नात्यासेवते पथ्याशी । पथ्याशः ॥ क्षीरपः इस पक्ष में 'आतोऽनुपसर्गे कः' इससे 'क' प्रत्यय होता है और पथ्याशः इस में 'अण्' हो जाता है ॥ ८१ ॥

मनः[3] ॥ ८२ ॥

'सुपि' इत्यनुवर्त्तते ॥ मनः । ५ । १ । उत्तरसूत्रे 'खश्' प्रत्यये सार्वधातुकानुबन्धः क्रियते तेन ज्ञायते 'मन' इति मन्यतेरेव ग्रहणं न तनोत्यादिस्थस्य ॥

[सुबन्त उपपदे मन्यते 'णिनिः' प्रत्ययो भवति]

दर्शनीयं मन्यत इति दर्शनीयमानी । सुरूपं मन्यत इति सुरूपमानी ॥ ८२ ॥

यहां 'सुपि' इस पद का अनुवर्त्तन है । अगले सूत्र में 'खश्' प्रत्यय में सार्वधातुक संज्ञा के लिये शकार अनुबन्ध किया है उससे यह जाना जाता है कि—'मनः' इस पद से दिवादिस्थ मन्यति का ग्रहण है तनोत्यादिस्थ का नहीं ॥

सुबन्त उपपद हो तो [मनः] 'मन्यति' से 'णिनिः' प्रत्यय होता है ॥

जैसे—दर्शनीयं मन्यत इति दर्शनीयमानी । सुरूपं मन्यत इति सुरूपमानी ॥ ८२ ॥

आत्ममाने खश् च[4] ॥ ८३ ॥

'मनः' इत्यनुवर्त्तते णिनिश्च[5] । आत्ममाने । ७ । १ । खश् । १ । १ । च [अ०] ॥

आत्मनः स्वस्य मानं मननमात्ममानं तस्मिन् । आत्ममाने सति सुबन्तोपपदान् 'मन' धातोः 'खश्' णिनिश्च प्रत्ययो भवति ॥

---

१. आ० सू०—१११४ ॥ २. अ०—३ । २ । ३ ॥
३. आ० सू०—१११५ ॥ ४. आ० सू०—१११६ ॥
५. न चात्र णिनिश्चकारेण समुच्चेतव्योऽन्यथा हि **'चानुकृष्टं नोत्तरत्र'** इति परिभाषया णिनेरुत्तरत्रानुवृत्तिर्न स्यात् ॥

आत्मानं पण्डितं मन्यत इति पण्डितंमन्यः । पण्डितमानी । शोभनंमन्यः । शोभनमानी ।।

'आत्ममाने' इति किम्—शोभनमानी देवदत्तस्य यज्ञदत्तः । अत्र 'खश्' मा भूत् ।। ८३ ।।

यहां 'मनः' तथा 'णिनि' पद का अनुवर्त्तन है ।। [**आत्ममाने**] आत्ममान 'अपने आप को मानना' अर्थ गम्यमान हो तो सुबन्त उपपद होने पर 'मन्' धातु से [खश्] 'खश' [च] और 'णिनिः' प्रत्यय होता है ।।

जैसे—आत्मानं पण्डितं मन्यत इति **पण्डितंमन्यः । पण्डितमानी । शोभनंमन्यः । शोभनमानी** ।।

'आत्ममाने' ग्रहण इसलिये है कि—**शोभनमानी** देवदत्तस्य यज्ञदत्तः ।। यहां 'खश्' नहीं होता ।। ८३ ।।

भूते[1] ।। ८४ ।।

भूते । ७ । १ ।। यत्र कालनियमो नास्ति तत्र सामान्येन त्रिषु कालेषु प्रत्यया भवन्ति । अत इदानीं कालाधिकारः क्रियते ।।

'वर्त्तमाने लट्'[2] इत्यतः पूर्वं पूर्वं ये प्रत्यया विधीयन्ते ते धात्वर्थे भूते वेदितव्याः ।।

पापं कृतवानिति पापकृत् । अत्र सामान्यकाले 'क्विप्' प्राप्तो भूते विधीयते ।।

'भूते' इति किम्—पापं करोति । अत्र 'क्विप्' न भवति, वाक्यमेव ।। ८४ ।।

जहां काल का नियम नहीं है वहां सामान्य करके तीनों कालों में प्रत्यय होते हैं । इस कारण यहां काल का अधिकार करते हैं ।।

'वर्त्तमाने लट्' इस से पूर्व पूर्व जो जो प्रत्यय कहेंगे वे धात्वर्थ भूत में होते हैं ऐसा जानना चाहिये ।।

जैसे—पापं कृतवानिति **पापकृत्** । यहां सामान्य काल में 'क्विप्' प्राप्त था सो भूतकाल में विधान किया है ।।

'भूते' ग्रहण इसलिये है कि—**पापं करोति** । यहां 'क्विप्' नहीं होता, वाक्य ही रहता है ।। ८४ ।।

करणे यजः[3] ।। ८५ ।।

'णिनिः' इत्यनुवर्त्तते । करणे । ७ । १ । यजः । ५ । १ ।।

करणकारकोपपदाद् 'यज' धातो 'णिनि' प्रत्ययो भवति धात्वर्थे भूते सति ।।

१. आ० सू०—१११८ ।। २. अ०—३ । २ । १२३ ।।
३. आ० सू०—१११९ ।।

अग्निष्टोमेनेष्टवान् अग्निष्टोमयाजी । राजसूयेनायाक्षीत् राजसूययाजी । अश्वमेधयाजी ।।

'करणे' इति किम्—पूर्णमास्यामयष्ट ।। 'भूते' इति किम्—अग्निष्टोमेन यजते । अत्रोभयत्र 'णिनि' र्न भवति ।। ८५ ।।

यहां 'णिनिः' पद का अनुवर्त्तन है ।। [करणे] करणकारक उपपद होने पर [यजः] 'यज' धातु से 'णिनि' प्रत्यय होता है धात्वर्थ भूत् हो तो ।।

जैसे—अग्निष्टोमेनेष्टवान् अग्निष्टोमयाजी । राजसूयेनायाक्षीत् राजसूययाजी । अश्वमेधयाजी ।।

'करणे' ग्रहण इसलिये है कि—पूर्णमास्यामयष्ट ।। 'भूते' ग्रहण इसलिये है कि—अग्निष्टोमेन यजते । यहां दोनों में 'णिनि' प्रत्यय नहीं होता है ।। ८५ ।।

कर्मणि हनः[1] ।। ८६ ।।

'णिनिः' इत्यनुवर्त्तते । कर्मणि । ७ । १ । हनः । ५ । १ ।।

कर्मणि कारक उपपदे 'हन' धातोर्भूतेऽर्थे णिनिः' प्रत्ययो भवति ।।

पितरं हतवान् पितृघाती । पितृव्यघाती । पुत्रघाती ।। ८६ ।।

यहां 'णिनिः' पद का अनुवर्त्तन है ।। [कर्मणि] कर्मकारक उपपद हो तो [हनः] 'हन' धातु से भूत अर्थ में 'णिनि' प्रत्यय होता है ।।

जैसे—पितरं हतवान् पितृघाती । पितृव्यघाती । पुत्रघाती ।। ८६ ।।

ब्रह्मभ्रूणवृत्रेषु क्विप्[2] ।। ८७ ।।

'हनः' इत्यनुवर्त्तते 'णिनिः' निवृत्तः । ब्रह्मभ्रूणवृत्रेषु । ७ । ३ । क्विप् १ । १ ।।

नियमार्थं सूत्रमिदम् । द्विविधो[3]ऽत्र नियमः । 'हन' धातोर्यदि भूते 'क्विप्' स्यात्तर्हि ब्रह्मादिष्वेवोपपदेषु । ब्रह्मादिषूपपदेषु यदि कस्माच्चित् 'क्विप्' स्यात्तर्हि हन्तेरेव ।।

ब्रह्मभ्रूणवृत्रेषु कर्मसूपपदेषु 'हन' धातोर्भूते 'क्विप्' प्रत्ययो भवति ।।

ब्रह्महा । भ्रूणहा । वृत्रहा ।।

---

१. आ० सू०—११२० ।। २. आ० सू०—११२१ ।।

३. यत्तु **काशिकाकृता** चतुर्विधोऽत्र नियम इति भण्यते, तद्भाष्यविरुद्धत्वादुपेक्षणीयम् । तथा च भाष्यम्—"·····**उभयतो नियमोऽयम् । ब्रह्मादिष्वेव हन्तेर्भूते क्विब्भवति, क्विबेव हन्तेर्भूते ब्रह्मादिष्विति**" (अ० ३ । २ । ८७ भा०) ।। तथा च—कामहा, मधुहा, हिमहेत्यादिषु **'कृत्यल्युटो बहुलम्'** (अ० ३ । ३ । ११३) इति बहुलग्रहणादुपपदान्तरादप्राप्तोऽपि हन्तेः क्विब्भवति ।।

"**बहुलं छन्दसि**" (अ० ३ । २ । ८८) इत्यतो बहुलग्रहणानुवृत्तेर्नियमव्यभिचारादिति रक्षितः ।।

नियमः किमर्थः—व्याघ्रं हतवान् । ब्रह्माधीतवान् । अत्र क्वापि 'क्विप्' न भवति ॥ ८७ ॥

यहां 'हनः' इस पद का अनुवर्त्तन है तथा 'णिनिः' पद का निवर्त्तन हुआ । यह सूत्र नियम करने के लिये है, वह नियम यहां दो प्रकार का है—'हन्' धातु से यदि भूतकाल में 'क्विप्' हो तो ब्रह्मादि उपपद होने पर ही हो, ब्रह्मादि उपपद होने पर यदि किसी धातु से 'क्विप्' हो तो 'हन्ति' से ही हो ॥

[ब्रह्मभ्रूणवृत्रेषु] ब्रह्म, भ्रूण, वृत्र ये कर्म उपपद हों तो 'हन' धातु से भूत में [क्विप्] 'क्विप्' प्रत्यय होता है ॥

जैसे——ब्रह्महा । भ्रूणहा । वृत्रहा ॥

नियम इसलिये है कि—व्याघ्रं हतवान् । ब्रह्माधीतवान् । यहां दोनों में 'विवप्' नहीं होता ॥ ८७ ॥

बहुलं छन्दसि[1] ॥ ८८ ॥

पूर्वसूत्रे यन्नियम्यते तस्य विघातार्थ आरम्भः । बहुलम् । १ । १ । छन्दसि । ७ । १ ॥

[छन्दसि=वेदविषये] सामान्ये कर्मण्युपपदे 'हन' धातोर्भूतेऽर्थे [बहुलं] 'क्विप्' प्रत्ययो भवति ॥

मातृहा[2] । पितृहा[3] । भ्रातृहा[4] । न च भवति—अमित्रघातः । बहुलग्रहणादमित्रघात इति 'क्विप्' एव न भवति ॥ ८८ ॥

पूर्वसूत्र में जो नियम किया है उसके विघात के लिये यह सूत्र है ॥

[छन्दसि] वैदिकप्रयोग विषय में सामान्य कर्म उपपद हो तो 'हन' धातु से [बहुलम्] बहुल करके भूत अर्थ में 'क्विप्' प्रत्यय होता है ॥

जैसे—मातृहा । पितृहा । भ्रातृहा । न च भवति—अमित्रघातः । बहुल ग्रहण से 'अमित्रघातः' यहां क्विप् ही नहीं होता ॥ ८८ ॥

सुकर्मपापमन्त्रपुण्येषु कृञः[5] ॥ ८९ ॥

'क्विप्' अनुवर्त्तते । सुकर्मपापमन्त्रपुण्येषु । ७ । ३ । कृञः । ५ । १ ॥

स्वादिपूपपदेषु 'कृञ्' धातोर्भूतेऽर्थे 'क्विप्' प्रत्ययो भवति ॥

---

१. आ० सू०—११२२ ॥

२. **मातृहा वै त्वमसि ॥ न मातृहाऽसीति ॥** छान्दो०—७ । १५ । २, ३ ॥

३. **पितृहा वै त्वमसि ॥ नैवं ब्रूयुः पितृहासीति ॥** छान्दो०—७ । १५ । २, ३ ॥

४. **भ्रातृहा वै त्वमसि ॥ न भ्रातृहासीति ॥** छान्दो०—७ । १५ । २, ३ ॥

५. आ० सू०—११२३ ॥

सुष्ठु कृतवान् सुकृत् । कर्मकृत् । पापकृत् । मन्त्रकृत् । पुण्यमकार्षीत् पुण्यकृत् ॥

इदमपि सूत्रं नियमार्थम्—स्वादिषूपपदेषु यदि 'क्विप्' स्यात्तर्हि भूत एव । भूते यदि स्वादिषूपपदेषु प्रत्ययः स्यात्तर्हि क्विबेव[1] ॥ ८९ ॥

यहां 'क्विप्' पद का अनुवर्त्तन है ॥ [सुकर्म० षु] सुकर्म, पाप, मन्त्र, पुण्य ये उपपद हों तो [कृञः] 'कृञ्' धातु से भूत अर्थ में 'क्विप्' प्रत्यय होता है ॥

जैसे—सुष्ठु कृतवान् सुकृत् । कर्मकृत् । पापकृत् । मन्त्रकृत् । पुण्यमकार्षीत् पुण्यकृत् ॥

यह सूत्र भी नियम के लिये है—सु-आदि उपपद होने पर यदि 'क्विप्' हो तो भूत में ही हो, भूत में यदि स्वादि उपपद होने पर प्रत्यय हो तो 'क्विप्' ही हो ॥ ८९ ॥

सोमे सुञः[2] ॥ ९० ॥

इदमपि नियमार्थमेव[3] । 'कर्मणि' इत्यनुवर्त्तते ॥ सोमे । ७ । १ । सुञः । ५ । १ ॥

सोमे कर्मण्युपपदे 'सुञ्' धातोर्भूते 'क्विप्' प्रत्ययो भवति ॥

सोममसोष्ट सोमसुत् । सोमसुतौ ॥ ९० ॥

यह सूत्र भी नियमार्थ ही है ॥ 'कर्मणि' इस पद का अनुवर्त्तन है ।

[सोमे] सोम कर्म उपपद हो तो [सुञः] 'सुञ्' धातु से 'क्विप्' प्रत्यय होता है ॥

जैसे—सोममसोष्ट सोमसुत् । सोमसुतौ । सोमसुतः ॥ ९० ॥

अग्नौ चेः[4] ॥ ९१ ॥

अग्नौ । ७ । १ । चेः । ५ । १ ॥ अग्नौ[5] कर्मण्युपपदे 'चिञ्' धातोर्भूते 'क्विप्' प्रत्ययो भवति ॥

अग्निमचैषीदिति-अग्निचित् । अग्निचितौ । अग्निचितः । इदमपि नियमार्थमेव[6] ॥ ९१ ॥

[अग्नौ] अग्नि कर्म उपपद हो तो [चेः] 'चिञ्' धातु से भूत अर्थ में 'क्विप्' प्रत्यय होता है ॥

जैसे—अग्निमचैषीदित्यग्निचित् । अग्निचितौ । अग्निचितः । यह सूत्र भी नियमार्थ ही है ॥ ९१ ॥

कर्मण्यग्न्याख्यायाम्[7] ॥ ९२ ॥

'चेः' इति 'कर्मणि' इति चानुवर्त्तते । कर्मणि । ७ । १ ।

---

१. 'त्रिविधोऽत्र नियमः' इति काशिका ॥ २. आ० सू०—११२४ ॥
३. 'चतुर्विधोऽत्र नियमः' इति काशिका ॥ ४. आ० सू०—११२५ ॥
५. अग्नि-शब्दोऽत्र इष्टिकारचितस्थण्डिलविशेषे वर्त्तते ॥
६. 'अत्रापि चतुर्विधो नियमः' इति काशिका ॥ ७. आ० सू०—११२६ ॥

अन्याख्यायाम् । ७ । १ ।। कर्मण्युपपदे 'चिञ्' धातोर्भूते कर्मणि कारके 'क्विप्' प्रत्ययो भवत्यग्न्याख्यायाम् ।।

'कर्त्तरि कृत्'[1] इति कर्त्तरि प्राप्तः कर्मणि विधीयते, श्येन इव चितोऽग्निः श्येनचित् । श्येनचिदिति रूढिसंज्ञाज्ञापनायाग्न्याख्याग्रहणं क्रियते । श्येनचिदित्यग्ने रूढिसंज्ञा ।। ९२ ।।

यहां 'चेः' तथा 'कर्मणि' इन पदों का अनुवर्त्तन है ।। कर्म उपपद होने पर भूत अर्थ गम्यमान हो तो 'चिञ्' धातु से [कर्मणि] कर्मकारक में [अग्न्याख्यायाम्] अग्नि अभिधेय होने पर 'क्विप्' प्रत्यय होता है ।।

'कर्त्तरि कृत्' इससे 'क्विप्' कर्त्ता में प्राप्त था, सो कर्म में कहा ।

जैसे—श्येन इव चितोऽग्निः श्येनचित् । श्येनचित् यह अग्नि की रूढ़ि संज्ञा है, इस बात को दर्शाने के लिए सूत्र में अग्न्याख्या ग्रहण किया है ।। ९२ ।।

कर्मणीनि विक्रियः[2] ।। ९३ ।।

'कर्मणि' इत्यनुवर्त्तमाने पुनः कर्मग्रहणमग्न्याख्यकर्मनिवृत्यर्थम् । कर्मणि । ७ । १ । इनि । १ । १ । विक्रियः । ५ । १ ।। इनीति लुप्तविभक्तिको निर्देशः ।।

कर्मण्युपपदे वि-पूर्वात् 'क्रीञ्' धातोर्भूत 'इनिः' प्रत्ययो भवति ।।

सुराविक्रयी । मद्यविक्रयी ।।

वा०—*कर्मणि कुत्सिते*[3] ।। १ ।।

कुत्सिते निन्दिते कर्मण्युपपद' इनि' प्रत्ययो भवतीति शेषः । इह मा भूत्—धान्यविक्रायः । अत्रानेन 'इनिः' प्रत्ययो न भवति किन्तूत्सर्गत्वाद् 'अण्' एव ।। ९३ ।।

यहां 'कर्म' पद के अनुवर्त्तमान होने पर पुनः कर्म ग्रहण अग्न्याख्य कर्म की निवृत्ति के लिये किया है ।। 'इनि' यहां विभक्ति का लोप है ।।

[कर्मणि] कर्म उपपद हो तो [विक्रियः] वि-पूर्वक 'क्रीञ्' धातु से भूतकाल में [इनि] 'इनि' प्रत्यय होता है ।। जैसे—सुराविक्रयी । मद्यविक्रयी ।।

वा०—कर्मणि कुत्सिते—कुत्सित अर्थात् निन्दित कर्म उपपद हो तो 'इनि' प्रत्यय होता है, यह सूत्रार्थ का शेष है इसलिये—धान्यविक्रायः यहां 'इनि' प्रत्यय नहीं होता किन्तु उत्सर्ग 'अण्' ही होता है ।। ९३ ।।

दृशेः क्वनिप्[4] ।। ९४ ।।

'कर्मणि' इत्यनुवर्त्तते । दृशेः । ५ । १ । क्वनिप् १ । १ ।।

---

१. अ०—३ । ४ । ६७ ।। २. आ० सू०—११२७ ।।
३. अ०—३ । २ । ९३ भा० ।। ४. आ० सू०—११२८ ।।

कर्मण्युपपदे 'दृश' धातोः 'क्वनिप्' प्रत्ययो भवति ।।

वाराणसीं दृष्टवान् वाराणसीदृश्वा । पाटलीपुत्रदृश्वा ।। नियमार्थं वचनम्—'दृश' धातोर्भूत एव 'क्वनिप्' स्यान्नान्यत्र ।। ९४ ।।

यहां 'कर्मणि' इस पद का अनुवर्त्तन है कर्म उपपद हो तो [दृशेः] 'दृश' धातु से [क्वनिप्] 'क्वनिप्' प्रत्यय होता है ।।

जैसे—वाराणसीं दृष्टवान् वाराणसीदृश्वा । पाटलिपुत्रदृश्वा ।।

यह सूत्र भी नियमार्थ है—'दृश्'—धातु से भूत में ही 'क्वनिप्' हो अन्यत्र नहीं ।। ९४ ।।

राजनि युधिकृञः[1] ।। ९५ ।।

[राजनि । ७ । १ । युधिकृञः । ५ । १ ।।] राजन् शब्दे कर्मण्युपपदे 'युध-कृञ्' धातुभ्यां भूते 'क्वनिप्' प्रत्ययो भवति ।।

युध-धातुरकर्मकस्तत्रान्तर्भावितण्यर्थत्वात्सकर्मक एव, राजानं योधितवान् राज-युध्वा । राजकृत्वा ।।

'राजनि' इति किम्—शब्दं कृतवान् शब्दकारः ।। ९५ ।।

[राजनि] राजन् शब्द कर्म उपपद हो तो [युधिकृञः] 'युध' तथा 'कृञ्' धातु से भूत अर्थ में 'क्वनिप्' प्रत्यय होता है ।।

'युध' धातु अकर्मक है परन्तु अन्तर्भावितण्यर्थ होने से सकर्मक हो जाता है ।। जैसे—राजानं योधितवान् राजयुध्वा । राजकृत्वा ।।

'राजनि' ग्रहण इसलिये है कि—शब्दं कृतवान् शब्दकारः ।। ९५ ।।

सहे च[2] ।। ९६ ।।

[सहे । ७ । १ । च अ०] सहशब्दस्याव्ययत्वात् कर्मत्वं नास्तीति पृथगारम्भः ।।

सहशब्द उपपदे युधि-कृञ् धातुभ्यां 'क्वनिप्' प्रत्ययो भवति ।।

सहयुध्वा । सहकृत्वा ।। ९६ ।।

सह शब्द के अव्यय होने से कर्मता नहीं है अतः पृथक् सूत्र किया ।।

[सहे] सह शब्द उपपद हो तो [च] 'युधि' तथा 'कृञ्' धातु से 'क्वनिप्' प्रत्यय होता है ।।

जैसे—सहयुध्वा । सहकृत्वा ।। ९६ ।।

सप्तम्यां जनेर्डः[3] ।। ९७ ।।

सप्तम्याम् । ७ । १ । जनेः । ५ । १ । डः । १ । १ ।।

---

१. आ० सू०—११२९ ।।
२. आ० सू०—११३० ।।
३. आ० सू०—११३१ ।।

सप्तम्यन्त उपपदे 'जन' धातो 'ड:' प्रत्ययो भवति ॥

कटे जातः कटजः । उ॰[स]रजः । मन्दुरजः ॥ ९७ ॥

[सप्तम्यां] सप्तम्यन्त उपपद हों तो [जनेः] 'जन' धातु से [डः] 'ड' प्रत्यय होता है ॥

जैसे—कटे जातः कटजः । उपसरजः । मन्दुरजः ॥ ९७ ॥

पञ्चम्यामजातौ[1] ॥ ९८ ॥

'जनेः, डः' इत्यनुवर्त्तते । पञ्चम्याम् । ७ । १ । अजातौ । ७ । १ ॥

अजातिवाचिनि [पञ्चम्यन्ते] सुबन्त उपपदे 'जन' धातो 'ड:' प्रत्ययो भवति ॥

शोकजो रोगः । गोमयाज्जायते गोमयजो वृश्चिकः । संस्कारजः । दुःखजः ॥

'अजातौ' इति किम्—हस्तिनो जातः ॥ ९८ ॥

यहां 'जनेः' तथा 'डः' पद का अनुवर्त्तन है ॥ [अजातौ] अजातिवाची [पञ्चम्याम्] पञ्चम्यन्त सुबन्त उपपद हो तो 'जन' धातु से 'ड' प्रत्यय होता है ॥

जैसे—शोकजो रोगः । गोमयाज्जायते गोमयजो वृश्चिकः । संस्कारजः । दुःखजः ॥

'अजातौ' ग्रहण इसलिये है कि—हस्तिनो जातः ॥ ९८ ॥

उपसर्गे च संज्ञायाम्[2] ॥ ९९ ॥

उपसर्गे । ७ । १ । च [अ० [संज्ञायाम् । ७ । १ ॥

उपसर्ग उपपदे संज्ञायां गम्यमानायां 'जन' धातो 'ड:' प्रत्ययो भवति ॥

वयं प्रजापतेः प्रजा अभूम । प्रजाता इति प्रजाः ॥ ९९ ॥

[उपसर्गे] उपसर्ग उपपद हो तो [संज्ञायाम्] संज्ञा गम्यमान होने पर 'जन' धातु से 'ड' प्रत्यय होता है ॥

जैसे—वयं प्रजापतेः प्रजा अभूम । प्रजाता इति प्रजाः ॥ ९९ ॥

अनौ कर्मणि[3] ॥ १०० ॥

अनौ । ७ । १ । कर्मणि । ७ । १ ॥

कर्मण्युपपदेऽनूपसर्गात् 'जन' धातो 'ड' प्रत्ययो भवति ॥

युधिष्ठिरमनुजातो युधिष्ठिरानुजः । रामानुजो भरतः ॥ १०० ॥

[कर्मणि] कर्म उपपद हो तो [अनौ] अनु-पूर्वक 'जन' धातु से 'ड' प्रत्यय होता है ॥

जैसे—युधिष्ठिरमनुजातो युधिष्ठिरानुजः । रामानुजो भरतः ॥ १०० ॥

---

१. आ० सू०—११३२ ॥ २. आ० सू०—११३३ ॥

३. आ० सू०—११३४ ॥

अन्येष्वपि दृश्यते[1] ॥ १०१ ॥

अन्येषु । ७ । ३ । अपि [अ०] । दृश्यते [क्रियापदम्] ॥

उक्तेभ्योऽन्येष्वप्युपपदेषु 'जन' धातो 'ड:' प्रत्ययो दृश्यते ॥

सप्तम्यामित्युक्तमसप्तम्यामपि दृश्यते । न जायत इत्यज: ॥ अजाताविति्युक्तं जातिवाचिन्युपपदेऽपि दृश्यते । ब्राह्मणज: ॥ क्षत्रियज: ॥ कर्मणीत्युक्तं केवलानूपपदादपि दृश्यते । अनु पश्चाज्जातोऽनुज: ॥

वा०—अन्येभ्योऽपि दृश्यत इति वक्तव्यम्[2] *॥ १ ॥*

इहापि यथा स्यात् । आखा । उखा । परिखा ॥ अन्येषूपपदेष्वपि 'जन' धातो 'ड:' प्रत्ययो दृश्यत इत्युक्तं तत्रान्याभ्य: प्रकृतिभ्योऽ[3]पि 'ड:' प्रत्ययो दृश्यत इति वार्त्तिकारम्भ: । आङ्-पूर्वात् 'खन' धातो 'ड:' । आखा ॥ १०१ ॥

[अन्येष्वपि] उक्त उपपदों से अन्य उपपद होने पर भी 'जन' धातु से 'ड' प्रत्यय [दृश्यते] देखा जाता है ॥

सप्तम्यन्त उपपद 'जन' से 'ड' कहा है परन्तु सप्तमी भिन्न उपपद होने पर भी 'जन' से 'ड' प्रत्यय देखा जाता है । जैसे— न जायत इत्यज: ॥ 'अजातौ' कहा है परन्तु जातिवाची उपपद होने पर भी देखा जाता है । जैसे—ब्राह्मणज: । क्षत्रियज: ॥ कर्म उपपद होने पर अनुपूर्वक 'जन' से 'ड' कहा है परन्तु केवल अनु उपपद से भी देखा जाता है जैसे—अनु पश्चाज्जातोऽनुज: ॥

वा०—अन्येभ्योऽपिदृ०—अन्य उपपद होने पर भी 'जन' धातु से 'ड' प्रत्यय देखा जाता है ऐसा कहा है, परन्तु अन्य प्रकृतियों से भी 'ड' प्रत्यय देखा जाता है, ऐसा कहना चाहिये इस प्रयोजन के लिए यह वार्त्तिक है ॥ जैसे—आङ्पूर्वक 'खन' धातु से 'ड' होकर आखा । उखा । परिखा इत्यादि भी सिद्ध हो जाते हैं ॥ १०१ ॥

निष्ठा[4] ॥ १०२ ॥

'क्तक्तवतू निष्ठा'[5] इति निष्ठा संज्ञा कृता तस्यात्र विधानं क्रियते ॥

तौ क्त-क्तवतू निष्ठासंज्ञकौ प्रत्ययौ भूतकाले भवत: ॥

भिन्न: । भिन्नवान् । भुक्त: । भुक्तवान् ॥

निष्ठासंज्ञायामितरेतराश्रयदोष आपद्यते, सतोश्च क्तक्तवत्वोर्निष्ठासंज्ञा भवति । संज्ञया च क्तक्तवतू विधीयेते । अत इतरेतराश्रयदोषनिवारणाय भाविनी संज्ञाऽत्र विज्ञातव्या, ययो 'निष्ठा' इत्येषा संज्ञा भविष्यति तौ भूते भवत इति ॥

---

१. आ० सू०—११३५ ॥ २. अ०—३ । २ । १०१ भा० ॥

३. 'अपि-शब्द: सर्वोपाधिव्यभिचारार्थ: इति **काशिका**कृदादयस्तदसत् । अन्येष्वपीति सप्तमी-निर्देशात्—उपपदान्तर एव प्राप्नोति, न तु धात्वन्तरेभ्य:, अत एवाह **वार्त्तिककार:**—**अन्येभ्योऽपि०** (अ० ३ । २ । १०१ भा०) इति ॥

४. आ० सू०—११३७ ॥ ५. अ०—१ । १ । २६ ॥

वा०—*आदिकर्मणि निष्ठा*[1] ॥ १ ॥

वर्त्तमानेप्यादिकर्मणि क्तः प्रयुज्यत इति सूत्रेण न प्राप्नोति । प्रकृतः कटं देवदत्तः । प्रकृतवान् कटं देवदत्तः । प्रकरोति कटं देवदत्तः ॥ १०२ ॥

'क्तक्तवतू निष्ठा' इस सूत्र से निष्ठा संज्ञा की है उसका यहां विधान है ॥

[निष्ठा] निष्ठासंज्ञक 'क्तक्तवतू' प्रत्यय भूतकाल में होते हैं ॥

जैसे—भिन्नः । भिन्नवान् । भुक्तः । भुक्तवान् ॥

निष्ठासंज्ञा में इतरेतराश्रय दोष उत्पन्न होता है, क्त-क्तवतू हों तो निष्ठा संज्ञा हो और संज्ञा हो तब 'क्त-क्तवतू' का विधान हो सके । इस प्रकार यहां इतरेतराश्रय दोष आता है उसके निवारणार्थ भावी संज्ञा समझनी चाहिये, अर्थात् जिनकी निष्ठा यह संज्ञा होगी वह भूतकाल में होते हैं ॥

वा०—आदिकर्मणि निष्ठा—वर्त्तमानकाल में भी आदिकर्म में 'क्त' का प्रयोग होता है सो सूत्र से प्राप्त नहीं है, एतदर्थ यह वार्त्तिक है जैसे—प्रकृतः कटं देवदत्तः । प्रकृतवान् कटं देवदत्तः ॥ १०२ ॥

सुयजोर्ङ्वनिप्[2] ॥ १०३ ॥

सुयजोः । ६ । २ । ङ्वनिप् । १ । १ ॥ 'सु[3]-यज' इत्येताभ्यां धातुभ्यां भूते 'ङ्वनिप्' प्रत्ययो भवति ।

सुतवानिति सुत्वा । इष्टवानिति यज्वा ॥ पित्करणं तुगर्थम् ॥ १०३ ॥

[सुयजोः] 'सु-यज' इन धातुओं से भूतकाल में [ङ्वनिप्] 'ङ्वनिप्' प्रत्यय होता है ॥

जैसे—सुतवानिति सुत्वा । इष्टवानिति यज्वा । पित्करण 'तुक्' आगम के लिये है ॥ १०३ ॥

जीर्यतेरतृन्[4] ॥ १०४ ॥

जीर्यतेः । ५ । १ । अतृन् । १ । १ ॥ **जॄष् वयोहानौ**[5] इत्यस्माद्धातोर्भूते 'अतृन्' प्रत्ययो भवति ॥

जरन् । जरन्तौ । जरन्तः । वाऽसरूपविधित्वान्निष्ठाऽपि भवति । जीर्णः ॥१०४॥

[जीर्यतेः] 'जॄष्-वयोहानौ' इस धातु से भूतकाल में [अतृन्] 'अतृन्' प्रत्यय होता है ॥

---

१. अ०—३ । २ । १०२ भा० ॥ (ख) आ० वा०—११८१ ॥

२. आ० सू०—१२२५ ॥

३. इह तु 'सु गतौ' 'षु प्रसवैश्वर्य्ययोः' इत्यनयोरेव निरनुबन्धकयोर्ग्रहणं प्राप्तम्, तदनभिधानात्, उभयपदिना साहचर्य्याद्वा न भवति, 'सुनोते' रेवेह ग्रहणम् ॥

४. आ० सू०—१२२६ ॥ ५. धा०—दिवा० २२ ॥

जैसे——जरन् । जरन्तौ । जरन्तः ॥ यहां वाऽसरूपविधि होने से निष्ठा भी हो जाता है । जैसे—जीर्णः ॥ १०४ ॥

छन्दसि लिट्[1] ॥ १०५ ॥

'छन्दसि लुङ्लङ्लिटः'[2] इति सामान्यकाले लिड् विधीयते तत्र 'धातुसम्बन्धे' इत्यनुवर्त्तते । अत्र धातुसम्बन्धेऽधातुसम्बन्धे च सामान्यविधानार्थं वचनम् ॥ छन्दसि । ७ । १ । लिट् । १ । १ ॥

छन्दसि वेदविषये धातुमात्राद् भूतेऽर्थे 'लिट्' प्रत्ययो भवति ॥

[अहं सूर्य्यमुभयतो ददर्श ।] अहं द्यावापृथिवी आततान[3] । अत्र **तनुविस्तार**[4] इत्यस्माल्लिट् ॥ १०५ ॥

'छन्दसि लुङ्लङ्लिटः' इस सूत्र से 'लिट्' प्रत्यय का विधान सामान्यकाल में है वहां 'धातुसम्बन्धे' इस पद का अनुवर्त्तन है । परन्तु यहां धातुसम्बन्ध हो अथवा न हो सामान्य विधान करने के लिये यह सूत्र है ॥

[छन्दसि] वेदविषय में धातुमात्र से भूत में [लिट्] 'लिट्' प्रत्यय होता है ॥

जैसे—अहं सूर्य्यमुभयतो ददर्श । अहं द्यावापृथिवी आततान । यहां 'तनुविस्तारे' इस धातु से 'लिट्' प्रत्यय हुआ ॥ १०५ ॥

लिटः कानज्वा[5] ॥ १०६ ॥

लिटः । ६ । १ । कानच् । १ । १ । वा [अ०] ॥ छन्दसि विहितस्य लिटः स्थाने कानजादेशो विकल्पेन भवति ॥

प्रजापतिः प्रजया स**ꣳ**रराणः[6] । अत्र रराण इति 'रा' धातोर्लिटः स्थाने 'कानच्' । न च भवति अहं सूर्यमुभयतो ददर्श[7] ॥ १०६ ॥

छन्द में विहित [लिटः] लिट् के स्थान में [कानच्] कानच् आदेश [वा] विकल्प से होता है ॥

जैसे - प्रजापतिः प्रजया **सꣳ**रराणः । यहां 'रराणः' इस उदाहरण में 'रा' धातु से 'लिट्' के स्थान में कानच् है । अहं सूर्य्यमुभयतो ददर्श । यहां 'कानच्' नहीं हुआ ॥ १०६ ॥

---

१. आ० सू०—१२७ ॥ २. अ०—३ । ४ । ६ ॥

३. अनुपलब्धमूलमिदम् ॥॥परन्तु—यो **भानुना पृथिवीं द्यामुतेमामाततान** (ऋ० १० । ८८ । ३) **याः सूर्यो रश्मिभिरातताान** (ऋ० ७ । ४७ । ४) ॥ ननु द्यावापृथिवी आततान (तै० ब्रा०—१ । २ । १ २३ ।) इत्यादयस्तु दृश्यन्त एव ॥

४. धा०—तना०—१ ॥ ५. आ०—सू०—१२८ ॥

६. यजु०—३२ । ५ ॥ ७. यजु०—८ । ९ ॥

क्वसुश्च[1] ॥ १०७ ॥

'छन्दसि-लिटः' इति 'वा' इति चाऽनुवर्त्तते । क्वसुः । १ । १ । च [अ०] ॥

छन्दसि[2] विहितस्य लिटः स्थाने विकल्पेन क्वसुरादेशो भवति ॥

जग्मिवान् । जघ्निवान् । अत्र क्नसोः कित्त्वादुपधालोपः । पेचिवान् । पेठिवान् । न च भवति—अहं द्यावापृथिवी आततान । विकल्पत्वाद् [पक्षे] आतताने इति तिङां श्रवणं भवति ॥ १०७ ॥

यहां 'छन्दसि' 'लिटः' तथा 'वा' इन पदों का अनुवर्त्तन है ॥

छन्द में विहित लिट् के स्थान में विकल्प करके [**क्वसुश्च**] 'क्वसुः' आदेश होता है ॥

जैसे—जग्मिवान् । जघ्निवान् । यहां 'क्वसु' के कित् होने से उपधा लोप हुआ है । पेचिवान् पेठिवान् । 'क्वसु' नहीं भी होता—अहं द्यावापृथिवी आततान । विकल्प होने से पक्ष में 'आतताने' इस में तिङ् का श्रवण होता है ॥ १०७ ॥

भाषायां सदवसश्रुवः[3] ॥ १०८ ॥

'छन्दसि' ग्रहणं निवृत्तम् । भाषायाम् । ७ । १ । सदवसश्रुवः । ५ । १ ॥

भाषायां लौकिकशब्दविषये सद, वस, श्रु इत्येतेभ्यो धातुभ्यः परस्य विकल्पेन 'लिट्' प्रत्ययो भवति, तस्य च लिटः स्थाने नित्यं क्वसुरादेशो भवति, पक्षे सामान्यभूते 'लुङ्' भवति, विशेषभूते परोक्षानद्यतने लिङ्-लङौ भवतः ॥

उपसेदिवान् । सामान्यभूते—उपासदत् । अनद्यतनभूते 'लङ्'—उपासीदत् । परोक्षभूते 'लिट्'—उपससाद ॥ वस—ऊषिवान् । अवात्सीत् । अवसत् । उवास ॥ श्रु—शुश्रुवान् अश्रौषीत् । अशृणोत् । शुश्राव । अत्र लिटः स्थाने लिट्-प्रसङ्गे भूतविषये नित्यं 'क्वसु' भवति । यदि पूर्वं लिट् क्रियेत तर्हि पक्षे लिडेव स्यात् । भूतविषये लिटो विकल्पत्वात् पक्षे यथाप्राप्तं प्रत्यया भवन्ति, तेन सदादिभ्य उक्ताः प्रयोगाः सिध्यन्ति ॥ १०८ ॥

यहां 'छन्दसि' पद का निवर्त्तन है ॥ [**भाषायाम्**] लौकिक शब्द विषय में [**सदवसश्रुवः**] सद, वस, श्रु इन धातुओं से परे विकल्प से 'लिट्' प्रत्यय होता है और उस लिट् के स्थान में नित्य 'क्वसु' आदेश होता है । पक्ष में—सामान्यभूत काल का लुङ्, विशेषभूतपरोक्षानद्यतन-काल के 'लिट्' और 'लङ्' हो जाते हैं ॥

जैसे—उपसेदिवान् । सामान्यभूत में—उपासदत् । अनद्यतनभूत में लङ्—उपासीदत् । परोक्षभूतकाल में लिट्—उपससाद ॥ वस—ऊषिवान् । अवात्सीत् । अवसत् । उवास ।

---

१. आ० सू०—१२२९ ॥

२. कवयस्तु बहुलं (भाषायामपि) प्रयुञ्जते—'तं तस्थिवांसं नगरोपकण्ठे, श्रेयांसि सर्वाण्यधिजग्मुषस्ते' इति **दीपिकाकृत्** ॥

३. आ० सू०—१२३० ॥

श्रु—शुश्रुवान् । अश्रोषीत् । अश्रृणोत् । शुश्राव । यहां लिट् के स्थान में लिट्-विषयक भूतकाल में नित्य 'क्वसु' आदेश होता है । यदि पहिले लिट् किया जाय तो पक्ष में लिट् ही होता । अब भूतविषय में 'लिट्' का विकल्प होने से पक्ष में यथाप्राप्त प्रत्यय होते हैं, अतः सदादि धातुओं से उक्त प्रयोग भी सिद्ध हो जाते हैं ॥ १०८ ॥

उपेयिवाननाश्वाननूचानश्च[1] ॥ १०९ ॥

उपेयिवाननाश्वाननूचानः । १ । १ । च [अ०] ॥ उपेयिवान्[2], अनाश्वान्, अनूचान इति त्रयः शब्दा क्वसु-कानच् प्रत्ययान्ता निपात्यन्ते ॥

इण् गतौ[3]—इत्यस्मात् 'क्वसु' प्रत्यये परतो द्विर्वचनमभ्यासदीर्घत्वमनभ्यासस्य व्यञ्जन एव यणादेशो निपातनात्तत एकाच्त्वाद् 'इट्' आगमः ॥ नञ्-पूर्वाद् **अश भोजन**[4] इत्यस्माद्धातोः क्वसुप्रत्यये कृते द्विर्वचन एकादेशे चैकाच्त्वादिट् प्राप्नोति तदभावो निपात्यते । नाशीदित्यनाश्वान् ।

वा०—अनूचानः कर्त्तरि[5] ॥ १ ॥

अनूचानशब्दः कर्त्तरि निपात्यते । अनूपपदाद् 'वच' धातोः 'कानच्' द्विर्वचनं संप्रसारणं च निपात्यते । अनूक्तवानित्यनूचानः । अनूक्तमित्येवान्यत्र ।

का०—अपर आह—

नोपेयिवान्निपात्यो द्विर्वचनादिड् भविष्यति परत्वात् ।
अन्येषामेकाचां द्विर्वचनं नित्यमित्याहुः ॥ १ ॥
अस्य पुनरिट् च नित्यो द्विर्वचनं च न विहन्यते ह्यस्य ।
द्विर्वचने चैकाच्त्वात्तस्मादिड् बाधते द्वित्वम्[6] **॥ २ ॥**

आर्ष्यछन्दसी इमे । केषाञ्चिदाचार्याणां मतमिदम् 'उपेयिवान्' इति निपातनं नैव कर्त्तव्यम् । अयमिण् धातुरुपदेश एकाच् द्विर्वचनादेकादेशे कृतेप्येकाजेव । पुनः सर्वया नित्यत्वात् परत्वाद् 'इट्' भविष्यति । अन्येषामुपदेशैकाचां नित्यत्वात् पूर्वं द्विर्वचनं पश्चादनेकाच्त्वादिड् न भविष्यति । अर्थान्निपातनकरणस्यैतत्प्रयोजनं किञ्चिदप्राप्तं कार्य्यं यथा स्यात् । उपेयिवानित्यत्र किमप्यप्राप्तं कार्य्यं नास्तीति ॥ १०९ ॥

उपेयिवान्, अनाश्वान्, अनूचान ये तीन शब्द क्वसु-कानच् प्रत्ययान्त निपातन हैं ॥

---

१. आ० सू०—१२३२ ॥

२. **परेयिवांसं प्रवतो महीरनु** (ऋ० १० । १४ । १) **एतद्वा एनं देवा ईयिवाꣳसम्** (श०—६ । १ । १३) इत्यादिष्वन्योपसर्गपूर्वान्निरुपसर्गपूर्वाच्च दर्शनान्नात्रोपसर्गस्तन्त्रम् ॥

३. धा०—अदा०—३६ ॥ ४. धा०—क्र्या०—५१ ॥

५. अ०—३ । २ । १०९ भा० ॥ ६. अ०—३ । २ । १०९ ॥

उपेयिवान्—इस में इण् गतौ' धातु से 'क्वसु' प्रत्यय के परे रहते द्विर्वचन अभ्यास को दीर्घत्व अभ्यास से उत्तर को व्यञ्जन परे रहने पर यणादेश का निपातन है। पुनः एकाच्त्व मान करके 'इट्' का आगम होता है॥ अनाश्वान्—इसमें नञ्-पूर्वक 'अश भोजने' धातु से 'क्वसु' प्रत्यय द्विर्वचन एकादेश करने पर एकाच्त्व होने से 'इट्' प्राप्त होता है उसका अभाव निपातन है। नाशीदित्यनाश्वान्॥

१—वा०—अनूचानः कर्त्तरि—अनूचान शब्द का कर्त्ता में निपातन है। अनु उपपद 'वच' धातु से 'कानच्' द्विर्वचन तथा सम्प्रसारण निपातन है। अनूक्तवानित्यनूचानः। अन्यत्र 'अनुक्तम्' ऐसा ही प्रयोग होगा॥

का—नोपेयिवान्निपात्यो.....॥ १॥
अस्य पुनरिट् च नित्यो..... .....॥ २॥

ये दोनों कारिकायें आर्य्या छन्द में हैं॥ किन्हीं आचार्य्यों का यह मत है कि—'उपेयिवान्' इसका निपातन नहीं करना चाहिये क्योंकि यह 'इण्' धातु उपदेश में एकाच् है, द्विर्वचन के अनन्तर एकादेश करने पर भी एकाच् ही हो जाती है। अतः नित्य तथा परत्व होने से 'इट्' हो ही जावेगा॥ अन्य निपातनों में—उपदेश में एकाच् धातुओं को नित्य होने से पहिले द्विर्वचन होगा पुनः उनके अनेकाच् होने से 'इट्' नहीं होगा। अर्थात् निपातन करने का यह प्रयोजन होता है कि जो सूत्र से सिद्ध नहीं होता वह निपातन से हो जावे, परन्तु 'उपेयिवान्' में कुछ भी अप्राप्य कार्य्य नहीं है॥ १०९॥

लुङ्'॥ ११०॥

लुङ्। १। १॥ भूतेऽर्थे वर्त्तमानाद् धातो 'लुङ्' प्रत्ययो भवति॥

आतीत्। अचेतीत्। ऐधिष्ट॥

१—वा०—वसेर्लुङ् रात्रिशेषे जागरणसन्ततौ[2]॥

रात्रिशेषे रात्रेश्चतुर्थे यामे प्रहरत्रयस्य वृत्तान्ते वर्ण्यमानेऽनद्यतनत्वाल्लङ् प्राप्तस्तदर्थोऽयमारम्भः। न्याय्ये प्रत्युत्थानसमये रात्रेश्चतुर्थे यामे प्रत्युपस्थितं कश्चित् कञ्चित् पृच्छति। क्व भवानुषित इति। स आह—अमुत्रावात्समिति। अमुत्रावसमिति 'लङ्' प्राप्तः। यदि सर्वां रात्रिं जागर्त्ति तदैव लुङा भवितव्यम्। यद्वा मुहूर्त्तमात्रमपि सुप्त्वा प्रबुध्य च प्रयोगं कुर्य्यात् तदा तु लङैव भवितव्यम्। अमुत्रावसमिति। रात्रेश्चतुर्थो यामो वर्त्तमानदिने गण्यते, तेन चतुर्थयामसहितस्य वर्त्तमानदिवसस्याद्यतनसंज्ञा पश्चाद् व्यतीतस्य रात्रेः प्रहरत्रयस्य चानद्यतनसंज्ञा॥ ११०॥

भूत अर्थ में वर्त्तमान धातु से [लुङ्] 'लुङ्' प्रत्यय होता है॥

जैसे—आतीत्। अचेतीत्। ऐधिष्ट॥

---

१. आ० सू०—८६॥ २. अ०—३। २। ११०॥

वा०—**वसेर्लुङ् रात्रिशेषे०**—रात्रिशेष अर्थात् रात्रि के चोथे पहर में तीन प्रहर का वृत्तान्त कहने में अनद्यतन होने से 'लङ्' प्राप्त था अतः यह 'लुङ्' विधानार्थ वार्त्तिक है ॥ रात्रि के चतुर्थ प्रहर में आये हुए को कोई पूछता है, आप कहां रहे ? वह बोला—**'अमुत्रावात्सम् । अमुत्रावसम्'** ऐसा 'लङ्' प्राप्त था, यदि सारी रात जागता रहा हो तब तो 'लुङ्' हो ही जायेगा, परन्तु यदि मुहूर्त्तमात्र भी सोकर जाग पड़ता है, पुनः यदि वह कहता है तब 'लङ्' ही होगा—**अमुत्रावसमिति** ॥

रात्रि का चतुर्थ प्रहर वर्त्तमान दिन में गिना जाता है, अतः **चतुर्थयाम** सहित वर्त्तमान दिन की **अद्यतन** संज्ञा है, पीछे के रात्रि के बीते हुए तीन प्रहर की **अनद्यतन** संज्ञा है ॥ ११० ॥

अनद्यतने लङ्[1] ॥ १११ ॥

अनद्यतनसंज्ञा पूर्वं दर्शिता । अनद्यतने । ७ । १ । लङ् । १ । १ । न विद्यतेऽद्यतनोऽस्मिन् सोऽनद्यतनस्तस्मिन् । नत्वत्र तत्पुरुषसमासः ॥

अनद्यतनभूतेऽर्थे वर्त्तमानाद् धातो 'लँङ्' प्रत्ययो भवति ॥

अभवत् । अकरोत् ॥

बहुव्रीहिनिर्देशः किमर्थः—अद्य च ह्यश्च गते दिवसेऽभुक्ष्महि । अत्राद्यतनानद्यतनयोर्**मिश्रीभावे** 'लङ्' मा भूत् । लुङेव यथा स्यात् ॥

वा०—परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये[2] ॥ १ ॥

लोके विज्ञातः प्रसिद्धो लोकविज्ञातः । प्रयोक्ता यदा परोक्षभूतस्य प्रयोगं कुर्य्यात्तदा, प्रयुक्तं पदार्थं द्रष्टुमिच्छेत् पश्येत् । ईदृशे परोक्षभूतकाले 'लङ्' प्रत्ययो भवति । **'परोक्षे लिट्'**[3] इति लिट् प्राप्तस्तस्यायमपवादः । अरुणद् यवनः साकेतम्[4] । अरुणद् यवनो माध्यमिकाम्[5] । अरुणदिति रुधधातोर्लङ् । साकेतशब्दोऽत्र कस्यचिन्नगरस्य वाचकः, तच्च प्रयोक्तुर्दर्शनविषय एव, प्रयोक्ता द्रष्टुमिच्छेत् पश्येत् ॥ 'परोक्षे' इति किमर्थम्—उदगादादित्यः । उदित इत्यर्थः ॥ 'लोकविज्ञाते' इति किमर्थम्—चकार कटं देवदत्तः । तुच्छकार्य्यत्वादप्रसिद्धम् । 'प्रयोक्तुर्दर्शनविषये' इति किमर्थम्—जघान कंसं किल वासुदेवः । यदि प्रयोक्ता कंसं द्रष्टुमिच्छेत्तर्हि तदभावे कं पश्येत् ॥ १११ ॥

अद्यतन संज्ञा पूर्वसूत्र में दर्शा चुके हैं ॥ न "विद्यतेऽद्यतनोऽस्मिन् सोऽनद्यतनस्तस्मिन्" अनद्यतन इस पद में तत्पुरुषसमास नहीं है किन्तु बहुव्रीहि है । [**अनद्यतने**] अनद्यतन भूत अर्थ में वर्त्तमान धातु से [**लङ्**]'लङ्' प्रत्यय होता है ॥ जैसे —**अभवत् । अकरोत्** ॥

बहुव्रीहिनिर्देश का यह प्रयोजन है कि—जहां आज और गत कल दिन में खाया, ऐसे प्रयोग में 'अभुक्ष्महि' यहां 'लुङ्' ही होगा, क्योंकि अद्यतन और अनद्यतन के मिले होने से 'लङ्' नहीं होता ॥

---

१. आ० सू०—७४ ॥ २. अ० ३ । २ । १११ भा० ॥
३. अ० ३ । २ । ११५ ॥ ४. अयोध्या इति प्रसिद्धम् ॥
५. चित्तौड़गढतः क्रोशत्रयानन्तरं नगरीनाम्ना प्रसिद्धं स्थानम् ॥

वा०—परोक्षे च लोक०—प्रयोक्ता जब लोक में प्रसिद्ध पदार्थ का परोक्षभूत का प्रयोग करे और यदि वह चाहे तो उस प्रयुक्त पदार्थ को देख भी सके, ऐसे परोक्षभूत काल में धातु से 'लङ्' प्रत्यय होता है ॥

'परोक्षे लिट्' से लिट् प्राप्त था उसका यह अपवाद है। जैसे—**अरुणद् यवनः साकेतम्। अरुणद् यवनो माध्यमिकाम्** ॥ 'अरुणत्' इसमें 'रुध' धातु से 'लङ्' है। साकेत शब्द किसी नगर का वाची है। वह प्रयोक्ता का दर्शनविषय है अर्थात् प्रयोक्ता चाहे तो देख सकता है॥ 'परोक्षे' ग्रहण इसलिये है कि—**उदगादादित्यः**। अर्थात् उदित हुआ ॥

'लोकविज्ञाते' इसलिये है कि—**चकार** कटं देवदत्तः। कार्य्य के तुच्छ होने से अप्रसिद्ध है ॥ 'प्रयोक्तुर्दर्शनविषये' इसलिये है कि——**जघान** कंस किल वासुदेवः ॥ यदि प्रयोक्ता कंस को देखना चाहे तो देख नहीं सक्ता, अतः उपर्युक्त उदाहरणों में लङ् नहीं होता ॥ १११ ॥

अभिज्ञावचने लृट्'॥ ११२ ॥

लङोऽपवादः। अभिज्ञावचने। ७। १। लृट्। १। १। अभिज्ञायाः स्मृतेर्वचनमभिज्ञावचनम् ॥

अभिज्ञावचन उपपदे सति भूताऽनद्यतने 'लृट्' प्रत्ययो भवति ॥

अभिजानासि देवदत्त कश्मीरेषु वत्स्यामः। स्मरसि देवदत्त कश्मीरेषु वत्स्यामः। अत्राभिजानासि स्मरसीत्यभिज्ञावचन उपपदे ॥

'अभिज्ञावचने' इति किम्—पचालेष्ववसम् ॥ **वचनग्रहणं किमर्थम्**—अभिजानासीत्यभिज्ञायामेव 'लृट्' स्यात् ॥ ११२ ॥

यह सूत्र 'लङ्' का अपवाद है [अभिज्ञावचने] अभिज्ञावचन अर्थात् स्मृति को कहने वाला उपपद हो तो भूतानद्यतन अर्थ में धातु से [लृट्] 'लृट्' प्रत्यय होता है॥

जैसे—**अभिजानासि देवदत्त कश्मीरेषु वत्स्यामः। स्मरसि देवदत्त कश्मीरेषु वत्स्यामः**। यहां अभिजानासि, स्मरसि ये दोनों अभिज्ञावचन उपपद हैं ॥

'अभिज्ञावचने' ग्रहण इसलिये है कि—पचालेष्ववसम् ॥ 'वचन' ग्रहण इसलिये है कि—स्मृतिवचनमात्र उपपद होने पर लृट् हो जावे। अन्यथा केवल 'अभिजानासि' इसी उपपद के योग में लृट् होता ॥ ११२ ॥

न यदि[2] ॥ ११३ ॥

पूर्वसूत्रेण प्राप्तो विधिः प्रतिषिध्यते। न [अ०] यदि। ७। १ ॥

यच्छब्दस्य प्रयोगेऽभिज्ञावचन उपपदे भूतानद्यतने वर्त्तमानाद् धातो 'लृट्' प्रत्ययो न भवति ॥

अभिजानासि देवदत्त यत्कश्मीरेष्वसाम। स्मरसि देवदत्त यत्कश्मीरेष्वगच्छाम ॥ ११३ ॥

---

१. आ० सू०—७४३ ॥ २. आ० सू०—७४४ ॥

पूर्वसूत्र से प्राप्त विधि का यह प्रतिषेध सूत्र है ॥ [यदि] यत् शब्द के प्रयोग में अभिज्ञा-वचन उपपद हो तो भूतानद्यतन अर्थ में वर्त्तमान धातु से 'लट्' प्रत्यय [न] नहीं होता ॥

जैसे—अभिजानासि देवदत्त यत्कश्मीरेष्ववसाम । स्मरसि देवदत्त यत्कश्मीरेष्व-गच्छाम ॥ ११३ ॥

विभाषा साकाङ्क्षे[1] ॥ ११४ ॥

प्राप्ताप्राप्तविभाषेयम् । अभिज्ञावचन इति नित्ये प्राप्ते, यद्योगेऽप्राप्ते । अभिज्ञा-वचने' इत्यनुवर्त्तते, 'यदि' इति नानुवर्त्तते । विभाषा [अ०] । साकाङ्क्षे । ७ । १ ॥ आकाङ्क्षया सह वर्त्तमान साकाङ्क्षम् । अभिज्ञावचन उपपदे यद्योगेच साकाङ्क्षे भूतानद्यतनेऽर्थे वर्त्तमानाद् धातोर्विकल्पेन 'लट्' प्रत्ययो भवति पक्षे लङेव ॥

भा०—विभाषा साकाङ्क्षे सर्वत्र । क्व सर्वत्र । यदि च, अयदि च । यदि तावत्—अभिजानासि देवदत्त यत् कश्मीरान् गमिष्यामः । यत्कश्मीरानगच्छाम । यत्तत्रौदनं भोक्ष्यामहे । यत्तत्रौदनमभुञ्ज्महि । अयदि—अभिजानासि देवदत्त कश्मीरान् गमिष्यामः । कश्मीरानगच्छाम । तत्रौदनं भोक्ष्यामहे । तत्रौदनमभुञ्ज्-महि ॥

इदं सर्वं सूत्रस्यैव व्याख्यानं महाभाष्यकारेण दर्शितम् ॥ ११४ ॥

यह प्राप्ताऽप्राप्तविभाषा है । अभिज्ञावचन में नित्य प्राप्त था, तथा 'यत्' के योग में अप्राप्त था ॥ यहां 'अभिज्ञावचने' इस पद का अनुवर्तन है 'यदि' पद का नहीं ॥ साकाङ्क्षम् = आकाङ्क्षा के सहित ॥

अभिज्ञावचन उपपद हो तो यत् का योग हो चाहे न हो तो भी [**साकाङ्क्षे**] साकाङ्क्षता गम्यमान होने पर भूतानद्यतन अर्थ में वर्त्तमान धातु से [**विभाषा**] विकल्प करके 'लट्' प्रत्यय होता है, पक्ष में 'लङ्' ही होता है ॥

भा०—विभाषा साकाङ्क्षे सब जगह करना चाहिये । सब जगह कहां ? यत् के योग में तथा विना भी यत् योग के । जैसे—यत् के योग में—अभिजानासि देवदत्त यत् कश्मीरान् गमिष्यामः । यत् कश्मीरानगच्छाम । यत्तत्रौदनं भोक्ष्यामहे । यत्तत्रौदनमभुञ्ज्महि ॥ यत् योग के विना—अभिजानासि देवदत्त कश्मीरान् गमिष्यामः । कश्मीरानगच्छाम । तत्रौदनं भोक्ष्यामहे । तत्रौदनमभुञ्ज्महि ॥

यह सारा सूत्र का ही व्याख्यान महाभाष्यकार ने दर्शाया है ॥ ११४ ॥

परोक्षे लिट्[2] ॥ ११५ ॥

भूतानद्यतन इत्यनुवर्त्तते । परोक्षे । ७ । १ । लिट् । १ । १ ॥ अनद्यतने लङ्-इत्यस्यापवादः ॥

---

१. आ० सू०—७४५ ॥ २. आ० सू०—२९ अत्र सुव्याख्यातः ॥

भूतानद्यतनपरोक्षेऽर्थे वर्त्तमानाद् धातो 'लिट्' प्रत्ययो भवति ॥

चकार कटं देवदत्तः । जहार सीतां रावणः ॥

'परोक्षे' इति किम्—उदगात्सूर्यः । अवर्षीन्मेघः । अत्र सामान्यभूते लुङेव भवति ॥

भा०—परोक्ष इत्युच्यते किं परोक्षं नाम ?

का०—परोभावः परस्याक्षे परोक्षे लिटि दृश्यताम् ।

उत्त्वं वादेः परादक्ष्णः सिद्धं वाऽस्मान्निपातनात्[1] *॥ १ ॥*

अक्षि-शब्द इन्द्रियवाची, अक्ष्ण इन्द्रियेभ्यः परं पृथग्भूतं परोक्षम् । समासान्तोऽत्राच् प्रत्ययः, अक्षशब्दे परतः परशब्दस्य 'परो' इत्यादेशस्तेन परोक्ष इति शब्दः । अथवाऽक्षशब्दस्यादेरकारस्य 'उत्त्वं' तेन परोक्ष इति सिध्यति । अथवाऽस्मिन् सूत्रे परोक्षशब्दो निपातनात् सिध्यति ॥ **भा०—कथं जातीयकं पुनः परोक्षं नाम ? केचित्तावदाहुर्वर्षशतवृत्तं परोक्षमिति । अपर आहुः—वर्षसहस्रवृत्तं परोक्षमिति । अपर आहुः—कुड्यकटान्तरितं परोक्षमिति । अपर आहुः—द्व्यहवृत्तं त्र्यहवृत्तं परोक्षमिति ॥** सर्वं स्पष्टमेव ।

वा०—सुप्तमत्तयोरुत्तमः[2] *॥ १ ॥*

स्वसाध्यायाः क्रियायाः प्रत्यक्षाभिमानं भवति । तस्मादप्राप्तो 'लिड्' विधीयते । सुप्तमत्त इति शब्दद्वयोपपदाद् भूतानद्यतने वर्त्तमानाद् धातोर्लिट उत्तमपुरुषो भवति । सुप्तोऽहं किल विललाप । मत्तोऽहं किल विललाप ।

वा०—परोक्षे लिडत्यन्ताऽपह्नवे च[3] *॥ २ ॥*

अत्यन्तापह्नवे केवलमिथ्याभाषणे धातोर्लिट उत्तमपुरुषो भवति ।

नो अहं[4] खण्डिकान् जगाम । नो अहं[4] कलिङ्गान्[5] जगाम ॥ ११५ ॥

यहां 'भूते, अनद्यतने' पदों का अनुवर्त्तन है ॥ यह सूत्र 'अनद्यतने लङ्' का अपवाद है ॥

भूतानद्यतन [परोक्षे] परोक्ष अर्थ में वर्त्तमान धातु से [लिट्] 'लिट्' प्रत्यय होता है जैसे—चकार कटं देवदत्तः । जहार सीतां रावणः ॥

'परोक्षे' ग्रहण इसलिये है कि—उदगात्सूर्य्यः । अवर्षीन्मेघः । यहां सामान्यभूत होने के कारण 'लुङ्' ही होता है ॥

भा०—परोक्ष क्या वस्तु है ?

---

१. अ०—३ । २ । ११५ ॥ २. अ०—३ । २ । ११५ ॥

३. भा०—३ । २ । ११५ भा० ॥ (ख) आ० वा०—७४६ ॥

४. भाष्ये त्वेवं पाठः—**नो खण्डिकान् जगाम । नो कलिङ्गान् जगाम ॥**

५. 'उड़ीसा' इति ख्यातः ॥

का०—परोभावः परस्याक्षै०—अक्षिशब्द इन्द्रियवाची है जो इन्द्रियों से परे अर्थात् पृथग्भूत है वह परोक्ष है। यहां समासान्त 'अच्' प्रत्यय है। अक्ष-शब्द के परे रहते 'पर' शब्द को 'परो' यह आदेश होकर परोक्ष शब्द सिद्ध हो जाता है॥ **अथवा** अक्ष–शब्द के आदि अकार को 'उकार' आदेश होकर **परोक्ष** सिद्ध हो जाता है॥ **अथवा** सूत्र में निपातन से परोक्षशब्द सिद्ध हो जाता है॥

भा०—(प्रश्न)—परोक्ष का स्वरूप क्या है ?

(उत्तर)—कोई कोई कहते हैं कि—सौ वर्ष बीत जाने पर परोक्ष होता है। किसी का मत है कि सहस्र वर्ष व्यतीत होने पर परोक्ष कहाता है। कोई कहते हैं भित्ति तथा कट (चटाई) के व्यवधान होने पर भी परोक्ष होता है॥ कोई कोई कहते हैं कि—दो दिन या तीन दिन का बीता हुआ भी परोक्ष कहाता है॥

वा०—सुप्तमत्तयोरु०—अपने आप से हुई क्रिया में प्रत्यक्षाभिमान होता है। इस कारण से अप्राप्त 'लिट्' का विधान है॥ सुप्त, मत्त यह दो शब्द उपपद हों तो भूतानद्यतन काल में वर्त्तमान धातु से लिट् तथा उत्तम पुरुष होता है। जैसे—सुप्तोऽहं किल **विललाप**। मत्तोऽहं किल विललाप॥ सोते हुए मैं विलाप करता रहा। मत्त हुआ हुआ विलाप करता रहा॥

वा०—परोक्षे लिडत्यन्ता०—अत्यन्तापह्नव अर्थात् केवल मिथ्याभाषण अर्थ में धातु से लिट् का उत्तम पुरुष होता है॥

जैसे—नो अहं खण्डिकान् जगाम। नो अहं कलिङ्गान् जगाम॥ ११५॥

हशश्वतोर्लङ् च[1]॥ ११६॥

पूर्वेण 'लिट्' प्राप्तस्तस्यायमपवादः। चकारग्रहणाल्लिडप्यनुवर्त्तते। हशश्वतोः। ७। २। लङ्। १। १। च [अ०]॥

'ह-शश्वत्' इत्युपपदद्वयाद् भूतानद्यतनपरोक्षे वर्त्तमानाद् धातो 'लँङ्' प्रत्ययो भवति चकाराल्लिट् च॥

इति हाकरोत्। इति ह चकार। शश्वदकरोत्। शश्वच्चकार। अत्र लकारार्थे परं भवति विप्रतिषेधेन॥ ११६॥

पूर्व सूत्र से लिट् प्राप्त था उसका यह अपवाद है॥ चकार ग्रहण से 'लिट्' का अनुवर्त्तन है॥

[हशश्वतोः] ह तथा शश्वत् ये उपपद हों तो भूतातनद्यन परोक्ष में वर्त्तमान धातु से [लङ्] 'लङ्' प्रत्यय होता है, चकार से 'लिट्' भी॥ जैसे—इति हाऽकरोत्। इति ह चकार। शश्वदकरोत्। शश्वच्चकार। यहां लकारार्थ में विप्रतिषेध से पर कार्य्य हो जाता हैं॥ ११६॥

---

१. आ० सू०—७४७॥

प्रश्ने चासन्नकाले[1] ॥ ११७ ॥

अत्रापि चकारेण 'लङ्-लिटौ' अनुवर्त्तते । अत्रानद्यतन इति नानुवर्त्तते । आसन्नो[2] वर्त्तमानसामीप्यकालस्तत्रानद्यतनस्याऽसंभवात् । प्रश्ने । ७ । १ । च । [अ०] । आसन्नकाले । ७ । १ ॥

प्रश्ने गम्यमाने परोक्ष आसन्नभूतकाले वर्त्तमानाद् धातोर्लङ्-लिटौ प्रत्ययौ भवतः ॥

देवदत्तोऽगच्छत् किम् ? देवदत्तो जगाम किम् ?

'प्रश्ने' इति किम्—जघान कंसं किल वासुदेवः । आसन्नकालस्यापीदमेव प्रत्युदाहरणम् ॥ ११७ ॥

यहां भी चकार से 'लङ्-लिट्' पदों का अनुवर्त्तन है । यहां 'अनद्यतन' पद का अनुवर्त्तन नहीं, क्योंकि यहां वर्त्तमानकाल के समीप काल का नाम आसन्नकाल है उसमें अनद्यतनकाल की सम्भावना ही नहीं ॥

[**प्रश्ने**] प्रश्न गम्यमान हो तो परोक्ष [**आसन्नकाले**] आसन्नभूतकाल में वर्त्तमान धातु से 'लङ्-लिट्' प्रत्यय होते हैं ॥

जैसे—देवदत्तोऽगच्छत् किम् ? देवदत्तो **जगाम** किम् ?

'प्रश्ने' ग्रहण इसलिये है कि—**जघान** कंसं किल वासुदेवः ॥ 'आसन्नकाले' इसका भी यही प्रत्युदाहरण है ॥ ११७ ॥

लट् स्मे[3] ॥ ११८ ॥

भूतानद्यतनपरोक्ष इत्यनुवर्त्तते ॥ अनद्यतनपरोक्षभूतकाले वर्त्तमानात् स्मशब्दोपपदाद् धातो 'लट्' प्रत्ययो भवति ॥

धर्मेण स्म कुरवो युध्यन्ते । युधिष्ठिरो यजते स्म । ययुधिरे, इयाजेति लिट् प्राप्तस्तस्यायमपवादः । हशश्वल्लक्षणात् स्म लक्षणो भवति परविप्रतिषेधेन । पुरालक्षणाच्च पूर्वविप्रतिषेधेन । न ह स्म वै पुरा शश्वदग्निरपरशुवृक्णं दहति । अत्र हशश्वदुपपदत्त्वाल्लङ्-लिटौ प्राप्नुतः । **'पुरि लुङ् चास्मे'**[4] इति 'लुङ्' प्राप्तः सर्वेभ्यो विप्रतिषेधेन स्मलक्षणो 'लट्' भवति ॥ ११८ ॥

यहां 'भूतानद्यतन परोक्षे' इन का अनुवर्त्तन है ॥ अनद्यतनपरोक्षभूतकाल में वर्त्तमान धातु से [**स्मे**] स्म शब्द उपपद हो तो [लट्] 'लट्' प्रत्यय होता है ॥

जैसे—धर्म्मेण स्म कुरवो **युध्यन्ते** । युधिष्ठिरो यजते स्म । ययुधिरे, इयाज ऐसा लिट् प्राप्त था उसका यह अपवाद है ॥

---

१. आ० सू०—७४८ ॥

२. 'पञ्चवर्षाभ्यन्तरमासन्नकाल' इति वदतां मतेऽनद्यतन इत्यनुवर्त्तते ॥

३. आ० सू०—७४९ ॥ ४. अ०—३ । २ । १२२ ॥

'हशश्व०' सूत्र की अपेक्षा 'लट् स्मे' सूत्र परविप्रतिषेध से हो जाता है। और 'पुरि लुङ्०' सूत्र की अपेक्षा पूर्वविप्रतिषेध से हो जाता है॥ **न ह स्म वै पुरा** शश्वदग्निरपरशुवृक्णं दहति। यहां ह-शश्वद् उपपद होने पर लङ् और लिट् प्राप्त थे 'पुरि लुङ् चास्मे' सूत्र से सब को बाधकर विप्रतिषेध से 'लुङ्' प्राप्त था परन्तु स्मलक्षण 'लट्' हो जाता है॥ ११८॥

अपरोक्षे च[1]॥ ११९॥

भूतानद्यतन इत्यनुवर्त्तते। **अपरोक्षे**। ७। १। **च** [अ०]॥

अपरोक्षे भूतानद्यतने वर्त्तमानात् स्मोपपदाद् धातो 'लट्' प्रत्ययो भवति॥

अध्यापयति स्म गुरुर्माम्। पिता मे ब्रवीति स्म। मया सह पुत्रो गच्छति स्म॥ ११९॥

यहां 'भूतानद्यतने' इस पद का अनुवर्त्तन है॥ [**अपरोक्षे**] अपरोक्षभूतानद्यतन में वर्त्तमान [**च**] स्म उपपद धातु से 'लट्' प्रत्यय होता है॥ जैसे—**अध्यापयति स्म** गुरुर्माम्। पिता मे **ब्रवीति स्म**। मया सह पुत्रो गच्छति स्म॥ ११९॥

ननौ पृष्ठप्रतिवचने[2]॥ १२०॥

अत्र 'अनद्यतनपरोक्षौ' निवर्तेते। सामान्यभूतेऽयं विधिस्तत्र 'लुङ्' प्राप्तस्तस्यायमपवादः। **ननौ**। ७। १। **पृष्टप्रतिवचने**। ७। १। ननुशब्दोऽव्ययवाची। पृष्टस्य प्रतिवचनमुत्तरं तस्मिन्।

पृष्टप्रतिवचनेऽर्थे वर्त्तमानात् 'ननु' शब्दोपपदाद् धातोः सामान्यभूते 'लट्' प्रत्ययो भवति॥

ननु ब्रवीमि शिष्यं सूत्रम्। शिष्येण सूत्रमहं पृष्टस्तदुत्तरमवोचमित्यर्थः॥

'पृष्टप्रतिवचने' इति किम्—नन्ववोचत् पण्डितः॥ १२०॥

यहां 'अनद्यतने' तथा 'परोक्षे' पदों का निवर्त्तन है। यह सूत्र सामान्यभूत-काल में प्रत्यय विधान करता है लुङ् प्राप्त था उसका यह अपवाद है॥ ननु-शब्द अव्ययवाची है, पृष्टप्रतिवचनम् = उत्तर अर्थात् जो पूछने पर कहा जावे॥ [**पृष्टप्रतिवचने**] पृष्टप्रतिवचन अर्थात् उत्तर देने अर्थ में वर्त्तमान [**ननौ**] ननु शब्द उपपद हो तो धातु से सामान्यभूत में 'लट्' प्रत्यय होता है॥

जैसे-- **ननु ब्रवीमि** शिष्यं सूत्रम्। अर्थात् शिष्य से पूछे हुए सूत्र का उत्तर दे रहा हूं॥

'पृष्टप्रतिवचने' ग्रहण इसलिये है कि—**नन्ववोचत्** पण्डितः। यहां 'लट्' **न** हो॥ १२०॥

नन्वोर्विभाषा[3]॥ १२१॥

अप्राप्तविभाषेयम्। सामान्यभूतकाल एव विधिरयम्। तत्र लुङोऽपवादः। **नन्वोः**। ७। २। **विभाषा** [अ०]॥

---

१. आ० सू०—७५०॥ २. आ० सू०—७५१॥

३. आ० सू०—७५२॥

न, नु इत्यव्ययद्वयोपपदात् सामान्यभूते वर्त्तमानाद् धातोः पृष्टप्रतिवचने गम्यमाने विकल्पेन 'लट्' प्रत्ययो भवति ।। किं ग्राममगमस्त्वम् ? । न गच्छामि भोः । नु गच्छामि भोः । नागमं भोः । न्वगमं भोः । पक्षे लुङेव भवति ।। १२१ ।।

यह सूत्र अप्राप्तविभाषा है यह सूत्र सामान्यभूतकाल में प्रत्यय विधान करता है । यह 'लुङ्' का अपवाद है ।।

[नन्वोः] न, नु ये अव्यय उपपद हों तो सामान्यभूत में वर्त्तमान धातु से पृष्टप्रतिवचन गम्यमान होने पर [विभाषा] विकल्प से 'लट्' प्रत्यय होता है ।।

जैसे—किं ग्राममगमस्त्वम् ? न गच्छामि भोः । नु गच्छामि भोः । नागमं भोः । न्वगमं भोः । पक्ष में 'लुङ्' ही होता है ।। १२१ ।।

पुरि लुङ् चास्मे[1] ।। १२२ ।।

अस्मिन् सूत्रे लुङ्ग्रहणसामर्थ्याद् 'अनद्यतन' ग्रहणमनुवर्त्तते ।। यदि सामान्यभूते स्यात्तर्हि विभाषाऽनुवृत्या स्यादेव पक्षे 'लुङ्' । चकारग्रहणाद् 'विभाषा लट्' इत्यनुवर्त्तते ।। पुरि[2] । ७ । १ । लुङ् । १ । १ । च [अ०] । अस्मे । ७ । १ ।। स्मशब्दरहिते पुर्य्युपपदेऽनद्यतनभूते वर्त्तमानाद् धातो 'लुङ्-लटौ' विकल्पेन भवतः पक्षे च 'लङ्-लिटौ' । एवं चत्वारः प्रत्यया अत्र भवन्ति ।। रथेनाग्रं पुरा याति । रथेनाऽग्रं पुराऽयासीत् । पक्षेऽनद्यतनभूते लङ्-रथेनाऽग्रं पुराऽयात् । परोक्षभूते लिट्—रथेनाऽग्रं पुरा ययौ ।।

ह्यश्वल्लक्षणात् पुरालक्षणो भवति परविप्रतिषेधेन । रथेनाऽग्रं ह शश्वत्पुरायाति । रथेनाऽग्रं ह शश्वत्पुराऽयासीत् । अत्र परविप्रतिषेधाद **'ह्यश्वतोर्लङ् च'**[3] इति 'लङ्' न भवति ।। १२२ ।।

इस सूत्र में लुङ्-ग्रहण सामर्थ्य से 'अनद्यतन' पद का अनुवर्त्तन है ।। यदि यह सूत्र सामान्यभूत में विधायक होता तो 'विभाषा' इस पद की अनुवृत्ति से पक्ष में लुङ् हो ही जाता । चकारग्रहण से यहां 'विभाषा' तथा 'लट्' पदों का अनुवर्त्तन है ।।

[अस्मे] स्मशब्दरहित [पुरि] पुरा उपपद हो तो अनद्यतनऽभूत में वर्त्तमान धातु से [लुङ् च] 'लुङ्' तथा 'लट्' प्रत्यय विकल्प से होते हैं पक्ष में 'लङ्' तथा 'लिट्' हो जाते हैं

---

१. आ० सू०—७५३ ।।

२. 'पुरि' इति पुरा-इत्येतस्य सप्तम्यैकवचनम् । तच्च नोपपद्यते, तत्र समाधिः—**आतो धातोः** (अ० ६ । ४ । १४०) इत्यत्र योगविभागादाकारलोपाददोषः । तथा च भाष्यम्—**अथवा योगविभागः करिष्यते—'आतः' आकारलोपो भवति । ततो 'धातोः' धातोश्चाकारस्य लोपो भवति** (अ० ६ । ४ । १४० भा०) ।।

३. अ०—३ । २ । ११६ ।।

इस प्रकार यहां चार प्रत्यय होते हैं ॥ जैसे—रथेनायं पुरा याति । रथेनायं पुराऽऽसीत् । पक्ष में अनद्यतनभूत में लङ्—रथेनायं पुराऽऽयात् । परोक्षभूत में लिट्—रथेनायं पुरा ययौ ॥

'ह्यश्वतोर्लङ् च' सूत्र की अपेक्षा 'पुरि लुङ् चास्मे' परविप्रतिषेध से होता है ॥

जैसे—रथेनाऽयं ह शश्वत् पुरा याति । रथेनाऽयं ह शश्वत् पुराऽऽयासीत् । यहां परविप्रतिषेध से 'ह्यश्वतोर्लङ् च' इससे 'लङ्' प्रत्यय नहीं होता ॥ १२२ ॥

वर्त्तमाने लट्[1] ॥ १२३ ॥

'भूते' इति निवृत्तम् । वर्त्तमाने । ७ । १ । लट् । १ । १ ॥ प्रवृत्तायाः क्रियाया असमाप्तिर्वर्त्तमानकालः[2], तस्येदानीमधिकारः क्रियते आ उणादयो बहुलमिति । वर्त्तमाने धात्वर्थे 'लट्' प्रत्ययो भवति ॥ हसति । भुनक्ति । पचति । पठति ॥ १२३ ॥

यहां 'भूते' इस पद का निवर्त्तन है । प्रवृत्त अर्थात् आरम्भ की हुई क्रिया की जब तक परिसमाप्ति न हो जावे तब तक उस काल को वर्त्तमान कहते हैं ॥ वर्त्तमान का अधिकार 'उणादयो बहुलम्' तक जानना चाहिये ॥

[वर्त्तमाने] वर्त्तमान धात्वर्थ में [लट्] 'लट्' प्रत्यय होता है ॥ जैसे———**हसति । भुनक्ति । पचति । पठति ॥** १२३ ॥

लटः शतृशानचावप्रथमासमानाधिकरणे[3] ॥ १२४ ॥

'नन्वोर्विभाषा'[4] इति सूत्रान्मण्डूकप्लुत्या विभाषाग्रहणमिहानुवर्त्तते । लटः ॥ ६ । १ । शतृशानचौ । १ । २ । अप्रथमासमानाधिकरणे । ७ । १ ॥ प्रथमया विभक्त्या समानाधिकरणं प्रथमासमानाधिकरणं तत्प्रतिषेधस्तस्मिन् ॥

अप्रथमासमानाधिकरणे प्रत्ययार्थे लटः स्थाने 'शतृ-शानचौ' प्रत्ययौ नित्यं भवतः, प्रथमासमानाधिकरणे तु विकल्पेन भवतः ॥

पठन्तं पश्य । आसीनं पश्य । पठता कृतम् । आसीनेन [कृतम् ।] पठते देहि । आसीनाय देहि ॥

---

१. आ० सू०—४ ॥

२. **एष एव न्याय्यो वर्त्तमानः कालो यत्र क्रियाया असमाप्तिर्भवति** (अ० ३ । २ । १२० भा०) **एष एव च न्याय्यो वर्त्तमानः कालो यत्राऽऽरम्भोऽनपवृत्तः** (अ० ३ । २ । १२३ भा०) ॥ एष नाम न्याय्यो०.....इति क्वाचित्कः पाठः ॥

३. आ० सू०—१२३५ ॥

४. अ० ३ । २ । १२१ ॥

'अप्रथमासमानाधिकरणे' इति किम्—देवदत्तो गच्छति । पचन् । पचमानः । सन् ब्राह्मणः । अस्ति ब्राह्मणः । कुर्वन्, कुर्वाणो वा ब्राह्मणः । करोति ब्राह्मणः । अत्र सर्वत्र प्रथमासमानाधिकरणे विकल्पेन[1] 'शतृ-शानचौ' भवतः ॥ १२४ ॥

'नन्वोर्विभाषा' इस सूत्र से मण्डूकप्लुति द्वारा यहां 'विभाषा' पद का अनुवर्त्तन है ॥ [**अप्रथमासमानाधिकरणे**] जब प्रथमान्त के साथ लट् प्रत्यय का समानाधिकरण न हो तो [लटः] 'लट्' के स्थान में [शतृशानचौ] 'शतृ' और 'शानच्' प्रत्यय नित्य होते हैं प्रथमा-समानाधिकरण में विकल्प से होते हैं ॥ जैसे—पठन्तं पश्य । आसीनं पश्य । पठता कृतम् । आसीनेन कृतम् । पठते देहि । आसीनाय देहि ॥

'अप्रथमासमानाधिकरणे' ग्रहण इसलिये है कि—देवदत्तो गच्छति । पचन् । पचमानः । सन् ब्राह्मणः । अस्ति ब्राह्मणः । कुर्वन् कुर्वाणो वा ब्राह्मणः । करोति ब्राह्मणः । यहां सब जगह प्रथमासमानाधिकरण में विकल्प से 'शतृ-शानच्' होते हैं ॥ १२४ ॥

सम्बोधने च[2] ॥ १२५ ॥

प्रथमासमानाधिकरणे नित्यार्थोऽयमारम्भः । सम्बोधने । ७ । १ । च [अ०] ॥ सम्बोधनविषये वर्त्तमानाद् धातोः परस्य लटः स्थाने 'शतृ-शानचौ' आदेशौ भवतः ॥ हे पचन् । हे पचमान । हे पठन् । हे अधीयान । अत्र [पूर्वसूत्रेण] विकल्पेन प्राप्नुतः ॥ १२५ ॥

प्रथमासमानाधिकरण में नित्य शतृ-शानच् के विधान के लिये यह सूत्र है । [**सम्बोधने**] सम्बोधन विषय में वर्त्तमान धातु से परे [च] लट् के स्थान में 'शतृ-शानच्' आदेश होते हैं ॥ जैसे—**हे पचन्** । हे पचमान । हे पठन् । हे अधीयान । यहां पूर्वसूत्र से विकल्प से प्राप्त थे सो नित्य हो जाते हैं ॥ १२५ ॥

लक्षणहेत्वोः क्रियायाः[3] ॥ १२६ ॥

'लटः शतृ-शानचौ' अनुवर्त्तते । अयमपि प्रथमासमानाधिकरणे नित्यार्थो योगः । लक्षणहेत्वोः । ७ । २ । क्रियायाः । ६ । १ ॥ लक्ष्यते येन तल्लक्षणम् । हेतुः=कारणम् ॥

क्रियाया लक्षणहेत्वोरर्थयोर्वर्त्तमानाद् धातोः परस्य लटः स्थाने 'शतृ-शानचौ' आदेशौ भवतः ॥

लक्षणे तावत्—तिष्ठन् मूत्रयति । गच्छन् भक्षयति । अत्र तिष्ठतिक्रिया मूत्रयति-क्रियाया लक्षणम् । गच्छतिक्रिया भक्षयतिक्रियायाश्च । शयानो भुङ्क्ते बालः । अत्र

---

१. **"व्यवस्थितविभाषा च"** [अ० ३ । २ । १२४] इति भाष्यवचनात् **"सदादयश्च बहुलम्"** इति वार्त्तिकाच्च व्यवस्थितविभाषेयं, तेन प्रथमासमानाधिकरणे सर्वत्र शतृशानचावादेशौ न भवतः ॥

२. आ० सू०—१२३८ ॥ ३. आ० सू०—१२३९ ॥

शयान इति भुनक्तिक्रियया लक्षणम् ।। हेतौ—अधीयानो वसति । उपदिशन् भ्रमति । अत्र वसनक्रियाया अध्ययनक्रिया हेतुः कारणम् । भ्रमणक्रियायाश्चोपदेशनक्रिया ।।

'लक्षणहेत्वोः' इति किम्—व्रजति । हसति ।। क्रियायाः' इति किम्—य आस्ते चाऽधीते च स चैत्रः । अत्र कर्त्तुः लक्षणे मा भूत् ।।

वा०—सदादयश्च बहुलम्[1] ।। १ ।।

सच्छब्दो विद्यमानार्थवाची । तत्सदृशाः शब्दाः शतृशानजन्ता विकल्पेन भवन्ति ।। सन् ब्राह्मणः । अस्ति ब्राह्मणः । विद्यते ब्राह्मणः । विद्यमानो ब्राह्मणः ।। प्रथमासमानाधिकरणे विकल्पेन भवत एव शतृशानचौ पुनर्बहुलार्थ आरम्भः ।। १ ।।

वा०—इङ्जुहोत्योर्वा वचनम्[2] ।। २ ।।

इङ्-जुहोतिभ्यां धातुभ्यां परस्य लटः स्थाने 'शतृ-शानचौ' विकल्पेन भवतः । अधीते । अधीयानः । जुहोति । जुह्वत् ।। २ ।।

वा०—माङ्याक्रोशे[3] ।। ३ ।।

माङ्युपपद आक्रोशे वर्त्तमानाद् धातोः परस्य लटः स्थाने 'शतृ-शानचौ' वा भवतः ।। मा पचन् । मा पचमानः ।। 'आक्रोशे' इति किम्—मा ते सङ्गोऽस्त्वकर्मणि[4] । अत्र माङुपपदे 'लोट्'[5] भवति । '**माङि लुङ्**'[6] इत्यस्यापवादो वार्त्तिकमिदम् ।। १२६ ।।

यहां 'लटः' तथा 'शतृशानचौ' पदों का अनुवर्त्तन है । यह सूत्र भी प्रथमासमानाधिकरण में नित्य विधान करने के लिये है ।। जिस से जाना जाय वह लक्षण होता है ।। हेतु कारण को कहते हैं ।। [**क्रियायाः**] क्रिया के [**लक्षणहेत्वोः**] लक्षण तथा हेत्वर्थ में वर्त्तमान धातु से परे लट् के स्थान में 'शतृ-शानच्' आदेश होते हैं ।। जैसे—तिष्ठन् मूत्रयति । गच्छन् भक्षयति । यहां तिष्ठतिक्रिया मूत्रयतिक्रिया की द्योतिका है । और गच्छतिक्रिया भक्षयतिक्रिया को जनाने वाली है ।। **शयानो** भुङ्क्ते बालः । यहां 'शयानः' यह भुनक्ति (खाने) क्रिया का लक्षण है ।। हेतु में—**अधीयानो** वसति । **उपदिशन्** भ्रमति । यहां वसने में अध्ययन कारण है और भ्रमण में हेतु उपदेश है ।।

'लक्षणहेत्वोः' ग्रहण इसलिये है कि—व्रजति-हसति ।। 'क्रियायाः' ग्रहण इसलिये है कि—**य आस्ते चाधीते च स चैत्रः** । यहां कर्त्ता के लक्षण में न हो ।।

वा०—सदादय०—सच्छब्द विद्यमान अर्थ का वाची है तत्-सदृश शब्द विकल्प करके 'शतृ-शानच्' प्रत्ययान्त होते हैं ।। जैसे—**सन् ब्राह्मणः । अस्ति ब्राह्मणः । विद्यमानो ब्राह्मणः ।**

---

१. अ० ३ । २ । १२६ भा० ।। २. अ० ३ । २ । १२६ भा० ।।
३. अ० ३ । २ । १२६ भा० ।। (ख) आ० वा० १२३७ ।।
४. गीता २ । ३७ ।
५. एतद् विषये माङि लुङ् (अ० ३ । ३ । १७५) सूत्रस्था टिप्पणी द्रष्टव्या ।।
६. अ० ३ । ३ । १७५ ।।

प्रथमसमानाधिकरण में तो 'शतृ, शानच्' विकल्प से होते ही हैं पुनः वार्त्तिक बहुल विधान के लिये है ॥ १ ॥

वा०—इङ् जुहो०—इङ् तथा जुहोति धातु से परे लट् के स्थान में 'शतृ-शानच्' विकल्प से होते हैं। जैसे—अधीते। अधीयानः। जुहोति। जुह्वत् ॥ २ ॥

वा०—माङ् या०—माङ् उपपद हो तो आक्रोश में वर्त्तमान धातु से परे लट् के स्थान में 'शतृ-शानच्' विकल्प करके होते हैं ॥

जैसे—मा पचन्। मा पचमानः ॥ 'आक्रोश' ग्रहण इसलिये है कि—मा ते सङ्गोऽस्त्वकर्मणि। यहां 'माङ्' उपपद होने पर 'लोट्' होता है। 'माङि लुङ्' इस सूत्र का अपवाद यह वार्त्तिक है ॥ १२६ ॥

तौ सत्[1] ॥ १२७ ॥

तावितौ शसुशानचौ निर्दिश्येते। तौ। १। २। सत्। १। १ ॥

तौ पूर्वविहितौ शतृशानचौ सत्संज्ञौ भवतः ॥

ब्राह्मणस्य पक्ष्यन्। ब्राह्मणस्य पक्ष्यमाणः। अत्र शतृशानचोः सत्संज्ञत्वात् 'पूरणगुण०'[2] इति षष्ठीसमासनिषेधः ॥ १२७ ॥

यहां 'तौ' पद से शतृ तथा शानच् का ग्रहण है। [तौ] अर्थात् पूर्व सूत्रों में विहित जो शतृ-शानच् प्रत्यय हैं वे [सत्] सत्संज्ञक होते हैं ॥ जैसे——ब्राह्मणस्य पक्ष्यन्। ब्राह्मणस्य पक्ष्यमाणः। यहां शतृ-शानच् की सत्संज्ञा होने से 'पूरणगुणसु०' इस से षष्ठीसमास का निषेध हो जाता है ॥ १२७ ॥

पूङ्यजोः शानन्[3] ॥ १२८ ॥

'वर्त्तमाने' इत्यनुवर्त्तते, अन्यत् सर्वं निवृत्तम्। पूङ्यजोः। ६। २। शानन्। १। १ ॥

शानन्नादयो लादेशा[4] न सन्ति किन्तु प्रत्यया निर्दिश्यन्ते ॥

'पूङ्'-'यज' धातुभ्यां वर्त्तमाने 'शानन्' प्रत्ययो भवति ॥

[पवमानः। यजमानः] ॥ सोमं पवमानः। नटमाघ्नानः। 'न लोकाव्यय०'[5] इति सूत्रे 'तृन्' इति प्रत्याहारग्रहणादत्र कर्मणि षष्ठी प्रतिषिध्यते ॥ १२८ ॥

यहां 'वर्त्तमाने' पद का अनुवर्त्तन है शेष सब निवृत्त है ॥ 'शानन्' आदि लादेश नहीं हैं किन्तु प्रत्यय हैं। [पूङ्यजोः] 'पूङ्' तथा 'यज' धातु से वर्त्तमान में [शानन्] 'शानन्' प्रत्यय

---

१. आ० सू०—११४२ ॥ २. अ० २। २। ११ ॥
३. आ० सू०—१२४४ ॥
४. सति हि लादेशे भावकर्म्मणोरपि प्राप्नुवन्ति, न चेष्यन्ते ॥
५. अ० २। ३। ६९ ॥

होता है। जैसे—पवमानः। यजमानः। सोमं पवमानः। नटमाघ्नानः। यहां 'न लोकाव्यय०' इस सूत्र में 'तृन्' पद से प्रत्याहार का ग्रहण है अतः कर्म में षष्ठीविभक्ति का प्रतिषेध हो जाता है॥ १२८॥

ताच्छील्यवयोवचनशक्तिषु चानश्'॥ १२९॥

ताच्छील्यवयोवचनशक्तिषु। ७। ३। चानश्। १। १॥ ताच्छील्यं=स्वाभाविकीवृत्तिः। वयः=यौवनाद्यवस्था। शक्तिः=सामर्थ्यम्॥

ताच्छील्यादिषु वर्त्तमानाद् धातोः 'चानश्' प्रत्ययो भवति॥

ताच्छील्ये—शाकं भुञ्जानः। ओदनं भुञ्जानः॥ वयोवचने—कवचं बिभ्राणः। अत्र चानशः सार्वधातुकत्वात् '**श्लौ**'[2] द्विर्वचनम्॥ शक्तौ—सन्तीह पचमानाः। सन्तीह पठमानाः॥ पक्तुं पठितुञ्च समर्था इत्यर्थः॥ १२९॥

ताच्छील्यम्=स्वभाव। वय=यौवनाद्यवस्था। शक्तिः=सामर्थ्य॥

[ताच्छील्य० षु] ताच्छील्यादि अर्थों में वर्त्तमान धातु से [चानश्] 'चानश्' प्रत्यय होता है॥ जैसे—ताच्छील्य में—शाकं भुञ्जानः। ओदनं भुञ्जानः। वयोवचन में—कवचं बिभ्राणः। यहां 'चानश्' के सार्वधातुक होने से' श्लौ' इससे द्विर्वचन हो जाता है॥ शक्ति में—सन्तीह पचमानाः। सन्तीह पठमानाः। अर्थात् पकाने तथा पढ़ने में समर्थ है॥ १२९॥

इङ्धार्य्योः शत्रकृच्छ्रिणि'॥ १३०॥

इङ्धार्य्योः। ६। २। शतृ। १। १। अकृच्छ्रिणि। ७। १। कृच्छ्रमस्यास्तीति कृच्छ्री न कृच्छ्री अकृच्छ्री तस्मिन्॥

अकृच्छ्रिणि कर्त्तरि वाच्ये इङ्-धारिभ्यां वर्त्तमानार्थाभ्यां धातुभ्यां 'शतृ' प्रत्ययो भवति॥

अधीयन् वेदान्। अधीयन् पारायणम्। धारयन् भारम्। अध्येतुं धारयितुञ्च काठिन्यं न मन्यत इति॥

'अकृच्छ्रिणि' इति किमर्थम्—कृच्छ्रेणाधीते वेदान्। कृच्छ्रेण धारयति भारम्॥ १३०॥

[अकृच्छ्रिणि] जिसकी क्रिया कष्टसाध्य नहीं है ऐसा कर्त्ता वाच्य हो तो [इङ्धार्य्योः] 'इङ्' तथा 'धारि' धातु से वर्त्तमान काल में [शतृ] 'शतृ' प्रत्यय होता है॥ जैसे—अधीयन् वेदान्। अधीयन् पारायणम्। धारयन् भारम्। पढ़ने में तथा भार उठाने में काठिन्य अनुभव नहीं करता॥ 'अकृच्छ्रिणि' ग्रहण इसलिये है कि—कृच्छ्रेणाधीते वेदान्। कृच्छ्रेण धारयति भारम्॥ यहां काठिन्य अर्थात् दुःखसाध्यत्व अर्थ है॥ १३०॥

---

१. आ० सू०—१२४५॥ २. अ० ६। १। १०॥
३. आ० सू०—१२४६॥

द्विषोऽमित्रे[1] ॥ १३१ ॥

द्विषः । ५ । १ । अमित्रे । ७ । १ ॥ न मित्रममित्रमरिः ॥

वर्त्तमानार्थाद् 'द्विष' धातोरमित्रे कर्त्तरि 'शतृ' प्रत्ययो भवति ॥

दुष्टस्य द्विषन् । दुष्टं द्विषन् । अत्र **'द्विषः शतुर्वा'**[2] इति वार्त्तिकेन षष्ठी विकल्पः ॥

'अमित्रे' इति किम्—द्वेष्टि पठनाय पुत्रम् ॥ १३१ ॥

वर्त्तमान अर्थ में [द्विषः] 'द्विष' धातु से [अमित्रे] शत्रु कर्त्ता हो तो 'शतृ' प्रत्यय होता है ॥

जैसे—दुष्टस्य द्विषन् । दुष्टं द्विषन् । यहां 'द्विषः शतुर्वा' इस वार्त्तिक से षष्ठी का विकल्प है ॥

'अमित्रे' ग्रहण इसलिये है कि—द्वेष्टि पठनाय पुत्रम् । यहां शतृ नहीं होता ॥ १३१ ॥

सुञो यज्ञसंयोगे[3] ॥ १३२ ॥

सुञः । ५ । १ । यज्ञसंयोगे । ७ । १ । संयुज्यत इति संयोगः, यज्ञेन संयोगस्तस्मिन् । कर्मणि 'घञ्' ॥

यज्ञसंयोगे गम्यमाने वर्त्तमानार्थात् ['सुञः'] धातोः 'शतृ' प्रत्ययो भवति ॥

यजमानाः[4] सुन्वन्तः । यज्ञेन संयुक्ता इत्यर्थः ॥

'यज्ञसंयोगे' इति किमर्थम्— सुनोति सुराम् । अत्र 'सुञ्' धातोः 'शतृ' प्रत्ययो न भवति ॥ १३२ ॥

[यज्ञसंयोगे] यज्ञसंयोग गम्यमान हो तो वर्त्तमान अर्थ वाली [सुञः] 'सुञ्' धातु से 'शतृ' प्रत्यय होता है ॥ जैसे—यजमानाः सुन्वन्तः । अर्थात् यज्ञ में संयुक्त हैं ॥

'यज्ञसंयोगे'—ग्रहण इसलिये है कि—सुनोति सुराम् । यहां 'सुञ्' धातु से 'शतृ' प्रत्यय नहीं होता ॥ १३२ ॥

अर्हः प्रशंसायाम्[5] ॥ १३३ ॥

अर्हः । ५ । १ । प्रशंसायाम् । ७ । १ ॥

---

१. आ० सू०—१२४७ ॥ २. अ०—३ । २ । १२७ ॥

३. आ० सू०—१२४८ ॥

४. 'ये यजमानास्ते ऋत्विजः (मी० भा० ५ । १ । १) इति वचनात् सत्रेऽत्र सर्वे ऋत्विजोऽपि यजमाना भवन्ति, अतः सर्वेषां यज्ञेन प्रधानसंयोगसंभवात् सुनोतिक्रियायाः कर्त्तारो भवन्ति ॥

५. आ० सू०—१२४९ ॥

प्रशंसायां सत्यां 'अर्ह' धातोर्वर्त्तमानकाले 'शतृ' प्रत्ययो भवति ।।

अर्हन् विद्याम् । अर्हत् सत्कारम् ।।

'प्रशंसायाम्' इति किम् —आततायी वधमर्हति । अत्र 'शतृ' प्रत्ययो मा भूत् ।। १३३ ।।

[प्रशंसायाम्] प्रशंसा गम्यमान हो तो [अर्हः] 'अर्हः' धातु से वर्त्तमानकाल में 'शतृ' प्रत्यय होता है ।। जैसे—अर्हन् विद्याम् । अर्हन् सत्कारम् ।।

'प्रशंसायाम्' ग्रहण इसलिये है कि——आततायी वधमर्हति । यहां 'शतृ' प्रत्यय नहीं होता ।। १३३ ।।

आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु[1] ।। १३४ ।।

शतृ-ग्रहणं निवृत्तम् । आ । क्वेः । ५ । १ । तच्छीलतद्धर्मतत्साधुकारिषु । ७ । ३ ।। आक्वेरित्यभिविधावाङः कर्मप्रवचनीय संज्ञा, ततः पञ्चमी । तच्छीलो धात्वर्थे स्वभावतः प्रवृत्तः । तद्धर्मा तस्मिन् स्वभावेन विनाऽपि प्रवृत्तः । तत्साधुकारी तत्कार्य्यकरणे शिल्पी । अधिकारसूत्रमिदम् ।।

इतोऽग्रे 'भ्राजभास०'[2] इति सूत्रेण विहितो यो क्विप् तत् पर्य्यन्तं ये प्रत्यया विधास्यन्ते तच्छीलादिषु कर्तृषु ते बोध्याः ।। वक्ष्यमाणसूत्र उदाहरणानि ।। १३४ ।।

यहां 'शतृ' पद का निवर्त्तन हुआ । 'आक्वेः' इसमें आङ् अभिविधि के अर्थ में होने से कर्मप्रवचनीयसंज्ञक है अतः उसके योग में यहां पञ्चमी है ।। तच्छीलः=अर्थात् धात्वर्थ में स्वभाव से प्रवृत्त होने वाला । तद्धर्म=अर्थात् विना भी स्वभाव के किसी कार्य्य में प्रवृत्त होने वाला । तत्साधुकारी=अर्थात् किसी कार्य को सुन्दरता से करने वाला शिल्पी=कारीगर ।।

यह अधिकार-सूत्र है यहां से आगे—'भ्राजभ्रास०' इस सूत्र से विहित 'क्विप्' पर्यन्त जो प्रत्यय कहेंगे वे ताच्छील्यादि कर्त्ता में जानने चाहियें । इसके उदाहरण अगले सूत्र में हैं ।। १३४ ।।

तृन्[3] ।। १३५ ।।

तृन् । १ । १ । वर्त्तमानार्याद् धातुमात्रात्तच्छीलादिषु कर्तृषु 'तृन्' प्रत्ययो भवति ।। तच्छीले—परुषं वदिता । कठोरं वदिता । मृदु वक्ता । तद्धर्मा—वेदानुपदेष्टा । धर्ममुपदेष्टा । वेदान् पठिता ।। तत्साधुकारी—कटं कर्त्ता । ओदनं पक्ता । अत्र सर्वत्र **'न लोकाव्यय०'**[4] इति षष्ठीप्रतिषेधाद् द्वितीया भवति ।।

वा०—तृन्विधावृत्विक्षु चानुपसर्गस्य[5] ।। १ ।।

१. आ० सू०—१२५० ।। २. अ० ३ । २ । १७७ ।।
३. आ० सू०—१२५१ ।। ४. अ० २ । ३ । ६९ ।।
५. अ० । ३ । २ । १३५ भा० ।। (ख) आ० वा० १२५२ ।।

ऋत्विक्षु कर्त्तृष्वनुपसर्गाद् धातोः 'तृन्' भवति ॥ होता । पोता ॥ अनुपसर्गस्य इति किमर्थम्—प्रशास्ता । प्रतिहर्त्ता । अत्र तृजेव भवति ॥ १ ॥

वा०—*नयतेः षुक् च*[1] ॥ २ ॥

'णीञ् प्रापणे'[2] इत्यस्माद् धातोः 'तृन्, षुक्' आगमश्च भवति ॥ नेष्टा ॥ २ ॥

वा०—*त्विषेर्देवतायामकारश्चोपधाया अनिट्त्वञ्च*[3] ॥ ३ ॥

'त्विष' धातोर्देवतायां कर्त्तरि 'तृन्' प्रत्ययो भवति' उपधाया इकारस्याकारादेशोऽनिट्त्वञ्च 'त्विष्' धातोर्भवति ॥ त्वष्टा । अस्मिन् वार्त्तिके यदनिट्त्वमुक्तं तत्पूर्वापरं सर्वेषां वार्त्तिकेषु सम्बध्यते । तेन प्रथमवार्त्तिके 'पूञ्' धातोः पोताशब्दे 'इट्' आगमो न भवति ॥ ३ ॥

वा—*क्षदेश्च युक्ते*[4] ॥ ४ ॥

क्षदिरयं वार्त्तिके सौत्रो धातुः । 'क्षद' धातोर्युक्तेऽर्थे 'तृन्' भवति । अनिट्त्वञ्चानुवर्त्तते । क्षत्ता ॥ ४ ॥

वा०—*छन्दसि तृच्च*[5] ॥ ५ ॥

छन्दसि 'क्षद' धातोः 'तृन्'-तृचौ' द्वावपि भवतः ॥ क्षत्तृभ्यः संगृहीतृभ्यः[6] । नित्, चिदित्यनुबन्धद्वयेन स्वरे विशेषः । तृन्याद्युदात्तत्वम् । तृच्यन्तोदात्तत्वं च भवति ॥ १३५ ॥

वर्त्तमान अर्थ में धातुमात्र से तच्छीलादि कर्त्ता में [तृन्] 'तृन्' प्रत्यय होता है ॥

जैसे—तच्छील में—परुषं वदिता । कठोरं वदिता । मृदु वक्ता ॥ तद्धर्म्मा—वेदानुपदेष्टा । वेदान् पठिता ॥ तत्साधुकारी—कटं कर्त्ता । ओदनं पक्ता । यहां सब स्थानों में 'न लोकाव्यय०' इस सूत्र से षष्ठी के प्रतिषिद्ध हो जाने से द्वितीया हो जाती है ॥

वा०—तृन्विधावृ०—ऋत्विक् कर्त्ता हों तो उपसर्गरहित धातु से 'तृन्' प्रत्यय होता है ॥ जैसे—होता । पोता ॥ 'अनुपसर्गस्य' इसलिये कहा है कि—प्रशास्ता । प्रतिहर्त्ता । यहां 'तृच्' ही होता है ॥

---

१. अ० ३ । २ । १३५ भा० ॥ (ख) धात्वन्तरेणाऽपि प्रयोगसिद्धिः—यथा भाष्यम्—**'धात्वन्तरं नेषतिः कथं ज्ञायते । नेषतुः—नेष्टादिति** प्रयोगो दृश्यते—**इन्द्रो वस्तेन नेषतुः । गावो नेष्टात्** (भा० ३ । २ । १३५) ॥

२. धा०—भ्वा०—८८८ ॥

३. अ० ३ । २ । १३५ भा० ॥ (ख) आ०—वा०—१२५३ ॥

४. अ० ३ । २ । १३५ भा० ॥ (ख) आ०—वा०—१२५४ ॥

५. अ० ३ । २ । १३५ भा० ॥ (ख) आ०—वा०—१२५५ ॥

६. यजु० १६ । २६ ॥

वा० - नयतेः षुक् च—'णीञ् प्रापणे' इस धातु से 'तृन्' प्रत्यय तथा 'षुक्' का आगम भी होता है ॥ जैसे—नेष्टा ॥ २ ॥

वा०—त्विषेर्देवतायाम०—'त्विष्' धातु से देवता कर्त्ता होने पर 'तृन्' प्रत्यय होता है तथा उपधाभूत इकार को 'अकार' आदेश और 'त्विष' धातु को अनिट्त्व होता है ॥ त्वष्टा ॥ इस वार्त्तिक में जो अनिट्त्व कहा है उसका पूर्वापर सब वार्त्तिकों में सम्बन्ध है। अतः प्रथम वार्त्तिक में पूञ् धातु से 'पोता' शब्द में 'इट्' आगम नहीं होता ॥ ३ ॥

वा०—क्षदेश्च युक्ते—इस वार्त्तिक में 'क्षदि' सौत्र धातु है ॥ क्षद धातु से 'युक्ते' इस अर्थ में 'तृन्' प्रत्यय होता है, तथा अनिट्त्व भी ॥ जैसे—क्षत्ता ॥ ४ ॥

वा०—छन्दसि तृच्च—छन्द में 'क्षद' धातु से 'तृन्' और 'तृच्' दोनों ही प्रत्यय होते हैं। जैसे—क्षत्तृभ्यः संग्रहीतृभ्यः ॥ नित् तथा चित् दो अनुबन्ध स्वर में विशेषता अर्थात् पृथक्ता लाने के लिये हैं – तृन् में आद्युदात्त तथा तृच् में अन्तोदात्त स्वर होता है ॥ १३५ ॥

अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर-इष्णुच्[1] ॥ १३६ ॥

अलंकृञ्० चरः। ५। १। इष्णुच्। १। १। अलंकृञ, निराकृञ्, प्रजन, उत्पच, उत्पत, उन्मद, रुचि, अपत्रप, वृतु, वृधु, सह, चर इत्येभ्यो वर्त्तमानार्थेभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु 'इष्णुच्' प्रत्ययो भवति ॥

अलंकरिष्णुः। निराकरिष्णुः। प्रजनिष्णुः। उत्पचिष्णुः। उत्पतिष्णुः। उन्मदिष्णुः। रोचिष्णुः। अपत्रपिष्णुः। वर्त्तिष्णुः। वर्धिष्णुः। सहिष्णुः। चरिष्णुः ॥

कृञादिषूपपदासञ्जनं नियमार्थम्। अलंपूर्वान्निरापूर्वादेव कृञ इष्णुच् प्रत्ययो भवति नान्यपूर्वाद् [एवमन्यत्रापि] इति ॥ १३६ ॥

[अलंकृञ्० चरः] अलंकृञ्-निराकृञ्-प्रजन-उत्पत-उन्मद-रुचि-अपत्रप-वृतु-वृधु-सह-चर इन धातुओं से वर्त्तमान अर्थ में तच्छीलादि कर्त्ता हों तो [इष्णुच्] 'इष्णुच्' प्रत्यय होता है ॥

जैसे—अलंकरिष्णुः। निराकरिष्णुः। प्रजनिष्णुः। उत्पचिष्णुः। उत्पतिष्णुः। उन्मदिष्णुः। रोचिष्णुः। अपत्रपिष्णुः। वर्त्तिष्णुः। वर्धिष्णुः। सहिष्णुः। चरिष्णुः ॥ कृञादि धातुओं में उपपदों का ग्रहण नियम के लिये है अर्थात् अलं तथा निरापूर्वक 'कृञ्' से ही 'इष्णुच्' प्रत्यय होता है। अन्य उपसर्गपूर्वक से नहीं। ऐसा अन्यत्र भी समझना चाहिये ॥ १३६ ॥

णेश्छन्दसि[2] ॥ १३७ ॥

'इष्णुच्' इत्यनुवर्त्तते। णेः। ५। १। छन्दसि। ७। १ ॥ छन्दसि = वेदविषये ण्यन्ताद् धातोस्तच्छीलादिषु कर्तृषु 'इष्णुच्' प्रत्ययो भवति ॥

१. आ० सू०—१२५६ ॥ २. आ० सू०—१२५७ ॥

भावयिष्णुः । कारयिष्णुः । धारयिष्णुः[1] ॥ १३७ ॥

यहां 'इष्णुच्' इस पद का अनुवर्त्तन है ॥ [छन्दसि] वेदविषय में [णेः] ण्यन्त धातु से तच्छीलादि कर्त्ता हों तो 'इष्णुच्' प्रत्यय होता है ॥

जैसे—भावयिष्णुः । कारयिष्णुः । धारयिष्णुः ॥ १३७ ॥

भुवश्च[2] ॥ १३८ ॥

[भुवः । ५ । १ ॥ च । अ० ॥] अण्यन्तार्थोऽयमारम्भः । 'छन्दसि' इत्यनुवर्त्तते ॥

'भू' धातोश्छन्दसि विषये 'इष्णुच्' प्रत्ययो भवति ॥

भविष्णुः[3] ॥ पृथग्योग उत्तरार्थः ॥ १३८ ॥

यह सूत्र अण्यन्त के लिये है । यहां 'छन्दसि' पद का अनुवर्त्तन है ॥

[भुवः] भूधातु से वेदविषय में 'इष्णुच्' प्रत्यय होता है ॥ जैसे—भविष्णुः ॥ पृथक् निर्देश उत्तर सूत्र में अनुवृत्ति के लिये है ॥ १३८ ॥

ग्लाजिस्थश्च ग्स्नुः[4] ॥ १३९ ॥

'छन्दसि' इति निवृत्तम् । चकाराद् 'भुवः' इत्यनुवर्त्तते । ग्लाजिस्थः । ५ । १ । च [अ० ।] 'क्स्नुः' । १ । १ ॥

ग्ला, जि, स्था इत्येतेभ्यो वर्त्तमानार्थेभ्यो धातुभ्यो [भवतेश्च] तच्छीलादिषु कर्त्तृषु 'क्स्नुः' प्रत्ययो भवति ॥

ग्लास्नुः । जिष्णुः । [स्थास्नुः] भूष्णुः ॥ क्स्नोः कित्त्वात् 'स्थास्नुः' इति स्थाधातोः 'ईत्वं' प्राप्नोति, तदर्थमिदमुच्यते—

का०—**स्नोर्गित्वान्न स्थ ईकारः किङतोरीत्वशासनात् ।**
गुणाभावस्त्रिषु स्मार्य्यः श्नुकोऽनिट्त्वं गकोरितोः[5] ॥ १ ॥

स्नु-प्रत्ययो गित्कर्त्तव्यस्तेन स्था-धातोरीत्वं न भविष्यति । कुतः ? किति ङिति च परत ईत्वस्य शासनात् । **त्रिषु** गित् कित् ङिदिति त्रिषु परतो गुणस्य प्रतिषेधो

---

१. शां० आ० १२ । २ । ७ ॥ तथा च—वीरुधः पारयिष्णवः (ऋ० १० । ९७ । ३) ॥ पारयिष्णुः (अथ० ६ । ९३ । २) ॥

२. आ० सू०—१२५८ ॥

३. प्रभविष्णु च (गीता—१३ । १६) छन्दोवत् कवयः कुर्वन्तीति कृत्वैष प्रयोगः ॥ यद्वा ग्रसिष्णुः, भ्राजिष्णुः, क्षयिष्णुः, इत्यादि प्रयोगबाहुल्याच्चकारस्यानुक्तसमुच्चयार्थत्वं बोध्यम् ॥

४. आ० सू० १२५९ ॥ ५. भा० ३ । २ । १३९ ॥

विज्ञेयः। अर्थात् '**क्ङिति च**'[1] इति सूत्रे चर्त्वभूतो गकारोऽपि निर्दिश्यते। '**क्ङिति च**'[1] एतादृक् सूत्रमस्तीति। तेन-जिष्णुः, भूष्णुरित्युभयत्र गुणो न भविष्यति। [**श्र्युको०**] भूष्णुरितीट् प्रतिषेधार्थं '**श्र्युकः किति**'[2] इति सूत्रे '**गकोरितोः**' गित् कितोः परयोरिट् प्रतिषेधो ज्ञातव्यः। अर्थात् '**श्र्युकः किति**'[2] इत्यत्रापि चर्त्वभूतो गकारो निर्दिश्यते। '**श्र्युकः क्किति**'[2] ईदृक् सूत्रमस्तीति तेन भूष्णुरित्युगन्ताद् 'इट्' न भविष्यति॥ १॥

वा०—स्थादंशिभ्यां स्नुश्छन्दसि[3] ॥ १॥

स्था-दंशिभ्यां धातुभ्यां छन्दसि वेदे 'स्नुः' प्रत्ययो भवति॥ स्थास्नु जङ्गमम्[4]। दङ्क्षणवः पशवः[4]। अत्र स्नोः कित्वाभावात् दंशेरनुनासिकलोपाभावः॥ १३९॥

यहां 'छन्दसि' पद निवृत्त हुआ। चकार ग्रहण से 'भुवः' पद का अनुवर्त्तन है॥ [ग्ला-जिस्थः] ग्ला, जि, स्था तथा भू इन धातुओं से वर्त्तमान अर्थ में ताच्छीलादि कर्त्ता में [**क्स्नुः**] 'क्स्नु' प्रत्यय होता है॥ जैसे—**ग्लास्नुः। जिष्णुः। स्थास्नुः। भूष्णुः।** क्स्नु प्रत्यय के कित् होने से 'स्थास्नु' में स्था धातु से 'ईत्व' प्राप्त होता है। उस विषय में कहते हैं—

का०—**क्स्नोर्गित्वा०**—स्नु प्रत्यय गित् करना चाहिये, ऐसा करने से स्था धातु को 'ईत्व' नहीं होगा। क्यों? [**क्ङितोरीत्वशासनात्**] कित्-ङित् परे ईत्व का विधान किया है॥ [**गुणाभावस्त्रिषु**] गुण का प्रतिषेध तीनों में अर्थात् गित्-कित्-ङित् परे होता है ऐसा जानना चाहिये। अर्थात् 'क्ङिति च' सूत्र में चर्त्वभूत गकार भी निर्दिष्ट है। सूत्र का स्वरूप भी 'क्ङिति च' इस प्रकार का है, अतः 'जिष्णुः' तथा 'भूष्णुः' इन दोनों में गुण नहीं होता। (**श्र्युको०**) भूष्णुः इस उदाहरण में इट् के प्रतिषेध के लिये 'श्र्युकः किति' सूत्र में (**गकोरितोः**) गित् तथा कित् परे इट् का प्रतिषेध होता है ऐसा जानना चाहिये, अर्थात् 'श्र्युकः किति' सूत्र में चर्त्वभूत गकार भी निर्दिष्ट है सूत्र का स्वरूप भी 'श्र्युकः क्किति' इस प्रकार है। इस कारण 'भूष्णुः' में उगन्त से इट् नहीं होता॥

वा०—स्थादंशिभ्यां०—स्था तथा दंश धातु से वैदिक प्रयोग विषय में स्नु प्रत्यय होता है॥ जैसे—**स्थास्नु जङ्गमम्। दङ्क्षणवः पशवः।** यहां स्नु प्रत्यय के कित् न होने से दंश धातु के अनुनासिक का लोप नहीं होता॥ १३९॥

त्रसिगृधिधृषिक्षिपेः क्नुः[5] ॥ १४०॥

त्रसिगृधिधिक्षिपेः। ५। १। क्नुः। १। १॥ वर्त्तमानेभ्यस्त्रस्यादिभ्यस्त-च्छीलादिषु कर्त्तृषु 'क्नुः' प्रत्ययो भवति॥

---

१. अ० १। १। ५॥ २. अ० ७। २। ११॥
३. अ० ३। २। १३९ भा०॥ (ख) आ० सू० १२६०॥
४. अनुपलब्धमूलमिदम्॥ ५. आ० सू० १२६१॥

त्रस्नुः । गृध्नुः । धृष्णुः । क्षिप्नुः । क्नोः कित्त्वान् गृध्यादीनां धातूनां गुणो न भवति ।।

[त्रसि० क्षिपेः] त्रसि, गृधि, धृषि, क्षिप इन धातुओं से वर्त्तमान काल में तच्छीलादि कर्त्ता हों तो [क्नुः] 'क्नु' प्रत्यय होता है ।।

जैसे—त्रस्नुः । गृध्नुः । धृष्णुः । क्षिप्नुः । 'क्नु' प्रत्यय के कित् होने से 'गृधू' आदि धातुओं में गुण नहीं होता ।। १४० ।।

शमित्यष्टाभ्यो घिनुण्[1] ।। १४१ ।।

शमिति । अष्टाभ्यः । ५ । ३ । घिनुण् । १ । १ ।। इति शब्दोऽत्रादिवाची शमाद्यष्टाभ्य इत्यर्थः । दिवाद्यन्तर्गताः शमादयः ।।

शमादिभ्योऽष्टाभ्यो धातुभ्यो 'घिनुण्' प्रत्ययो भवति ।।

शमी । तमी । दमी । श्रमी । भ्रमी । क्लमी । प्रमादी । उन्मादी । घिनुण् प्रत्यये घकार उत्तरसूत्रे कुत्वार्थः । उकार उगित्कार्यार्थः । शमिनितरा । शमिनीतरा । अत्र घिनुण उगित्वात् '**उगितश्च**'[2] इति घादिषूत्तरेषु विकल्पेन ह्रस्वादेशः । णित् करणं 'मदी' धातोर्वृद्ध्यर्थम् ।। १४१ ।।

यहां 'इति' शब्द आदि का वाची है अर्थात् दिवाद्यन्तर्गत शमादि आठ धातुओं का ग्रहण है ।।

[शमित्यष्टाभ्यः] शमादि आठ धातुओं से [घिनुण्] 'घिनुण्' प्रत्यय होता है तच्छीलादि कर्त्ता हों तो ।।

कैसे—शमी । तमी । दमी । श्रमी । भ्रमी । क्लमी । प्रमादी । उन्मादी ।

'घिनुण्' प्रत्यय में घकार उत्तर-सूत्र में कुत्व करने के लिये है । तथा उकार उगित् कार्य्य के लिये है । जैसे—शमिनितरा । शमीनीतरा । यहां 'घिनुण्' के उगित् होने से 'उगितश्च' इस सूत्र से घादि परे होने पर विकल्प से ह्रस्वादेश होता है । णित् करण 'मदी' धातु में वृद्धि के लिये है ।। १४१ ।।

सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिप-परिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविवि-चत्यजरजभजातिचरापचरामुषाभ्याहनश्च[3] ।। १४२ ।।

'घिनुण्' इत्यनुवर्त्तते । सम्पृचानु० हनः । ५ । १ । च [अ०] ।। सम्पृचादीनां समाहारद्वन्द्वः ।। सम्पृचादिषु ये सोपसर्गा धातवस्तेष्वन्योपसर्गस्य ग्रहणं न भविष्यतीति नियमार्थम् । निरुपसर्गाश्च यथेष्टं सोपसर्गा भविष्यन्ति ।।

१. आ० सू० १२६२ ।। २. अ० ६ । ३ । ४५ ।।
३. आ० सू० १२६३ ।।

सम्पृच, अनुरुध, आङ्यम, आङ्यस, परिसृ, संसृज, परिदेवि, संज्वर, परिक्षिप, परिरट, परिवद, परिदह, परिमुह, दुष, द्विष, द्रुह, दुह, युज, आक्रीड, विविच, त्यज, रज, भज, अतिचर, अपचर, आमुष, अभ्याहन इत्येतेभ्यो धातुभ्यस्तच्छीलादिषु कर्त्तृषु 'घिनुण्' प्रत्ययो भवति ॥

सम्पृच-रौधादिकस्य ग्रहणम् । परिभाषया[1] लुग्विकरणस्य ग्रहणं न भवति । सम्पर्की । अनुरोधी । आयामी । आयासी । परिसारी । संसर्गी । परिदेवीति **'देवृ देवने'**[2] भ्वादिस्थस्य गहणम् । परिदेवी । संज्वारी । परिक्षिपेति **'क्षिप प्रेरणे'**[3] तुदादिर्दिवादिश्च द्वयोरपि ग्रहणम्, परिक्षेपी । परिराटी । परिवादी । परिदाही । परिमोही । दोषी । द्वेषी । द्रोही । दोही । **'युज समाधौ**[4]**, युजिर्**[5] **योगे'** इति दिवादिरुधाद्योर्द्वयोरपि ग्रहणम् । योगी । आक्रीडी । विवेकी । त्यागी । **'रञ्ज**[6] **रागे'** इत्यस्य निपातनादनुनासिकलोपः । रागो । भागी । अतिचारी । अपचारी । आमोषी । अभ्याघाती । अत्र घिनुणि परतो यथायोग्यं कार्य्याणि भवन्ति ॥ १४२ ॥

यहां 'घिनुण्' इस पद का अनुवर्त्तन है । सम्पृचादि में समाहारद्वन्द्व है ॥

सम्पृचादि में सोपसर्ग धातुओं का ग्रहण अन्य उपसर्गों से न हो इस विषय के लिये है । और निरुपसर्ग धातुओं से तो प्रत्येक उपसर्ग के योग में प्रत्यय की उत्पत्ति हो जाती है ।

[सम्पृचा० हनः] सम्पृच, अनुरुध, आङ्यम, आङ्यस, परिसृ, संसृज, परिदेवि, संज्वर, परिक्षिप, परिरट, परिवद, परिदह, परिमुह, दुष, द्विष, द्रुह, दुह, युज, आक्रीड, विविच, त्यज, रज, भज, अतिचर, अपचर, आमुष, अभ्याहन इन धातुओं से तच्छीलादि कर्त्ता हों तो 'घिनुण्' प्रत्यय होता है ॥

सम्पर्की—इस में रौधादिक **'पृची सम्पर्के'** का ग्रहण है क्योंकि **'लुग्विकरणा लुग्वि०'**—इस परिभाषा से अदादिगण वाली पृची का ग्रहण नहीं होता ॥ **अनुरोधी । आयामी । आयासी । परिसारी । संसर्गी । परिदेवी ।** इस में भ्वादिगण वाली **'देवृ देवने'** का ग्रहण है । **संज्वारी । परिक्षेपी ।** तुदादि तथा दिवादिगण वाली **'क्षिप प्रेरणे'** का ग्रहण है । **परिराटी । परिवादी । परिदाही । परिमोही । दोषी । द्वेषी । द्रोही । दोही । योगी**—इसमें दिवादि तथा रुधादिगण की **'युज समाधौ' 'युजिर् योगे'** धातुओं का ग्रहण है ॥ **आक्रीडी । विवेकी । त्यागी । रागी**—इस में **'रञ्ज रागे'** धातु का अनुनासिक लोप 'रज' इस निपातन से होता है ॥ **भागी । अतिचारी । अपचारी । आमोषी । अभ्याघाती ।** यहां 'घिनुण्' प्रत्यय के परे रहने पर यथायोग्य कार्य्य हो जाते हैं ॥ १४२ ॥

---

१. 'लुग्विकरणाऽलुग्वि०' अ० ७ । २ । ४४ भा० ॥

२. धा०—भ्वा०—४९३ ॥

३. धा०—दिवा०—१४ । तुदा० ५ ॥

४. धा०—दिवा०—६९ ॥

५. धा०—रुधा०—७ ॥

६. धा०—भ्वा०—९८४ ॥

वौ कषलसकत्थस्तम्भः[1] ॥ १४३ ॥

वौ । ७ । १ । कष० स्तम्भः । ५ । १ ॥ कष, लस, कत्थ, स्तम्भ इत्येभ्यो विपूर्वेभ्यो धातुभ्यस्तच्छीलादिषु कर्त्तृषु घिनुण्[2] प्रत्ययो भवति ॥

विकाषी । विलासी । विकत्थी । विस्तम्भी । **'लस श्लेषणक्रीडनयोः'**[3] इत्यस्य धातोरत्र ग्रहणम् ॥ १४३ ॥

[वौ] वि-पूर्वक [कष० स्तम्भः] कष, लस, कत्थ, स्तम्भ इन धातुओं से तच्छीलादि कर्त्ता हो तो 'घिनुण्' प्रत्यय होता है ॥

जैसे—विकाषी । विलासी । विकत्थी । विस्तम्भी यहां 'लस श्लेषणक्रीडनयोः' इस धातु का ग्रहण है ॥ १४३ ॥

अपे च लषः[4] ॥ १४४ ॥

वि-ग्रहणं चादत्रानुवर्त्तते । अपे । ७ । १ । च [अ०] । लषः । ५ । १ । **'लष कान्तौ'**[5] इत्यस्यात्र ग्रहणम् ॥

अप-पूर्वाद् वि-पूर्वाच्च 'लष' धातोस्तच्छीलादिषु कर्त्तृषु 'घिनुण्' प्रत्ययो भवति ॥ अपलाषी । विलाषी ॥ १४४ ॥

यहां चकार ग्रहण से 'वि' इस पद का अनुवर्त्तन है । यहां 'लष कान्तौ' इस धातु का ग्रहण है ॥

[अपे] अप-पूर्वक [च] तथा वि-पूर्वक [लषः] 'लष' धातु से तच्छीलादि कर्त्ता हो तो 'घिनुण्' प्रत्यय होता है ॥ जैसे—अपलाषी । विलाषी ॥ १४४ ॥

प्रे लपसृद्रुमथवदवसः[6] ॥ १४५ ॥

प्रे । ७ । १ । लप० वसः । ५ । १ ॥ इति **'वस निवासे'**[7] इत्यस्यैव ग्रहणम् । न त्वाच्छादनार्थस्य लुग्विकरणत्वात् ॥

प्रोपसर्गपूर्वेभ्यो लपादिधातुभ्यो 'घिनुण्' प्रत्ययो भवति तच्छीलादिषु वाच्यार्थेषु ॥

प्रलापी । प्रसारी । प्रद्रावी । प्रमाथी । प्रवादी । प्रवासी ॥ १४५ ॥

यहां 'वस' ग्रहण से 'वस निवासे' इसी का ग्रहण है लुग्विकरण होने से 'वस आच्छादने' का नहीं ॥

---

१. आ० सू० १२६४ ॥
२. धा० भ्वा० ७०१ ॥
३. आ० सू० १२६५ ॥
४. धा० भ्वा० ८७६ ॥
५. आ० सू० १२६६ ॥
६. धा० भ्वा० ९९० ॥

[प्रे] प्र-पूर्वक [लप० वसः] लप, सृ, द्रु, मथ, वद, वस इन धातुओं से तच्छीलादि कर्त्ता अभिधेय हो तो 'घिनुण्' प्रत्यय होता है ॥

जैसे—प्रलापी । प्रसारी प्रद्रावी । प्रमाथी । प्रवादी । प्रवासी ॥ १४५ ॥

निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्या-भाषासूयो वुञ्[1] ॥ १४६ ॥

'घिनुण्' निवृत्तः ॥ निन्द० सूयः । १ । १ । वुञ् । १ । १ ॥ असूय इति प्रथमया विभक्त्या निर्देशः क्रियते, तत्र प्रातिपदिकनिर्देशस्यार्थतन्त्रत्वात्पञ्चमी[2] प्रकल्प्यते ॥

निन्द, हिंस, क्लिश, खाद, विनाश, परिक्षिप, परिरट, परिवादी, व्याभाष, असूय इत्येतेभ्यो धातुभ्यस्तच्छीलादिषु कर्त्तृषु 'वुञ्' प्रत्ययो भवति ॥

असूयेति कण्ड्वादेर्यगन्तस्य धातोर्ग्रहणम् ॥ निन्दकः । हिंसकः । **'क्लिश उपतापे[3], क्लिशू विबाधे[4]'** इति द्वयोरेव ग्रहणम् । क्लेशकः । खादकः । विनाशकः । परिक्षेपकः । परिरटकः । परिवादकः । व्याभाषकः । असूयकः । ण्वुल् प्रत्यये वुञ्-प्रत्यये च स्वरप्रयोगभेदो नास्ति । अतो निन्दादिषु वाऽसरूपविधिना तच्छीलादिषु स्यादेव 'ण्वुल्' । पुनर्निन्दादिभ्यो यद्वुञ् विधीयते तेनैतज्ज्ञाप्यते तच्छीलादिषु वाऽसरूपन्यायेन तृजादयो न भवन्तीति । तेन शमी, तमी, वासरूपेण ण्वुल् तृचौ न भवतः ॥ १४६ ॥

यहां 'घिनुण्' पद का निवर्त्तन है ॥ निन्द० ..... असूयः—यह ऐसा प्रथमाविभक्ति से निर्देश किया है । प्रातिपदिकनिर्देश के अर्थाधीन होने के कारण यहां पञ्चमी की प्रकल्पना हो जाती है ॥

[निन्द० सूयः] निन्द, हिंस, क्लिश, खाद, विनाश, परिक्षिप, परिरट, परिवादी, व्याभाष, असूय इन धातुओं से तच्छीलादि कर्त्ता हो तो [वुञ्] 'वुञ्' प्रत्यय होता है ॥

'असूय' यह कण्ड्वादि यगन्त का ग्रहण है । जैसे—**निन्दकः । हिंसकः । क्लेशकः ।** इसमें—'क्लिश उपतापे, क्लिशू विबाधे' इन दोनों का ग्रहण है ॥ **खादकः । विनाशकः । परिक्षेपकः । परिरटकः । परिवादकः । व्याभाषकः । असूयकः ॥**

ण्वुल् तथा वुञ् प्रत्यय होने पर स्वर में भी भेद नहीं होता । अतः निन्दादि धातुओं से तच्छीलादि कर्त्ता होने पर वाऽसरूपविधि से 'ण्वुल्' हो ही जाता पुनः निन्दादि से जो 'वुञ्'

---

१. आ० सू० १२६७ ॥

२. अत्र भाष्यम्—**'प्रातिपदिकनिर्देशोऽयम् । प्रातिपदिकनिर्देशाश्चार्थतन्त्रा भवन्ति । न काञ्चित् प्राधान्येन विभक्तिमाश्रयन्ति । तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितुं बुद्धिरुपजायते सा सा आश्रयितव्या'** (अ० १ । १ । ५६ सू० भाष्ये) ॥

३. धा० दिवा० ५३ ॥ ४. धा० क्रचा० ५० ॥

विधान किया है उससे यह जाना जाता है कि—तच्छीलादि में वासरूपविधि से तृजादि नहीं होते इस कारण—शमी। लमी। इत्यादि में वासरूपविधि से 'ण्वुल्' तथा 'तृच्' नहीं होते ॥ १४६ ॥

देविक्रुशोश्चोपसर्गे[1] ॥ १४७ ॥

देविक्रुशोः । ३ । २ । च [अ०] । उपसर्गे । ७ । १ ॥ **'देवृ देवने'[2]** इति भ्वादेर्ग्रहणम् ॥

सोपसर्गाभ्यां देवि-क्रुशिधातुभ्यां तच्छीलादिषु कर्त्तृषु 'वुञ्' प्रत्ययो भवति ॥ प्रदेवकः । परिदेवकः । आदेवकः । प्रक्रोशकः । परिक्रोशकः ॥

'उपसर्गे' इति किम्—देविता । क्रोष्टा । अत्र तृन्नेव ॥ १४७ ॥

यहां भ्वादिगणवाली 'देवृ देवने' का ग्रहण है ॥

[उपसर्गे] सोपसर्ग [देविक्रुशोः] 'देवि' तथा 'क्रुश' धातु से तच्छीलादि कर्त्ता हो तो 'वुञ्' प्रत्यय होता है ॥

जैसे—प्रदेवकः । परिदेवकः । आदेवकः । प्रक्रोशकः । परिक्रोशकः ।

'उपसर्गे' ग्रहण इसलिये है कि—देविता । क्रोष्टा । यहां 'तृन्' ही होता है ॥ १४७ ॥

चलनशब्दार्थादकर्मकाद्युच्[3] ॥ १४८ ॥

चलनशब्दार्थात् । ५ । १ । अकर्मकात् । ५ । १ । युच् । १ । १ ॥

चलनञ्च शब्दश्च चलनशब्दौ, तावर्थौ यस्य स चलनशब्दार्थस्तस्मात् ॥

अकर्मकेभ्यश्चलनशब्दार्थेभ्यो धातुभ्यस्तच्छीलादिषु कर्त्तृषु 'युच्' प्रत्ययो भवति ॥

चलनः । चोपनः ॥ शब्दार्थ—रवणः । कवनः । लम्बनः ॥

'अकर्मकात्' इति किम्—वदिता श्लोकान् । अत्र तृन्नेव भवति ॥ १४८ ॥

[चलनशब्दार्थात्] चलनार्थ और शब्दार्थक जो [अकर्मकात्] अकर्मक धातु उन से तच्छीलादि कर्त्ता हो तो [युच्] 'युच्' प्रत्यय होता है ॥

जैसे—चलनः । चोपनः । शब्दार्थक—रवणः । कवनः । लम्बनः । 'अकर्मकात्' ग्रहण इसलिये है कि—वदिता श्लोकान् । यहां 'तृन्' ही होता है ॥ १४८ ॥

---

१. आ० सू० १२६८ ॥ २. धा० भ्वा० ४९३ ॥

३. आ० सू० १२६९ ॥

अनुदात्तेतश्च हलादेः[1] ॥ १४९ ॥

अनुदात्तेतः । ५ । १ । च [अ०] । हलादेः । ५ । १ ॥ हल् आदौ यस्य तस्मात् ॥

अनुदात्तेतो हलादेर्धातोस्तच्छीलादिषु कर्तृषु 'युच्' प्रत्ययो भवति । स्पर्द्धनः । वर्त्तनः । वर्द्धनः ॥

'हलादेः' इति किम्—आसिता । एधिता ॥ १४९ ॥

[अनुदात्तेतः] अनुदात्तेत् [च] और [हलादेः] हलादि धातुओं से तच्छीलादि कर्त्ता हो तो 'युच्' प्रत्यय होता है ॥

जैसे—स्पर्धनः । वर्त्तनः । वर्द्धनः ॥

'हलादेः' ग्रहण इसलिये है कि—आसिता । एधिता । यहां 'तृन्' ही होता है ॥ १४९ ॥

जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः[2] ॥ १५० ॥

जु० पदः । ५ । १ ॥ जु इति सौत्रो धातुः । चङ्क्रम्य-दन्द्रम्य इति द्वौ यङन्तौ । पद-धातुरनुदात्तेद्धलादिश्च, तस्मात् पूर्वेणैव 'युच्' सिद्धे पुनर्ग्रहणं ज्ञापकार्थम्, अनेन ज्ञाप्यते तच्छीलाद्यधिकारे वाऽसरूपविधिर्न भवति । '**लषपतपदस्थ०**[3] इति वक्ष्यमाणसूत्रेण 'पद'धातोः 'उकञ्' विधीयते सोऽपि स्यात् । अत्र ग्रहणाद् युजपि स्यात् । अन्यदपि प्रयोजनम्—शमादिभ्यो 'घिनुण्' विधीयते [तत्र] वाऽसरूपन्यायेन तृन्न भवति ॥

जु, चङ्क्रम्य, दन्द्रम्य, सृ, गृधि, ज्वल, शुच, लष, पत, पद इत्येभ्यो धातुभ्यस्तच्छीलाद्यर्थेषु 'युच्' प्रत्ययो भवति ॥

जवनः । चङ्क्रमणः । दन्द्रमणः । अत्र "**अतो लोपः**[4]" इत्यकारस्य लोपो '**यस्य हलः**[5]" इति यकारस्य च । सरणः । गर्द्धनः । ज्वलनः । शोचनः । लषणः । पतनः । पदनः ॥ १५० ॥

'जु' यह सूत्रपठित धातु है । चङ्क्रम्य, दन्द्रम्य यह दो यङन्त पद हैं 'पद' धातु के अनुदात्त तथा हलादि होने से पूर्व सूत्र से ही 'युच्' प्रत्यय सिद्ध था पुनः पदधातु का ग्रहण इस बात के ज्ञापन के लिये है कि तच्छीलाधिकार में वाऽसरूपविधि नहीं होती । 'लषपतपद०' इस अगले सूत्र से 'पद' धातु से 'उकञ्' कहा है वह भी हो जाता है और इस सूत्र से 'युच्' भी होता है । इसका और भी प्रयोजन है कि— शमादि से 'घिनुण्' कहा है वहां वाऽसरूपविधि से 'तृन्' नहीं होता ॥

---

१. आ० सू० १२७० ॥
२. आ० सू० १२७१ ॥
३. अ० ३ । २ । १५४ ॥
४. अ० ६ । ३ । ४८ ॥
५. अ० ६ । ३ । ४९ ॥

[जु० पदः] जु, चङ्क्रम्य, दन्द्रम्य, सृ, गृधि, ज्वल, शुच, लष, पत, पद इन धातुओं से तच्छीलादि कर्त्ता हो तो 'युच्' प्रत्यय होता है ॥

जैसे—जवनः । चङ्क्रमणः । दन्द्रमणः । यहां 'अतो लोपः' से अकार लोप तथा 'यस्य हलः' सूत्र से यकार का लोप होता है। सरणः । गर्द्धनः । ज्वलनः । शोचनः । लषणः । पतनः । पदनः ॥ १५० ॥

क्रुधमण्डार्थेभ्यश्च[1] ॥ १५१ ॥

क्रुधमण्डार्थेभ्यः । ५ । ३ ॥ क्रुधश्च मण्डश्चानयोरिवार्था येषां ते क्रुधमण्डार्थास्तेभ्यः ॥

क्रुधार्थेभ्यो मण्डार्थेभ्यश्च धातुभ्यस्तच्छीलाद्यर्थेषु 'युच्' प्रत्ययो भवति ॥

क्रोधनः । कोपनः । द्रोहणः ॥ मण्डार्थ—मण्डनः । भूषणः ॥ १५१ ॥

[क्रुधमण्डार्थेभ्यः] क्रुध तथा मण्ड धातु के अर्थ के समान जिन धातुओं के अर्थ हैं उन से तच्छीलादि कर्त्ता हो तो 'युच्' प्रत्यय होता है ॥

जैसे—क्रोधनः । कोपनः । द्रोहणः । मण्डार्थ—मण्डनः । भूषणः ॥ १५१ ॥

न यः[2] ॥ १५२ ॥

'**अनुदात्तेतश्च हलादेः**[3]' इति सामान्यप्राप्तस्य युचोऽयं प्रतिषेधः । न [अ०] । यः । ५ । १ ॥

यकारान्ताद्धातो 'युच्' प्रत्ययो न भवति ॥ दयिता । क्नूयिता । क्ष्मायिता । तृन्नेव ॥ १५२ ॥

'अनुदात्तेतश्च हलादेः' इस सूत्र से सामान्यप्राप्त 'युच्' का यह प्रतिषेध है ॥

[यः] यकारान्त धातु से तच्छीलादि कर्त्ता हो तो 'युच्' प्रत्यय [न] नहीं होता ॥

जैसे—क्नूयिता । क्ष्मायिता । यहां 'तृन्' ही होता है ॥ १५२ ॥

सूददीपदीक्षश्च[4] ॥ १५३ ॥

अयमपि तस्यैव प्रतिषेधः ॥ सूददीपदीक्षः । ५ । १ । च [अ०] ॥

सूद, दीप, दीक्ष इत्येतेभ्यो धातुभ्यस्तच्छीलादिषु कर्त्तृषु 'युच्' प्रत्ययो न भवति ॥

सूदिता । दीपिता । दीक्षिता ॥ यदि तच्छीलाधिकारे वाऽसरूपविधिः सर्वथा न भवेत्तर्ह्यस्मिन् सूत्रे दीपिग्रहणमनर्थकं स्यात् । कथम् ? '**नमिकम्पी**[5]' ति वक्ष्यमाणसूत्रे

---

१. आ० सू० १२७२ ॥
२. आ० सू० १२७३ ॥
३. अ० ३ । २ । १४९ ॥
४. आ० सू० १२७४ ॥
५. अ० ३ । २ । ६७ ॥

'दीप' धातो 'रः' प्रत्ययो विधीयते स युचो बाधकः स्यादेव। पुन र्युच् प्रतिषेधार्थं 'दीप' धातुरत्र पठ्यते, तेन ज्ञायते क्वचिद्वासरूपविधिनाऽपि तच्छीलाधिकारे प्रत्यया भवन्ति। '**कमु कान्तौ**'[1] इत्यनुदात्तेत्-हलादिर्धातुस्तस्मात् सामान्येन [युच्], विशेषत्वेन रो विधीयते, वाऽसरूपविधिना द्वयमपि भवति। इह पक्षद्वयमुच्यते। तच्छीलाधिकारे वाऽसरूपविधिर्न भवति, भवति च। तत्कथं प्रतिपत्तव्यम् ?। एतद्द्वयमेव न्याय्यम्। द्विविधमेव ज्ञापकं दृश्यते। प्रायशो वासरूपविधिर्न भवत्यल्पशो भवति च ॥ १५३ ॥

यह सूत्र भी '**अनुदात्तेतश्च हलादेः**' का ही अपवाद है।

[सूद० दीक्षः] सूद, दीप, दीक्ष इन धातुओं से तच्छीलादि कर्त्ता हो तो 'युच्' प्रत्यय नहीं होता॥

जैसे—सूदिता। दीपिता। दीक्षिता॥

यदि इस तच्छीलाधिकार में वाऽसरूपविधि सर्वथा होती ही नहीं ऐसा माना जाय तो इस सूत्र में 'दीपि' ग्रहण अनर्थक होता है। कैसे ? 'नमिकम्पिस्म्य०' इस अगले सूत्र में 'दीप' धातु से 'र' प्रत्यय कहा है वह 'र' प्रत्यय 'युच्' का बाधक हो ही जाता पुनः इस सूत्र में 'युच्' बाधने के लिये जो 'दीप' धातु पढ़ा है उससे यह जाना जाता है कि इस तच्छीलादि अधिकार में भी कहीं कहीं वाऽसरूपविधि से प्रत्यय हो जाते हैं। जैसे—'**कमु कान्तौ**' इस अनुदात्तेत् हलादि धातु से 'अनुदात्ते०' से सामान्यतया' युच्' प्राप्त है विशेषतया 'र' प्रत्यय का विधान किया है सो वाऽसरूप विधि से दोनों ही हो जाते हैं।

(**प्रश्न**) इस तच्छीलादि अधिकार में दो पक्ष कहे हैं कि—तच्छीलादि अधिकार में वाऽसरूप विधि नहीं होती और होती भी है सो इसका क्या स्वरूप समझा जावे ?

(उत्तर) यह दोनों ही पक्ष ठीक हैं क्योंकि दोनों ही प्रकार के ज्ञापक दीखते हैं। अर्थात् इस तच्छीलादि अधिकार में प्रायः करके वाऽसरूपविधि नहीं होती और अल्पशः अर्थात् कहीं कहीं हो भी जाती है॥ १५३ ॥

लषपतपदस्थाभूवृषहनकमगमश्रुभ्य उकञ्[2] ॥ १५४ ॥

लष० शृभ्यः। ५। ३। उकञ्। १। १॥ लषादिधातुभ्यस्तच्छीलाद्यर्थेषु 'उकञ्' प्रत्ययो भवति॥

अपलाषुकः। पातुकः। पादुका। प्रस्थायुकः। भावुकः। प्रवर्षुकः। चोरं घातुकः। स्त्रियं कामुकः। गृहमागामुकः। किं शारुकः॥ अत्र '**न लोकाव्यय०**[3]' इति सूत्रेण षष्ठी प्रतिषिध्यतेऽतो लषादीनां कर्मणि द्वितीयैव भवति॥ १५४ ॥

१. धा० भ्वा० ४४६॥ २. आ० सू० १२७५॥

३. अ० २। ३। ६९॥

[लष० शृभ्यः] लष, पत, पद, स्था, भू, वृष, हन, कम, गम, शृ इन धातुओं से तच्छीलादि कर्त्ता हो तो [उकञ्] 'उकञ्' प्रत्यय होता है ।।

जैसे—अपलाषुकः । पातुकः । पादुका । प्रस्थायुकः । भावुकः । प्रवर्षुकः । चोरं घातुकः । स्त्रियं कामुकः । गृहमागामुकः । किं शारुकः । यहां 'न लोकाव्यय०' इस सूत्र से षष्ठी का निषेध हो जाता है अतः लषादिकों से कर्म में द्वितीया ही होती है ॥ १५४ ॥

जल्पभिक्षकुट्टलुण्टवृङः षाकन्[1] ॥ १५५ ॥

जल्प० वृङः । १ । षाकन् । १ । १ ।। जल्पादिभ्यो धातुभ्यस्तच्छीलादिषु कर्त्तृषु 'षाकन्' प्रत्ययो भवति ।।

जल्पाकः । भिक्षाकः कुट्टाकः । लुण्टाकः । वराकः ।

षाकनि षित्करणं '**षिद्गौरादिभ्यश्च**[2]' इति ङीषर्थम् । जल्पाकी । भिक्षाकी कुट्टाकी । लुण्टाकी । वराकी ।। नित्करणं स्वरार्थम् ।। १५५ ।।

[जल्प० वृङः] जल्प, भिक्ष, कुट्ट, लुण्ट, वृङ् इन धातुओं से तच्छीलादि कर्त्ता हो तो [षाकन्] 'षाकन्' प्रत्यय होता है ।।

जैसे – जल्पाकः । भिक्षाकः । कुट्टाकः । लुण्टाकः । वराकः । 'षाकन्' प्रत्यय में षित्करण इसलिये किया है कि 'षिद्गौरादिभ्यश्च' से ङीष् हो जावे ।। जैसे—जल्पाकी । भिक्षाकी । कुट्टाकी । लुण्टाकी । वराकी ।। नित्करण स्वर के लिये है ।। १५५ ।।

प्रजोरिनिः[3] ॥ १५६ ॥

प्रजोः । ५ । १ । इनिः । १ । १ ।।

प्रपूर्वकात्सौत्राज्जुधातोस्तच्छीलाद्यर्थेषु 'इनिः' प्रत्ययो भवति ।। प्रजवी । प्रजविनौ । प्रजविनः ।। १५६ ।।

[प्रजोः] प्र-पूर्वक सौत्र 'जु' धातु से तच्छीलादि अर्थों में [इनिः] 'इनि' प्रत्यय होता है ।।

जैसे—प्रजवी । प्रजविनौ । प्रजविनः ।। १५६ ।।

जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च[4] ॥ १५७ ॥

'इनिः' इत्यनुवर्त्तते । जि० प्रसूभ्यः । ५ । ३ । च [अ०] ।।

जि, दृ, क्षि, विश्री, इण्, वम, अव्यथ, अभ्यम, परिभू, प्रसू इत्येतेभ्यो धातुभ्यस्तच्छीलाद्यर्थेषु 'इनिः' प्रत्ययो भवति ।।

१. आ० सू० १२७६ ।। २. अ० ४ । १ । ४१ ।।
३. आ० सू० १२७७ ।। ४. आ० सू० १२७८ ।।

'**जि जये**[1], **जि ज्रि**[2] **अभिभवे**' इति द्वयोरेव ग्रहणम् । जयी । दरी । **क्षि क्षये**[3], **क्षि निवासगत्योः**[4]' अनयोरपि द्वयोर्ग्रहणम् । क्षयी । विश्रयी । अयी । अत्ययी । वमी । अव्यथी[5]। अभ्यमी । परिभवी ।। '**षू प्रेरणे**[6]' इत्येतस्यव प्रसवी । निरुपसर्गेभ्य उपसर्गनियमो नास्ति ।। १५७ ।।

[जि० प्रसूभ्यः] जि, द्र, क्षि, विश्री, इण्, वम, अव्यथ, अभ्यम, परिभू, प्रसू इन धातुओं से तच्छीलादि अर्थों में 'इनिः' प्रत्यय होता है ॥

जैसे—जयी । इसमें-जि जये, जि ज्रि अभिभवे । इन दोनों का ही ग्रहण है ॥ दरी । क्षयी । इसमें 'क्षि क्षये, क्षि निवासगत्योः' । इन दोनों का ही ग्रहण है । विश्रयी । अयी । अत्ययी । वमी । अव्यथी । अभ्यमी । परिभवी । प्रसवी—इसमें 'षु प्रेरणे' का ग्रहण है ॥ यहां जो निरुपसर्ग धातु हैं उनमें उपसर्ग का नियम नहीं ॥ १५७ ॥

स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ॥ १५८ ॥

स्पृहि० श्रद्धाभ्यः । ५ । ३ । आलुच् । १ । १ ॥

स्पृह्यादिभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु 'आलुच्' प्रत्ययो भवति ॥

स्पृह ईप्सायाम्[7], **गृह ग्रहणे**[8], **पत गतौ**[9]' इति त्रयो धातवश्चुरादिष्वदन्ताः पठ्यन्ते तेभ्यो ण्यन्तेभ्य 'आलुच्' । स्पृहयालुः । गृहयालुः । पतयालुः । लुप्तस्याकारस्य स्थानिवद्भावाद् गुणवृद्धी न भवतः । '**दय दानगतिरक्षणहिंसादानेषु**[11]' दयालुः ॥ '**द्रा कुत्सायां गतौ**[12]' इत्यस्मान्निपूर्वात् तत्पूर्वाच्चालुच् तच्छब्दस्य नकारादेशो निपातनात् । निद्रालुः । तन्द्रालुः । श्रत्पूर्वाच्च 'धाञ्' धातोरालुच् । श्रद्धालुः ॥

वा०—आलुचि शीङ्ग्रहणम्[13] ॥ १ ॥

१. धा० भ्वा० ५५२ ॥ २. धा० भ्वा० ९३१ ॥
३. धा० भ्वा० २३७ ॥ ४. धा० तुदा० १२३ ॥
५. नञ्पूर्वोऽत्र व्यथधातुः, निपातनान्नञो नकारलोपो धातुना च समासः ॥
६. धा० तुदा० १२४ ॥ (ख) 'षू' इति निरनुबन्धकग्रहणात् 'षूङ् प्राणिप्रसवे, षूङ् प्राणिगर्भविमोचने' इत्यनयोर्ग्रहणं न भवति सानुबन्धकत्वात् ॥
७. आ० सू० १२७९ ॥ ८. धा० चु० ३२२ ॥
९. धा० चु० ३४८ ॥ १०. धा० चु० ३१२ ॥
११. धा० भ्वा० ४७४ ॥ १२. धा० अदा० ४४ ॥
१३. अ० ३ । २ । १५८ भा० ॥ (ख) आ० वा० १२८० ॥

'शीङ्' धातोरप्यालुच् स्यात् । शयालुः[1] ॥ १५८ ॥

[स्पृहि० श्रद्धाभ्यः] स्पृहि, गृहि, पति, दयि, निद्रा, तन्द्रा, श्रद्धा इन धातुओं से तच्छीलादि कर्त्ता में [आलुच्] 'आलुच्' प्रत्यय होता है ॥

'स्पृह ईप्सायाम्, गृह ग्रहणे, पत गतौ' ये तीनों धातु चुरादिगण में अदन्त पढ़ी हैं। इन से ण्यन्त से 'आलुच्' होता है ॥

जैसे—स्पृहयालुः । गृहयालुः । पतयालुः । लुप्त हुए अकार के स्थानिवद्भाव से गुण तथा वृद्धि नहीं होते । 'दय दानगतिरक्षणहिंसादानेषु' । दयालुः । निद्रालुः । तन्द्रालुः । इनमें 'नि' तथा 'तत्' पूर्वक 'द्रा कुत्सायां गतौ' इस धातु से 'आलुच्' तथा तत् शब्द को नकारान्तादेश निपातन से होता है ॥ श्रद्धालुः । इसमें 'श्रत्' पूर्वक 'धाञ्' धातु से 'आलुच्' होता है ॥

वा०—आलुचि शीङ्ग्रहणम्—'शीङ्' धातु से भी 'आलुच्' प्रत्यय होता है। जैसे—शयालुः ॥ १५८ ॥

दाधेट्सिशदसदो रुः[2] ॥ १५९ ॥

दाधेट्सिशदसदः । ५ । १ । रुः । १ । १ ॥

दा, धेट् सि, शद, सद इत्येतेभ्यो धातुभ्यस्तच्छीलाद्यर्थेषु 'रुः' प्रत्ययो भवति ॥

दारुः । धारुः । सेरुः । शद्रुः । सद्रुः ॥

अस्मिन् सूत्रे काशिकाकृज्जयादित्येनोक्तम्—'धारुर्वत्सो मातरम् । 'न लोकाव्यय०[3]' इत्युकारप्रश्लेषात् षष्ठी न भवतीति' । तदेतद्विचारणीयम् । 'न लोकाव्ययेति सूत्र उकारप्रश्लेषः कृतो न तु 'रु' इत्यस्य । रुकारे य उकारः सोऽनर्थकः, समुदायो ह्यर्थवान् तस्यैकदेशोऽनर्थकः । 'अर्थवद्ग्रहणे नानर्थकस्य[4]' इत्युकारग्रहणे रुकारविशिष्टस्यानर्थकस्य ग्रहणं न भविष्यति । अतो 'धारुर्वत्सो मातरम्' इत्यशुद्धमेव । धारुर्वत्सो मातुरित्यवश्यं षष्ठी भविष्यति । एवं जयादित्यवचनं प्रामादिकमेव ॥१५९॥

[दा० सदः] दा, धेट्, सि, शद, सद इन धातुओं से तच्छीलादि अर्थों में [रुः] 'रु' प्रत्यय होता है ॥

---

१. ईर्ष्यालुः, बुभुक्षालुः, स्पर्धालुः, कृपालुरित्येवमादयस्तु **मृगय्वादयश्च'** (उ० १ । ३७ ।) इत्यनेन 'उ' प्रत्ययान्ताः सिध्यन्ति—कृपां लातीति = कृपालुः । ईर्ष्यां लातीति = ईर्ष्यालुरित्येवं विग्रहः ॥

हृदयालुः, शीतालुः, उष्णालुः, तृप्रालुरित्यादयस्तु 'बहुलं छन्दसि' (अ० ५ । २ । १२२) इत्यत्र वार्त्तिकेन सिध्यन्ति ॥

२. आ० सू० १२८१ ॥ ३. अ० २ । ३ । ६९ ॥

४. अ० ५ । १ । २२ भा० ॥

जैसे—दारुः । धारुः । सेरुः । शद्रुः ।

इस सूत्र में काशिकाकार जयादित्य ने कहा है कि—धारुर्वत्सो मातरम् । यहां 'न लोकाव्यय०' इस सूत्र में उकार का प्रश्लेष होने से षष्ठी नहीं होती । इसमें यह विचार है कि 'न लोकाव्यय०' इस सूत्र में उकार का प्रश्लेष किया है न कि 'रु' का, क्योंकि रुकार का उकार तो अनर्थक है, समुदाय ही अर्थवान् होता है समुदाय का एकदेश अनर्थक होता है इसलिये 'अर्थवद्ग्रहणे नानर्थकस्य' इस परिभाषा के बल से उकार के ग्रहण में रुकारविशिष्ट अनर्थक उकार का ग्रहण होगा ही नहीं । इस कारण—'धारुर्वत्सो मातरम्' यह अशुद्ध ही है परन्तु 'धारुर्वत्सो मातुः' इसमें षष्ठी अवश्य ही होगी । इसलिये जयादित्य का यह वचन प्रामादिक है ॥ १५९ ॥

सृघस्यदः क्मरच्[1] ॥ १६० ॥

सृघस्यदः । ५ । ३ । क्मरच् । १ । १ ॥ सृ, घसि, अद इत्येतेभ्यो धातुभ्य स्तच्छीलाद्यर्थेषु] 'क्मरच् प्रत्ययो भवति ॥

सृमरः । घस्मरः । अद्मरः । ककारो गुणप्रतिषेधार्थः, चकारः स्वरार्थः ॥ १६० ॥

[सृ० अदः] सृ, घसि, अद इन धातुओं से तच्छीलादि कर्त्ता में [क्मरच्] 'क्मरच्' प्रत्यय होता है ॥

जैसे—सृमरः । घस्मरः । अद्मरः । 'क्मरच्' में ककार गुण के प्रतिषेध के लिये है तथा चकार स्वर के लिये ॥ १६० ॥

भञ्जभासमिदो घुरच्[2] ॥ १६१ ॥

भञ्जभासमिदः । ५ । ३ । घुरच् । १ । १ ॥ भञ्ज, भास, मिद इत्येतेभ्यो धातुभ्यस्तच्छीलाद्यर्थेषु 'घुरच्' प्रत्ययो भवति ॥

भङ्गुरः । भासुरः । मेदुरः । घुरचो घित्त्वाद् भङ्गुर इति कुत्वम्[3] । चित्करणश्च स्वरार्थम् ॥ १६१ ॥

[भञ्ज० मिदः] भञ्ज, भास, मिद इन धातुओं से तच्छीलादि अर्थों में [घुरच्] 'घुरच्' प्रत्यय होता है ॥

जैसे—भङ्गुरः । भासुरः । मेदुरः ॥ 'घुरच्' प्रत्यय के घित् होने से 'भङ्गुरः में कुत्व हो जाता है । चित्करण स्वर के लिये है ॥ १६१ ॥

विदिभिदिछिदेः कुरच्[4] ॥ १६२ ॥

विदिभिदिछिदेः । ५ । ३ । कुरच् । १ । १ ॥ विदादिभ्यस्तच्छीलाद्यर्थेषु 'कुरच्' प्रत्ययो भवति ॥

१. आ० सू० १२८२ ॥ २. आ० सू० १२८३ ॥
३. अ० ७ । ३ । ५२ ॥ ४. आ० सू० १२८४ ॥

विदुरः । पण्डितशब्दपर्यायो विदुर-शब्दोऽतो ज्ञानार्थस्यैव 'विद' धातोर्ग्रहणं नान्यस्य ॥ भिदुरं काष्ठं स्वयमेव । छिदुरा रज्जुः स्वयमेव । भिदि-छिदिभ्यां कर्मकर्त्तरि [अपि] 'कुरच्' । कर्त्रभिहिता विधयोऽपि कर्मकर्त्तरि भवन्तीत्युक्तम्[1] ॥ १६२ ॥

[विदि० छिदेः] विदि, भदि, छिदि इन धातुओं से तच्छीलादि अर्थों में [कुरच्] 'कुरच्' प्रत्यय होता है ॥

जैसे—**विदुरः**—इसमें 'विद ज्ञाने' धातु का ग्रहण है क्योंकि विदुर शब्द पण्डित का पर्यायवाची है ॥ **भिदुरं** काष्ठं स्वयमेव । **छिदुरा** रज्जुः स्वयमेव । भिद, छिद धातु से कर्मकर्त्ता में भी 'कुरच्' प्रत्यय होता है । कर्त्ता में विहित विधि कर्मकर्त्ता में भी हो जाती है ऐसा (अ० ३ । १ । ६७) में कहा है ॥ १६२ ॥

इण्नशजिसर्त्तिभ्यः क्वरप्[2] ॥ १६३ ॥

इण्० सर्त्तिभ्यः । ५ । ३ । क्वरप् । १ । १ ॥ इण्, नश्, जि, सर्त्ति इत्येतेभ्यो धातुभ्यस्तच्छीलाद्यर्थेषु **'क्वरप्'** प्रत्ययो भवति ॥

क्वरपि ककारो गुणप्रतिषेधार्थो विशेषणार्थश्च ('.....**कञ् क्वरपः**[3]' इति, पकारस्तुगर्थः **स्वरार्थश्च** ॥ इत्वरः । इत्वरी । नश्वरी । जित्वरः । जित्वरी । सृत्वरः । सृत्वरी ॥ **नश्वर** इति '**नेड्वशि कृति**[4]' इतीट् प्रतिषिध्यते ॥ १६३ ॥

[इण्० सर्त्तिभ्यः] इण्, नश्, जि, सर्त्ति इन धातुओं से तच्छीलादि अर्थों में [क्वरप्] 'क्वरप्' प्रत्यय होता है ॥

---

१. प्रकृतस्यैव घुरचो ङित्त्वे गुणाभावे सिद्धे सति प्रत्ययान्तरविधानं ज्ञापकार्थम् **'प्रातिदेशिकं ङित्त्वमनित्यम्'** इति ॥ ज्ञापकान्तरञ्चात्र **'अर्त्तेरुः'** (उ०-४-७९) इत्यस्मादनुवर्तमानस्य 'अरु' प्रत्ययस्य **'गाङ्कुटादिभ्योऽञ्णिन्ङित्'** (अ० १ । २ । १) इत्यनेन ङित्त्वे सिद्धे **'कुटः कित्'** (उ० ४ । ८०) इति कित्त्वचनम् । तेन **'धवित्रम्'** इत्यत्र कुटादित्वान् ङित्त्वेऽपि गुणो भवति ।

अत एवाह **श्वेतवनवासी**—"कुटादित्वान्ङित्त्वेनैव गुणाभावे सिद्धे तस्याऽनित्यत्वज्ञापनार्थं पुनः कित्त्वविधानं, तेन—**'धवित्रम्'** (अ० ३ । २ । १८४) इत्यत्र गुणाभावो न भवति (उ० वृ०—४ । ८४)" ॥ कुट-धातौ **माधवोप्येवम्** ॥ **नारायणोऽप्याह**—

कुटेर्ङित्त्वेन सिद्धेऽपि यदयं कित्ग्रहः कृतः । तेन कोटरकोटीराद्यु णादौ ज्ञापितो गुणः ॥
(उ० वृ० ४ । ८५)

२. आ० सू० १२८५ ॥ ३. अ० ४ । १ । १५ ॥
४. अ० ७ । २ । ८ ॥

'क्वरप्' में ककार गुण, के प्रतिषेध तथा 'कञ्क्वरपः' इसमें विशेषण के लिये है। पकार 'तुक्' तथा 'स्वर' के लिए है॥

जैसे—इत्वरः। इत्वरी। नश्वरः। नश्वरी। जित्वरः। जित्वरी। सृत्वरः। सृत्वरी। 'नश्वरः' इसमें 'नेड्वशि कृति' से 'इट्' का निषेध हो जाता है॥ १६३॥

गत्वरश्च[1]॥ १६४॥

गत्वरः। १। १। च [अ०]॥ गत्वर इति 'गम' धातोः 'क्वरप् प्रत्ययो निपात्यते॥ अनुनासिकलोपो झलि परतो विधीयते स क्वरपि न प्राप्नोति निपातनादनुनासिको लुप्यते॥ १६४॥

गत्वरः इसमें 'गम' धातु से 'क्वरप्' प्रत्यय निपातन है॥ झल् परे रहते अनुनासिक का लोप कहा है परन्तु वह 'क्वरप्' परे नहीं पाता था अतः निपातन से अनुनासिक का लोप किया है॥ १६४॥

जागरूकः[2]॥ १६५॥

जागुः। ५। १। ऊकः। १। १॥ तच्छीलाद्यर्थेषु 'जागृ' धातोः 'ऊकः' प्रत्ययो भवति जागरूकः। जागरणशील इत्यर्थः॥ १६५॥

[जागुः] तच्छीलादि अर्थों में 'जागृ' धातु से [ऊकः] 'ऊक' प्रत्यय होता है॥ जैसे—जागरूकः—अर्थात् जागरणशील॥ १६५॥

यजजपदशां यङः[3]॥ १६६॥

यजजपदशाम्। ६। ३। यङः। ५। १॥ तच्छीलाद्यर्थेषु यज, जप, दश[4] इत्येतेभ्यो यङन्तेभ्यो धातुभ्य 'ऊकः' प्रत्ययो भवति॥ यायज्यत इति यायजूकः। जञ्जप्यत इति जञ्जपूकः। दन्दश्यत इति दन्दशूकः॥ १६६॥

तच्छीलादि अर्थों में [यज० दशाम्] यज, जप, दश इन [यङः] यङन्त धातुओं से 'ऊक' प्रत्यय होता है॥

जैसे—यायज्यत इति यायजूकः। जञ्जपूकः। दन्दशूकः॥ १६६॥

नमिकम्पिस्म्यजसकमहिंसदीपो रः[5]॥ १६७॥

नमि० दीपः। ५। १। रः। १। १॥ नमि, कम्पि, स्मि, अजस, कम, हिंस, दीप इत्येतेभ्यो धातुभ्यो 'रः' प्रत्ययो भवति तच्छीलादिषु कर्तृषु॥

---

१. आ० सू० १२८६॥ २. आ० सू० १२८७॥

३. आ० सू० १२८८॥

४. 'यजजपदशाम्' इति दंशेर्भाविना नलोपेन निर्देशः॥

५. आ० सू० १२८९॥

नम्रो ब्राह्मणः । **कम्प्रा** शाखा । **स्मेरः** पुरुषः, ईषद्धसनशीलः ॥ अजस इति नञ् पूर्वकस्य '**जसु मोक्षणे**'[1] इत्यस्य ग्रहणम् । **अजस्रम्** । **कम्रा** युवतिः । **हिंस्रो** दस्युः । **दीप्रं** काष्ठम् ॥ १६७ ॥

[नमि-दीपः] नमि, कम्पि, स्मि, अजस, कम, हिंस, दीप इन धातुओं से [रः] 'र' प्रत्यय होता है, तच्छीलादि कर्त्ता में ॥

जैसे—**नम्रो** ब्राह्मणः । **कम्प्रा** शाखा । **स्मेरः** पुरुषः । मुस्कराने वाला ॥ **अजस्रम्** । इसमें नञ् पूर्वक 'जसु मोक्षणे' का ग्रहण है । **कम्रा** युवतिः । **हिंस्रो** दस्युः । **दीप्रं** काष्ठम् ॥ १६७ ॥

सनाशंसभिक्ष उः[2] ॥ १६८ ॥

सनाशंसभिक्षः । ५ । १ । उः । १ । १ ॥ सनिति सन्नन्तस्य[3] ग्रहणं न तु सनधातोः । आशंसेति आङः शसि इच्छायामित्यस्य ग्रहणम्[4] ॥

सन्नन्तेभ्यः आशंस-भिक्षिभ्याञ्च धातुभ्यां तच्छीलादिषु कर्त्तृषु 'उः' प्रत्ययो भवति ॥

चिकीर्षुः कटम् । व्याकरणं **पिपठिषुः** । ग्रामं **जिगमिषुः** । **आशंसुः** । **भिक्षुः** ॥ १६८ ॥

यहां 'सन्' से सन्नन्त का ग्रहण है 'सन' धातु का नहीं । 'आशंस' में **'आङः शसि इच्छायाम्'** धातु का ग्रहण है ॥

[सना० भिक्षः] सन्नन्त तथा 'आशंस' और 'भिक्ष' धातुओं से तच्छीलादि कर्त्ता में [उः] 'उ' प्रत्यय होता है ॥

जैसे—चिकीर्षुः कटम् । व्याकरणं पिपठिषुः । ग्रामं जिगमिषुः । आशंसुः । भिक्षुः ॥ १६८ ॥

विन्दुरिच्छुः[5] ॥ १६९ ॥

विन्दुः । १ । १ । इच्छुः । १ । १ । [विन्दुरिच्छुरिति शब्दद्वयं तच्छीलाद्यर्थे निपात्यते] । विन्दुरिति 'विद' धातोः 'उः' प्रत्ययो' नुग्' आगमश्च निपात्यते । इच्छुरिति 'इष' धातोरुश्छत्वञ्च निपात्यते ॥ वेदनशीलो विन्दुः[6] । एषणशील इच्छुः । विद्या-

---

१. धा० दिवा० १०३ ॥ (ख) अजस्रमित्यत्र नञ्-पूर्वो 'जसुः' तत्र निपातनान्नञो नकार-लोपो धातुना च समासः ॥ अजस्रं क्रियासातत्ये वर्त्तते ॥

२. आ० सू० १२९० ॥

३. **'गर्गादिभ्यो यञ्'** (अ० । ४ । १ । १०५) इत्यत्र गणे जिगीषु-पाठाज्ज्ञाप्यते ॥

४. धा० भ्वा० ६१९ ॥ ५. आ० सू० १२९१ ॥

६. केचित्तु—**'विदि अवयवे'** इत्यस्मान्निपातनमिच्छन्ति । तेन—**तैलविन्दुरिवाम्भसि । जल-विन्दुनिपातेन क्रमशः पूर्य्यते घटः** (चा० नी० १२ । २२ ॥ षड्विन्दुः—इत्यादयः सिध्यन्ति) ॥

मिच्छुः । अत्र 'उ' प्रत्ययान्तशब्देषु **'न लोकाव्यये'**[1] ति कर्मणि षष्ठीनिषेधाद् द्वितीयैव भवति ॥ १६९ ॥

[विन्दुरिच्छुः] 'विन्दुः' तथा 'इच्छुः' यह दो शब्द तच्छीलादि अर्थ में निपातन हैं ॥

जैसे—विन्दुः । इसमें 'विद' धातु से 'उ' प्रत्यय तथा 'नुम्' आगम निपातन है ॥ इच्छुः इसमें इष-धातु से 'उ' प्रत्यय तथा 'छत्व' निपातन है ॥ वेदनशीलो विन्दुः । एषणशील इच्छुः । यहां 'उ' प्रत्ययान्त शब्दों में 'न लोकाव्यय०' से कर्म में षष्ठी के प्रतिषिद्ध होने से द्वितीया ही होती है ॥ १६९ ॥

क्याच्छन्दसि[2] ॥ १७० ॥

क्यात् । ५ । १ । छन्दसि । ७ । १ ॥ निरनुबन्धकग्रहणे[3] सानुबन्यकग्रहणं भवतीति क्यच्-क्यङ्-क्यषां सामान्येन ग्रहणं भवति ॥

क्यात् = क्यप्रत्ययान्ताद् धातोस्तच्छीलादिषु छन्दसि = वेदविषये 'उः' प्रत्ययो भवति ॥

देवयुः[4] । सुम्नयुः[5] । अघायुः[6] ॥

'छन्दसि' इति किम्—पुत्रीयिता । मित्रीयिता लोके तच्छीलादिषु 'तृन्' ॥ १७० ॥

'क्यात्' इस पद के निरनुबन्धक होने से सामान्य करके क्यच्, क्यङ्, क्यष्, इन सानुबन्धकों का ग्रहण होता है ॥

[क्यात्] क्यप्रत्ययान्त धातु से तच्छीलादि अर्थों में [छन्दसि] वेदविषय में 'उ' प्रत्यय होता है ॥

जैसे—देवयुः । सुम्नयुः । अघायुः ॥

'छन्दसि' ग्रहण इसलिये है कि—पुत्रीयिता । मित्रीयिता । लोक में तच्छीलादि में 'तृन्' ही होता है ॥ १७० ॥

आदृगमहनजनः किकिनौ लिट् च[7] ॥ १७१ ॥

आदृ० जनः । ५ । १ । किकिनौ । १ । २ । लिट् । १ । १ । च [अ०] ॥ आत्-आकारान्तः । ऋ-ग्रहणेन ऋवर्णान्ताश्च धातवो गृह्यन्ते ॥

---

१. अ० २ । ३ । ६९ ॥ २. आ० सू० १२९२ ॥

३. विशेषाऽनुबन्धरहितानां ग्रहणे—इत्यर्थः ॥

४. ऋ० ९ । ११ । २ ॥ ४ । २ । ७ । इत्यादिषु बहुषु स्थलेषु ॥

५. ऋ० १ । ७९ । १० ॥ २ । ३० । ११ ॥ ३ । २७ । ११ ॥ ६ । २ । ३ ॥

६. अघायवः—यजु० ४ । ३४ ॥ ११ । ७९ ॥ (ख) यत्तु गीतायाम्—**"अघायुरिन्द्रियारामो मोघं पार्थ स जीवति"** । ३ । १६ ॥ छन्दोवत् कवयः कुर्वन्तीत्यनुसृत्यैव तदिति वेदितव्यम् ॥

७. आ० सू० १२९२ ॥

आत्, ऋ, गम, हन, जन इत्येतेभ्यो धातुभ्यस्तच्छीलादिषु छन्दसि = वेदविषये कि-किनौ प्रत्ययौ भवतः, 'लिट् च' किकिनौ [च] लिड्वद्भवतः। लिड्वदिति कार्य्यातिदेशः। लिटि यानि द्वित्वादीनि कार्य्याणि, [तानि] यथा स्युः ॥

पपिः[1] सोमम् । ददि[1] र्गाः ॥ ऋ–मित्रावरुणौ ततुरिः[2] । दूरे ह्यध्वा जगुरिः[3] । अत्र तॄ-गॄभ्यां किकिनौ, लिड्वत्त्वाद् द्विर्वचनं '**बहुलं छन्दसि**[4]' इत्युत्वम् ॥ गम—जग्मिः[5] ॥ हन—जघ्निः[6] ॥ जन–जज्ञिः[7] ॥

लिड्वत्करणेन '**असंयोगाल्लिट् कित्**[8]' इति किकिनौ किद्वद्भविष्यतः, पुनः किकिनोः कित्करणस्यैतत्प्रयोजनम्—'**ऋच्छत्यृताम्**[9]' इति प्रतिषेधविषये गुण आरभ्यते स यथा तेरतुः तेरुरित्यत्र भवत्येवं ततुरिर्जगुरिरित्यत्रापि प्राप्नोति । एवमर्थं किकिनोः कित्करणम् । नित्करणञ्च स्वरार्थम् ॥

वा०—उत्सर्गश्छन्दसि सदादिभ्यो दर्शनात्[1] ॥ १ ॥

कि-किनौ प्रत्ययौ छन्दसि वेदे सामान्यधातुभ्यो वक्तव्यौ । किं कारणम् ? सदादि-धातुभ्यो वेदेषु किकिनौ दृश्येते ॥

सेदिः[10] । मेनिः[11] : रेमिः[12] । नेमिश्चक्रमिवाभवत्[13] । विविचिं[14] रत्नधातमम् ॥

वा०—भाषायां धात्वृकृसृजननिमिभ्यः[15] ॥ २ ॥

भाषायां लौकिकशब्दविषये धात्रादिभ्यः किकिनौ भवतः । दधिः । चक्रिः । सस्रिः । जज्ञिः । नेमिः ॥ २ ॥

वा०—महिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ वक्तव्यौ[15] ॥ ३ ॥

---

१. ऋ०—६ । २३ । ४ ॥ २. अनुपलब्धमूलमिदम् ॥
३. ऋ० १० । १०८ । १ ॥ ४. अ० ७ । १ । १०३ ॥
५. ऋ० ७ । २० । १ ॥ ६. ऋ० ९ । ६१ । २० ॥
७. अ० १ । २ । ५ ॥ ८. अ० ७ । ४ । ११ ॥
९. अ० ३ । २ । १७१ भा० ॥ (ख) आ० वा० १२९३ ॥
१०. श०—७ । ३ । १ । २३ ॥ तै० आ०—४ । २२ । १ ।, २३ । १ ॥
११. अथ० २ । ११ । १ ॥ ६ । ३ । ९ ॥ एवं बहुत्रापि ॥
१२. ऋ० २ । ५ । ३ ॥ १३. ऋ० ५ । ८ । ३ ॥
१४. अ० ३ । २ । १७१ भा० ॥ आ० वा०—१२९४ ॥
१५. अ० ३ । २ । १७१ भा० ॥ (ख) आ० वा० १२९५ ॥

वृषा सहमानं सासहिः[1] । वावहिः[2] । चाचलि.[3] । पापतिः[3] । इदं तृतीयं वार्त्तिकं वेदविषयमेव ॥ १७१ ॥

यहां 'आत्' ग्रहण से आकारान्त तथा 'ऋ' ग्रहण से ऋवर्णान्तों का ग्रहण है ॥

[आदृ० जनः] आत्, ऋ, गम, हन, जन इन धातुओं से तच्छीलादि अर्थों में छन्दसि अर्थात् वैदिकविषय में [किकिनौ] 'कि' तथा 'किन्' प्रत्यय होते हैं [लिट् च] और कि, किन् प्रत्ययों को लिड्वत् होता है ॥ 'लिट् च' इस पद से लिड्वत् कार्य्यातिदेश कहा है । अर्थात् लिट् परे जो द्वित्वादि कार्य्य होते हैं वे इन से भी हो जावें ॥

जैसे—पपिः सोमम् । ददिर्गाः ॥ ऋ—मित्रावरुणौ ततुरिः । दूरे ह्यध्वा जगुरिः । यहां 'तॄ' तथा 'गृ' धातु से, 'कि-किन्' प्रत्यय तथा इन के लिड्वत् होने से द्विर्वचन हो जाता है । 'बहुलं छन्दसि' से 'उत्व' हो जाता है ॥ गम-जग्मिः ॥ हन-जघ्निः ॥ जन-जज्ञिः ॥ लिड्वत् करने से 'असंयोगाल्लिट् कित्' सूत्र से कित्वत् हो जाते, पुनः कि-किन् प्रत्ययों को कित् करने का यह प्रयोजन है कि—'ऋच्छत्यृताम्' यह सूत्र प्रतिषेध विषय में गुण का विधायक है, वह जिस प्रकार तेरतुः । तेरुः में गुण कर देता है इसी प्रकार ततुरिः । जगुरिः में भी प्राप्त था सो न हो जावे इसलिये 'कि-किन्' को कित् किया ॥

वा०—उत्सर्गश्छन्दसि सदा०—छन्द अर्थात् वैदिकविषय में धातुमात्र से सामान्यतया 'कि-किन्' प्रत्यय होते हैं ऐसा कहना चाहिये, क्योंकि सदादि धातुओं से वेदविषय में कि-किन् देखे जाते हैं ॥

जैसे—सेदिः । नेमिः । रेमिः । नेमिश्चक्रमिवाऽभवत् । विविचि रत्नधातमम् ॥१॥

वा०—भाषायां धाञ्क्रु०—भाषायां अर्थात् लौकिकशब्दविषय में धाञादि धातुओं से 'कि-किन्' हो जाते हैं ॥

जैसे—दधिः । चक्रिः । सस्रिः । जज्ञिः । नेमिः ॥ २ ॥

वा०—सहिवहि०—सहि, वहि, चलि, पति इन यङन्त धातुओं से 'कि-किन्' प्रत्यय होते हैं ऐसा कहना चाहिये ॥

जैसे—वृषा सहमानं सासहिः । वावहिः । चाचलिः । पापतिः ॥ यह तृतीय वार्त्तिक वेदविषय में ही है ॥ ३ ॥ १७१ ॥

स्वपितृषोर्नजिङ्[4] ॥ १७२ ॥

स्वपितृषोः । ६ । २ । नजिङ् । १ । १ ॥

स्वपि-तृषिभ्यां धातुभ्यां तच्छीलादिषु 'नजिङ्' प्रत्ययो भवति ॥

---

१. परन्तु—येना समत्सु सासहिः ॥ (सा० उ० प्र० ७ । अ० प्र० २ । १० । २) इत्येवमन्यत्रापि (श० ६ । ६ । ३ । ९) ॥

२. सप्त पंश्यति वावहिः ॥ (ऋ० ९ । ९ । ६) ॥

३. अनुपलब्धमूलमिदम् ॥

४. आ० सू० १२९६ ॥

स्वप्नक् । तृष्णक् । ङकारो गुणप्रतिषेधार्थः । इकारो जकाररक्षणार्थश्च ॥ १७२ ॥

[स्वपितृषोः] 'स्वपि' तथा 'तृष' धातु से तच्छीलादि अर्थों में [नजिङ्] 'नजिङ्' प्रत्यय होता है ॥

जैसे—स्वप्नक् । तृष्णक् ॥

ङकार गुण वृद्धि के निवारणार्थ तथा 'इकार' जकार की रक्षा के लिये है ॥ १७२ ॥

शृवन्द्योरारुः[1] ॥ १७३ ॥

शृवन्द्योः । ६ । २ । आरुः । १ । १ ॥

शृवन्दिभ्यां धातुभ्यां 'आरुः' प्रत्ययो भवति तच्छीलाद्यर्थेषु ॥

शृ हिंसायाम्[2] शरारुः । **वदिअभिवादनस्तुत्योः**[3] । वन्दारुः ॥ १७३ ॥

[शृवन्द्योः] 'शृ' तथा 'वन्दि' धातु से तच्छीलादि अर्थों में [आरुः] 'आरुः' प्रत्यय होता है ॥

जैसे—शरारुः—इसमें 'शृ हिंसायाम्' धातु है। वन्दारुः में—'वदि अभिवादन-स्तुत्योः' धातु है ॥ १७३ ॥

भियः क्रुक्लुकनौ[4] ॥ १७४ ॥

भियः । ५ । १ । क्रुक्लुकनौ । १ । २ ॥

'ञिभी भये'[5] इत्यस्माद् धातोस्तच्छीलादिषु क्रु-क्लुकनौ प्रत्ययौ भवतः ॥

भीरुः । भीलुकः ॥

१—वा०—क्रुकन्नपि वक्तव्यः[6] ॥

भीरुकः । कित्करणं त्रिष्वपि प्रत्ययेषु गुणप्रतिषेधार्थम् ॥ १७४ ॥

[भियः] 'ञिभी भये' इस धातु से तच्छीलादि अर्थों में [क्रुक्लुकनौ] 'क्रुक्लुकन्' प्रत्यय होते हैं ॥

जैसे—भीरुः । भीलुकः ॥

१—वा०—क्रुकन्नपि०—'ञिभी' धातु से 'क्रुकन्' प्रत्यय भी कहना चाहिये ॥ जैसे—भीरुकः ॥ तीनों प्रत्ययों में कित्करण गुण के प्रतिषेध के लिये है ॥

---

१. आ० सू० १२९७ ॥
२. धा० क्र्या० १६ ॥
३. धा० भ्वा० ११ ॥
४. आ० सू० १२९८ ॥
५. धा० जुहो० २ ॥
६. अ० ३ । २ । १७४ भा० ॥ (ख) आ० वा० १२९९ ॥

स्थेशभासपिसकसो वरच्[1] ॥ १७५ ॥

स्थेश० कसः । ५ । १ । वरच् । १ । १ ॥

स्था, ईश, भास, पिस, कस इत्येतेभ्यो धातुभ्यो 'वरच्' प्रत्ययो भवति तच्छीलाद्यर्थेषु ॥

स्थावरः । ईश्वरः । भास्वरः । पेस्वरः । विकस्वरः ॥ १७५ ॥

[स्थे० कसः] स्था, ईश, भास, पिस, कस इन धातुओं से तच्छीलाद्यर्थों में [वरच्] 'वरच्' प्रत्यय होता है ॥

जैसे—स्थावरः । ईश्वरः । भास्वरः । पेस्वरः । विकस्वरः ॥ १७५ ॥

यश्च यङः[2] ॥ १७६ ॥

यः । ५ । १ । च । [अ०] । यङः । ५ । १ ॥ वरच् इत्यनुवर्त्तते ॥

'या प्रापणे'[3] यङन्ताद् 'या' धातोस्तच्छीलादिषु कर्त्तृषु 'वरच्' प्रत्ययो भवति ॥ यायावरः ॥ १७६ ॥

यहां 'वरच्' इस पद का अनुवर्त्तन है ॥ [यङः] यङन्त [यः] 'या प्रापणे' धातु से तच्छीलादि कर्त्ता हों तो 'वरच्' प्रत्यय होता है ॥

जैसे—यायावरः ॥ १७६ ॥

भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः[4] क्विप् ॥ १७७ ॥

भ्राजः० स्तुवः । ५ । १ । क्विप् । १ । १ ॥

भ्राज, भास, धुर्वि, द्युत, ऊर्जि, पॄ, जु, ग्रावस्तु इत्येतेभ्यो धातुभ्यस्तच्छीलादिषु कर्त्तृषु 'क्विप्' प्रत्ययो भवति ॥

[भ्राज]—विभ्राट् । विभ्राजौ । 'व्रश्चभ्रस्ज०'[5] इति पदान्ते षत्वम् ॥ [भास]—भाः । भासौ । भासः ॥ [धुर्वि]—धूः । धुरौ । धुरः ॥ [द्युत]—विद्युत् । विद्युतौ ॥ [ऊर्जि]—ऊर्क् । ऊर्जौ ॥ [पॄ]—पूः । पुरौ ॥ अत्र 'उदोष्ठ्यपूर्वस्य'[6] इत्युत्वम् ॥ [जु]—जूः । [जुवौ] । जुवः ॥ अत्र वार्त्तिकेन दीर्घत्वम् [ग्रावस्तु]—ग्रावस्तुत् । ग्रावस्तुतौ ॥

'क्विप् च'[7] इति सूत्रेण सिद्ध एव 'क्विप्', पुनर्विधानस्येतत् प्रयोजनम्—तच्छीलाद्यर्थेषु वासरूपेण तृजादयो न भवन्ति । 'क्विप् च'[7] इति विहितः क्विबपि

---

१. आ० सू० १३०० ॥
२. आ० सू० १३०१ ॥
३. धा० अदा० ३९ ॥
४. आ० सू० १३०२ ॥
५. अ० ८ । २ । ३६ ॥
६. अ० ७ । १ । १०२ ॥
७. अ० ३ । २ । ७६ ॥

तृजादिस्तस्य सामान्यविहितस्य विशेषविहितस्तच्छीलादिष्वर्थेषु 'तृन्' बाधकः स्यात्, इष्यते च भ्राजादिभ्योऽपि तच्छीलादिष्वर्थेषु 'क्विप्' स्यात्तत्पुनर्विधानमन्तरा न प्राप्नोतीति प्रयोजनम् ॥ १७७ ॥

[भ्राज० स्तुवः] भ्राज, भास, धुर्वि, द्युत, ऊर्जि, पॄ, जु, ग्रावस्तु इन धातुओं से तच्छीलादि कर्त्ता में [क्विप्] 'क्विप्' प्रत्यय होता है ॥

जैसे—भ्राज—विभ्राट्, विभ्राजौ । 'व्रश्चभ्रस्ज०' इत्यादि सूत्र से पदान्त में षत्व हो जाता है ॥ भास्—भाः, भासौ, भासः ॥ धुर्वि—धूः, धुरौ, धुरः ॥ द्युत्—विद्युत्, विद्युतौ ॥ ऊर्जि—ऊर्क् ऊर्जौ । पॄ—पूः, पुरौ । यहां 'उदोष्ठ्यपूर्वस्य' से उत्व हो जाता है ॥ जु—जूः, जुवौ, जुवः । यहां वार्त्तिक से दीर्घ होता है ॥ ग्रावस्तु—ग्रावस्तुत्, ग्रावस्तुतौ ॥ इन में 'क्विप् च' सूत्र से 'क्विप्' सिद्ध ही था पुनः 'क्विप्' विधान करने का यह प्रयोजन है कि—तच्छीलादि में वासरूपविधि से तृजादि नहीं होते हैं । 'क्विप् च' सूत्र से विहित क्विप् भी तृजादि है अतः उसका तच्छीलादि अर्थों में विशेष विहित 'तृन्' बाधक हो जाता परन्तु इष्ट यह है कि—भ्राजादि धातुओं से तच्छीलादि अर्थों में 'क्विप्' हो, वह विधान किये विना प्राप्त नहीं होता ॥ १७७ ॥

अन्येभ्योऽपि दृश्यते[1] ॥ १७८ ॥

क्विबनुवर्त्तते ॥ अन्येभ्यः । ५ । ३ । अपि । [अ०] । दृश्यते । [क्रियापदम्] ॥

अन्येभ्योऽपि धातुभ्यस्तच्छीलाद्यर्थेषु 'क्विप्' प्रत्ययो दृश्यते ॥

पचतीति पक् । पचनशील इत्यर्थः । भिनत्तीति भित् । छित् ॥

वा०—वचिप्रच्छ्यायतस्तु-कटप्रु-जु-श्रीणां दीर्घश्च[2] ॥ १ ॥

वचि, प्रच्छि, आयतपूर्वक-स्तु, कटपूर्वक-प्रु, जु, श्री इत्येतेभ्यो धातुभ्यस्तच्छीलादिषु 'क्विप्' तस्मिन् परत एषां दीर्घत्वञ्च भवति ॥

वाक् । प्राट् । अत्र दीर्घवचनसामर्थ्यात् सम्प्रसारणं न भवति ॥ आयतस्तूः । कटप्रूः । जूः । भ्राजादिसूत्रे 'जु' धातोः 'क्विप्' विधीयते तस्यैव दीर्घार्थमत्र ग्रहणम् । [श्रीः] ॥ १ ॥

वा०—द्युतिगमिजुहोतीनां द्वे च[3] ॥ २ ॥

चकाराद्दीर्घत्वञ्चानुवर्त्तते । तञ्जुहोतिना[4] सम्बध्यते । द्युतिगमिजुहोतिभ्यः 'क्विप्' एतेषां द्विर्वचनं जुहोतेर्दीर्घश्च । दिद्युत् । जगत् । जुहूः ॥ २ ॥

---

१. आ० सू० १३०३ ॥

२. अ० ३ । २ । १७८ भा० ॥ (ख) आ० वा० १३०४ ॥

३. अ० ३ । २ । १७८ भा० ॥ (ख) आ० वा० १३०५ ॥

४. दीर्घत्वविधानात् **'अचश्च'** (अ० । १ । २ । २८) इति परिभाषाया उपस्थितावजन्तस्य धातोरित्यर्थे दीर्घग्रहणं जुहोतेरेव सम्बध्यते, द्युतिगम्योरनजन्तत्वात् ॥ (ख) आ० वा० १३०६ ॥

वा०—दृणातेर्ह्रस्वश्च द्वे च क्विप् चेति वक्तव्यम्[1] ॥ ३ ॥ ददृत् । ह्रस्वत्वे कृते 'तुक्' ।

भा०—**जुहूः जुहोतेर्ह्वयतेर्वा, ददृत्—दृणातेर्दीर्यतेर्वा । जूः—ज्वरते-र्जीर्यतेर्वा ॥**

वा०—ध्यायतेः सम्प्रसारणञ्च[2] ॥ ४ ॥ धीर्ध्यायतेर्दधातेर्वा ॥ १७८ ॥

यहां 'क्विप्' पद का अनुवर्त्तन है । [अन्येभ्योऽपि] और धातुओं से भी तच्छीलादि अर्थों में 'क्विप्' प्रत्यय [दृश्यते] देखा जाता है ॥ जैसे—पचतीति पक् अर्थात् पचन स्वभाव वाला ॥ भिनत्तीति भित् । छित् ॥

वा०—वचिप्रच्छ्या०—वचि, प्रच्छि, आयतपूर्वक स्तु, कटपूर्वक प्रु, जु, श्री, इन धातुओं से तच्छीलादि में 'क्विप्' होता है ॥ तथा क्विप् परे इन को दीर्घत्व भी हो जाता है ॥

जैसे—**वाक् । प्राट् ।** यहां दीर्घवचनसामर्थ्य से सम्प्रसारण नहीं होता ॥ **आयतस्तूः । कटप्रूः । जूः ।** भ्राजादि सूत्र में 'जु' धातु से 'क्विप्' विधान किया है उसी को दीर्घ विधान करने के लिये यहां पढ़ा है ॥ १ ॥

वा०—द्युतिगमि०—यहां वार्त्तिक में चकार से 'दीर्घत्व' का अनुवर्त्तन है । और वह दीर्घ जुहोति के साथ सम्बन्धित होता है । जैसे—द्युति, गमि, जुहोति इन से 'क्विप्' होता है और उनको द्विर्वचन होता है तथा जुहोति को दीर्घत्व भी हो जाता है ॥ जैसे—**दिद्युत् । जगत् । जुहूः** ॥ २ ॥

वा०—दृणातेर्ह्रस्व०—दृणाति से 'क्विप्' और ह्रस्वत्व तथा द्विर्वचन कहना चाहिये ॥ जैसे—**ददृत्** ॥ ह्रस्व करने से 'तुक्' हो जाता है ॥ ३ ॥

[भा०] 'जुहूः' जुहोति तथा ह्वयति दोनों से सिद्ध है । ददृत् दृणाति तथा दीर्यति से तथा 'जूः'—ज्वरति तथा जीर्यति से सिद्ध है ॥

वा०—ध्यायतेः सम्प्रसारणञ्च—धीः । इसमें—ध्यायति तथा दधाति का ग्रहण है ॥ १७८ ॥

भुवः संज्ञान्तरयोः[3] ॥ १७९ ॥

'क्विप्' अनुवर्त्तते । भुवः । ५ । १ । संज्ञान्तरयोः । ७ । २ ॥

'भू' धातोस्तच्छीलादिषु संज्ञान्तरयोः 'क्विप्' प्रत्ययो भवति ॥

संज्ञायाम्—**विभूः । स्वयम्भूः ।** अन्तरे—**प्रतिभूः**[4] ॥ इह पर्य्यन्तं तच्छीलाधिकारोऽनुवर्त्तते ॥ १७९ ॥

यहां 'क्विप्' पद की अनुवृत्ति है [भुवः] 'भू' धातु से तच्छीलादि अर्थों में [**संज्ञान्तरयोः**] 'संज्ञा' तथा 'अन्तर' गम्यमान हो तो 'क्विप्' प्रत्यय होता है ॥

---

१. आ० वा० १३०७ ॥

२. अ० ३ । २ । १७८ भा० ॥ आ० वा० १३०८ ॥

३. आ० सू० १३०९ ॥

४. "धनिकाधमर्णयोरन्तरे यस्तिष्ठति स प्रतिभूरुच्यते" इति वृत्तिः ॥

जैसे—संज्ञा में—विभूः । स्वयम्भूः ॥ अन्तर में—प्रतिभूः । इस सूत्र तक तच्छीलादि का अधिकार है, आगे नहीं ॥ १७९ ॥

विप्रसम्भ्यो ड्वसंज्ञायाम्[1] ॥ १८० ॥

'भुवः' इत्यनुवर्त्तते, 'क्विप्' निवृत्तः ॥ विप्रसम्भ्यः । ५ । ३ । डु । १ । १ । असंज्ञायाम् । ७ । १ ॥

वि, प्र, सम् इत्युपसर्गत्रयपूर्वाद् 'भू' धातो 'डु' प्रत्ययो भवति [असंज्ञायां गम्यमानायाम्] ॥

विभुः । प्रभुः । सम्भुः । डित्करणेनात्र टिलोपः ॥

वा०—डु-प्रकरणे मितद्वादिभ्य उपसंख्यानं धातुविधितुक् प्रतिषेधार्थम्[2] ॥

मितं द्रवतीति मितद्रुः । शतद्रुः । शम्भुः । **धातुविधि**र्धातोर्विहितानि कार्याणि मितद्र्वादीनां मा भूवन् । मितद्रव इत्युवङ् मा भूत् । **'ह्रस्वस्य पिति कृति तुक्'**[3] इति क्विपि 'तुक्' प्राप्नोति स मा भूत् ॥ १८० ॥

यहां 'भुवः' इस पद का अनुवर्त्तन है । तथा 'क्विप्' का निवर्त्तन हुआ ॥

[विप्रसम्भ्यः] वि, प्र, सम् ये तीन उपसर्ग हों तो 'भू' धातु से [असंज्ञायाम्] असंज्ञा गम्यमान हो तो [डु] 'डु' प्रत्यय होता है ॥ जैसे—विभुः । प्रभुः । सम्भुः । डित् करने से यहां टिलोप हो जाता है ॥

वा०—डुप्रकरणे मित०—डु-प्रकरण में 'मितद्रुः' आदि का उपसंख्यान करना चाहिये 'धातुविधि' तथा 'तुक्' प्रतिषेध के लिये ॥ जैसे—मितं द्रवतीति मितद्रुः । शतद्रुः । शम्भुः । 'धातुविधि' का प्रतिषेध इसलिये कहा है कि—धातु से विहित कार्य्य मितद्रु आदि को न हों ॥ जैसे—मितद्रवः में 'उवङ्' नहीं हुआ ॥ 'ह्रस्वस्य पिति कृति तुक्' से तुक् प्राप्त था सो न होवे ॥ १८० ॥

धः कर्मणि ष्ट्रन्[4] ॥ १८१ ॥

धः । ५ । १ । कर्मणि । ७ । १ । ष्ट्रन् । १ । १ ॥ ध इति 'धेट्' निर्दिश्यते 'डुधाञ्' वा ॥ 'धा' धातोः कर्मणि कारके 'ष्ट्रन्' प्रत्ययो भवति ॥

धयति दधाति वा यां सा धात्री स्तनदायिनी माता । षित्करणं ङीषर्थम् ॥१८१॥

'धः' इस पद से 'धेट्' या 'डुधाञ्' का निर्देश है ॥ [धः] 'धा' धातु से [कर्मणि] कर्मकारक में [ष्ट्रन्] 'ष्ट्रन्' प्रत्यय होता है ॥

जैसे—धयति-दधाति वा यां सा धात्री । स्तन देने वाली माता धात्री (धायी) कहाती है । 'ष्ट्रन्' में षित् करण 'ङीष्' के लिये है ॥ १८१ ॥

---

१. आ० सू० १३१० ॥
२. अ० ३ । २ । १८० भा० ॥ (ख) आ० वा० १३११ ॥
३. अ० ६ । १ । ७१ ॥ ४. आ० सू० १३१२ ॥

दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे[1] ॥ १८२ ॥

दाम्नी० नहः । ५ । १ । करणे । ७ । १ ॥ ष्ट्रन्नित्यनुवर्त्तते ॥

दाप्, नी, शसु, यु, युज, स्तु, तुद, सि, सिच, मिह, पत, दश, नह इत्येतेभ्यो धातुभ्यः करणकारके 'ष्ट्रन्' प्रत्ययो भवति ॥

दान्ति लुनन्त्यनेन दात्रम् । नयन्ति प्राप्नुवन्ति कार्य्याण्यनेन नेत्रम् । शस्त्रम् । योत्रम् । योक्त्रम् । स्तोत्रम् । तोत्त्रम् । सेत्रम् । सेक्तृम् । मेढ्रम् । पत्त्रम् । दश इति भ्वादिस्थस्य दंश-धातोर्ग्रहणाय '**दंशसञ्जस्वञ्जां शपि**[2]' इति शब्विषयेऽनुनासिक-लोपो भवति । अन्यथा—यङ्लुगन्तस्य [अपि] ग्रहणं स्यात् । '**अनिदितां हल उपधायाः क्ङिति**[3]' इत्यत्रानुनासिकलोपविषये महाभाष्ये व्याख्यातम् । दशन्त्यनया दंष्ट्रा—अत्र ष्ट्रनः षित्त्वान् ङीषि प्राप्तेऽजादिपाठाट्टाप्[4] ॥

नह्यन्ति बध्नन्त्यनेन नद्धं पाशम् । '**नहो धः**[5]' इति झलि परतो हकारस्य धकारादेशः ॥ १८२ ॥

यहां 'ष्ट्रन्' पद का अनुवर्त्तन है ॥ [दाम्नी० नहः] दाप्, नी, शसु, यु, युज, स्तु, तुद, सि, सिच, मिह, पत, दश, नह इन धातुओं से [**करणे**] करणकारक में 'ष्ट्रन्' प्रत्यय होता है ॥ जैसे—दान्ति लुनन्त्यनेन **दात्रम्** । नयन्ति प्राप्नुवन्ति कार्य्याण्यनेन **नेत्रम्** । **शस्त्रम्** । **योत्रम्** । **योक्त्रम्** । **स्तोत्रम्** । **तोत्त्रम्** । **सेत्रम्** । **सेक्त्रम्** । **मेढ्रम्** । **पत्त्रम्** । दंष्ट्रा । इसमें 'दश' पद से भ्वादिगणवाली 'दश' धातु का ग्रहण करने के लिये '**दंशसञ्जस्वञ्जां शपि**' इस सूत्र से शप् विषय में अनुनासिक का लोप किया है । अन्यथा यङ्लुगन्त का भी ग्रहण हो जाता । यह बात महाभाष्य में 'अनिदितां हल०' इस सूत्र में अनुनासिक के लोपविषय में व्याख्यात है ॥ दशन्त्यनया **दंष्ट्रा** । यहां 'ष्ट्रन्' के षित् होने से ङीष् की प्राप्ति थी परन्तु अजादि गण में पाठ होने से 'टाप्' हो जाता है ॥ नह्यन्ति बध्नन्त्यनेन **नद्धं** पाशम् । '**नहो धः**' से झल् परे रहते हकार को 'धकार' आदेश हो जाता है ॥ १८२ ॥

हलसूकरयोः पुवः[6] ॥ १८३ ॥

हलसूकरयोः । ७ । २ । पुवः । ५ । १ ॥ करण इति हलसूकराभ्यां सह सम्बध्यते । 'पू' धातोर्हलसूकरकरणकारकयोः 'ष्ट्रन्' प्रत्ययो भवति ॥

पोत्रं हलम् । पोत्रः सूकरः । ष्ट्रनः षित्त्वात् 'पोत्री' सूकरी इति ङीषपि सिद्धो भवति ॥ १८३ ॥

---

१. आ० सू० १३१३ ॥
२. अ० ६ । ४ । २५ ॥
३. अ० ६ । ४ । २४ ॥
४. अ० ४ । १ । ४ ॥
५. अ० ८ । २ । ३४ ॥
६. आ० सू० १३१४ ॥

यहां 'करणे' पद का 'हल' तथा 'सूकर' शब्द के साथ सम्बन्ध है ॥ [पुवः] 'पू'धातु से [हलसूकरयोः] हल तथा सूकर करणकारक हों तो 'ष्ट्रन्' प्रत्यय होता है ॥ जैसे—पोत्रम् । हलम् । पोत्रः सूकरः । 'ष्ट्रन्' के षित् होने से 'पोत्री सूकरी' इसमें 'ङीष्' भी सिद्ध हो जाता है ॥ १८३ ॥

अर्त्तिलूधूसूखनसहचर इत्रः[1] ॥ १८४ ॥

'करणे' इत्यनुवर्त्तते । अर्त्ति० चरः । ५ । १ । इत्रः । १ । १ ॥ अर्त्ति, लू, धू, सू, खन, सह, चर इत्येतेभ्यो धातुभ्यः करणकारके 'इत्रः' प्रत्ययो भवति ॥

अरित्रम् । लवित्रम् । धवित्रम्[2] । सवित्रम् । खनित्रम् । सहित्रम् । चरित्रम् । 'तितुत्र०[3]' इति 'इट्' प्रतिषिद्धयते तदर्थं वचनम् ॥ १८४ ॥

यहां 'करणे' इस पद का अनुवर्त्तन है ॥ [अर्त्ति चरः०] अर्त्ति, लू, धू, सू, खन, सह, चर इन धातुओं से करणकारक में [इत्रः] 'इत्र' प्रत्यय होता है ॥

जैसे—अरित्रम् । लवित्रम् । धवित्रम् । सवित्रम् । खनित्रम् । सहित्रम् । चरित्रम् ॥ 'तितुत्र०' इत्यादि से 'इट्' का निषेध होता है अतः 'इत्र' विधान के लिए सूत्र है ॥ १८४ ॥

पुवः संज्ञायाम्[4] ॥ १८५ ॥

पुवः ५ । १ । संज्ञायाम् । ७ । १ ॥ संज्ञायां गम्यमानायां 'पू' धातोः करणकारके 'इत्र' प्रत्ययो भवति ॥ पवित्रं दर्भः । पवित्रे प्राणापानौ ॥ १८५ ॥

[संज्ञायाम्] संज्ञा गम्यमान हो तो [पुवः] 'पू'धातु से करणकारक में 'इत्र' प्रत्यय होता है ॥

जैसे—पवित्रं दर्भः । पवित्रे प्राणापानौ ॥ १८५ ॥

कर्त्तरि चर्षिदेवतयोः[5] ॥ १८६ ॥

करणे, पुव इत्यनुवर्त्तते । कर्त्तरि । ७ । १ । च । [अ०] । ऋषिदेवतयोः । ७ । २ ॥

'पू' धातोर्ऋषौ करणे देवतायाञ्च कर्त्तरि 'इत्र' प्रत्ययो भवति ॥

पूयतेऽनेन पवित्रोऽयमृषिः । देवतायां कर्त्तरि—अग्निः पवित्रमुच्यते[6] । वायुः पवित्रमुच्यते[7] । इन्द्रः पवित्रमुच्यते[8] ॥ १८६ ॥

---

१. आ० सू० १३१५ ॥

२. आतिदेशिकस्य कुटादिङित्त्वस्यानित्यत्वादत्र गुणः । प्रपञ्चितञ्च विस्तरेणास्माभिः **'विदि भिदिछिदेः कुरच्'** (अ० ३ । २ । १६२) इत्यत्र ॥

३. अ० ७ । २ । ९ ॥

४. आ० सू० १३१६ ॥

५. आ० सू० १३१७ ॥

६. निरुक्त ५ । ६ ॥

यहां 'करणे' तथा 'पुवः' पदों का अनुवर्त्तन है ॥ 'पू'धातु से [कर्त्तरि च ऋषि-देवतयोः] ऋषिः करण हो तथा देवता कर्त्ता हो तो 'इत्र' प्रत्यय होता है ॥

जैसे--पूयतेऽनेन इति पवित्रोऽयमृषिः । देवता से कर्त्ता में अग्निः पवित्रमुच्यते । वायुः पवित्रमुच्यते । इन्द्रः पवित्रमुच्यते ॥ १८६ ॥

क्रीतः क्तः[1] ॥ १८७ ॥

क्रीतः । ५ । १ । क्तः । १ । १ ॥ सामान्यधातुभ्यो भूते निष्ठा विहिता वर्त्तमानार्थोऽयमारम्भः ॥

क्रि इद्यस्य स क्रीत् तस्मात्, क्रीतो धातोर्वर्त्तमाने 'क्तः' प्रत्ययो भवति । **क्रिमिदा स्नेहने**[2]-मिन्नः । **क्रिक्ष्विदा-क्ष्विण्णः** । **क्रिधृषा-धृष्टः** । निष्ठासंज्ञाऽस्यापि भवति तेन 'मिन्नः' इत्यादिषु नत्वं सिद्धं भवति ॥ १८७ ॥

धातुमात्र से भूतकाल में निष्ठा कहा हैं, यह सूत्र वर्त्तमानकाल में विधान करने के लिये है ॥

[क्रीतः] क्रि-इत् धातु से वर्त्तमानकाल में [क्तः] 'क्त' प्रत्यय होता है ॥ जैसे—क्रिमिदा स्नेहने-मिन्नः । क्रिक्ष्विदा-क्ष्विण्णः । क्रिधृषा—धृष्टः ॥ इस 'क्त' की भी निष्ठा संज्ञा होती है, इस कारण 'मिन्नः' इत्यादि में 'नत्व' सिद्ध हो जाता है ॥ १८७ ॥

मतिबुद्धिपूजार्थेभ्यश्च[3] ॥ १८८ ॥

मतिबुद्धिपूजार्थेभ्यः । ५ । ३ । च । [अ०] । चकारोऽत्र समाप्त्यर्थ, पाद-समाप्तिं द्योतयति । मति, बुद्धि, पूजा इति त्रयोऽर्था येषां तेभ्यो धातुभ्यो वर्त्तमानकाले 'क्तः' प्रत्ययो भवति ॥

मत्यर्थेभ्यः—राज्ञां मतः । राज्ञामिष्टः ॥ बुद्ध्यर्थेभ्यः—राज्ञां बुद्धः । राज्ञां ज्ञातः ॥ पूजार्थेभ्यः—राज्ञां पूजितः । राज्ञामर्चितः ॥ **'क्तस्य च वर्त्तमाने'**[4] इति षष्ठी । **'क्तेन च पूजायाम्'**[5] इति षष्ठीसमासनिषेधश्च ॥

का०—शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट इत्यपि ।
रुष्टश्च रुषितश्चोभावभिव्याहृत इत्यपि ॥ १ ॥
हृष्टतुष्टौ तथा क्रान्तस्तथोभौ संयतोद्यतौ ।
कष्टं भविष्यतीत्याहुरमृताः पूर्ववत्स्मृताः[6] ॥ २ ॥

---

१. आ० सू० १२२१ ॥
२. धा० क्रया०—१३४ ॥
३. आ० सू० १२२२ ॥
४. अ० २ । ३ । ६७ ॥
५. अ० २ । २ । १२ ॥
६. अ० ३ । २ । १८८ भा० ॥

सूत्रेणाऽसिद्धानाँ शब्दानां परिगणनं क्रियते । शीलितः । रक्षितः । क्षान्तः । आक्रुष्टः । जुष्टः । रुष्टः । रुषितः । '**तीषसह०**'[1] इति वा-इट् ।। अभिव्याहृतः हृष्टः । तुष्टः । क्रान्तः । संयतः । उद्यतः । इत्येते शब्दा वर्त्तमानकाले क्त-प्रत्ययान्ताः सिद्धयन्ति । कष्टमिति 'कष'धातोर्भविष्यति काले 'क्त' इति वदन्ति । अमृत-शब्दे पूर्ववत् वर्त्तमाने 'क्त' प्रत्ययः ।। १८८ ।।

॥ इति तृतीयाऽध्यायस्य द्वितीयः पादः ॥

यहां 'चकार' समाप्ति के अर्थ में है अर्थात् पाद समाप्त हुआ ऐसा दर्शाता है ॥

[**मति० र्थेभ्यः**] मति, बुद्धि, पूजा, ये तीन अर्थ हैं जिन धातुओं के उनसे वर्त्तमानकाल में 'क्त' प्रत्यय होता है ॥

जैसे—मत्यर्थ – **राज्ञां मतः । राज्ञामिष्टः ।।** बुद्ध्यर्थ—**राज्ञां बुद्धः । राज्ञां ज्ञातः ।।** पूजार्थ—**राज्ञां पूजितः । राज्ञामर्चितः ।।** यहां सर्वत्र **'क्तस्य च वर्त्तमाने'** से षष्ठी होती है। **'क्तेन च पूजायाम्'** से षष्ठी समास का निषेध हो जाता है ॥

का०—**शीलितो रक्षितः०**—जो शब्द सूत्र में सिद्ध नहीं होते उनका परिगणन इन दो कारिकाओं द्वारा किया है ॥ जैसे—**शीलितः । रक्षितः । क्षान्तः । आक्रुष्टः । जुष्टः । रुष्टः । रुषितः ।** इसमें 'तीषसह०' इत्यादि से विकल्प से 'इट्' होता है ॥ **अभिव्याहृतः । हृष्टः । तुष्टः । क्रान्तः । संयतः । उद्यतः ।** ये शब्द क्वप्रत्ययान्त वर्त्तमान काल में सिद्ध होते हैं। **कष्टम्**—इस में 'कष' धातु से भविष्यत् काल में 'क्त' प्रत्यय है। **अमृत**—शब्द में पूर्ववत् 'क्त' प्रत्यय है ॥ १८८ ॥

[तीसरे अध्याय का द्वितीयपाद समाप्त हुआ]

---

१. अ० ७ । २ । ४८ ॥

अथ तृतीयाध्याये तृतीयः पादः ॥

उणादयो बहुलम्[1] ॥ १ ॥

उणादयः । १ । ३ । बहुलम् । १ । १ ॥ वर्त्तमान इत्यनुवर्त्तते ॥

उणादयः प्रत्यया वर्त्तमानकाले धातुभ्यो बहुलं भवन्ति ॥

का०—बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि तेषाम् ।
कार्य्यसशेषविधेश्च तदुक्तं नैगमरूढिभवं हि सुसाधु ॥ १ ॥
नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम् ।
यन्न विशेषपदार्थसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम् ॥ २ ॥
संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्य्याद्विद्यादनुबन्धमेतच्छास्त्रमुणादिषु[2] ॥ ३ ॥

आभिः कारिकाभिर्बहुलप्रयोजनमुच्यते—तन्वीभ्योऽल्पाभ्यः प्रकृतिभ्य उणादयः प्रत्यया दृश्यन्ते, तत्र बहुलवचनादविहिताभ्योऽपि प्रकृतिभ्यो भवन्ति । यथा—'**हृषेरलच्**[3]' इति 'हृष' धातोः 'उलच्' विधीयते शकि-धातोरपि भवति—शङ्कुला । तथा त उणादयः प्रत्यया अपि न समुच्चिता एकीकृताः किन्तु प्रायेण लघुत्वेन प्रत्यय-विधानमुणादौ कृतं, तत्रापि बहुलवचनादेवाविहिताः प्रत्यया भवन्ति । यथा- ऋ-धातोः फिडफिड्डौ[4] भवतः, ऋफिडः । ऋफिड्डः ॥ एवमुणादिषु कार्य्याणि सशेषाणि कृतानि, अष्टाध्याय्यां यानि कार्य्याणि सूत्रैर्विधीयन्ते तान्युणादौ सर्वाणि न भवन्ति, किन्तु सूत्रैर्विहितानि कार्य्याणि न भवन्त्यविहितानि च भवन्ति, यथा 'दण्ड[5]' इत्यत्र प्रत्यया-

---

१. आ० सू० १३१८ ॥ (ख) सूत्रमिदमुणादिसूत्रभूमिकायामृग्वेदादिभाष्यभूमिकायां [व्याकरणविषये] च भगवत्पादैः सुव्याख्यातम् ॥

(ग) उणादिसूत्राण्याचार्यपादैः स्वयमपि विवृतानि । तानि च ग्रन्थरूपेण पृथङ्मुद्रितान्युपलभ्यन्त इति नात्र मुद्रयन्ते ॥

२. अ० ३ । ३ । १ भा० ॥ ३. उणा० १ । ९६ ॥

४. अत्र भाष्यम्—**"अयं तर्हि यदृच्छाशब्दोऽपरिहार्यः—लुफिडः, लुफिड्डश्चेति । एषोऽपि ऋफिडः, ऋफिड्डश्च । कथम् ? अस्तिप्रवृत्तिश्चैव हि लोके लक्ष्यते । फिडफिड्डावौणादिकौ प्रत्ययौ"** (ऋलृक् सूत्रे)

५. उणा० १ । ११४ ॥

देर्डकारस्येत्संज्ञा[1] प्राप्ता सा न भवति । 'षण्ढ[2]' इत्यत्राप्राप्तं षत्वं भवति । **तदुक्त**मेतदर्थं बहुलमित्युक्तम् ।। इदं पूर्वोक्तं त्रिविधं कार्य्यमुणादौ किमर्थं क्रियत इत्युच्यते—**'नैगमरूढिभवं हि सुसाधु'** नैगमा वैदिकाः शब्दा रूढयो लौकिकाश्च सुसाधु शोभनाः साधवो यथा स्युः । एवं कृतेन विना नैव ते सुष्ठु सेत्स्यन्ति ।। १ ।।

(नाम च०) **नाम** संज्ञाशब्दान् **निरुक्ते**[3] निरुक्तकारा धातुजान् यौगिकानाहुर्वदन्ति । **व्याकरणे** वैयाकरणेषु **शकटस्य तोक**मपत्यं शाकटायनस्यैकस्य ऋषेर्मतं संज्ञाशब्दा यौगिका इति । अन्येषां मतेन तु संज्ञाशब्दा रूढय एव ।। (यन्न०)—यद्विशेषात् पदार्थान्न सम्यगुत्थितमर्थात् प्रकृति-प्रत्ययविधानेन न व्युत्पन्नं, तत्र प्रकृतिं दृष्ट्वा प्रत्यय ऊह्यः प्रत्ययञ्च दृष्ट्वा प्रकृतिः ।। २ ।।

(संज्ञासु०)—प्रकृतिप्रत्ययोरूहन **क्व** कर्त्तव्यमित्याह—**संज्ञासु** संज्ञाशब्देषु **धातुरूपाणि** पूर्वमूह्यानि, ततस्तेभ्यः प्रकृतिभ्यः परे च प्रत्ययाः । तत्राऽनुबन्धकार्य्यं दृष्ट्वा प्रकृतिप्रत्ययोरनुबन्ध ऊह्यः । यथा—टित्कार्य्यं ङीप्[4] दृश्येत, टित्प्रत्यय ऊह्यः । शब्दानुशासनेऽस्मिन् ग्रन्थ उणादिष्वे**[त]च्छास्त्रं** शासितव्यमस्तीति । एवमर्थमस्मिन् सूत्रे बहुलग्रहणमस्तीति । अत एव बहुलार्थाः[5] बोध्याः ।। ३ ।: १ ।।

उणादि प्रत्यय वर्त्तमान काल में धातु से बहुल करके होते हैं ।।

कारिका—बाहुलकं प्रकृतेः.....हि सुसाधु ।। १ ।।

नाम च धातुज.....तदूह्यम् ।। २ ।।

संज्ञासु धातु.....मुणादिषु ।। ३ ।।

इन कारिकाओं से बहुलग्रहण का प्रयोजन कहते हैं—उणादि प्रत्ययों का विधान थोड़े से धातुओं से ही किया है । परन्तु बहुलवचन से अविहित धातुओं से भी उणादि प्रत्यय देखे जाते हैं । यथा—'हृषेरुलच्' इस सूत्र में 'हृष' धातु से 'उलच्' प्रत्यय का विधान है परन्तु इस वचन से शकि धातु से भी 'उलच्' प्रत्यय होकर शङ्कुला शब्द सिद्ध होता है । इसी प्रकार प्रत्यय भी

---

१. अ० १ । ३ । ७ ।।

२. **"षणेर्ढः"** उणा० १ । ९७ (श्वेतवनवासिवृत्तौ) । अन्यत्र तु **"शमेर्ढः"** शण्ढः इति पाठः ।।

३. **"तत्र नामानि सर्वाण्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च । न सर्वाणीतिगार्ग्यो वैयाकरणानां चैके"** । निरु० १ । १२ ।।

४. **"टिड्ढाणञ्०"** (अ० ४ । १ । १५) इति ङीप् ।।

५. **क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद् विभाषा क्वचिदन्यदेव । विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ।।** इति प्राञ्चः ।।

थोड़े से संकेतमात्र ही पढ़े हैं इसीलिये बहुलवचन से अविहित प्रत्यय भी देखे जाते हैं। यथा—'ऋफिड' और 'ऋफिड्ड' शब्दों में 'ऋ' धातु से 'फिड' और 'फिड्ड' प्रत्यय होते हैं। इसी प्रकार अन्य कार्यों का भी उणादि में पूर्णरूप से विधान नहीं किया गया है। इसलिये अष्टाध्यायी में विहित सब कार्य उणादि में नहीं होते, और अविहित कार्य हो भी जाते हैं। यथा 'दण्ड' इस शब्द में दम धातु से विहित ड प्रत्यय में 'चुटू' इस सूत्र से डकार की इत् संज्ञा नहीं होती। और 'षण्ढ' इस पद में अष्टाध्यायी से अप्राप्त षत्व बहुलवचन से हो जाता है इन सब प्रकार के कार्यों की सिद्धि के लिये सूत्रकार ने बहुल ग्रहण किया है।

उणादि में पूर्वोक्त त्रिविधकार्य का विधान क्यों किया है इसका प्रयोजन कहते हैं—"नैगमरूढिभवं हि सुसाधु" नैगम अर्थात् वैदिक और रूढि अर्थात् लौकिक संज्ञाशब्द जिससे भली प्रकार सिद्ध हो सकें। ऐसा किये विना ये शब्द भली प्रकार सिद्ध नहीं हो सकते ॥ १ ॥

"नाम च धातुजम्" निरुक्तकार ने तथा वैयाकरणों में शकट ऋषि के पुत्र शाकटायन ने भी संज्ञावाची शब्दों को धातुज अर्थात् यौगिक कहा है। अन्य आचार्य संज्ञावाची शब्दों को रूढि अर्थात् अव्युत्पन्न मानते हैं इसलिये जो पद प्रकृतिप्रत्यय के विधान से सिद्ध नहीं होते उन में प्रकृति को देखकर प्रत्यय की और प्रत्यय को देखकर प्रकृति की ऊहा कर लेनी चाहिये ॥ २ ॥

प्रकृति और प्रत्ययों की कल्पना कहां करनी चाहिये इसके लिये लिखते हैं—"संज्ञासु····" संज्ञाशब्दों में प्रकृति को देखकर उसके परे प्रत्यय की तथा प्रत्यय को देखकर उससे पूर्व धातु की कल्पना कर लेनी चाहिये। इसी प्रकार कार्य को देखकर प्रकृति और प्रत्यय में अनुबन्धों की कल्पना कर लेनी चाहिये। यथा किसी पद में टित् कार्य ङीप् देखा जाता हो तो टित् प्रत्यय की कल्पना करनी चाहिये ॥ ३ ॥

शब्दानुशासनरूप इस अष्टाध्यायी ग्रन्थ में उणादिसूत्रों में ऐसा विधान समझना चाहिये। इसीलिये इस सूत्र में बहुलग्रहण किया है। इसी से बहुल शब्द का अर्थ भी समझ लेना चाहिये ॥ १ ॥

यहां वर्त्तमान का अधिकार समाप्त हुआ ॥

भूतेऽपि दृश्यन्ते[1] ॥ २ ॥

'वर्त्तमाने' इति निवृत्तम्। 'उणादयः' इत्यनुवर्त्तते। भूते। ७। १। अपि। [अ०]। दृश्यन्ते। [क्रियापदम्]॥

उणादयः प्रत्यया भूतेऽपि दृश्यन्ते॥ वृत्तमिति वर्त्म[2]। चरितमिति चर्म॥ दृश्यन्त इति ग्रहणात् शिष्टप्रयोगेषु[3] दृष्टा मन्तव्याः॥

---

१. आ० सू० १३१९॥ २. सर्वधातुभ्यो मनिन्। (उणा० ४। १४५)॥

३. शिष्टलक्षणन्तु—'एतस्मिन्नार्य्यावर्त्ते निवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कल्पाश्चिद्विद्यायाः पारङ्गतास्तत्र भवन्तः शिष्टाः'॥ अ० ६। ३। १०९ भा०॥

यहां 'वर्त्तमाने' पद की निवृत्ति हो जाती है और 'उणादयः' इस पद का अनुवर्त्तन है ॥

उणादि प्रत्यय [भूतेऽपि] भूतकाल में भी [दृश्यन्ते] देखे जाते हैं ॥

जैसे—वृत्तमिति **वर्त्म** । चरितमिति **चर्म** ।

'दृश्यन्ते' इस ग्रहण से शिष्टप्रयोगों में देखे जाते हैं; ऐसा जानना चाहिये ॥ २ ॥

भविष्यति गम्यादयः[1] ॥ ३ ॥

भविष्यति । ७ । १ । गम्यादयः । १ । ३ ॥ उणादिषु **गम्यादयः** शब्दा भविष्यत्काले सिद्धा भवन्ति । अर्थात् गम्यादिषु ये प्रत्ययाः सन्ति, ते भविष्यत्काले विधीयन्ते ॥

वा०—भविष्यतीत्यनद्यतन उपसंख्यानम्[2] *॥ १ ॥*

अनद्यतनभविष्यत्काले गम्यादयो भवन्तीत्यर्थः । श्वो ग्रामं गमी ॥

अथ गम्यादिगणः—[१] गमी । [२] आगमी[3] । [३] आगामी । [४] प्रस्थायी । [५] प्रतिरोधी । [६] प्रतिबोधी । [७] प्रतियोधी । [८] प्रतियोगी । [९] प्रतियायी[4] । [१०] भावी । इति गम्यादयः ॥

इतोऽग्रे **अनद्यतने लुडिति**[5] पर्य्यन्तं भविष्यदधिकारः ॥ ३ ॥

उणादि में [गम्यादयः] गम्यादि शब्द [भविष्यति] भविष्यत्काल में सिद्ध होते हैं अर्थात् गम्यादि शब्दों में धातु से भविष्यत्काल में प्रत्यय होते हैं ॥

वा०—भविष्यतीत्य० । गम्यादि शब्दों का विधान अनद्यतनभविष्यत्काल में करना चाहिये ॥ जैसे—श्वो ग्रामं गमी । अर्थात् कल गांव को जायगा ॥

यहां से आगे 'अनद्यतने लुट्' तक भविष्यत् का अधिकार है ॥ ३ ॥

शिष्टाः खलु विगतमत्सरा निरहङ्काराः कुम्भीधान्या अलोलुपा दम्भदर्पलोभमोहक्रोधविवर्जिताः ॥ ५ ॥

धर्मेणाधिगतो येषां वेदः सपरिबृंहणः । शिष्टास्तदनुमानज्ञाः श्रुतिप्रत्यक्षहेतवः ॥ ६ ॥

(बौधा० स्मृ० १ । १)

'पारम्पर्य्यगतो येषाम्' इति प्रथमचरणभेदेन वसिष्ठस्मृतावपि (५ । ३९) ॥

धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः । ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ॥

(मनु० १२ । १०९) ॥

१. आ० मु० १३२० ॥

२. आ० ३ । ३ । ३ । भा० ॥ आ० वा० १३२१ ॥

३. काशिकायाम्—'आगामी' नास्ति ॥ ४. 'आयायी' इति तु काशिकायामधिकम् ॥

५. अ० ३ । ३ । १५ ॥

यावत्पुरानिपातयोर्लट्[1] ॥ ४ ॥

'भविष्यति' इत्यनुवर्त्तते । यावत्पुरानिपातयोः । ७ । २ । लट् । १ । १ ॥

यावत्पुराशब्दयोर्निपातोपपदयोः सामान्यधातोर्भविष्यति काले 'लट्' प्रत्ययो भवति ॥ यावद् भुङ्क्ते । पुरा भुङ्क्ते ॥

'निपातयोः[2]' इति किम्—यावद्दास्यति तावद् ग्रहीष्यति । पुरा[3] वाराणस्या पृथग्भविष्यति ॥ '**अनद्यतने लुट्**[4]' इत्यस्माद् '**यावत्पुरानिपातयोर्लट्**[5]' इति 'लट्' भवति पूर्वविप्रतिषेधेन । यावत् श्वो भुङ्क्ते । पुरा श्वो भुङ्क्ते । लुट्प्राप्तौ 'लड्' भवति विप्रतिषेधेन ॥ ४ ॥

यहां 'भविष्यति' पद का अनुवर्त्तन है ॥

[यावत्-पुरानिपातयोः] यावत्, पुरा ये दो निपात उपपद हों तो धातु से भविष्यत्-काल में [लट्] 'लट्' प्रत्यय होता है ॥ जैसे—यावद्भुङ्क्ते । पुरा भुङ्क्ते ॥ 'निपातयोः' ग्रहण इसलिये है कि—यावद्दास्यति तावद् ग्रहीष्यति । पुरा वाराणस्या पृथग्भविष्यति ॥

'अनद्यतने लुट्' इस सूत्र की अपेक्षा 'यावत्पुरानिपातयोर्लट्' सूत्र से प्राप्त 'लट्' पूर्वविप्रतिषेध से हो जाता है । जैसे—यावत् श्वो भुङ्क्ते । पुरा श्वो भुङ्क्ते । यहां 'लुट्' की प्राप्ति में पूर्वविप्रतिषेध से 'लट्' हुआ ॥ ४ ॥

विभाषा कदाकर्ह्योः[6] ॥ ५ ॥

'लट्' अनुवर्त्तते । अप्राप्तविभाषेयम् । विभाषा । १ । १ । कदाकर्ह्योः । ७ । २ ॥

कदाकर्ह्योरुपपदयोर्धातुमात्राद् भविष्यत्काले विकल्पेन 'लट्' प्रत्ययो भवति ॥

कदा याति । कदा यास्यति । कर्हि याति । कर्हि यास्यति ॥ विशेषेऽनद्यतने भविष्यति 'लुट्' । कदा याता । कर्हि याता । लुट्पक्षे लुडपि भवति ॥ ५ ॥

यहां 'लट्' पद का अनुवर्त्तन है । यह सूत्र 'अप्राप्तविभाषा' है ॥

[कदाकर्ह्योः] कदा और कर्हि ये दो उपपद हों तो धातुमात्र से भविष्यत्काल में [विभाषा] विकल्प करके 'लट्' प्रत्यय होता है ॥

जैसे—कदा याति । कदा यास्यति । कर्हि याति । कर्हि यास्यति ॥ अनद्यतन भविष्यत् में 'लुट्' होता है । कदा याता । कर्हि याता । पक्ष में 'लुट्' भी हो जाता है ॥ ५ ॥

---

१. आ० सू० ७५४ ॥

२. निपातग्रहणम्—'**लक्षणप्रतिपदोक्त०**' परिभाषाया अनित्यत्वज्ञापनार्थम् । यद्वा मन्दबुद्धीनां प्रतिपत्तिगौरवपरिहारार्थम् ॥

३. पूःशब्दात् करणे तृतीयैकवचनम् ॥

४. अ० ३ । ३ । १५ ॥

५. अ० ३ । ३ । ४ ॥

६. आ० सू० ७५५ ॥

किंवृत्ते लिप्सायाम्[1] ॥ ६ ॥

'विभाषा' इत्यनुवर्त्तते 'लट्' च । किंवृत्ते । ७ । १ । लिप्सायाम् । ७ । १ ॥

वृत्त-शब्दोऽत्र प्रयोगवाची स्वरूपविधिनिवृत्त्यर्थः । लब्धुमिच्छा लिप्सा तस्याम् ॥ लिप्सायां गम्यमानायां किं-शब्दस्य प्रयोग उपपदे धातोर्विकल्पेन भविष्यत्काले 'लट्' प्रत्ययो भवति ॥

कं [कतरं कतमं वा] भवानिदं पुस्तकं ददाति । कस्मै [कतरस्मै कतमस्मै वा] भवानिदं पुस्तकं दास्यति [दाता वा] । कतमो मह्यं भिक्षां ददाति, दास्यति, दाता वा ईप्सुः कश्चिद्वदति ॥

'लिप्सायाम्' इति किम्—को गृहं गमिष्यति । अत्र लण्मा भूत् ॥ ६ ॥

यहां 'विभाषा' तथा 'लट्' पद का अनुवर्त्तन है । यहां स्वरूप की निवृत्ति के लिये प्रयोग-वाची वृत्त शब्द का ग्रहण है । प्राप्त करने की इच्छा का नाम लिप्सा है ।

[लिप्सायाम्] लिप्सा गम्यमान होने पर [किंवृत्ते] कि शब्द का प्रयोग उपपद हो तो धातु से विकल्प करके 'लट्' प्रत्यय हो ॥

जैसे—कस्मै कतरस्मै कतमस्मै वा भवानिदं पुस्तकं ददाति । कं कतरं कतमं वा भवानिदं पुस्तकं दास्यति । कतमो मह्यं भिक्षां ददाति-दास्यति-दाता वा । लेने की इच्छा रखने वाला कोई ऐसा कहता है ॥

'लिप्सायाम्' ग्रहण इसलिये है कि—को गृहं गमिष्यति । यहां 'लट्' प्रत्यय न हो ॥ ६ ॥

लिप्स्यमानसिद्धौ च[2] ॥ ७ ॥

पूर्वेण सूत्रेण सिद्धेऽकिंवृत्त्यर्थोऽयमारम्भः ॥

'विभाषा, लट्' इत्यनुवर्त्तते । लिप्स्यमानसिद्धौ । ७ । १ । च । [अ०] ॥

लिप्स्यते प्राप्तुमिष्यतेऽदो लिप्स्यमानम् । कर्मणि 'शानच्' । तस्य सिद्धिः प्राप्तिस्तस्याम् । लिप्स्यमानसिद्धौ सत्यां धातोर्भविष्यत्काले विकल्पेन 'लट्' प्रत्ययो भवति ॥

यो धर्ममाचरति स स्वर्गं लोकं गच्छति । यो धर्ममाचरिष्यत्याचरिता वा स स्वर्गं लोकं गमिष्यति गन्ता वा ॥ 'लृट्' पक्षेऽनद्यतनविशेषे लुडपि ॥ ७ ॥

पूर्वसूत्र से किंवृत्त में प्राप्त था अकिंवृत्त के लिये इस सूत्र का आरम्भ है ॥

यहां ['विभाषा' और] 'लट्' पद का अनुवर्त्तन है । जिसे प्राप्त करना चाहते हैं उसे लिप्स्यमान कहते हैं । यहां 'शानच्' प्रत्यय कर्म में है ॥

[लिप्स्यमान] लिप्स्यमान पदार्थ की [**सिद्धौ**] सिद्धि हो तो धातु से भविष्यत्काल में विकल्प करके 'लट्' प्रत्यय होता है ॥

---

१. आ० सू० ७५६ ॥ २. आ० सू० ७५७ ॥

जैसे—यो धर्ममाचरति स स्वर्गं लोकं गच्छति, यो धर्ममाचरिष्यति, आचरिता वा स स्वर्गं लोकं गमिष्यति, गन्ता वा ।। 'लृट्' पक्ष में अनद्यतन भविष्यत्काल होने पर 'लुट्' भी होता है ॥ ७ ॥

लोडर्थलक्षणे च[1] ॥ ८ ॥

'विभाषा, लट्' इत्यनुवर्त्तते । लोडर्थलक्षणे । ७ । १ ॥ च । [अ०] ॥ लोटोऽर्थो लोडर्थः प्रैषादिः, स लक्षितो भवत्यनेन तल्लोडर्थलक्षणम् ॥ लोडर्थलक्षणे धातोर्विकल्पेन भविष्यत्काले 'लट्' भवति ॥

उपाध्यायश्चेदागच्छति, आगमिष्यति, आगन्ता वा—अथ त्वं व्याकरणमधीष्व ॥

अत्राध्ययनं लोडर्थस्तस्य लक्षणमुपाध्यायागमनं तस्मिन् त्रयो लकारा भवन्ति ॥ ८ ॥

यहां 'विभाषा, लट्' इन पदों का अनुवर्त्तन है । जिससे लोट् के प्रैषादि अर्थ लक्षित हों उसे लोडर्थलक्षण कहते हैं ॥

[लोडर्थलक्षणे] लोडर्थलक्षण गम्यमान हो तो धातु से विकल्प करके भविष्यत्काल में 'लट्' प्रत्यय होता है ॥

जैसे—उपाध्यायश्चेदागच्छति, आगमिष्यति, आगन्ता वा, अथ त्वं व्याकरणमधीष्व । यहां अध्ययन लोडर्थ है उसका लक्षण उपाध्याय का आगमन है उसमें तीनों लकार होते हैं ॥ ८ ॥

लिङ् चोर्ध्वमौहूर्त्तिके[2] ॥ ९ ॥

'विभाषा, लट्' इति 'लोडर्थलक्षणे' इति चाऽनुवर्त्तते । लिङ् । १ । १ । च । [अ०] । ऊर्ध्वमौहूर्त्तिके । ७ । १ ॥ मुहूर्त्तादूर्ध्वमूर्ध्वमुहूर्त्तस्तत्र भवमूर्ध्वमौहूर्त्तिकम् । **कालाट्ठञ्[3]** ठञ् । उत्तरपदवृद्धिश्च[4] ॥

ऊर्ध्वमौहूर्त्तिके लोडर्थलक्षणे वर्त्तमानाद् धातोर्विकल्पेन भविष्यत्काले 'लिङ्' चाल्लट् पक्षे लृट्लुटौ च लकारौ भवतः ।

मुहूर्त्तस्य पश्चादुपाध्यायश्चेदागच्छेद्, उपाध्यायश्चेदागच्छति, उपाध्यायश्चेदागमिष्यति, आगन्ता वा अथ त्वं वेदमधीष्व । मुहूर्त्तस्य पश्चाद्भविष्यति लिङपि भवतीति । वि । शेषः । अत्राप्यध्ययनस्य लोडर्थस्योपाध्यायागमनं लक्षणम् ॥ ९ ॥

यहां 'विभाषा, लट्, लोडर्थलक्षणे' इन पदों का अनुवर्त्तन है । 'ऊर्ध्वमौहूर्त्तिके' पद में 'कालाट्ठञ्' से ठञ् तथा उत्तरपदवृद्धि होती है ॥

---

१. आ० सू० ७५८ ॥ २. आ० सू० ७५९ ॥

३. अ० ४ । ३ । ११ ॥

४. अस्मिन् सूत्रे निपातनात्, समास उत्तरपदवृद्धिश्चेति भावः ॥

लोडर्थ में वर्त्तमान धातु से [ऊर्ध्वमौहूर्त्तिके] दो घड़ी से ऊपर जो भविष्यत्काल है उसमें विकल्प करके [लिङ्] 'लिङ्' और 'लट्' हो पक्ष में 'लृट्' और 'लुट्' होते हैं ॥

जैसे—मुहूर्त्तस्य पश्चादुपाध्यायश्चेदागच्छेत्, उपाध्यायश्चेदागच्छति, उपाध्यायश्चेदागमिष्यति, आगन्ता वा, अथ त्वं वेदमधीष्व । मुहूर्त्त के अनन्तर भविष्यत् में 'लिङ्' भी हो जाता है ॥ यहां भी अध्ययनरूप लोडर्थ का लक्षण उपाध्याय का आगमन है ॥ ९ ॥

तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्[1] ॥ १० ॥

'भविष्यत्' इत्यनुवर्त्तते । अन्यत्सर्वं निवृत्तम् । तुमुन्ण्वुलौ । १ । २ । क्रियायाम् । ७ । १ । क्रियार्थायाम् । ७ । १ ॥

क्रियार्थायां क्रियायामुपपदे धातोर्भविष्यत्काले तुमुन्ण्वुलौ प्रत्ययौ भवतः ॥

भोक्तुं व्रजति । पठितुं व्रजति । अत्र व्रजन-क्रिया भोजन-पठनप्रयोजनोपपदं, तत्र भुजिपठिभ्यां तुमुन् । आसको व्रजति । शायको व्रजति । भोजको व्रजति । पाचको व्रजति । अत्र व्रजनक्रियाऽऽसनादिक्रियार्थां उपपदं, तत्र आसादिभ्यो धातुभ्यो ण्वुल् ॥

'ण्वुल्तृचौ'[2] इति सूत्रेण सामान्यविहितो 'ण्वुल्' क्रियार्थायां क्रियायामुपपदेऽपि स्यात् पुनर्वचनेनैतज्ज्ञाप्यते क्रियार्थायां क्रियायामुपपदे वाऽसरूपेण तृजादयो न भवन्तीति । यद्यत्र ण्वुल्विधानं न स्यात्तर्हि क्रियार्थायां क्रियायां 'लृट्' स्यात्, वाऽसरूपेण सामान्यविहितो ण्वुलपि स्यात्, पुनर्वचनस्यैतत् प्रयोजनं क्रियार्थायां क्रियायामुपपदे वासरूपेण तृजादयो मा भूवन् ॥ १० ॥

यहां 'भविष्यति' पद का अनुवर्त्तन है अन्य सब पदों का निवर्त्तन है ॥

[क्रियायां क्रियार्थायाम्] क्रियार्थ क्रिया उपपद हो तो धातु से भविष्यत्काल में [तुमुन्ण्वुलौ] 'तुमुन्' और 'ण्वुल्' प्रत्यय होते हैं ॥

जैसे—**भोक्तुं व्रजति । पठितुं व्रजति ।** जाना रूप क्रिया भोजन तथा पठन के लिये होने से क्रियार्थ क्रिया है, अतः क्रियार्थ क्रिया व्रजति के उपपद होने से 'भुज' तथा 'पठ' धातुओं से 'तुमुन्' प्रत्यय हो जाता है ॥ **आसको व्रजति । शायको व्रजति । भोजको व्रजति । पाचको व्रजति ।** यहां व्रजन क्रिया आसनादि क्रिया के लिये होती हुई उपपद है अतः आसादि धातुओं से 'ण्वुल्' प्रत्यय हो जाता है ॥

'ण्वुल्तृचौ' सूत्र से सामान्यविहित 'ण्वुल्' क्रियार्थक्रिया उपपद होने पर भी हो जाता, पुनः विधान से यह जाना जाता है कि क्रियार्थक्रिया उपपद होने पर वाऽसरूप विधि से तृजादि नहीं होते । यदि 'ण्वुल्' विधान न किया जाय तो भी क्रियार्थक्रिया उपपद होने पर 'लृट्' और वाऽसरूप विधि से सामान्य विहित 'ण्वुल्' भी हो ही जाता, पुनः विधान का यह प्रयोजन है कि क्रियार्थक्रिया उपपद होने पर वाऽसरूप विधि से तृजादि न हों ॥ १० ॥

---

१. आ० सू० १३२५ ॥ २. अ० ३ । १ । १३३ ॥

भाववचनाश्च[1] ॥ ११ ॥

भाववचनाः । १ । ३ ॥ च । [अ०] ॥ 'क्रियायां क्रियार्थायाम्' इत्यनुवर्त्तते भविष्यत्काले क्रियार्थायां क्रियायामुपपदे भाववचना भाववाचकाश्च प्रत्यया भवन्ति ॥

पाकाय व्रजति । इष्टये व्रजति । पुष्टये व्रजति । अत्र व्रजिक्रिया पचनाद्यर्थोपपदं तत्र पचादिभ्यो भविष्यति घञ्-क्तिनौ भवतः । अस्मिन् भविष्यदधिकारे वासरूपविधिर्न[2] भवति । अतः क्रियार्थायां क्रियायामुपपदे भाववाचकानां 'तुमुन्' बाधकः स्यात्, एवमर्थमिदमुच्यते भाववचना अपि यथा स्युः[3] ॥ ११ ॥

यहां 'क्रियायां क्रियार्थायाम्' पदों का अनुवर्त्तन है ॥

भविष्यत्काल में क्रियार्थक्रिया उपपद हो तो [भाववचनाः] भाव-वचन अर्थात् भाववाचक प्रत्यय होते हैं ॥

जैसे—पाकाय व्रजति । इष्टये व्रजति । पुष्टये व्रजति । यहां व्रजति क्रिया पचनादि के लिये होती हुई उपपद है तो पचादि से भविष्यत्काल में 'घञ्' और 'क्तिन्' होते हैं ॥

इस भविष्यदधिकार में वासरूपविधि नहीं होती । अतः क्रियार्थक्रिया उपपद होने पर भाववाचकों का 'तुमुन्' बाधक हो जाता, इसलिये यह कहा है कि भाववाचक प्रत्यय भी हो जाव ॥ ११ ॥

अण् कर्मणि च[4] ॥ १२ ॥

'क्रियायां क्रियार्थायाम्' इत्यनुवर्त्तते । अण् । १ । १ । कर्मणि । ७ । १ । च । [अ०] ॥ क्रियार्थायां क्रिया[यां] कर्मणि चोपपदे धातोर्भविष्यत्कालेऽण् प्रत्ययो भवति ॥

गोदायो व्रजति । कम्बलदायो व्रजति । गां दास्यति, कम्बलं दास्यतीति दान-क्रियार्था व्रजिक्रियोपपदं तत्र ण्वुल्' प्राप्नोति तस्यायमपवादेनाण् विधीयते ।

---

१. आ० सू० १३३१ ॥

२. अत्र भाष्यम्—**भाववचनानां च यथाविहितानां प्रतिपदविध्यर्थोऽयमारम्भः ॥ इदानीमेव ह्युक्तं क्रियार्थायां वाऽसरूपेण तृजादयो न भवन्तीति, भाववचनाश्च तृजादयः ॥** अ० ३ । ३ । ११ ॥

३. वचन-ग्रहणं किमर्थम्—अत्र भाष्यम्—**इह भावे प्रत्यया भवन्तीतीयता सिद्धम् । सोऽयमेवं सिद्धे सति यद्वचन-ग्रहणं करोति तस्यैतत् प्रयोजनं वाचका यथा स्युरिति । यदि च याभ्यः प्रकृतिभ्यो येन विशेषेण भावे प्रत्यया विहितास्ताभ्यः प्रकृतिभ्यस्तेन विशेषेण क्रियायामुपपदे क्रियार्थायामपि भवन्ति ततोऽमी वाचकाः कृताः स्युः ॥** अ० ३ । ३ । ११ ॥ विषयोऽयमाख्यातिके प्रदर्शितः ॥

४. आ० सू० १३३२ ॥

'**कर्मण्यण्**'[1] इति सामान्यविहितोऽण् क्रियार्थायां क्रियायामुपपदेऽपि स्यात् पुनर्वचनं वाऽसरूपविधिप्रतिषेधार्थम्[2] ॥ १२ ॥

इस सूत्र में 'क्रियायां क्रियार्थायाम्' का अनुवर्त्तन है ॥

[कर्मणि च] क्रियार्थक्रिया और कर्म उपपद हो तो धातु से भविष्यत्काल में [अण्] 'अण्' प्रत्यय होता है ॥

जैसे—गोदायो व्रजति । कम्बलदायो व्रजति । गौ देगा, कम्बल देगा, इस अर्थ में दानक्रियार्थ व्रजिक्रिया उपपद है, यहां 'ण्वुल्' प्राप्त था अतः उसका अपवाद यह 'अण्' है ॥

'कर्मण्यण्' इस सूत्र से सामान्य विहित 'अण्' क्रियार्थक्रिया उपपद होने पर भी हो ही जाता, पुनः 'अण्' का विधान वाऽसरूपविधि के प्रतिषेध के लिये है ॥ १२ ॥

लृट् शेषे च[3] ॥ १३ ॥

अत्र सर्वेषु सूत्रेषु चकारः 'क्रियायां कियार्थायाम्' इत्यधिकारस्याऽनुकर्षणार्थः ॥ लृट् । १ । १ । शेषे । ७ । १ । च । [अ०] ॥

शेषे केवले भविष्यत्काले क्रियार्थायां क्रियायामुपपदे च भविष्यति काले धातो-'र्लृट्' प्रत्ययो भवति ॥

केवले भविष्यत्काले—करिष्यति । हरिष्यति । पक्ष्यति ॥ क्रियार्थायां क्रियायामुपपदे—करिष्यामीति व्रजति । हरिष्यामीति व्रजति ॥ १३ ॥

यहां सब सूत्रों में चकार 'क्रियायां क्रियार्थायाम्' इस अधिकार के अनुकर्षण के लिये है ॥

[शेषे] शेष अर्थात् केवल भविष्यत्काल में [च] तथा क्रियार्थ क्रिया उपपद होने पर भविष्यत्काल में धातु से [लृट्] 'लृट्' प्रत्यय होता है ॥

जैसे—करिष्यति । हरिष्यति । पक्ष्यति । क्रियार्थक्रिया उपपद होने पर—करिष्यामीति व्रजति । हरिष्यामीति व्रजति ॥ १३ ॥

लृटः सद्वा[4] ॥ १४ ॥

लृटः । ६ । १ । सत् । १ । १ । वा । [अ०] ॥ क्रियार्थायां क्रियायामुपपदे शेषे केवले भविष्यत्काले च लृङ्-विहितस्तस्य स्थाने शतृ-शानचौ प्रत्ययौ विकल्पेन भवतः ॥

---

१ अ० ३ । ३ । १ ॥

२. अत्र भाष्यम्—**एवं तर्ह्युभयमनेन क्रियते—अपवादविषये चानिवृत्तिः, उत्सर्गविषये च प्रतिपदविधिः** ॥ अ० ३ । ३ । १३ ॥

३. आ० सू० ५५ ॥ ४. आ० सू० १२४३ ॥

वा०—सद्विधिर्नित्यमप्रथमासमानाधिकरणे[1] ॥ १ ॥

लृटः स्थाने सत्संज्ञकौ शतृशानचावप्रथमासमानाधिकरणे नित्यं भवतः ॥ पक्ष्यन्तं पश्य । पक्ष्यमाणं पश्य । क्व तर्हीदानीं विभाषा ?, प्रथमासमानाधिकरणे । प्रथमासमानाधिकरणे लृटः स्थाने शतृ-शानचौ विकल्पेन भवतः । पक्ष्यन् । पक्ष्यति । पक्ष्यमाणः । पक्ष्यते । पठिष्यन् वसति । अध्येष्यमाणो वसति । अत्र अध्ययनार्था वसनक्रियोपपदं तत्रापि शतृ-शानचौ भवतः ॥ १४ ॥

क्रियार्थक्रिया उपपद होने पर तथा केवल भविष्यत्काल में विहित [**लृटः**] 'ल्ट्' के स्थान में [**सत्**] 'शतृ, शानच्' प्रत्यय [**वा**] विकल्प से होते हैं ॥

वा०—सद्विधिर्नित्य०—ल्ट् के स्थान में सत्संज्ञक 'शतृ-शानच्' प्रत्यय अप्रथमासमानाधिकरण में नित्य होते हैं ॥ जैसे—पक्ष्यन् । पक्ष्यति । पक्ष्यमाणः । पक्ष्यते । पठिष्यन् । वसति । **अध्येष्यमाणो** वसति । यहां अध्ययनार्थ वसनक्रिया उपपद है, वहां भी 'शतृ, शानच्' हो जाते हैं ॥ १४ ॥

अनद्यतने लुट्[2] ॥ १५ ॥

'भविष्यत्' इत्यनुवर्त्तते ॥ अनद्यतने । ७ । १ । लुट् । १ । १ ॥ न विद्यतेऽद्यतनमस्मिन्, तस्मिन् । अनद्यतनभविष्यत्काले धातो 'लुँट्' प्रत्ययो भवति ॥ श्वः कर्त्ता । श्वोऽध्येता । श्वो भोक्ता ॥

अनद्यतनशब्दे बहुव्रीहिसमासादद्यतनानद्यतनयोर्मिश्रीभावे 'लुट्' न भवति ॥ अद्य श्वो वा कार्य्यं भविष्यति ॥

भा०—**योगविभागः कर्त्तव्यः । अनद्यतने । लृटः सत्संज्ञौ भवतः । श्वोऽग्नीनाधास्यमानेन । श्वः सोमेन यक्ष्यमाणेन । ततो लुट् । लुट् च भवत्यनद्यतने ॥**

अनेन योगविभागेनानद्यतनभविष्यति शतृ-शानचावपि भवतः । अन्यथा 'लुङ्' बाधकः स्यात् ॥

वा०—परिदेवने श्वस्तनीभविष्यन्त्यर्थे[3] ॥ १ ॥

पूर्वाचार्य्यसंज्ञया भविष्यन्ती-शब्देन 'ल्ट्' उच्यते । श्वस्तन्यनद्यतनभविष्यत्काले परिदेवने[4]ऽर्थे धातो 'लुँट्' प्रत्ययो भवति[5] । इयं नु कदा गन्ता यैवं पादौ निदधाति ।

---

१. अ० ३ । ३ । १४ भा० ॥ २. आ० सू० ४७ ॥

३. अ०—३ । ३ । १५ भा० ॥

४. परिदेवनम् = अनुशोचनं, विलापः, दुःखानुभवनं वा । तथा च—

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत । अव्यक्तनिधनान्येव तत्र का परिदेवना ॥

(गी० अ० २ श्लो० २८)

५. अपरे तु वार्त्तिकमिदमन्यथा व्याचक्षते ॥

अयन्तु कदाऽध्येता य एवमनभियुक्त इति । अत्र **'विभाषा कदाकर्ह्योः'**[1] इति लट्-लुटौ प्राप्नुतस्तत्र परिदेवनेऽनेन बाध्येते । अपरिदेवने तस्यावकाशः ॥ १५ ॥

यहां 'भविष्यति' पद का अनुवर्त्तन है ॥

[अनद्यतने] अनद्यतनभविष्यत्काल में धातु से [लुट्] 'लुट्' प्रत्यय होता है ॥

जैसे—श्वः कर्त्ता । श्वोऽध्येता । श्वो भोक्ता ॥

अनद्यतन शब्द में 'नहीं है विद्यमान अद्यतन जिस में' वह अनद्यतन कहाता है, इस प्रकार बहुव्रीहिसमास होने से अद्यतन तथा अनद्यतन मिले होने पर 'लुट्' नहीं होता । जैसे—अद्य श्वो वा कार्य्यं भविष्यति ॥ **'अनद्यतने लुट्'** इस सूत्र का योगविभाग करना चाहिये—**'अनद्यतने'** अनद्यतन में 'लृट्' के स्थान में 'शतृ, शानच्' होते हैं । जैसे—**श्वोऽग्नीना धास्यमानेन । श्वः सोमेन यक्ष्यमाणेन ।** तदनन्तर 'लुट्' कहना चाहिये । अर्थात् अनद्यतन में 'लुट्' होता है । इस योग विभाग से अनद्यतन भविष्यत् में 'शतृ-शानच्' भी हो जाते हैं, अन्यथा 'लुट्' उनका बाधक हो जाता ॥

वा०—परिदेवने०—यहां 'भविष्यन्ती' इस पूर्वाचार्य्यों की संज्ञा से 'लृट्' गृहीत होता है । अनद्यतनभविष्यत्काल में परिदेवन अर्थ में धातु से 'लुट्' प्रत्यय होता है । जैसे—**इयं नु कदा गन्ता** यैवं पादौ निदधाति । अयं तु कदाऽध्येता य एवमनभियुक्त इति । यहां 'विभाषा कदाकर्ह्योः' सूत्र से 'लट्-लुट्' प्राप्त थे, परन्तु परिदेवन अर्थ में यह वार्त्तिक बाध लेता है, क्योंकि परिदेवन से अन्य अर्थ में 'विभाषा कदाकर्ह्योः' की प्राप्ति है ही ॥ १५ ॥

पदरुजविशस्पृशो घञ्[2] ॥ १६ ॥

'भविष्यति' इति निवृत्तम् । इत उत्तरं घञादयः प्रत्ययास्त्रिषु कालेषु भवन्ति । पद० स्पृशः । ५ । १ । घञ् । १ । १ ॥

पद, रुज, विश, स्पृश इत्येतेभ्यो धातुभ्यो 'घञ्' प्रत्ययो भवति ॥

सामान्येन विधानात् कर्त्तरि 'घञ्' भवति । पद्यतेऽसौ पादः ।

रुजत्यसौ रोगः । विशत्यसौ वेशः ॥

वा०—स्पृश उपतापे[3] ॥ १ ॥

स्पृशतीति स्पर्श उपतापः, व्याधिविशेषः[4] । इह मा भूत्—कम्बलस्पशः । कम्बलस्य स्पर्शकर्त्ता अत्र **'सर्वधातुभ्योऽच्'**[5] इत्यच् प्रत्ययः ॥ १६ ॥

यहाँ 'भविष्यति' पद का निवर्त्तन है । यहां से आगे घञादि प्रत्यय तीनों कालों में होते हैं ॥

---

१. अ० ३ । ३ । ५ ॥ २. आ० सू० १३३३ ॥
३. अ० ३ । ३ । १६ भा० ॥ आ० वा० १३३४ ॥
४. ज्वरः ॥ ५. अ० ३ । १ । १३४ भा० ॥

[पद० स्पृशः] पद, रुज, विश, स्पृश इन धातुओं से [घञ्] 'घञ्' प्रत्यय होता है ॥ सामान्य विधान से 'घञ्' कर्त्ता में होता है । जैसे—पद्यतेऽसौ पादः । रुजत्यसौ रोगः । विशत्यसौ वेशः ॥

वा०—स्पृश उपतापे—स्पृशतीति स्पर्श उपतापः । व्याधिविशेष को कहते हैं । अतः 'कम्बलस्पर्शः' यहां 'घञ्' नहीं होता, किन्तु 'स्पृश' धातु से 'सर्वधातुभ्योऽसुन्' इस सौत्रिक से 'असुन्' प्रत्यय होता है ॥ १६ ॥

सृ स्थिरे' ॥ १७ ॥

सृ । ५ । १ । स्थिरे । ७ । १ ॥ लुप्तविभक्तिको निर्देशः 'सृ' । स्थिर इति कालान्तरस्थायी पदार्थ उच्यते ॥

[सर्त्तेर्धातोः स्थिरे कर्त्तरि 'घञ्' प्रत्ययो भवति] ॥ चन्दनसारः । आम्रसारः ॥ 'स्थिरे' इति किम्—सर्त्ता । सारकः ॥

वा०—व्याधिमत्स्यबलेष्विति वक्तव्यम्[2] ॥ १ ॥

अतिसारो[3] व्याधिः[4] । विसारो मत्स्यः । बले—शालसारः । खदिरसारः । शालस्य खदिरस्य वा बलमुच्यते । अस्थिरार्थोऽयमारम्भः ॥ १७ ॥

'सृ' यह लुप्तविभक्तिक निर्देश है । कालान्तर में वर्त्तमान रहने वाले पदार्थ को स्थिर कहते हैं ।

[सृ] 'सृ' धातु से [स्थिरे] स्थिर कर्त्ता हो तो 'घञ्' प्रत्यय होता है ॥ जैसे—चन्दनसारः । आम्रसारः ॥

'स्थिरे' ग्रहण इसलिये किया है कि—सर्त्ता । सारकः । यहां न हो ॥

---

१. आ० सू० १३३५ ॥

२. आ० ३ । ३ । १७ भा० ॥ आ० वा० १३३६ ॥

३. उपसर्गस्य घञ्यमनुष्ये बहुलम् (अ० ६ । ३ । १२२) इति दीर्घत्वस्य बहुलवचनात् 'अतिसार-—'अतीसारो' वा ॥

४. अतिसारः-व्याधेरुत्पत्तिः—आदिकाले खलु यज्ञेषु पशवः समालभनीया बभूवुर्नालम्भाय प्रक्रियन्ते स्म । ततो दक्षयज्ञं प्रत्यवरकालं मनोः पुत्राणां नरिष्यन्ताभागेक्ष्वाकुनृगशर्यातीनां क्रतुषु पशूनामेवाभ्यनुज्ञानात् पशवः प्रोक्षणमवापुः । अतश्च प्रत्यवरकालं पृषध्रेण दीर्घसत्रेण यजता पशूनामलाभाद् गवामालम्भः प्रवर्तितः । तं दृष्ट्वा व्यथिता भूतगणाः, तेषां चोपयोगाङ्गपाकृतां गवां गौरवादौष्ण्यादसात्म्यत्वादशस्तोपयोगाच्चोपहताग्नीनामुपहतमनसां चातीसारः पूर्वमुत्पन्नः पृषध्रयज्ञे ॥ (च० चि० स्थान अ० १९ । गद्य ४ ॥ तल्लक्षणन्तु—

संशम्यापां धातुरग्नि प्रवृद्धः शकृन्मूत्रो वायुनाधः प्रणुन्नः । सरत्यतीवातिसारं तमाहुर्व्याधिं घोरं षड्विधं तं वदन्ति ॥ (सु० उ० अ० ४०, श्लो०—३, ४ ।)

वा०—व्याधिमत्स्य० — व्याधि, मत्स्य, बल इन अर्थों में 'सृ' धातु से 'घञ्' कहना चाहिये ॥ जैसे—अतिसारो व्याधिः । विसारो मत्स्यः । बले—शालसारः । खदिरसारः । शाल अथवा खदिर का बल कहाता है ॥ यह वार्त्तिक स्थिर अर्थ से भिन्न अर्थ में प्रत्यय विधान करने के लिये है ॥ १७ ॥

भावे[1] ॥ १८ ॥

भावे । ७ । १ ॥ भाव इति पुल्लिङ्गेनैकवचनेन निर्देशः क्रियते, स प्रातिपदिक-निर्देशो[2] विज्ञेयः । न तु पुल्लिङ्ग एकवचनाभिधायकाः प्रत्यया भवन्ति । किन्तु त्रिषु लिङ्गेषु त्रिवचनाभिधायका घञादयः प्रत्यया भवन्ति ॥

भावे सामान्यधातुभ्यो 'घञ्' प्रत्ययो भवति ॥

पचनं पाकः । त्यजनं त्यागः । रजनं रागः । भजनं भागः ॥ 'भावे' इति सूत्रमधिक्रियते । अतोऽग्रे भावाधिकारः ॥ १८ ॥

'भावे' इस पुल्लिङ्ग तथा एकवचन निर्देश से प्रातिपदिकमात्र का निर्देश समझना चाहिये इसलिये पुल्लिङ्ग तथा एकवचन के ही अभिधायक प्रत्यय नहीं होते किन्तु तीनों लिङ्गों में तथा तीनों वचनों को कहने वाले घञादि प्रत्यय होते हैं ॥

[भावे] भाव में धातुमात्र से 'घञ्' प्रत्यय होता है ॥ जैसे—पचनं पाकः । त्यजनं त्यागः । रजनं रागः । भजनं भागः । 'भावे' यह अधिकार सूत्र है अर्थात् यहां से आगे भाव का अधिकार है ॥ १८ ॥

अकर्त्तरि च कारके संज्ञायाम्[3] ॥ १९ ॥

अकर्त्तरि । ७ । १ । च । [अ०] । कारके । ७ । १ । संज्ञायाम् । ७ । १ ॥ कर्त्तृरहिते कारके संज्ञायां गम्यमानायां धातो 'घञ्' प्रत्ययो भवति ॥

आवाहः । विवाहः । उद्वाहः । आहारः । विहारः । प्रासः । प्रसेवः ॥

'अकर्त्तरि' इति किम्—पक्ता । पाचकः ॥ 'संज्ञायाम्' इति किम्—दुर्लभः ॥

भा०—संज्ञाग्रहणानर्थक्यं सर्वत्र घञो दर्शनात् । असंज्ञायामपि घञ् दृश्यते ।
को भवता लाभो लब्धः । को भवता दायो दत्तः ॥

सर्वं स्पष्टम् ॥ १९ ॥

---

१. आ० सू० १३३७ ॥

२. अत्र भाष्यम्—एवमिहापि नान्तरीयकत्वात् पुल्लिङ्गेन निर्देशः क्रियत एकवचनान्तेन च । लक्ष्यत्र निर्देशस्तन्त्रम् । अवश्यं कयाचिद्विभक्त्या केनचिच्च लिङ्गेन निर्देशः कर्त्तव्यः ॥ अ० ३। ३ । १८ ॥

३. आ० सू० १३४४ ॥

[अकर्त्तरि च] कर्तृभिन्न [कारके] कारक में [संज्ञायाम्] संज्ञा गम्यमान हो तो धातु से 'घञ्' प्रत्यय होता है ॥

जैसे—आवाहः । विवाहः । उद्वाहः । आहारः । विहारः । प्रासः । प्रसेवः ॥ 'अकर्त्तरि' ग्रहण इसलिये है कि—पक्ता । पाचकः ॥ 'संज्ञायाम्' ग्रहण इसलिये है कि—दुर्लभः । यहां घञ् न हो ॥

संज्ञा ग्रहण अनर्थक है क्योंकि असंज्ञा में भी 'घञ्' देखा जाता है जैसे—को भवता लाभो लब्धः । को भवता दायो दत्तः ॥ १९ ॥

परिमाणाख्यायां सर्वेभ्यः[1] ॥ २० ॥

'अकर्त्तरि कारके' इत्यनुवर्त्तते । अग्रेऽप्यधिकारेणास्याऽनुवर्त्तनं भविष्यति ॥ परिमाणाख्यायाम् । ७ । १ । सर्वेभ्यः । ५ । ३ ॥ परिमाणस्येयत्ताया आख्या तस्याम्—सर्वेभ्यो[2] धातुभ्यः परिमाणाख्यायां सत्यां 'घञ्' प्रत्ययो भवति ॥

एकस्तण्डुलनिचायः । द्वौ शूर्पनिष्पावौ । द्वौ पाकौ । त्रयः पाकाः ॥ सर्वग्रहणमजपोर्बाधनार्थम् । अन्यथा पुरस्तादपवादन्यायेन[3] 'अच्' प्रत्ययस्यैव बाधनं स्यात्, अपो बाधनं न स्यात् ॥

'परिमाणाख्यायाम्' इति किम्—निश्चयः । जयः । लवः । पवः ॥

वा०—घञनुक्रमणमजन्विषये[4] ॥ १ ॥

अतोऽग्रे घञ् प्रत्ययस्यानुक्रमणं विशेषविधानं क्रियते तद्-अजपोरपवादो विज्ञेयः । न तु स्त्रीप्रत्ययानाम् । तेन—एका तिलोच्छ्रितिः । द्वे प्रसृती इति । अत्र परिमाणाख्यायां 'क्तिन्' प्रत्ययस्य घञा बाधनं न भवति ॥ १ ॥

वा०—दारजारौ कर्त्तरि णिलुक् च[5] ॥ २ ।

ण्यन्ताभ्यां दारिजारिधातुभ्यां कर्त्तरि 'घञ्', णिप्रत्ययस्य [च] लुग्भवति । दारयन्तीति दाराः । जारयन्तीति जाराः ॥ २ ॥

वा०—करणे वा[6] ॥ ३ ॥

---

१. आ० सू० १३४४ ॥

२. अत्र भाष्यम्—**प्रकृत्याश्रयो योऽपवादस्तस्य बाधनं यथा स्यात्, अर्थाश्रयो योऽपवादस्तस्य बाधनं मा भूत्** ॥ अ० ३ । ३ । २० ॥

३. **पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्,** इति परिभाषया ॥ (अ० ४। १ । ५५ भा०) ॥

४. अ० ३ । ३ । २० भा० ॥

५. अ० ३ । ३ । २० भा० ॥ आ० वा० १३४५ ॥

६. अ० ३ । ३ । २० भा० ॥ आ० वा० १३४६ ॥

अथवा करणे दारजारशब्दौ निपातयितव्यौ। दीर्य्यन्ते तैर्दाराः। जीर्य्यन्ति तैर्जाराः॥ ३॥ २०॥

यहां 'अकर्त्तरि' तथा 'कारके' इन पदों का अनुवर्त्तन है। आगे भी अधिकार से इन पदों की अनुवृत्ति समझनी चाहिये॥

[परिमाणाख्यायाम्] परिमाणाख्या गम्यमान होने पर [सर्वेभ्यः] सब धातुओं से 'घञ्' प्रत्यय होता है॥

जैसे—एकस्तण्डुलनिचायः। द्वौ शूर्पनिष्पावौ। द्वौ पाकौ। त्रयः पाकाः। सर्व-शब्द का ग्रहण 'अच्' तथा 'अप्' के बाधनार्थ है। अन्यथा 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इस न्याय से 'अच्' प्रत्यय का ही बाधन होता, 'अप्' का नहीं होता॥

'परिमाणाख्यायाम्' ग्रहण इसलिये है कि—निश्चयः। जयः। लवः। पवः। यहां घञ् नहीं होता॥

वा०—घञनुक्रमण०—यहां से आगे 'घञ्' प्रत्यय के विधान को 'अच्', अप्' का अपवाद समझना चाहिये, स्त्रीप्रत्ययों का नहीं, अतः एका तिलोच्छ्रितिः। द्वे प्रसृती। यहां परिमाणाख्या होने पर भी 'घञ्' के द्वारा 'क्तिन्' प्रत्यय का बाधन नहीं होता॥ १॥

वा०—दारजारौ०- ण्यन्त दारि, जारि धातुओं से कर्त्ता में 'घञ्' प्रत्यय होता है और णि का लुक् हो जाता है॥ जैसे—दारयन्तीति दाराः। जारयन्तीति जाराः॥ २॥

वा०—करणे वा—अथवा दार-जार-शब्दों का करण में निपातन समझना चाहिये॥ जैसे—दीर्य्यन्ते तैर्दाराः। जीर्य्यन्ते तैर्जाराः॥ ३। २०॥

इङश्च[1]॥ २१॥

'एरच्'[2] इत्यच् प्राप्तस्तस्यायमपवादः॥ इङः। ५। १। च। [अ०]॥

कर्त्तृभिन्ने कारके भावे च 'इङ्' धातो 'घञ्' प्रत्ययो भवति।

उपेत्याधीयते शिष्या यस्मादित्युपाध्यायः॥

वा०—इङश्चेत्यपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीष्[3] *॥ १॥*

[अपादाने कारके] स्त्रियामभिधेयायामिङ् धातो 'घञ्', तदन्ताच्च विकल्पेन 'ङीष्', पक्षे 'टाप्'॥ उपाध्यायी। उपाध्याया॥ १॥

वा०—शॄ वायुवर्णनिवृत्तेषु[4] *॥ २॥*

---

१. आ० सू० १३४७॥ २. अ० ३। ३। ५६॥
३. अ० ३। ३। २१ भा०॥ आ० वा०—१३४८॥
४. अ० ३। ३। २१ भा०॥ आ० वा० १३४९॥

शॄ हिंसायाम्[1]इत्यस्माद् धातो 'घञ्' प्रत्ययो भवति ।। शारो वायुः । शारो वर्णः । गौरिवाकृतनीशारः[2] प्रायेण शिशिरे कृशः ।। २१ ।।

'एरच्' इस सूत्र से प्राप्त 'अच्' का यह अपवाद है ॥

कर्तृभिन्नकारक तथा भाव में [इङश्च] 'इङ्' धातु से 'घञ्' प्रत्यय होता है ॥ जैसे—उपेत्याधीयते शिष्या यस्मादित्युपाध्यायः ।।

वा० —इङश्चेत्यपा० – स्त्री अभिधेय हो तो [अपादान कारक में] 'इङ्' धातु से 'घञ्' और तदन्त से विकल्प करके 'ङीप्' पक्ष में 'टाप्' होता है ॥ जैसे—उपाध्यायी । उपाध्याया ।।

वा०—शॄ वायुवर्ण०—'शॄ हिंसायाम्' इस धातु से 'घञ्' प्रत्यय होता है ॥ जैसे—शारो वायुः । शारो वर्णः । गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः ॥ २१ ॥

उपसर्गे रुवः[3] ।। २२ ।।

उवर्णान्ताद् 'अप्' प्रत्ययः प्राप्तस्तस्यापवादः । उपसर्गे । ७ । १ । रुवः । ५ । १ ।। कर्तृभिन्ने कारके भावे च सोपसर्गाद् 'रु' धातो 'घञ्' प्रत्ययो भवति । संरावः । विरावः । उपरावः ।।

'उपसर्गे' इति किम्—रवः । अत्र निरुपसर्गेऽबेव ।। २२ ।।

उवर्णान्त होने से 'अप्' प्राप्त था उस का यह अपवाद है ॥

कर्तृभिन्न कारक और भाव में [उपसर्गे] उपसर्ग उपपद होने पर [रुवः] 'रु' धातु से 'घञ्' प्रत्यय होता है ॥

जैसे—संरावः । विरावः । उपरावः ।।

'उपसर्गे' ग्रहण इसलिये है कि—रवः । यहां निरुपसर्ग होने से 'अप्' ही होता है ॥२२॥

समि युद्रुदुवः[4] ।। २३ ।।

अयमप्यप एवापवादः । समि । ७ । १ । युद्रुदुवः । ५ । १ ।।

कर्तृभिन्ने कारके भावे च संपूर्वेभ्यो यु, द्रु, दु इत्येतेभ्यो धातुभ्यो 'घञ्' प्रत्ययो भवति ।। संयावः । संद्रावः । संदावः ।।

'समि' इति किम्—प्रयवः । विद्रवः ।। २३ ।।

यह सूत्र भी 'अप्' का अपवाद है ॥

कर्तृभिन्न कारक और भाव में [समि] सम्-पूर्वक [युद्रुदुवः] यु, द्रु, दु, इन धातुओं से 'घञ्' प्रत्यय होता है ॥

---

१. धा०—क्र्या० १६ ॥
२. अकृतशीतनिवारणाच्छादनः ॥
३. आ० सू० १३५० ॥
४. आ० सू० १३५१ ॥

जैसे—संयावः । संद्रावः । संदावः ॥

'समि' ग्रहण इसलिये है कि—प्रयवः । विदवः ॥ २३ ॥

श्रिणीभुवोऽनुपसर्गे[1] ॥ २४ ॥

श्रि-णीभ्यां 'अच्' प्राप्तो भूधातोश्च 'अप्', द्वयोरप्यपवादः । श्रिणीभुवः ५ । १ । अनुपसर्गे । ७ । १ ॥

कर्तृभिन्ने कारके भावे च श्रि, णी, भू एतेभ्य उपसर्गरहितेभ्यो 'घञ्' प्रत्ययो भवति ॥ श्रायः । नायः । भावः ॥

'अनुपसर्गे' इति किम्—विश्रयः । प्रणयः । प्रभवः ॥ २४ ॥

श्रि, णी, धातु से 'अच्' तथा 'भू' धातु से 'अप्' प्राप्त था, उन दोनों का यह अपवाद है ॥ कर्तृभिन्न कारक और भाव में [अनुपसर्गे] उपसर्गरहित [श्रिणीभुवः] श्रि, णी और भू इन धातुओं से 'घञ्' प्रत्यय होता है ॥

जैसे—श्रायः । नायः । भावः ॥

'अनुपसर्गे' ग्रहण इसलिये है कि—विश्रयः । प्रणयः । प्रभवः । यहां यथाप्राप्त प्रत्यय होते हैं ॥ २४ ॥

वौ क्षुश्रुवः[2] ॥ २५ ॥

अपोऽपवादः । वौ । ७ । १ । क्षुश्रुवः । ५ । १ ॥

कर्तृभिन्ने कारके भावे च विपूर्वाभ्यां क्षु-श्रुधातुभ्यां 'घञ्' प्रत्ययो भवति ॥ विक्षावः । विश्रावः ॥

'वौ' इति किम्—क्षवः ७ । श्रवः ॥ २५ ॥

यह सूत्र 'अप्' का अपवाद है ।

कर्तृभिन्न कारक और भाव में [वौ] विपूर्वक [क्षुश्रुवः] 'क्षु' और 'श्रु' धातुओं से 'घञ्' प्रत्यय होता है ॥

जैसे—विक्षावः । विश्रावः ॥

'वौ' ग्रहण इसलिये है कि—क्षवः । श्रवः ॥ यहां 'अप्' होता है ॥ २५ ॥

अवोदोर्नियः[3] ॥ २६ ॥

अचोऽपवादः । 'श्रिणीभुवः' इति तत्रानुपसर्ग इति निषेधे प्राप्ते विधीयते । अवोदोः । ७ । २ । नियः । ५ । १ ॥

---

१. आ० सू० १३५२ ॥ २. आ० सू० १३५३ ॥

३. आ० सू० १३५४ ॥

कर्तृभिन्ने कारके भावे च अव-उत्-इत्युपसर्गद्वयपूर्वात् 'नी' धातो 'घञ्' प्रत्ययो भवति । अवनायः । उन्नायः ॥ २६ ॥

यह 'अच्' का अपवाद है । 'ण्विण्वीभुव०' इस सूत्र से उपसर्ग होने पर प्रतिषेध प्राप्त था, इसलिये विधान किया ॥

कर्तृभिन्न कारक और भाव में [अवोदोः] अव, उत् ये दो उपसर्ग पूर्व हों तो [नियः] 'नी' धातु से 'घञ्' प्रत्यय होता है ॥

जैसे—**अवनायः । उन्नायः ॥ २६ ॥**

प्रे द्रुस्तुस्रुवः[1] ॥ २७ ॥

अपोऽपवादः । प्रे । ७ । १ । द्रुस्तुस्रुवः । ५ । १ ॥

कर्तृभिन्ने कारके भावे च प्रपूर्वेभ्यो द्रु, स्तु, स्रु इत्येतेभ्यो धातुभ्यो 'घञ्' प्रत्ययो भवति ॥ प्रद्रावः । प्रस्तावः । प्रस्रावः ॥

'प्रे' इति किमर्थम्—द्रवः । स्तवः । स्रवः । अत्रोत्सर्गत्वादबेव भवति ॥ २७ ॥

यह 'अप्' का अपवाद है ॥

कर्तृभिन्न कारक और भाव में [प्रे] प्र-पूर्वक [द्रुस्तुस्रुवः] द्रु, स्तु, स्रु इन धातुओं से 'घञ्' प्रत्यय होता है ॥

जैसे—**प्रद्रावः । प्रस्तावः । प्रस्रावः ॥**

'प्रे' ग्रहण इसलिये है कि—द्रवः । स्तवः । स्रवः ॥ यहां उत्सर्ग 'अप्' ही होता है ॥ २७ ॥

निरभ्योः पूल्वोः[2] ॥ २८ ॥

अयमपि 'अप' एवापवादः । निरभ्योः । ७ । २ । पूल्वोः । ६ । २ ॥ पू इति पूङ्-पूञोः सामान्येन ग्रहणम् ॥

कर्तृभिन्ने कारके भावे च निरभिपूर्वाभ्यां 'पू-लू' धातुभ्यां यथासंख्यं 'घञ्' प्रत्ययो भवति ॥ निष्पावः । अभिलावः ॥

'निरभ्योः' इति किम्—लवः । पवः ॥ २८ ॥

यह 'अप्' का अपवाद है । यहां पू, निर्देश से 'पूङ्' तथा 'पूञ्' दोनों का सामान्यग्रहण होता है ॥

कर्तृभिन्न कारक और भाव में [निरभ्योः] यथासंख्य निर्-अभि-पूर्वक [पूल्वोः] 'पू' तथा 'लू' धातु से 'घञ्' प्रत्यय होता है ॥

जैसे—**निष्पावः । अभिलावः ॥**

---

१. आ० सू० १२५५ ॥ २. आ० सू० १२५६ ॥

'निरभ्योः' ग्रहण इसलिये है कि—लवः । पवः । यहां 'अप्' होता है ॥ २८ ॥

उन्न्योर्ग्रः[1] ॥ २९ ॥

ऋवर्णान्ताद्-अपोऽपवादः । उन्न्योः । ७ । २ । ग्रः । ५ । १ ॥ गृ[2] इति निगरणशब्दार्थयोर्द्वयोरेव ग्रहणम् ॥

कर्तृभिन्ने कारके भावे च उत्-नि-इत्युपसर्गद्वयपूर्वाद् 'गृ' धातो 'घञ्' प्रत्ययो भवति ॥ उद्गारः । निगारः ॥ २९ ॥

ऋवर्णान्त होने से प्राप्त 'अप्' का यह अपवाद है 'गृ निगरणे' तथा 'गृ शब्दे' दोनों का ही ग्रहण है ॥

कर्तृभिन्न कारक और भाव में [उन्न्योः] उत्, नि, इन दो उपसर्ग पूर्वक [ग्रः] 'गृ' धातु से 'घञ्' प्रत्यय होता है ॥ जैसे—उद्गारः । निगारः ॥ २९ ॥

कृ धान्ये[3] ॥ ३० ॥

'उन्न्योः' इत्यनुवर्त्तते । अप एवापवादः । कृ । १ । धान्ये । ७ । १ ॥ कृ इति लुप्तविभक्तिको[4] निर्देशः ॥ विक्षेपार्थस्य कृ[5]-धातोरत्र ग्रहणम् ॥

धान्येऽर्थे वर्त्तमानादुत्-नि-पूर्वात् 'कृ' धातोः कर्तृभिन्ने कारके भावे च 'घञ्' प्रत्ययो भवति ॥ उत्कारः । निकारः ॥

'धान्ये' इति किम्—भिक्षोत्करः । फलनिकरः ॥ ३० ॥

यहां 'उन्न्योः' पद का अनुवर्त्तन है । 'अप्' का ही अपवाद है । 'कृ' यह लुप्तविभक्तिक है ॥ यहां विक्षेप अर्थ वाली 'कृ' धातु का ग्रहण है ॥

[धान्ये] धान्य अर्थ में वर्त्तमान नि तथा उत् पूर्वक [कृ] 'कृ' धातु से कर्तृभिन्न कारक और भाव में 'घञ्' प्रत्यय होता है ॥

जैसे—उत्कारः । निकारः ॥

'धान्ये' ग्रहण इसलिये है कि—भिक्षोत्करः । फलनिकरः ॥ ३० ॥

यज्ञे समि स्तुवः[6] ॥ ३१ ॥

यज्ञे । ७ । १ । समि । ७ । १ । स्तुवः । ५ । १ ॥ यज्ञेऽभिधेये संपूर्वात् 'स्तु' धातोः कर्तृभिन्ने कारके 'घञ्' प्रत्ययो भवति ॥

संस्तुवन्ति यस्मिन् संस्तावो यज्ञः ॥

---

१. आ० सू० १३५७ ॥ २. धा० रुधा० १२६, धा० क्रया० २७ ॥
३. आ० सू० १३५८ ॥
४. **सुपां सुलुक्पूर्व०** (अ० ७ । १ । ३९) इति सुब्लुक् ॥
५. धा० तुदा० १२५ ॥ ६. आ० सू० १३५९ ॥

'यज्ञे' इति किम्—गुरोः संस्तवः। अत्रोत्सर्गत्वादबेव भवति ॥ ३१ ॥

[यज्ञे] यज्ञ अभिधेय हो तो [समि] सम्-पूर्वक [स्तुवः] 'स्तु', धातु से कर्तृभिन्न कारक में 'घञ्' प्रत्यय होता है ॥

जैसे—संस्तुवन्ति यस्मिन् **संस्तावो** यज्ञः ॥

'यज्ञे' ग्रहण इसलिये है कि—**गुरो संस्तवः**। यहां उत्सर्ग 'अप्' ही होता है ॥ ३१ ॥

प्रे स्त्रोऽयज्ञे[1] ॥ ३२ ॥

ऋवर्णान्ताद् अपोऽपवादः। प्रे। ७। १। स्त्रः। ५। १। अयज्ञे। ७। १ ॥

स्तृञ् आच्छादने[2]—इत्यस्मात् प्रपूर्वाद् यज्ञविषयं विहाय कर्तृभिन्ने कारके भावे च 'घञ्' प्रत्ययो भवति ॥ छन्दःप्रस्तारः। वर्णप्रस्तारः ॥

'अयज्ञे' इति किम्—प्रस्तरो यज्ञः[3] ॥ ३२ ॥

ऋवर्णान्त से प्राप्त 'अप्' का यह अपवाद है।

[प्रे] प्र पूर्वक [स्त्रः] 'स्तृञ् आच्छादने' इस धातु से [अयज्ञे] यज्ञविषय को छोड़ कर कर्तृभिन्न कारक और भाव में 'घञ्' प्रत्यय होता है ॥

जैसे—छन्दःप्रस्तारः। वर्णप्रस्तारः ॥

'अयज्ञे' ग्रहण इसलिये है कि—**प्रस्तरो यज्ञः** ॥ ३२ ॥

प्रथने वावशब्दे[4] ॥ ३३ ॥

'स्त्रः' इत्यनुवर्त्तते। प्रथने। ७। १। वौ। ७। १। अशब्दे। ७। १ ॥

विपूर्वात् 'स्तृञ्' धातोरशब्दे **प्रथनेऽर्थेऽभिधेये** कर्तृभिन्ने कारके भावे च 'घञ्' प्रत्ययो भवति ॥ पटस्य विस्तारः। अन्नस्य विस्तारः ॥

'प्रथने' इति किम्—तृणविस्तरः ॥ 'वौ' इति किम्—स्तरः ॥

'अशब्दे' इति किम्—वाग्विस्तरः। कथनविस्तरः ॥ अत्र सर्वत्र ऋवर्णान्तादबेव भवति ॥ ३३ ॥

यहां 'स्त्रः' पद का अनुवर्त्तन है।

[वौ] वि-पूर्वक 'स्तृञ्' धातु से [अशब्दे] शब्दभिन्न [प्रथने] प्रथन अर्थ में कर्तृभिन्न कारक और भाव में 'घञ्' प्रत्यय होता है ॥

जैसे—पटस्य **विस्तारः**। अन्नस्य **विस्तारः** ॥

---

१. आ० सू० १३६० ॥
२. धा० क्रया० १२ ॥
३. तादर्थ्यात्तार्च्छब्द्यम् ॥
४. आ० सू० १३६१ ॥

'प्रथने' ग्रहण इसलिये है कि—तृणविस्तरः ।। 'वौ' ग्रहण इसलिये है कि—स्तरः ।। 'प्रशब्दे' ग्रहण इसलिये है कि—वाग्विस्तरः । कथनविस्तरः । यहां ऋवर्णान्त होने से 'अप्' ही होता है ॥ ३३ ॥

छन्दोनाम्नि च[1] ॥ ३४ ॥

'वौ—स्तरः' इत्यनुवर्त्तते । छन्दोनाम्नि । ७ । १ । च । [अ०] ॥

विपूर्वात् 'स्तृञ्' धातोश्छन्दोनाम्नि सति कर्त्तृभिन्ने कारके भावे च 'घञ्' प्रत्ययो भवति ॥ गायत्र्यादीनां छन्दसां नाम छन्दोनाम । विष्टारपङ्क्तिः । पङ्क्तिविशेषस्य छन्दस इयं संज्ञा । आष्टमिकेन **'छन्दोनाम्नि च[2]'** इति सूत्रेण मूर्द्धन्यादेशः ॥ ३४ ॥

वि-पूर्वक 'स्तृञ्' धातु से [छन्दोनाम्नि] छन्दोनाम हो तो कर्तृभिन्न कारक और भाव में 'घञ्' प्रत्यय होता है ॥

छन्दः शब्द से गायत्र्यादि छन्द समझने चाहिये ॥

जैसे—विष्टारपङ्क्तिः ॥

पङ्क्ति छन्दविशेष का यह नाम है । 'विष्टार' इस में आष्टमिक 'छन्दोनाम्नि च' सूत्र से मूर्द्धन्य आदेश हो जाता है ॥ ३४ ॥

उदि ग्रहः[3] ॥ ३५ ॥

'ग्रहवृद०[4]' इति सामान्येन 'अप्' प्रत्ययः प्राप्तस्तस्यायमपवादः । उदि । ७ । १ । ग्रहः । ५ । १ ॥

उत्पूर्वाद् 'ग्रह' धातोः कर्त्तृभिन्ने कारके भावे च 'घञ्' प्रत्ययो भवति । उद्ग्राहः ॥ ३५ ॥

'ग्रहवृद०' इस सूत्र से सामान्यतया 'अप्' प्राप्त था उसका यह अपवाद है ॥

[उदि] उत्-पूर्वक [ग्रहः] 'ग्रह' धातु से कर्तृभिन्न कारक तथा भाव में 'घञ्' प्रत्यय होता है ॥ जैसे—उद्ग्राहः ॥ ३५ ॥

समि मुष्टौ[5] ॥ ३६ ॥

'ग्रहः' इत्यनुवर्त्तते । परिमाणाख्यायां 'घञ्' सिद्ध एव अपरिमाणार्थोऽयमारम्भः । समि । ७ । १ । मुष्टौ । ७ । १ ॥

मुष्टौ वाच्ये संपूर्वाद् 'ग्रह' धातो 'घञ्' प्रत्ययो भवति ॥ मल्लस्य संग्राहः । मुष्टिकस्य संग्राहः ।

---

१. आ० सू० १३६२ ॥
२. अ० ८ । ३ । ५४ ॥
३. आ० सू० १३६३ ॥
४. अ० ३ । ३ । ५८ ॥
५. आ० सू० १३६५ ॥

वा०—उद्ग्राभनिग्राभौ च छन्दसि स्रुगुद्यमननिपातनयोः[1] ॥ १ ॥

उद्ग्राभ-निग्राभौ शब्दौ स्रुगुद्यमननिपातनयोरर्थयोर्घञ् प्रत्ययान्तौ भवतः **'हृग्रहो[र्भ]श्छन्दसि हस्य'**[2] इति वार्त्तिकेन हकारस्य भकारादेशः ॥ ३६ ॥

यहां 'ग्रहः' पद का अनुवर्त्तन है। परिमाणाख्या में तो 'घञ्' सिद्ध ही था यह सूत्र अपरिमाणार्थ है ॥

[मुष्टौ] मुष्टि वाच्य हो तो [समि] सम्-पूर्वक 'ग्रह' धातु से 'घञ्' प्रत्यय होता है ॥

जैसे—मल्लस्य संग्राहः । मुष्टिकस्य संग्राहः ॥

वा०—उद्ग्राभनिग्राभौ च०—उद्ग्राभ और निग्राभ शब्द स्रुक्[3] के उद्यमन और निपातन अर्थ में 'घञ्' प्रत्ययान्त होते हैं ॥

'हृग्रहोर्भश्छदसि हस्य' इस वार्त्तिक से हकार को 'भकार' आदेश होता है ॥ ३६ ॥

परिन्योर्नीणोर्द्यूताभ्रेषयोः[4] ॥ ३७ ॥

इवर्णान्तादचोऽपवादः । परिन्योः । ७ । २ । नीणोः । ६ । २ । द्यूताभ्रेषयोः । ७ । २ । अभ्रेषो यथार्थकरणम् ॥

परिपूर्वान् 'नी' धातोर्द्यूते, निपूर्वाद्-'इण्' धातोश्चाभ्रेषेऽर्थे 'घञ्' प्रत्ययो भवति ॥ परिणायो द्यूतः । न्यायः—पक्षपातराहित्येन कार्य्यकरणम् ॥ 'द्यूताभ्रेषयोः' इति किम्—परिणयः । न्ययः । अत्राजेव भवति ॥ ३७ ॥

इवर्णान्त से प्राप्त 'अच्' का अपवाद है । अभ्रेष यथार्थ करने को कहते हैं ॥

परि-पूर्वक 'नी' धातु से द्यूत अर्थ में तथा नि-पूर्वक 'इण्' धातु से अभ्रेष (यथार्थ करने) अर्थ में 'घञ्' प्रत्यय होता है ॥

जैसे—**परिणायो** द्यूतः । **न्यायः** । पक्षपात से रहित हो कर कार्य्य करना ॥

'द्यूताऽभ्रेषयोः' ग्रहण इसलिये है कि—परिणयः । न्ययः । यहां 'अच्' ही होता है ॥ ३७ ॥

परावनुपात्यय इणः[5] ॥ ३८ ॥

परौ । ७ । १ । अनुपात्यये । ७ । १ । इणः । ५ । १ ॥ अनुपात्ययो विशेषसहचारित्वम् ॥ परिपूर्वाद् 'इण्' धातोरनुपात्यये कर्त्तृभिन्ने कारके भावे च 'घञ्' प्रत्ययो भवति ॥ शब्दस्य पर्य्यायः । धर्मस्य पर्य्यायः ॥

---

१. अ० ३ । ३ । ३६ भा० ॥ आ० वा० १३६४ ॥

२. अ० ८ । २ । ३२ भा० ॥

३. स्रुच् यज्ञीय पात्रविशेष का नाम है जिसमें कि—यज्ञीय घृत डाला जाता है, दर्शपौर्णमासादि के अनुष्ठान काल में विशेष क्रियाओं में उस स्रुच को नीचे ऊपर उठाना होता है ॥

४. आ० सू० १३६६ ॥ ५. आ० सू० १३६७ ॥

'अनुपात्यये' इति किम्—कालस्य पर्य्ययः ।। ३८ ।।

[परौ] परि-पूर्वक [इणः] 'इण्' धातु से [अनुपात्यये] अनुपात्यय (क्रम अर्थात् बारी) अर्थ में कर्तृभिन्न कारक और भाव में 'घञ्' प्रत्यय होता है ॥

जैसे -- शब्दस्य पर्य्यायः । धर्मस्य पर्य्यायः ।

'अनुपात्यये' ग्रहण इसलिये है कि—कालस्य पर्य्ययः । यहां न हो ॥ ३८ ॥

व्युपयोः शेतेः पर्य्याये[1] ।। ३९ ।।

अचोऽपवादः । व्युपयोः । ७ । २ । शेतेः । ५ । १ । पर्य्याये । ७ । १ ।।

वि-उप-इत्युपसर्गद्वय पूर्वात् 'शीङ्' धातोः पर्य्याये कर्तृभिन्ने कारके भावे च 'घञ्' प्रत्ययो भवति ।।

तव विशायः । मम विशायः । तवोपशायः । ममोपशायः ।। इदानीं तव शयनस्य समय इदानीं च मम ।।

'पर्य्याये' इति किम्—विशयः । अत्राजेव भवति ।। ३९ ।।

यह 'अच्' का अपवाद है ॥

[व्युपयोः] वि, उप, इन दो उपसर्ग पूर्वक [शेतेः] 'शीङ्' धातु से [पर्य्याये] पर्य्याय अर्थ में कर्तृभिन्न कारक और भाव में 'घञ्' प्रत्यय होता है ॥

जैसे—तव विशायः । मम विशायः । तवोपशायः । ममोपशायः । अर्थात् अब तेरे सोने का समय है और अब मेरे सोने का समय है ॥

'पर्य्याये' ग्रहण इसलिये है कि—विशयः । उपशयः । यहां 'अच्' ही होता है ॥ ३९ ॥

हस्तादाने चेरस्तेये[2] ।। ४० ।।

अचोऽपवादः । हस्तादाने । ७ । १ । चेः । ५ । १ । अस्तेये । ७ । १ ।। हस्तेनादानं ग्रहणं हस्तादानं तस्मिन् । अस्तेये चौर्य्यरहिते हस्तादाने 'चिञ्' धातोः कर्तृभिन्ने कारके भावे च 'घञ्' प्रत्ययो भवति ।।

मुद्राप्रचायः । कार्षापणप्रचायः ।।

'हस्तादाने' इति किम्—गृहेऽन्नप्रचयं करोति ।। 'अस्तेये' इति किम्—फल-प्रचयश्चौर्य्येण करोति ।। ४० ।।

यह 'अच्' का अपवाद है । हाथ से ग्रहण करने को हस्तादान कहते हैं ।।

[अस्तेये] अस्तेय अर्थात् चौर्यरहित [हस्तादाने] हस्तादान में [चेः] 'चिञ्' धातु से कर्तृभिन्न कारक और भाव में 'घञ्' प्रत्यय होता है ॥

जैसे—मुद्राप्रचायः । कार्षापणप्रचायः ।।

---

१. आ० सू० १३६८ ।। २. आ० सू० १३६९ ।।

'हस्तादाने' ग्रहण इसलिये है कि—गृहेऽन्नप्रचयं करोति। 'अस्तेये' ग्रहण इसलिये है कि—फलप्रचयश्चौर्येण करोति ॥ ४० ॥

निवासचितिशरीरोपसमाधानेष्वादेश्च कः[1] ॥ ४१ ॥

'चेः' इत्यनुवर्त्तते। निवास० नेषु। ७। ३। आदेः। ६। १। च। [अ०]। कः। १। १ ॥ उपसमाधानं पुञ्जीकरणम् ॥

निवास, चिति, शरीर, उपसमाधान इत्येतेषु 'चिञ्' धातोः 'घञ्' प्रत्ययो भवति, 'चिञ्' धातोरादेश्चकारस्य 'ककार' आदेशः ॥

एषोऽस्य निकायः। निवासस्थानमित्यर्थः ॥ आकायमग्निं चिन्वीत[2]। अकायं ब्रह्म। शरीररहितमित्यर्थः। महान् फलनिकायः। फलसमूह इत्यर्थः ॥

'निवासादिषु' इति किम्—चयः ॥ ४१ ॥

यहां 'चेः' इस पद का अनुवर्त्तन है। उपसमाधान समूह अर्थात् (ढेर) कहाता है ॥

[निवास० नेषु] निवास, चिति, शरीर, उपसमाधान इन अर्थों में चिञ् धातु से 'घञ्' प्रत्यय होता है, [आदेश्च] 'चिञ्' के आदि चकार को [कः] ककार आदेश हो जाता है ॥

जैसे—एषोऽस्य निकायः, अर्थात् निवास स्थान। आकायमग्निं चिन्वीत। अकायं ब्रह्म। अर्थात् शरीररहित है। महान् फलनिकायः, अर्थात् फलों का ढेर ॥

'निवास० नेषु' ग्रहण इसलिये है कि—चयः। यहां 'घञ्' नहीं होता ॥ ४१ ॥

सङ्घे चानौत्तराधर्ये[3] ॥ ४२ ॥

'चेः—आदेश्च कः' इत्यनुवर्त्तते ॥ सङ्घे। ७। १। च। [अ०]। अनौत्तराधर्य्ये। ७। ३ ॥ एकस्योपरि द्वितीयस्य रक्षणमौत्तराधर्य्यं[4] तस्य प्रतिषेधः। अनौत्तराधर्य्ये सङ्घे 'चिञ्' धातो 'घञ्' प्रत्ययो भवति, 'चिञ्' धातोश्चकारस्य 'ककार' आदेशश्च ॥ ब्राह्मणनिकायः। पण्डितनिकायः ॥ 'अनौत्तराधर्य्ये' इति, किम्—[सूकरनिचयः]

['सङ्घे' इति, किम्—घटनिचयः, ज्ञानकर्मसमुच्चयः, प्राणिविषयत्वात् सङ्घस्येह न भवति] ॥ ४२ ॥

यहां 'चेः, आदेश्च कः' इन पदों का अनुवर्त्तन है। एक के ऊपर दूसरे को रखना औत्तराधर्य्य है, उसका न होना अनौत्तराधर्य्य कहाता है ॥

[अनौत्तराधर्य्ये] अनौत्तराधर्य्य (ऊपर नीचे न होने) [सङ्घे] सङ्घ अर्थ में 'चिञ्' धातु से 'घञ्' प्रत्यय होता है 'चिञ्' के चकार को 'ककार' आदेश हो जाता है ॥

जैसे—ब्राह्मणनिकायः। पण्डितनिकायः।

---

१. आ० सू० १३७० ॥ २. अनुपलब्धमूलमिदम् ॥
३. आ० सू० १३७१ ॥
४. उत्तरे चाधरे चोत्तराधरस्तेषां भाव औत्तराधर्य्यम् ॥

'अनौत्तराधर्य्ये' ग्रहण इसलिये है कि—सूकरनिचयः । यहां 'घञ्' न हो ॥

'सङ्घे' ग्रहण इसलिये है कि—घटनिचयः । ज्ञानकर्मसमुच्चयः । सङ्घ से प्राणिविषयक समुदाय का ग्रहण होने से यहां 'घञ्' न होकर 'अप्' हो जाता है ॥ ४२ ॥

कर्मव्यतिहारे णच् स्त्रियाम्[1] ॥ ४३ ॥

कर्मशब्दोऽत्र क्रियावाची ॥ कर्मव्यतिहारे । ७ । १ । णच् । १ । १ । स्त्रियाम् । ७ । १ ॥

कर्मणः क्रियाया व्यतिहारः परस्परकरणं तस्मिन्, कर्मव्यतिहारे स्त्रियामभिधेयायां सामान्यधातोः कर्तृभिन्ने कारके भावे च 'णच्' प्रत्ययो भवति ॥

व्यावचोरी । व्यावचर्ची । व्यावक्रोशी[2] । व्यावहासी ॥ अत्र '**णचः स्त्रियामञ्**[3]' इति स्वार्थेञ् तदन्तान्ङीप् प्रत्ययः ॥

'कर्मव्यतिहारे' इति किम्—उपाध्याया । 'स्त्रियाम्' इति किम्—व्यतिपाको वर्त्तते ॥ ४३ ॥

कर्म शब्द से यहां क्रिया अभिप्रेत है । क्रिया का अदल बदल होना कर्मव्यतिहार कहाता है ॥

[कर्मव्यतिहारे] कर्मव्यतिहार में [स्त्रियाम्] स्त्री अभिधेय हो तो धातुमात्र से कर्तृभिन्न कारक तथा भाव में [णच्] 'णच्' प्रत्यय होता है ॥

जैसे—व्यावचोरी । व्यावचर्ची । व्यावक्रोशी । व्यावहासी ॥ 'णचः स्त्रियामञ्' इस सूत्र से स्वार्थ में 'अञ्' और तदन्त से 'ङीप्' प्रत्यय हो जाता है ॥

'कर्मव्यतिहारे' ग्रहण इसलिये है कि—उपाध्याया ॥ 'स्त्रियाम्' ग्रहण इसलिये है कि—व्यतिपाको वर्त्तते ॥ ४३ ॥

अभिविधौ भाव इनुण्[4] ॥ ४४ ॥

अभिविधौ । ७ । १ । भावे । ७ । १ । इनुण् । १ । १ ॥ सर्वथा कार्य्यविधानमभिविधिस्तस्मिन् । अभिविधौ भावे धातोः 'इनुण्' प्रत्ययो भवति ॥

---

१. आ० सू० १३७२ ॥

२. अत्र **'णचः स्त्रियामञ्'** (अ० ५ । ४ । १४) इत्यादिना केवलात् कृदन्तादेव तद्धितोत्पत्तिः प्राप्नोति, तद्वारणाय **गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः'** (अ० २ । २ । १९ भा०) इत्यनया परिभाषया सुबुत्पत्तेः प्राक् समासे कृते पुनः प्रातिपदिकसंज्ञायां सत्यां तद्धितोत्पत्तिर्भवति एवं साङ्कूटिनमत्रापि । तथा च भाष्यम्—**साङ्कूटिनम्, व्यावक्रोशी । अत्र अवयवाद्युत्पत्तिः प्रसज्ज्येत 'गतिकारकोपपदानां कृद्भिः सह समासो भवति' इति न दोषो भवति ।** (अ० ४ । १ । ४८ भा०) ॥

३. अ० ५ । ४ । १४ ॥

४. आ० सू० १३७३ ॥

सांराविणम् । सांकूटिनम्[1] ।। इनुणन्तात् स्वार्थेऽण् विधीयते ।।

'अभिविधौ' इति किम्—संरावः । संकोटः ।।

भाव इत्यनुवर्त्तमाने पुनर्भावग्रहणस्य प्रयोजनम्—अभिविधौ भावे विहितानां क्तादीनामपीनुण् बाधकः स्यात् । अन्यथा **'मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते'**[2] इति घञो बाधकः स्याद् वाऽसरूपेण क्तादयस्तु प्राप्नुवन्त्येव । **'कृत्यल्युटो बहुलम्'**[3] इति बहुलवचनाल्ल्युटो बाधनमभिविधावपि न भवति संकूटनम् ।। ४४ ।।

[अभिविधौ] अभिविधि (अभिव्याप्ति अर्थात् क्रिया और गुणों से परिपूर्ण सम्बन्ध) अर्थ हों तो [भावे] भाव में धातु से [इनुण्] 'इनुण्' प्रत्यय होता है ।।

जैसे—सांराविणम् । साङ्कूटिनम् ।। इनुणन्त से स्वार्थ में 'अण्' हो जाता है ।।

'अभिविधौ' ग्रहण इसलिये कि—**संरावः । संकोटः ।।**

'भावे' पद की अनुवृत्ति आ रही थी पुनः भाव-ग्रहण का यह प्रयोजन है कि—'इनुण्' अभिविधि अर्थ होने पर भाव में विहित क्तादि प्रत्ययों का भी बाधक हो जाय, अन्यथा **'मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्'** इस नियम से 'घञ्' का बाधक होता, वासरूप विधि से क्तादि तो प्राप्त होते ही हैं । 'कृत्यल्युटो बहुलम्' इसमें बहुलवचन से 'ल्युट्' का बाधन अभिविधि में भी नहीं होता ।। जैसे—**संकूटनम्** ।। ४४ ।।

आक्रोशेऽवन्योर्ग्रहः[4] ।। ४५ ।।

'घञ्' अनुवर्त्तते, नेनुण् । आक्रोशे । ७ । १ । अवन्योः । ७ । २ । ग्रहः । ५ । १ ।। आक्रोशः शापः ।।

अव-नि-इत्युपसर्ग द्वयपूर्वादाक्रोशे वर्त्तमानाद् 'ग्रह' धातो 'घञ्' प्रत्ययो भवति ।। अवग्राहो दुष्ट ते भूयात् । निग्राहो दुष्ट ते भूयात् । विनाशस्ते स्यात् । 'आक्रोशे' इति किम्—अवग्रहः पदस्य । निग्रह इन्द्रियाणाम् । अत्र **'ग्रहवृद०'**[5] इत्यप् प्रत्ययः ।।४५।।

यहां 'घञ्' पद का अनुवर्त्तन है, इनुण् का नहीं । आक्रोश शाप को कहते हैं ।।

[अवन्योः] अव, नि ये दो उपसर्ग पूर्व होने पर [**आक्रोशे**] आक्रोश अर्थ गम्यमान हो तो [ग्रहः] 'ग्रह' धातु से 'घञ्' प्रत्यय होता है ।।

जैसे—**अवग्राहो** दुष्ट ते भूयात् । **निग्राहो** दुष्ट ते भूयात् ।।

'आक्रोशे' ग्रहण इसलिये है कि—**अवग्रहः** पदस्य । **निग्रह** इन्द्रियाणाम् । यहां **'ग्रहवृद०'** से 'अप्' प्रत्यय हो जाता है ।। ४५ ।।

---

१. यत्तु-व्यावक्रोशी' (अ० ३ । ३ । ४३) टिप्पण्यां तदत्रापि संधेयम् ।।
२. अ० ४ । १ । ५५ भा० ।। पा०—५२ ।। ३. अ० ३ । ३ । ११३ ।।
४. आ० सू० १३७४ ।। ५. अ० ३ । ३ । ५८ ।।

प्रे लिप्सायाम्[1] ॥ ४६ ॥

'ग्रहः' इत्यनुवर्त्तते ॥ प्रे । ७ । १ । लिप्सायाम् । ७ । १ ॥ लब्धुमिच्छायां = लिप्सायाम्, लिप्सायां वर्त्तमानात् प्र-पूर्वाद् 'ग्रह' धातोः कर्त्तृभिन्ने कारके भावे च 'घञ्' प्रत्ययो भवति ॥

अन्नप्रग्राहेण चरति भिक्षुकः, अन्नमभीप्सुश्चरति ॥

'लिप्सायाम्' इति किम्—प्रग्रहो देवदत्तस्य ॥ ४६ ॥

यहां 'ग्रहः' पद का अनुवर्त्तन है । प्राप्ति की इच्छा लिप्सा कहाती है ॥

[लिप्सायाम्] लिप्सा अर्थ में [प्रे] प्र-पूर्वक 'ग्रह' धातु से कर्तृभिन्न कारक और भाव में 'घञ्' प्रत्यय होता है ॥

जैसे—**अन्नप्रग्राहेण** चरति भिक्षुकः । अर्थात् अन्नप्राप्ति की अभिलाषा से घूमता है ॥

'लिप्सायाम्' ग्रहण इसलिये है कि—**प्रग्रहो** देवदत्तस्य । यहां 'ग्रहवृद०' से 'अप्' हो जाता है ॥ ४६ ॥

परौ यज्ञे[2] ॥ ४७ ॥

ग्रह इत्यनुवर्त्तते । परौ । ७ । १ ॥ यज्ञे । ७ । १ ॥ यज्ञेऽभिधेये परिपूर्वाद् 'ग्रह' धातोः कर्त्तृभिन्ने कारके भावे च 'घञ्' प्रत्ययो भवति ॥ परिग्राहो[3] यज्ञः ॥

'यज्ञे' इति किम्—परिग्रहः ॥ ४७ ॥

यहां 'ग्रहः' पद का अनुवर्त्तन है ॥

[यज्ञे] यज्ञ अभिधेय हो तो [परौ] परि-पूर्वक 'ग्रह' धातु से कर्तृभिन्न कारक और भाव में 'घञ्' प्रत्यय होता है ॥

जैसे—**परिग्राहो** यज्ञः ॥

'यज्ञे' ग्रहण इसलिये है कि—**परिग्रहः** । यहां 'अप्' होता है ॥ ४७ ॥

---

१. आ० सू० १३७५ ॥ २. आ० सू० १३७६ ॥

३. दर्शपौर्णमासयोर्वेदिनिर्माण इदं श्रूयते—**त्रिः पूर्वं परिग्राहं परिगृह्णाति त्रिरुत्तरम्** (कां० श० २ । २ । ३ । ११) तत्र गार्हपत्यादारभ्याहवनीयपर्य्यन्ता या रेखा वेदिनिर्माणार्था क्रियते सा परिग्राहपदेनोच्यते । अयञ्चात्र विशेषः—**काण्वशतपथे** यत्र **'परिग्राह'** १ । ६ । १ । ९ ॥ २ । ३ । ११ ।) पदं प्रयुज्यते **माध्यन्दिने शतपथे** तत्रैव **परिग्रह** (१ । २ । ५ । १२ ॥ २ । ६ । १ । १२ ।) पदं श्रूयते, अर्थस्तु स एव । **तैत्तिरीये** तु **'परिग्राह'** एव (ब्रा० ३ । २ । ९ ।) अत्राष्टाध्यायीभाष्ये तु—तादर्थ्यात्ताच्छब्द्यमिति न्यायेन परिग्राहो यज्ञ इति प्रयुक्तम् ॥

नौ वृ धान्ये[1] ॥ ४८ ॥

ऋवर्णान्ताद्-अपोऽपवादः । नौ । ७ । १ । वृ । ५ । १ । धान्ये । ७ । १ ॥ वृ लुप्तविभक्तिको[2] निर्देशः । 'वृ' इति निरनुबन्धकग्रहणे वृङ्वृञोः सामान्यग्रहणम् ॥

नि-पूर्वाद् 'वृञ्-वृङ्' धातोः [धान्येऽर्थे] कर्तृभिन्ने कारके भावे च 'घञ्' प्रत्ययो भवति ॥ नीवारा व्रीहयः ॥

'धान्ये' इति किम्—निवरा कन्या ॥ ४८ ॥

ऋवर्णान्त से प्राप्त 'अप्' का अपवाद है । 'वृ' यह अविभक्तिक निर्देश है, 'वृ' ऐसे निरनुबन्ध निर्देश से 'वृङ्-वृञ्' दोनों का सामान्यग्रहण हो जाता है ॥

[नौ] नि पूर्वक [वृ] वृञ्, वृङ् धातु से [धान्ये] धान्य अर्थ में कर्तृभिन्न कारक तथा भाव में 'घञ्' प्रत्यय होता है ॥

जैसे—नीवारा व्रीहयः ॥

'धान्ये' ग्रहण इसलिये है कि—निवरा कन्या ॥ ४८ ॥

उदि श्रयतियौतिपूद्रुवः[3] ॥ ४९ ॥

अजपोरपवादः । उदि । ७ । १ । श्रयतियौतिपूद्रुवः । ५ । १ ॥

उत्पूर्वेभ्यः श्रयत्यादिधातुभ्यः कर्तृभिन्ने कारके भावे च 'घञ्' प्रत्ययो भवति ॥ उच्छ्रायः । उद्यावः । उत्पावः । उद्द्रावः ॥

'उदि' इति किम्—आश्रयः । यवः । अत्राजपौ भवतः ॥ ४९ ॥

यह सूत्र 'अच्' तथा 'अप्' का अपवाद है ॥

[उदि] उत्पूर्वक [श्रयतियौतिपूद्रुवः] श्रि, यु, पू, द्रु इन धातुओं से कर्तृभिन्न कारक तथा भाव में 'घञ्' प्रत्यय होता है ॥

जैसे —उच्छ्रायः । उद्यावः । उत्पावः । उद्द्रावः ॥

'उदि' ग्रहण इसलिये है कि—आश्रयः । पवः । यहां 'अच्' तथा 'अप्' प्रत्यय हो जाते हैं ॥ ४९ ॥

विभाषाङि रुप्लुवोः[4] ॥ ५० ॥

अप्राप्तविभाषेयम् । विभाषा । [अ०] । आङि । ७ । १ । रुप्लुवोः । ६ । २ ॥

---

१. आ० सू० १३७७ ॥

२. **सुपां सुलुक्०** (अ० ७ । १ । ३९) इति सुब्लुक् ॥

३. आ० सू० १३७८ ॥ ४. आ० सू० १३७९ ॥

आङ्-पूर्वाभ्यां रु-प्लु' धातुभ्यां कर्त्तृभिन्ने कारके भावे च विकल्पेन 'घञ्' प्रत्ययो भवति ।। आरावः । आरवः । आप्लावः ।। आप्लवः ।। पक्ष उत्सर्गत्वादबेव भवति ।। ५० ।।

यह सूत्र अप्राप्त विभाषा है ।।

[आङि] आङ्पूर्वक [रुप्लुवोः] रु, प्लु धातुओं से कर्तृभिन्न कारक तथा भाव में [विभाषा] विकल्प करके 'घञ्' प्रत्यय होता है ।।

जैसे—आरावः । आरवः । आप्लावः । आप्लवः । पक्ष में 'ऋदोरप्' [ऋदोरप्] से 'अप्' ही हो जाता है ।। ५० ।।

अवे ग्रहो वर्षप्रतिबन्धे[1] ।। ५१ ।।

'विभाषा' इत्यनुवर्त्तते । अपोऽपवादः । अवे । ७ । १ । ग्रहः । ५ । १ । वर्षप्रतिबन्धे ७ । १ ।। वर्षस्य प्राप्तप्रवाहस्य कार्य्यस्य प्रतिबन्धस्तस्मिन् ।

वर्षप्रतिबन्धेऽभिधेयेऽवपूर्वाद् 'ग्रह' धातोः कर्त्तृभिन्ने कारके भावे च विकल्पेन 'घञ्' प्रत्ययो भवति ।। अवग्राहः । अवग्रहः ।।

'वर्षप्रतिबन्धे' इति किम्—अवग्रहः शब्दस्य । [अवग्रहः पदस्य] ।। ५१ ।।

यहां 'विभाषा' पद का अनुवर्त्तन है ।

[वर्षप्रतिबन्धे] वर्षप्रतिबन्ध (समय होने पर भी वर्षा का न होना वर्ष प्रतिबन्ध कहाता है) अभिधेय हो तो [अवे] अव-पूर्वक [ग्रहः] 'ग्रह' धातु से कर्तृभिन्न कारक तथा भाव में विकल्प करके 'घञ्' प्रत्यय होता है ।।

जैसे—अवग्राहः । अवग्रहः ।।

'वर्षप्रतिबन्धे' ग्रहण इसलिये है कि—अवग्रहः शब्दस्य । अवग्रहः पदस्य ।। ५१ ।।

प्रे वणिजाम्[2] ।। ५२ ।।

'विभाषा-ग्रहः' इत्यनुवर्त्तते । प्रे । ७ । १ । वणिजाम् । ६ । ३ ।।

वणिक्सम्बन्धे प्रत्ययार्थे सति प्र-पूर्वाद् 'ग्रहः' धातोः कर्त्तृभिन्ने कारके भावे च विभाषा 'घञ्' प्रत्ययो भवति ।। तुलाप्रग्राहः[3] । तुलाप्रग्रहः ।।

'वणिजाम्' इति किम्—प्रग्रहो देवदत्तस्य ।। ५२ ।।

यहां 'विभाषा' तथा 'ग्रहः' पदों का अनुवर्त्तन है ।।

---

१. आ० सू० १३८० ।। २. आ० सू० १३८१ ।।

३. तुला सूत्रेऽश्वादिरश्मौ प्रग्राहः प्रग्रहः पुनः ।। (वै० कोषः, पुल्लिङ्गाध्याय श्लो० ४९)

[वणिजाम्] वणिक् सम्बन्धी प्रत्ययार्थ हो तो [प्रे] प्र-पूर्वक 'ग्रह' धातु से कर्तृभिन्न कारक तथा भाव में विभाषा 'घञ्' प्रत्यय होता है ॥

जैसे—तुलाप्रग्राहः । तुलाप्रग्रहः ॥

'वणिजाम्' ग्रहण इसलिये है कि—**प्रग्रहो देवदत्तस्य** ॥ ५२ ॥

रश्मौ च[1] ॥ ५३ ॥

विभाषा, ग्रहः, प्रे इत्यनुवर्त्तते । रश्मौ । ७ । १ । च । [अ०] ॥

रज्ज्वा[2] वाच्ये प्रपूर्वाद् 'ग्रह' धातोर्विकल्पेन 'घञ्' प्रत्ययो भवति ॥ प्रग्रहः । प्रग्रहः ॥

'रश्मौ' इति किम्—**प्रग्रहः** ॥ ५३ ॥

यहां 'विभाषा', 'ग्रहः' इन पदों का अनुवर्त्तन है ॥

[रश्मौ] रज्जुवाच्य हो तो प्र-पूर्वक 'ग्रह' धातु से विकल्प करके 'घञ्' प्रत्यय होता है ॥

जैसे—**प्रग्रहः । प्रग्राहः** ॥

'रश्मौ' ग्रहण इसलिये है कि—**प्रग्रहः** ॥ ५३ ॥

वृणोतेराच्छादने[3] ॥ ५४ ॥

विभाषा, प्रे, इत्यनुवर्त्तते । वृणोतेः । ५ । १ । आच्छादने । ७ । १ ॥

आच्छादनार्थात् प्रपूर्वाद् 'वृञ्' धातोः कर्तृभिन्ने कारके भावे च [विभाषा] 'घञ्' प्रत्ययो भवति ॥ प्रावारः । प्रवरः ॥

'आच्छादने' इति किम्—**प्रवरः** ॥ ५४ ॥

यहां 'विभाषा' तथा 'प्रे' इन दो पदों का अनुवर्त्तन है ॥

[आच्छादने] आच्छादन अर्थ वाली प्र-पूर्वक [वृणोतेः] 'वृञ्' धातु से कर्तृभिन्न कारक तथा भाव में विकल्प करके 'घञ्' प्रत्यय होता है ॥

जैसे—**प्रावारः । प्रवरः** ॥

'आच्छादने' ग्रहण इसलिये है कि—**प्रवरः** । यहां 'अप्' ही होता है ॥ ५४ ॥

---

१. आ० सू० १३८२ ॥

२. रज्जु० शब्दोऽत्र नहि रज्जुमात्रवचनः, किन्त्वश्वादि-निग्रहनिमित्तो रज्जुर्गृह्यते । तथा च प्रयोगः—**'आत्मानं रथिनं वि०.....मनः प्रग्रहमेव च**। (कठ उ०—अ० १ । वल्ली २ । मं० ३)

३. आ० सू० १३८३ ॥

परौ भुवोऽवज्ञाने[1] ॥ ५५ ॥

'विभाषा' इत्यनुवर्त्तते । परौ । ७ । १ । भुवः । ५ । १ । अवज्ञाने । ७ । १ ॥ अवज्ञानं तिरस्कारः ॥

अवज्ञाने वर्त्तमानात् परिपूर्वाद् 'भू' धातोः कर्त्तृभिन्ने कारके भावे च विभाषा 'घञ्' प्रत्ययो भवति ॥ परिभावः । परिभवः ॥

'अवज्ञाने' इति किम्—परितो भवनं परिभवः ॥ ५५ ॥

यहां 'विभाषा' पद का अनुवर्त्तन है । अवज्ञान तिरस्कार को कहते हैं ॥ [अवज्ञाने] अवज्ञान में वर्त्तमान [परौ] परि-पूर्वक [भुवः] 'भू' धातु से कर्तृभिन्न कारक और भाव में विकल्प करके 'घञ्' प्रत्यय होता है ॥ जैसे—परिभावः । परिभवः ॥

'अवज्ञाने' ग्रहण इसलिये है कि—परितो भवनं परिभवः । यहां 'अप्' हो जाता है ॥५५॥

एरच्[2] ॥ ५६ ॥

एः । ५ । १ । अच् । १ । १ ॥ उत्सर्गसूत्रमिदम् । सामान्यविहितस्य घञस्त्वपवाद एव ॥

इवर्णान्ताद् धातोः कर्त्तृवर्जिते कारके भावे च 'अच्' प्रत्ययो भवति ॥ जयः । नयः । चयः । क्षयः । आश्रयः ॥

वा०—अज्विधौ भयादीनामुपसंख्यानम्[3] ॥ १ ॥

भयादिशब्दा अप्यच् प्रत्ययान्ताः स्युः । भयम् । वर्षम्[4] । किं प्रयोजनम् ? नपुंसकलिङ्गे भावे क्तादयो मा भूवन् । घञ् त्वनेन बाध्यते । वाऽसरूपन्यायेन क्तादयः प्राप्नुवन्त्येव तेषामपि बाधनं स्यात् ॥

वा०—कल्यादिभ्यः प्रतिषेधः[5] ॥ २ ॥

ण्यन्तानामिवर्णान्तत्वादच् प्राप्तस्तत् प्रतिषेधे 'घञ्' यथा स्यात् । कल्पः । अर्थः । मन्त्रः ॥ २ ॥

---

१. आ० सू० १३८४ ॥ २. आ० सू० १३८५ ॥

३. अ० ३ । ३ । ५६ भा० ॥ आ० वा० १३८६ ॥

४. **'वृषभो वर्षणात्'** (पस्पशाह्निके भाष्ये) इति भाष्यवचनाद् बाहुलकात् 'ल्युट्' अपि भवति ॥

५. अ० ३ । ३ । ५६ ॥ आ० वा० १३८७ ॥

६. केचन वृत्तिकारा ण्यन्तेभ्योऽच् प्रत्ययो न भवतीत्याहुः । ज्ञापकञ्चात्र **'उञ्छादीनाञ्च'** (अ० ६ । १ । १६०) इति सूत्रे **'भक्षमन्थभोगदेहाः'** इति गणसूत्रे घञन्तं भक्षग्रहणं वदन्ति । कुतः यदि भक्षयतेरपि-अच्स्यात्तर्हि चित्त्वादेवान्तोदात्तत्वे सिद्धेऽन्तोदात्तार्थं भक्षग्रहणमनर्थकं स्यात्, तदर्थं **'एरजण्यन्तानाम्'** (का० वृ० ६ । १ । १६० ।) इति पठन्ति । तदेतत् सर्वमयुक्तम् ।

वा०—जवसवौ छन्दसि[1] ॥ ३ ॥

अप्राप्तेऽज्विधीयते स्वरभेदार्थम् । ऊर्वोरस्तु मे जवः[2] । अयं मे पञ्चौदनः सवः[2] ॥ द्वितीयतृतीयवार्त्तिकाभ्यां स्वर एव विशेषः ॥ ५६ ॥

यह उत्सर्ग सूत्र है । और सामान्य 'घञ्' का तो अपवाद ही है ॥ [एः] इवर्णान्त धातु से कर्तृवर्जित कारक तथा भाव में [**अच्**] 'अच्' प्रत्यय होता है ॥

जैसे—जयः । नयः । चयः । क्षयः । आश्रयः ॥

वा०—अज्विधौ भया०—भयादि शब्दों का भी अज्विधि में उपसंख्यान करना चाहिये, अर्थात् भयादि शब्द भी 'अच्' प्रत्ययान्त होते हैं ॥ जैसे—**भयम्** । **वर्षम्** ॥ इसका प्रयोजन यह है कि—नपुंसकलिङ्ग भाव में क्तादि प्रत्यय न हों, 'घञ्' तो 'अच्' से बाधा ही जाता है, वासरूपन्याय से क्तादि प्राप्त होते हैं, उनका भी बाधन हो जाय इसलिये 'अच्' विधि में भयादि का उपसंख्यान किया ॥

वा०—कल्प्यादि०—ण्यन्तों के इवर्णान्त होने से 'अच्' प्राप्त था उसको बाध कर 'घञ्' हो जाय । जैसे—कल्पः । अर्थः । मन्त्रः ॥

वा०—जवसवौ०—अप्राप्ति में 'अच्' का विधान स्वरभेद के लिये है ॥ जैसे—ऊर्वोरस्तु मे **जवः** । अयं मे पञ्चौदनः **सवः** ॥ द्वितीय, तृतीय वार्त्तिक से स्वर में ही भेद होता है ॥ ५६ ॥

ऋदोरप्[3] ॥ ५७ ॥

अयमपि सामान्यविहितस्य घञ एवापवादः । ऋदोः । ५ । १ । अप् । १ । १ । दकारो मुखसुखार्थो न तु तपरकरणम् ॥

ऋवर्णान्तेभ्य उवर्णान्तेभ्यश्च धातुभ्यः कर्तृवर्जिते कारके भावे च 'अप्' प्रत्ययो भवति ॥

करः । गरः । स्मरः । शरः । सरः । दरः ॥ उवर्णान्तेभ्यः—रवः । लवः । यवः । पवः ॥ विशेषविहिता घञादयस्त्वस्यापवादाः ॥ ५७ ॥

भाष्ये तादृशवचनस्यानुपलब्धेः । यत्तु ज्ञापकं तदपि न, चौरादिकस्य णेरनित्यत्वाद्यदा णिर्न भवति तदा भक्षग्रहणं सप्रयोजनं भवति, चौरादिकस्य णेरनित्यत्वञ्च **'ऋदुपधात्०'** (अ० ३ । १ । ११०) इति सूत्र उक्तम् । यद्वा—**'कल्प्यादिभ्यः प्रतिषेधः'** इति वचनात् भक्षयतेरच् न भविष्यति ॥

१. अ० ३ । ३ । ५६ भा० ॥ आ० वा० १३८८ ॥

२. अनुपलब्धमूलमिदम् । परन्त्वन्तोदात्तौ जवसवौ वेदे दृश्येते—**श्रेष्ठं सवं सविता** (अथ० ७ । ७३ । ३) एवमन्येष्वपि । **जवस्ते अर्वन्** (अथ० ६ । ९२ । २) एवमन्यत्रापि—**जवेषु** (ऋ० १० । ७१ । ८) ॥

३. आ० सू० १३८९ ॥

यह सूत्र भी सामान्यविहित 'घञ्' का ही अपवाद है ॥ सूत्र में दकार उच्चारण की सुगमता के लिये है, तपर करने के लिये नहीं ॥

[ऋदोः] ऋवर्णान्त धातुओं से कर्तृवर्जित कारक और भाव में [अप्] 'अप्' प्रत्यय होता है ॥

जैसे—करः । गरः । स्मरः । शरः । सरः । दरः ॥ उवर्णान्तेभ्यः—रवः । लवः । यवः । पवः । विशेषविहित घञादि तो इसके अपवाद हैं ॥ ५७ ॥

ग्रहवृदृनिश्चिगमश्च[1] ॥ ५८ ॥

घञ्-अचोरपवादः । ग्रह-वृ-दृ-निश्चि-गमः ५ । १ । [च । अ०] ॥

ग्रह, वृ, दृ, निश्चि, गम इत्येतेभ्यः [धातुभ्यः] कर्तृवर्जिते कारके भावे च 'अप्' प्रत्ययो भवति ॥ ग्रहः । वरः । दरः । निश्चयः । गमः ॥

अत्र ग्रह-गम धातुभ्यां घञ् प्राप्तः स बाध्यते । वृ दृभ्यां त्वप् सिद्ध एव पुनर्ग्रहणं वासरूपविधिनिवृत्त्यर्थम् । नपुंसके भावे क्तादीनां बाधनं स्यात् । कर्तृभिन्ने कारके भावे चाबेव स्यात् । निस्पूर्वाच्चिञ्-धातोरच् प्राप्तस्तस्य ग्रहणं मध्योदात्तो[2] यथा स्यात् [इति] ।

वा०—*वशिरण्योश्चोपसंख्यानम्*[3] ॥ १ ॥

वशिरणिभ्यामप् प्रत्ययः स्यात् । घञोऽपवादः । सवशं सैन्धवम् । घनञ्जयं रणे रणे ॥ १ ॥

वा०—*घञर्थे क-विधानं स्था, स्ना, पा, व्यधि, हनि, युध्यर्थम्*[4] ॥ २ ॥

घञर्थे कर्तृवर्जिते कारके भावे च स्थादिधातुभ्यः 'क' प्रत्ययो भवति ॥ प्रतिष्ठन्तेऽस्मिन् धान्यानीति प्रस्थः । प्रस्थे हिमवतः शृङ्गे ॥

---

१. आ० सू० १३९० ॥

२. अचि सति **'थाथघञ्'** (अ० ६ । २ । १४४) इति सूत्रेणोत्तरपदान्तोत्तत्वं प्राप्नोति, अप्यपि सति स एव स्वरः प्राप्नोति तदनर्थकं सत् **ज्ञापयत्याचार्यो** नाऽत्र थाथादिविधिर्भवतीति । **'गतिकारकोपपदात् कृत्'** (अ० ६ । २ । १३९) इत्युत्तरपदप्रकृतिस्वरे प्रत्ययस्य पित्त्वात् धातुस्वरेण मध्योदात्तो भवति ॥

तथा च भाष्यम्—**एवं तर्हि सिद्धे सति यन्निष्पूर्वाच्चिनोतेरयं शास्ति तज्ज्ञापयत्याचार्यो यत्तद् 'अन्तःयाथघञक्ताजबित्रकाराणाम्' (अ० ६ । २ । १४४) इति तन्निष्पूर्वाच्चिनोतेर्नं भवतीति । किमेतस्य ज्ञापने प्रयोजनम् ? निश्चयः, इत्येष स्वरः सिद्धो भवति** (अ० ३ । ३ । ५८ भा०) ॥

३. अ० ३ । ३ । ५८ भा० ॥ आ० वा० १३९१ ॥

४. अ० ३ । ३ । ५८ भा० ॥ आ० वा० १३९२ ॥

स्ना—प्रस्नान्त्यस्मिन्निति प्रस्नः ।। पा—प्रपिबन्त्यस्यामिति प्रपा ।।

व्यधि—आविध्यन्ति तेनाविधः ।। हनि—विघ्नन्ति तस्मिन् मनांसि विघ्नः ।। युधि—आयुध्यन्ते येन तदायुधम् ।। अत्र 'क' प्रत्ययस्य कित्त्वादाकारलोपो व्यधेः संप्रसारणं हनेरुपधालोपश्च भवति ।। ५८ ।।

यह सूत्र 'घञ्' तथा 'अच्' का अपवाद है ।।

[ग्रह० गमः] ग्रह, वृ, द, निश्रि, गम इन धातुओं से कर्तृवर्जित कारक और भाव में 'अप्' प्रत्यय होता है ।।

जैसे—ग्रहः । वरः । दरः । निश्चयः । गमः ।। यहां ग्रह, गम इन धातुओं से 'घञ्' प्राप्त था सो इस सूत्र से नहीं होता । वृ, द से तो 'अप्' सिद्ध ही था, पुनर्वचन वासरूपविधि की निवृत्त्यर्थ है ।। नपुंसकलिङ्ग भाव में क्तादि प्रत्ययों का बाधन हो जाय, अर्थात् कर्तृभिन्न कारक और भाव में 'अप्' ही हो ।।

निश्रि—इसमें निस् पूर्वक 'चिञ्' धातु से 'अच्' प्राप्त था उसका ग्रहण मध्योदात्तस्वर के लिये किया है ।।

वा०—वशिरण्यो०—वश तथा रण धातुओं से 'अच्' प्रत्यय हो । 'घञ्' का अपवाद है ।। जैसे—सवशं सैन्धवम् । धनंजयं रणे रणे ।। १ ।।

वा०—घञर्थेकविधान०—घञर्थ में अर्थात् कर्तृवर्जित कारक और भाव में स्थादि धातुओं से 'क' प्रत्यय होता है । जैसे—प्रतिष्ठन्तेऽस्मिन् धान्यानीति प्रस्थः । प्रस्थे हिमवतः शृङ्गे । स्ना—प्रस्नान्त्यस्मिन्निति प्रस्नः । पा—प्रपिबन्त्यस्यामिति प्रपा । व्यधि—आविध्यन्ति तेनाविधः । हनि—विघ्नन्ति तस्मिन् मनांसि विघ्नः । युधि—आयुध्यन्ते तेनायुधम् ।। यहां 'क' प्रत्यय के कित् होने से आकार का लोप 'व्यध' धातु को सम्प्रसारण तथा 'हन्' धातु के उपधा का लोप हो जाता है ।। ५८ ।।

उपसर्गेऽदः[1] ।। ५९ ।।

उपसर्गे । ७ । १ । अदः । ५ । १ ।। घञोऽपवादः ।। सोपसर्गाद् 'अदः' धातोः कर्त्तृभिन्ने कारके भावे च 'अप्' प्रत्ययो भवति ।। प्रघसः । विघसः ।।

'उपसर्गे' इति किम्—घासः । उत्सर्गत्वाद् 'घञ्' । उभयत्र 'घञपोश्च[2]' इति घस्लादेशः ।। ५९ ।।

यह सूत्र 'घञ्' का अपवाद है ।।

[उपसर्गे] उपसर्ग सहित [अदः] 'अद' धातु से कर्तृभिन्न कारक और भाव में 'अप्' प्रत्यय होता है ।।

जैसे—प्रघसः । विघसः ।।

---

१. आ० सू० १३९४ ।। २. अ० २ । ४ । ३८ ।।

'उपसर्गे' ग्रहण इसलिये है कि—घासः। यहां उत्सर्ग 'भावे' सूत्र से 'घञ्' हो जाता है। दोनों ही स्थानों में 'घञपोश्च' से 'घस्लृ' आदेश होता है॥ ५९॥

नौ ण च'॥ ६०॥

'अदः' इत्यनुवर्त्तते। नौ। ७। १। णः। १। १। च। [अ०]॥

निपूर्वाद् 'अद' धातोः कर्तृभिन्ने कारके भावे च 'णः' प्रत्ययो भवति चाद् 'अप्' च॥

न्यादः। निघसः। णपक्षे वृद्धिर्घस्लादेशाभावश्च॥ ६०॥

यहां 'अदः' पद का अनुवर्त्तन है॥

[नौ] नि-पूर्वक 'अदः' धातु से कर्तृभिन्न कारक और भाव में [णः] 'ण' प्रत्यय होता है, चकार से 'अप्' भी होता है॥

जैसे—न्यादः। निघसः॥ ण-पक्ष में वृद्धि और 'घस्लृ' आदेश नहीं होता है॥ ६०॥

व्यधजपोरनुपसर्गे'॥ ६१॥

घञोऽपवादः। व्यधजपोः। ६। २। अनुपसर्गे। ७। १॥

उपसर्गरहिताभ्यां 'व्यध-जप' धातुभ्यां कर्तृभिन्ने कारके भावे च 'अप्' प्रत्ययो भवति॥ व्यधः। जपः॥

'अनुपसर्गे' इति किम्—प्रव्याधः॥ ६१॥

यह 'घञ्' का अपवाद है॥

[अनुपसर्गे] उपसर्गरहित [व्यधजपोः] 'व्यध' तथा 'जप' धातु से कर्तृभिन्न कारक और भाव में 'अप्' प्रत्यय होता है॥

जैसे—व्यधः। जपः॥

'अनुपसर्गे' ग्रहण इसलिये है कि—प्रव्याधः॥ ६१॥

स्वनहसोर्वा[3]॥ ६२॥

अनुपसर्गे इत्यनुवर्त्तते। घञ एवापवादः। स्वनहसोः। ६। २। वा [अ०]। अप्राप्तविभाषेयम्॥

उपसर्गरहिताभ्यां स्वन-हसधातुभ्यां कर्तृभिन्ने कारके भावे च 'अप्' प्रत्ययो विकल्पेन भवति पक्षे 'घञ्'॥ स्वनः। स्वानः। हसः। हासः॥

'अनुपसर्गे' इति किम्—प्रस्वानः। प्रहासः॥ ६२॥

---

१. आ० सू० १३९५॥ २. आ० सू० १३९७॥

३. आ० सू० १३९८॥

यहां अनुपसर्गे' इस पद का अनुवर्त्तन है। यह 'घञ्' का अपवाद है। यह अप्राप्त-विभाषा है ॥

उपसर्गरहित [स्वनहसोः] 'स्वन' तथा 'हस' धातु से कर्तृभिन्न कारक और भाव में 'अप्' प्रत्यय [वा] विकल्प करके होता है, पक्ष में 'घञ्' होता है ॥

जैसे—स्वनः। स्वानः। हसः। हासः ॥

'अनुपसर्गे' ग्रहण इसलिये है कि—प्रस्वानः। प्रहासः ॥ ६२ ॥

यमः समुपनिविषु च' ॥ ६३ ॥

'वा' इत्यनुवर्त्तते। यमः। ५। १। समुपनिविषु। ७। ३। च। [अ०] ॥ घञोऽपवादः। सम्-उप-नि-वि-इत्युपसर्गचतुष्टयपूर्वाद् 'यम' धातोः कर्तृभिन्ने कारके भावे च विकल्पेन 'अप्' प्रत्ययो भवति पक्षे 'घञ्' ॥

संयमः। संयामः। उपयमः। उपयामः। नियमः। नियामः। वियमः। वियामः ॥ ६३ ॥

यहां 'वा' इस पद का अनुवर्त्तन है। यह 'घञ्' का अपवाद है ॥ [समुपनिविषु] सम्, उप, नि, वि ये चार उपसर्ग पूर्व हों तो [यमः] 'यम' धातु से कर्तृभिन्न कारक और भाव में विकल्प से 'अप्' प्रत्यय होता है पक्ष में 'घञ्' ॥

जैसे—संयमः। संयामः। उपयमः। उपयामः। नियमः। नियामः। वियमः। वियामः ॥ ६३ ॥

नौ गदनदपठस्वनः' ॥ १६७ ॥

घञोऽपवादः। वा इत्यनुवर्त्तते। नौ। ७। १। गदनदपठस्वनः। ५। १ ॥ निपूर्वेभ्यो गदादिधातुभ्यः कर्तृभिन्ने कारके भावे च विकल्पेन 'अप्' प्रत्ययो भवति पक्षे 'घञ्' ॥

निगदः। निगादः। निनदः। निनादः। निपठः। निपाठः। निस्वनः। निस्वानः ॥

'नौ' इति किम्—गादः ॥ ६४ ॥

यह 'घञ्' का अपवाद है ॥ 'वा' इस पद का अनुवर्त्तन है ॥

[नौ] नि-पूर्वक [गद० स्वनः] गद, नद, पठ, स्वन इन धातुओं से कर्तृभिन्न कारक और भाव में विकल्प से 'अप्' प्रत्यय होता है, पक्ष में 'घञ्' ॥

जैसे—निगदः। निगादः। निनदः। निनादः। निपठः। निपाठः। निस्वनः। निस्वानः ॥

'नौ' ग्रहण इसलिये है कि—गादः। यहां 'घञ्' होता है ॥ ६४ ॥

---

१. आ० सू० १३९९ ॥ २. आ० सू० १४०० ॥

क्वणो वीणायां च[1] ॥ ६५ ॥

'वा' इति 'नौ' इति चानुवर्त्तते ॥ क्वणः । ५ । १ । वीणायाम् । ७ । १ । च । [अ०] ॥

वीणायामभिधे[या]यां निपूर्वात् [अनुपसर्गाच्च] 'क्वण' धातोः कर्त्तृभिन्ने कारके भावे च विकल्पेन 'अप्' प्रत्ययो भवति ॥ निक्वणः । निक्वाणः । [क्वणः । क्वाणः वीणायां—प्रक्वणः । प्रक्वाणः । उपक्वणः । उपक्वाणः ।]

'वीणायाम्' इति किम्—प्रक्वाणः ॥ 'नौ' इति किम्—अतिक्वाणो वर्त्तते ॥ ६५ ॥

यहां 'वा' तथा 'नौ' इन पदों का अनुवर्त्तन है ॥

[**वीणायाम्**] वीणा अभिधेय हो तथा नि-उपसर्गपूर्वक अथवा उपसर्गरहित [**क्वणः**] 'क्वण' धातु से कर्तृभिन्न कारक और भाव में विकल्प करके 'अप्' प्रत्यय होता है, पक्ष में 'घञ्' ॥

जैसे—**निक्वणः** । निक्वाणः । क्वणः । क्वाणः । वीणा में—**प्रक्वणः** । प्रक्वाणः । उपक्वणः । उपक्वाणः ॥

'वीणायाम्' ग्रहण इसलिये है कि—**प्रक्वाणः** । 'नौ' ग्रहण इसलिये है कि—**अतिक्वाणो वर्त्तते** । यहां 'घञ्' हो जाता है ॥ ६५ ॥

नित्यं पणः परिमाणे[2] ॥ ६६ ॥

विकल्पग्रहणं निवृत्तं, नाविति च ॥ नित्यम् । १ । १ । पणः । ५ । १ । परिमाणे । ७ । १ ॥ **पण व्यवहारे स्तुतौ च**[3] । परिमाणे तोलनसाधने गम्यमाने 'पण' धातोः कर्त्तृभिन्ने कारके भावे च नित्यम् 'अप्' प्रत्ययो भवति ॥ पणः । कार्षापणस्य[4] संज्ञा ॥

'परिमाणे' इति किम्—पाणः ॥ ६६ ॥

यहां 'वा' और 'नौ' इन पदों की अनुवृत्ति नहीं आती ॥ **'पण व्यवहारे स्तुतौ च'** ॥ [**परिमाणे**] परिमाण तोलने का साधन गम्यमान हो तो [पणः] 'पण' धातु से कर्तृभिन्न कारक और भाव में [नित्यम्] नित्य 'अप्' प्रत्यय होता है ॥

जैसे—पणः । यह कार्षापण की संज्ञा है ॥

'परिमाणे' ग्रहण इसलिये है कि—**'पाणः'** यहां 'घञ्' होता है ॥ ६६ ॥

---

१. आ० सू० १४०१ ॥ २. आ० सू० १४०२ ॥

३. धा० भ्वा० ४४२ ॥

४. ताम्रसम्बन्धी-कर्षप्रमाणे **'पणः'** इत्येकं 'पैसा' इति ख्यातस्य ॥

(अमरको० माहे० टी०—कां० २ । वैश्यवर्ग । श्लो० २८)

'मूलकपणः-शाकपणः-संव्यवहाराय मूलकादीनां यः परितो मुष्टिर्बध्यते तस्येदमभिधानम्' इति काशिका ॥

मदोऽनुपसर्गे[1] ॥ ६७ ॥

घञोऽपवादः । मदः । ५ । १ । अनुपसर्गे । ७ । १ ॥ उपसर्गरहितान्' 'मद' धातोः कर्त्तृभिन्ने कारके भावे च 'अप्' प्रत्ययो भवति ॥ यौवनस्य मदः । धनस्य मदः । अहङ्कार इत्यर्थः ॥

'अनुपसर्गे' इति किमर्थम्—निमादः । उन्मादः । परिमादः ॥ अत्र घञेव ॥६७॥

यह 'घञ्' का अपवाद है ॥

[अनुपसर्गे] उपसर्गरहित [मदः] 'मद' धातु से कर्तृभिन्न कारक और भाव में 'अप्' प्रत्यय होता है ॥

जैसे—यौवनस्य मदः । धनस्य मदः । अर्थात् धन का अहङ्कार है ॥

'अनुपसर्गे' ग्रहण इसलिये कि—निमादः । उन्मादः । यहां 'घञ्' ही हो ॥ ६७ ॥

प्रमदसम्मदौ हर्षे[2] ॥ ६८ ॥

प्रमदसम्मदौ । १ । २ । हर्षे । ७ । १ ॥ हर्षेऽभिधेये प्रमद सम्मदशब्दौ 'अप्' प्रत्ययान्तौ निपात्येते ॥ सोपसर्गत्वं निपातनम् । बालानां प्रमदः । छात्राणां सम्मदः ॥

'हर्षे' इति किम्—प्रमादः ॥ ६८ ॥

[हर्षे] हर्ष अभिधेय हो तो [प्रमद-सम्मदौ] प्रमद और सम्मद शब्द 'अप्' प्रत्ययान्त निपातन हैं । पूर्वसूत्र से सोपसर्ग 'मद' धातु से 'अप्' का निषेध प्राप्त था, इस सूत्र से सोपसर्ग 'मद' का निपातन किया है ॥

जैसे—बालानां प्रमदः । छात्राणां सम्मदः ॥

'हर्षे' ग्रहण इसलिये है कि—प्रमादः । यहां 'घञ्' हो जाता है ॥ ६८ ॥

समुदोरजः पशुषु[3] ॥ ६९ ॥

घञोऽपवादः समुदोः । ७ । २ । अजः । ५ । १ । पशुषु । ७ । ३ ॥

पशुविषये प्रत्ययार्थे सम्-उत्-इत्युपसर्गद्वयपूर्वाद् 'अज' धातोः कर्त्तृभिन्ने कारके भावे च 'अप्' प्रत्ययो भवति ॥

समजः पशूनाम् । समुदाय इत्यर्थः । उदजः पशूनाम्, प्रेरणमित्यर्थः ॥

'पशुषु' इति किम्—समाज आर्य्याणाम् । समाजो वैयाकरणानाम् । उदाजो राज्ञाम् । अत्र घञेव ॥ ६९ ॥

यह सूत्र 'घञ्' का अपवाद है ॥

---

१. आ० सू० १४०३ ॥ २. आ० सू० १४०४ ॥
३. आ० सू० १४०५ ॥

[पशुषु] प्रत्ययान्त से पशुविषयक अर्थ प्रतीत हो तो [समुदोः] सम्-उत् इन दो उपसर्ग पूर्वक [अजः] 'अज' धातु से कर्तृभिन्न कारक और भाव में 'अप्' प्रत्यय होता है ॥

जैसे—**समजः** पशूनाम् । अर्थात् पशुओं का समुदाय ॥ **उदजः** पशूनाम् । पशुओं को प्रेरणा करना (हांकना) ॥

'पशुषु' ग्रहण इसलिये है कि—**समाज** आर्य्याणाम् । **समाजो** वैयाकरणानाम् । **उदाजो** राज्ञाम् । यहां 'घञ्' ही होता है ॥ ६९ ॥

अक्षेषु ग्लहः[1] ॥ ७० ॥

अक्षेषु । ७ । ३ । **ग्लहः** । ५ । १ ॥ **अक्षविषये प्रत्ययार्थे 'ग्रह' धातोः 'अप्' प्रत्ययो लत्वञ्च[2] निपात्यते ॥ अक्षस्य ग्लहः ॥**

'अक्षेषु' इति किम्—ग्रहो धान्यस्य ॥ ७० ॥

[अक्षेषु] अक्षविषयक प्रत्ययार्थ हो तो [ग्लहः] 'ग्रह' धातु से 'अप्' प्रत्यय तथा लत्व निपातन से होता है ॥

जैसे—**अक्षस्य ग्लहः** ॥

'अक्षेषु' ग्रहण इसलिये है कि—**ग्रहो धान्यस्य** । यहां लत्व नहीं होता ॥ ७० ॥

प्रजने सर्त्तेः[3] ॥ ७१ ॥

प्रजने । ७ । १ । **सर्त्तेः** । ५ । १ ॥ **प्रजनं प्रथमं गर्भाधानम् । प्रजने वर्त्तमानात् 'सृ' धातोः कर्तृभिन्ने कारके भावे च 'अप्' प्रत्ययो भवति ॥**

वडवाया उपसरः । महिष्या उपसरः ॥

'प्रजने' इति किमर्थम्—गोधूमसारः । सामान्यविहितोऽप् विशेषत्वेन नियम्यते ॥ ७१ ॥

प्रजनम् = प्रथम गर्भधारण करना ॥ [प्रजने] प्रजन अर्थ में वर्त्तमान [सर्त्तेः] 'सृ' धातु से कर्तृभिन्न कारक और भाव में 'अप्' प्रत्यय होता है ॥

जैसे—**वडवाया उपसरः । महिष्या उपसरः ॥**

'प्रजने' ग्रहण इसलिये है कि—**गोधूमसारः** ॥ सामान्य विहित 'अप्' को विशेष अर्थ में नियमित किया है ॥ ७१ ॥

---

१. आ० सू० १४०६ ॥

२. **'ग्रहवृद०'** (अ० ३ । ३ । ५८) इत्यादिना 'अपि' सिद्धे पुनर्वचनं लत्वनिपातनार्थमिति भावः । येषां ग्लहिः प्रकृत्यन्तरस्तेषां 'ग्लाहः' प्रत्युदाहरणम् ॥

३. आ० सू० १४०७ ॥

ह्वः संप्रसारणं च न्यभ्युपविषु[1] ॥ ७२ ॥

घञोऽपवादः । ह्वः । ५ । १ । संप्रसारणम् । १ । १ । च । [अ०] । न्यभ्युपविषु । ७ । ३ ॥ नि, अभि, उप, वि इत्युपसर्गचतुष्टयपूर्वात् **'ह्वेञ् स्पर्द्धायां'**[2] धातोः कर्तृभिन्ने कारके भावे च 'अप्' प्रत्ययो भवति, [ह्वेञ्] धातोश्च संप्रसारणं भवति ॥

निह्वः । अभिह्वः । उपह्वः । विह्वः ॥

'न्यभ्युपविषु' इति किम्—प्रह्वायः । अत्र 'घञ्' यथा स्यात् ॥ ७२ ॥

यह 'घञ्' का अपवाद है ॥

[न्यभ्युपविषु] नि, अभि, उप, वि इन चार उपसर्गों के पूर्व होने पर [ह्वः] 'ह्वेञ्' धातु से कर्तृभिन्न कारक और भाव में 'अप्' प्रत्यय होता है [सम्प्रसारणञ्च] और 'ह्वेञ्' धातु को सम्प्रसारण भी हो जाता है ॥

जैसे—निह्वः । अभिह्वः । उपह्वः । विह्वः ॥

'न्यभ्युपविषु' ग्रहण इसलिये है कि—प्रह्वायः । यहां 'घञ्' हो जाता है ॥ २७ ॥

आङि युद्धे[3] ॥ ७३ ॥

'ह्वः' इत्यनुवर्त्तते । [सम्प्रसारणञ्च] । आङि । ७ । १ । युद्धे । ७ । १ ॥ [युद्धे गम्यमाने] आङ्-पूर्वाद् 'ह्वेञ्' धातोः 'अप्' प्रत्ययो भवति सम्प्रसारणञ्च ॥

आहूयन्तेऽस्मिन्नित्याहवः संग्रामः ॥ 'युद्धे' इति किम्—आह्वायः ॥ ७३ ॥

यहां 'ह्वः', 'सम्प्रसारणञ्च' इन पदों का अनुवर्त्तन है ॥

[युद्धे] युद्ध अर्थ में [आङि] आङ्-पूर्वक 'ह्वेञ्' धातु से 'अप्' प्रत्यय तथा सम्प्रसारण होता है ॥

जैसे—आहवः संग्रामः ॥

'युद्धे' ग्रहण इसलिये है कि—आह्वायः । यहां 'घञ्' हो जाता है ॥ ७३ ॥

निपानमाहावः[4] ॥ ७४ ॥

निपानम् । १ । १ । आहावः । १ । १ ॥ निपिबन्त्यस्मिन् तन्निपानं जलाधारः । अधिकरणे 'ल्युट्' ॥

---

१. आ० सू० १४०८ ॥

२. धा० भ्वा० ९९३ ॥ (ख) अत्र ह्वेञः स्पर्द्धार्थस्याभीष्टत्वात् 'स्पर्द्धायाम्' इत्युक्तम्, अन्यथा शब्दार्थस्यापि ग्रहणमभविष्यत् ॥

३. आ० सू० १४०९ ॥

४. आ० सू० १४१० ॥

'ह्वेञ्' धातोः 'अप्' प्रत्ययः सम्प्रसारणं वृद्धिश्चास्य निपानेऽभिधेये निपात्यते ॥ आहावो निपानम् । आहूयन्ते पशवो यत्र स आहावः । कूपसमीपे पश्वर्थं जलाधारो मनुष्यैः सृज्यते तत्र पशव आहूयन्ते ॥

'निपानम्' इति किमर्थम्—आह्वायः । अत्र घञेव ॥ ७४ ॥

निपानम्—यहां करण कारक में 'ल्युट्' प्रत्यय निपातन है ॥

निपान जलाधार को कहते हैं जो कि कूओं के समीप पशुओं को पानी पिलाने के लिये बनाया जाता है ॥

[निपानम्] निपान अभिधेय होने पर [आहावः] 'ह्वेञ्' धातु से 'अप्' प्रत्यय सम्प्रसारण और वृद्धि का निपातन है ॥

जैसे—आहावो निपानम् । जहां पशु पानी पिलाने के लिये ले जाये जाते हैं वह 'आहाव' कहाता है ॥

'निपान' ग्रहण इसलिये है कि—आह्वायः । यहां 'घञ्' ही हो ॥ ७४ ॥

भावेऽनुपसर्गस्य[1] ॥ ७५ ॥

अकर्तृकारक इति निवृत्त्यर्थं भावग्रहणम् । 'ह्वः' इत्यनुवर्त्तते [सम्प्रसारणञ्च] । भावे । ७ । १ । अनुपसर्गस्य । ६ । १ ॥

उपसर्गरहिताद् 'ह्वेञ्' धातोर्भावे 'अप्' प्रत्ययः सम्प्रसारणञ्च भवति ॥

हवः । हवेहवे [सुहवं] शूरमिन्द्रम्[2] ॥

'अनुपसर्गस्य' इति किम्—प्रह्वायः । संह्वायः । अत्र घञेव भवति ॥ ७५ ॥

यहां 'ह्वः' तथा 'सम्प्रसारणञ्च' इन पदों का अनुवर्त्तन है ॥ 'अकर्त्तरि च कारके' इस अधिकार की निवृत्ति के लिये 'भावे' ग्रहण किया ॥

[अनुपसर्गस्य] उपसर्गरहित 'ह्वेञ्' धातु से [भावे] भाव में 'अप्' प्रत्यय तथा सम्प्रसारण होता है ॥

जैसे—हवः । हवेहवे सुहवं शूरमिन्द्रम् ॥

'अनुपसर्गस्य' ग्रहण इसलिये है कि—प्रह्वायः । संह्वायः ॥ यहां 'घञ्' ही होता है ॥ ७५ ॥

---

१. आ० सू० १४११ ॥

२. ऋ० ६ । ७ । ११ ॥, साम० पू०—४ । ५ । २ ॥

हनश्च वधः[1] ॥ ७६ ॥

भावे, अनुपसर्गस्य इत्यनुवर्त्तते । हनः । ५ । १ । च । [अ०] । वधः । १ । १ ॥ वध इत्यादेशोऽकारान्तः[2] ॥

उपसर्गरहिताद् 'हन' धातोर्भावे 'अप्' प्रत्ययो भवति 'हन' धातोश्च वधादेशः ॥ वधश्चौराणाम् । वधः शत्रूणाम् । कंसस्य वधः ॥

'भावे' इति किम्—घातः ॥ 'अनुपसर्गस्य' इति किम्—प्रघातः ॥ ७६ ॥

यहां 'भावे' तथा 'अनुपसर्गस्य' इन पदों का अनुवर्त्तन है । 'वध' यह अकारान्त आदेश होता है ॥

उपसर्गरहित [हनः] 'हन' धातु से भाव में 'अप्' प्रत्यय और 'हन' धातु को [वधः] 'वध' आदेश होता है ॥

जैसे—वधश्चौराणाम् । वधः शत्रूणाम् । कंसस्य वधः ॥

'भावे' का अनुवर्त्तन इसलिये है कि—घातः ॥ 'अनुपसर्गस्य' का अनुवर्त्तन इसलिये है कि—प्रघातः । यहां 'घञ्' ही होता है ॥ ७६ ॥

मूर्त्तौ घनः[3] ॥ ७७ ॥

मूर्त्तौ । ७ । १ । घनः । १ । १ ॥ मूर्त्तिः स्थूलता काठिन्यं वा ॥ मूर्त्तावभिधेयायां 'हन' धातोः 'अप्' प्रत्ययो धात्वादिहकारस्य च कुत्वं निपात्यते ॥

[अभ्रघनः । दधिघनः] घनो मेघः । घनं वस्त्रम् [घनं दधि[4]] 'मूर्त्तौ' इति किम्—घातः ॥ ७७ ॥

मूर्त्तिः = स्थूलता तथा कठिनता को कहते हैं ॥

[मूर्त्तौ] मूर्त्ति अभिधेय हो तो [घनः] 'हन, धातु से 'अप्' प्रत्यय तथा धात्वादि हकार को कुत्व का निपातन है ॥

जैसे—अभ्रघनः । दधिघनः । घनो मेघः । घनं वस्त्रम् । घनं दधि ॥

'मूर्त्तौ' ग्रहण इसलिये है कि—घातः । यहां 'घञ्' हो जाता है ॥ ७७ ॥

---

१. आ० सू० १४१२ ॥

२. अत्र भाष्यम्—**किमयमदन्तः, आहोस्विद् व्यञ्जनान्तः ? यदि व्यञ्जनान्तः, वधौ व्यञ्जनान्त उक्तम् । किमुक्तम् ? वध्यादेशे वृद्धितत्वप्रतिषेध इड्विधिश्च इति । अथादन्तः, न दोषो भवति, यथा न दोषस्तथाऽस्तु ॥** (अ० २ । ४ । ४३ भा०)

३. आ० सू० १४१३ ॥

४. घनो मेघः, घनं वस्त्रम्, घनं दधि-इत्याद्युदाहरणेषु गुणशब्देन गुणी गृह्यत इति बोध्यम् । घनं वस्त्रम्-इत्यत्र तु सघनशब्दस्यापि व्यवहारो दृश्यते, अयमेवापभ्रंशरूपः 'सङ्घणः' इति शब्दो भाषायामपि दृश्यते ॥

अन्तर्घनो देशे[1] ॥ ७८ ॥

अन्तर्घनः । १ । १ । देशे । ७ । १ ॥ देशेऽभिधेयेऽन्तः पूर्वाद् 'हन' धातोः 'अप्' प्रत्ययः, आदेश्च कुत्वं निपात्यते ॥

अन्तर्घनो[2] देशः । देशविशेषस्य[3] संज्ञा ॥ 'देशे' इति किम्—अन्तर्घातः ॥ ७८ ॥

[देशे] देश अभिधेय हो तो [अन्तर्घनः] अन्तः-पूर्वक 'हन' धातु से 'अप्' प्रत्यय तथा घात्वादि को कुत्व का निपातन है ॥

जैसे—अन्तर्घनो देशः ॥ यह किसी देश का नाम है ॥

'देशे' ग्रहण इसलिये है कि—अन्तर्घातः ॥ ७८ ॥

अगारैकदेशे प्रघणः प्रघाणश्च[4] ॥ ७९ ॥

अगारैकदेशे । ७ । १ । प्रघणः । १ । १ । प्रघाणः । १ । १ ॥ च । [अ०] ॥ अगारस्य स्थानस्यैकदेशोऽवयवः [अगारैकदेशः] ॥

अगारैकदेशे प्रघण-प्रघाण इत्येतौ शब्दौ 'हन' धातोः 'अप्' प्रत्ययान्तौ कृतकुत्व-णत्वौ च निपात्येते ॥ प्रघणः[5] । प्रघाणः ॥

'अगारैकदेशे' इति किम्—प्रघातोऽन्यत्र ॥ ७९ ॥

[अगारैकदेशे] अगार अर्थात् गृह का एक देश अभिधेय हो तो 'हन' धातु से [प्रघणः प्रघाणश्च] प्रघण और प्रघाण ये शब्द 'अप्' प्रत्ययान्त तथा धात्वादि को कुत्व तथा णकारादेश किये हुए निपातित हैं ॥

जैसे—प्रघणः । प्रघाणः ॥

'अगारैकदेशे' ग्रहण इसलिये है कि—अन्यत्र 'प्रघातः' ही हो ॥ ७९ ॥

उद्घनोऽत्याधानम्[6] ॥ ८० ॥

उद्घनः । १ । १ । अत्याधानम् । १ । १ ॥ अत्यन्तमाधीयन्तेऽस्मिन्नित्यत्या-धानम् । उत्पूर्वाद् 'हन' धातोः 'अप्' प्रत्यय आदेश्च कुत्वं निपात्यतेऽत्याधाने वाच्ये ॥

उद्घनः । यस्मिन्काष्ठेऽन्यानि काष्ठानि स्थापयित्वा तक्षकास्तक्षन्ति स उच्यत उद्घनः ॥ उद्घातोऽन्यत्र ॥ ८० ॥

---

१. आ० सू० १४१४ ॥ २. अन्ये णकारं पठन्ति—अन्तर्घणो देश इति ॥

३. द्वारमतिक्रम्य यः सावकाशः प्रदेशः सोऽन्तर्घनः । तस्यैव 'आङ्गन' इत्यपभ्रंशो भाषायाम् वाह्लीकेषु देशविशेष इति केचित् ॥

४. आ० सू० १४१५ ॥

५. द्वारप्रकोष्ठाद् बहिर्द्वाराग्रवर्त्तिचतुष्कस्य, 'चबूतरा' इति ख्यातस्य ॥

६. आ० सू० १४१६ ॥

[उद्घनः] उत्-पूर्वक 'हन' धातु से 'अप्' प्रत्यय और आदि को कुत्व निपातन है [अत्याधाने] अत्याधान वाच्य हो तो ॥

जैसे—उद्घनः । जिस काष्ठ पर वर्द्धिक (बढ़ई) लोग काष्ठ को रख कर छीलते हैं, वह काष्ठ उद्घन कहाता है ॥

'अत्याधाने' ग्रहण इसलिये है कि—अन्यत्र 'उद्घातः' ही होगा ॥ ८० ॥

अपघनोऽङ्गम्[1] ॥ ८१ ॥

अपघनः । १ । १ । अङ्गम् । १ । १ ॥ अङ्गशब्दोऽत्रावयववाची तेन हस्तादयः शरीरावयवा गृह्यन्ते ॥

अप-पूर्वाद् 'हन' धातोः 'अप्' प्रत्यय आदेश्च कुत्वमवयवाऽभिधेये निपात्यते ॥ [अपहन्यतेऽनेनेति, अपघनः, पाणिः पादो वा] ॥

'अङ्गम्' इति किम्—अपघातोऽन्यत्र ॥ ८१ ॥

अङ्ग शब्द सामान्य अवयव वाची होता हुआ यहां हाथ पैर का वाची है ॥

[अङ्गम्] हाथ-पैर आदि अवयव अभिधेय हो तो [अपघनः] अपपूर्वक 'हन' धातु से 'अप्' प्रत्यय तथा आदि को कुत्व निपातन से होता है ॥

जैसे—अपघनः पाणिः पादो वा ॥

'अङ्गम्' ग्रहण इसलिये है कि—अपघातः । यहां नहीं होता ॥ ८१ ॥

करणेऽयोविद्रुषु[2] ॥ ८२ ॥

'हनश्च वधः[3]' इत्यस्माद् 'हनः' इत्यनुवर्त्तते ॥ करणे । ७ । १ । अयोविद्रुषु । ७ । ३ ॥ अयस्, वि, द्रु इति शब्दत्रयोपपदाद् 'हन' धातोः करणकारके 'अप्' प्रत्ययो भवति 'हन' धातोश्च घनादेशः ॥

अयो हन्यतेऽनेनायोघनः । विघनः । द्रुघणः[4] ॥ विशब्देनात्रोपसर्गस्य ग्रहणं नास्ति किन्तु पक्षिवाचिनः ॥ द्रुघणः कुद्दाल उच्यते । 'पूर्वपदात् संज्ञायामगः[5]' इति णत्वम् ॥ ८२ ॥

'हनश्च वधः' इस सूत्र से 'हनः' का अनुवर्त्तन है ॥

---

१. अ० सू० १४१७ ॥ २. अ० सू० १४१८ ॥

३. अ० ३ । ३ । ७६ ॥

४. "द्रुघणो द्रुममयो घन" इति निरु० अ० ९ खं० २३ ॥ (ख) द्रुघणं शयानम् । ऋ० १० । १०२ । ९ ॥

५. अ० ८ । ४ । ३ ॥

[**अयोविद्रुषु**] अयस्, वि, द्रु ये तीन शब्द उपपद हों तो 'हन' धातु से [करणे] करणकारक में 'अप्' प्रत्यय तथा 'हन' धातु को घनादेश होता है ॥

जैसे—अयोघनः । विघनः । द्रुघणः ॥ यहां वि-शब्द पक्षी वाची है, उपसर्ग नहीं । द्रुघण कुदाल (कुठार या कुल्हाड़ी) का नाम है । 'पूर्वपदात् संज्ञायामगः' सूत्र से णत्व हो जाता है ॥ ८२ ॥

स्तम्बे क च[1] ॥ ८३ ॥

'हनः, करणे' इत्यनुवर्त्तते । स्तम्बे । ७ । १ । क । १ । १ । च । [अ०] ॥ चकारोऽबनुकर्षणार्थः ॥

स्तम्बपूर्वाद् 'हन' धातोः करणे कारके 'क' प्रत्ययश्चाद् 'अप्' च भवति, तत्राप्-सन्नियोगे घनादेशश्च ॥

स्तम्बघ्नः । स्तम्बघनः । स्तम्बघ्ना । स्तम्बघना ॥

'करणे' इति किम्—स्तम्बघातः ॥ ८३ ॥

यहां 'हनः', 'करणे' पदों का अनुवर्त्तन है ॥ चकार 'अप्' प्रत्यय का अनुकर्षक है ॥

[स्तम्बे] स्तम्ब-पूर्वक 'हन' धातु से करणकारक में [क] 'क' प्रत्यय [च] और 'अप्' प्रत्यय भी होता है, 'अप्' प्रत्यय के साथ 'घन' आदेश भी हो जाता है ॥

जैसे—स्तम्बघ्नः । स्तम्बघनः । स्तम्बघ्ना । स्तम्बघना ॥

'करणे' ग्रहण इसलिये है कि—स्तम्बघातः । यहां 'घञ्' होता है ॥ ८३ ॥

परौ घः[2] ॥ ८४ ॥

'करणे-हनः' इत्यनुवर्त्तते । परौ । ७ । १ । घः । १ । १ ॥

परिपूर्वाद् 'हन' धातोः करणकारके 'अप्' प्रत्ययो भवति 'हन' धातोश्च 'घ' इत्यादेशः ॥

परिघः । पलिघः ॥ '**परेश्च घाङ्कयो**रिति[3]' विभाषा लत्वम्, परिहन्यतेऽनेनेति विग्रहः ॥

'करणे' इति किम्—परिघातः ॥ ८४ ॥

यहां 'करणे, हनः' पदों का अनुवर्त्तन है ॥

[परौ] परि-पूर्वक 'हन' धातु से करणकारक में 'अप्' प्रत्यय होता है, 'हन' धातु को [घः] 'घ' यह आदेश हो जाता है ॥

जैसे—परिघः । पलिघः ॥ 'परेश्च घाङ्कयोः' सूत्र से विकल्प करके लत्व हो जाता है ॥

---

१. आ० सू० १४१९ ॥ २. आ० सू० १४२० ॥

३. अ० ८ । २ । २१ ॥

'करणे' ग्रहण इसलिये है कि—परिघातः । यहां 'घञ्' हो जाता है ॥ ८४ ॥

उपघ्न आश्रये[1] ॥ ८५ ॥

उपघ्नः । १ । १ । आश्रये । ७ । १ ॥ उपपूर्वाद् 'हन' धातोः 'अप्' प्रत्यय उपधालोपश्च आश्रयेऽभिधेये निपात्यते ॥

आश्रय-शब्द आधारवाची । पर्वतोपघ्नः । ग्रामोपघ्नः ॥ उपघातोऽन्यत्र ॥८५॥

[आश्रये] आधार अभिधेय हो तो [उपघ्नः] उप-पूर्वक 'हन' धातु से 'अप्' प्रत्यय, उपधा का लोप निपातन है ॥

जैसे—पर्वतोपघ्नः । ग्रामोपघ्नः ॥ अन्यत्र 'उपघातः' होता है ॥ ८५ ॥

संघोद्घौ गणप्रशंसयोः[2] ॥ ८६ ॥

संघोद्घौ । १ । २ । गणप्रशंसयोः । ७ । २ ॥ गणप्रशंसयोरभिधेययोः समुत्पूर्वाद् 'हन' धातोः 'अप्' प्रत्ययो घादेश[ष्टिलोप]श्च निपात्यते ॥

सङ्घः पशूनाम् । उद्घो मनुष्यः, प्रशंसायोग्य इत्यर्थः ॥

'गणप्रशंसयोः' इति किम्—[सङ्घातः] । उद्घात इत्यन्यत्र ॥ ८६ ॥

[गणप्रशंसयोः] गण (समुदाय) और प्रशंसा अभिधेय हो तो [सङ्घोद्घौ] सम् और उत्पूर्वक 'हन' धातु से 'अप्' प्रत्यय, 'हन' के हकार को 'घ' आदेश और टिलोप निपातन से हो जाते हैं ॥

जैसे—सङ्घः पशूनाम् । पशुओं का समूह ॥ उद्घो मनुष्यः । अर्थात् प्रशंसा योग्य मनुष्य है ॥

'गणप्रशंसयोः' ग्रहण इसलिये है कि—अन्यत्र 'सङ्घातः' । 'उद्घातः' ऐसा ही हो ॥ ८६ ॥

निघो निमितम्[3] ॥ ८७ ॥

निघः । १ । १ । निमितम् । १ । १ ॥ निरन्तरं मितं तुलितं निमितम् ॥ निमितेऽभिधेये निघ इति निपूर्वाद् 'हन्' धातोः 'अप्' प्रत्ययो घादेशश्च निपात्यते ॥ निघो गोधूमः । निघाः शालयः । निघा[4] वृक्षाः ॥

'निमितम्' इति किम्—निघात इत्यन्यत्र ॥ ८७ ॥

[निमितम्] सब प्रकार से जो मित (परिपूर्णता को प्राप्त) अभिधेय हो तो [निघः] 'निघ' इस पद में नि-पूर्वक 'हन' धातु से 'अप्' प्रत्यय और हकार को 'घ' आदेश निपातन से हो जाते हैं ॥

---

१. आ० सू० १४२२ ॥
२. आ० सू० १४२३ ॥
३. आ० सू० १४२४ ॥
४. निर्विशेषं हन्यन्ते ज्ञायन्ते = निघा वृक्षाः ॥

जैसे—निघो गोधूमः । निघाः शालयः । निघा वृक्षाः ॥

'निमितम्' ग्रहण इसलिये है कि—अन्यत्र 'निघातः' यहां 'घञ्' होता है ॥ ८७ ॥

ड्वितः क्त्रिः[1] ॥ ८८ ॥

ड्वितः । ५ । १ । क्त्रिः । १ । १ ॥ डु इद्यस्य स ड्वित् तस्मात् । ड्वितो धातोः कर्त्तृभिन्ने कारके भावे च 'क्त्रिः' प्रत्ययो भवति ॥

कृत्रिमम् । पक्त्रिमम् । **'क्त्रेर्मम् नित्यम्'**[2] इति वचनात् केवलस्य 'क्त्रि' प्रत्ययान्तस्य प्रयोगो न भवति । वाऽसरूपन्यायेन घञादयः प्रत्यया अपि भवन्ति । कित्त्वाद् गुणप्रतिषेधः सम्प्रसारणञ्च ॥ ८८ ॥

[ड्वितः] डु इत् है जिन धातुओं का उन से कर्तृभिन्न कारक और भाव में [क्त्रिः] 'क्त्रिः' प्रत्यय होता है ॥

जैसे—कृत्रिमम् । पक्त्रिमम् ॥ 'क्त्रेर्मम् नित्यम्' इस सूत्र से केवल 'क्त्रि-प्रत्ययान्त का प्रयोग नहीं होता ॥ वाऽसरूपन्याय से घञादि प्रत्यय भी होते हैं ॥ प्रत्यय के कित् होने से गुण का प्रतिषेध और सम्प्रसारण हो जाता है ॥ ८८ ॥

ट्वितोऽथुच्[3] ॥ ८९ ॥

ट्वितो । ५ । १ । अथुच् । १ । १ ॥ टु इद्यस्य तस्मात् । ट्वितो धातोः कर्त्तृभिन्ने कारके भावे च 'अथुच्' प्रत्ययो भवति ॥

टुवेपृ—वेपथुः[4] । टुओश्वि—श्वयथुः । वासरूपेण घञादयोऽपि ॥ ८९ ॥

[ट्वितः] टु इत् है जिन धातुओं का उनसे कर्तृभिन्न कारक और भाव में [अथुच्] 'अथुच्' प्रत्यय होता है ॥

जैसे—टुवेपृ—वेपथुः । टुओश्वि—श्वयथुः । वाऽसरूपविधि से घञादि भी हो जाते हैं ॥ ८९ ॥

यजयाचयतविच्छप्रच्छरक्षो नङ्[5] ॥ ९० ॥

यज० रक्षः । ५ । १ । नङ् । १ । १ ॥ यज, याच, यत, विच्छ, प्रच्छ, रक्ष इत्येतेभ्यो धातुभ्यः कर्त्तृभिन्ने कारके भावे च 'नङ् प्रत्ययो भवति ॥

---

१. आ० सू० १४२५ ॥ २. अ० ४ । ४ । २० ॥

३. आ० सू० १४२६ ॥

४. **वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥** गी० अ० १ । श्लो० २९ ॥

५. आ० सू० १४२७ ॥

यज्ञः । याच्ञा । यत्नः । विश्नः । प्रश्नः । रक्षणः ॥ नङो ङित्त्वाद् विश्न इत्यत्र गुणःप्रतिषिध्यते । प्रश्न इत्यत्र ङित्त्वात् सम्प्रसारणं प्राप्तं तत् **'प्रश्ने चासन्नकाले'**[1] इति ज्ञापकान्निवार्य्यते । यजादिभ्यो वासरूपत्वाद् घञादयोऽपि भवन्ति ॥ ९० ॥

[यज० रक्षः] यज, याच, यत, विच्छ, प्रच्छ, रक्ष इन धातुओं से कर्तृभिन्न कारक और भाव में [नङ्] 'नङ्' प्रत्यय होता है ॥

जैसे—यज्ञः । याच्ञा । यत्नः । विश्नः । प्रश्नः । रक्षणः ॥ 'नङ्' प्रत्यय के ङित् होने से 'विश्नः' इस में गुण नहीं होता ॥ 'प्रश्नः' इस में ङित् होने से सम्प्रसारण प्राप्त था वह **'प्रश्ने चासन्नकाले'** इस ज्ञापक से नहीं होता, यजादि में वासरूपविधि से घञादि भी हो जाते है ॥ ९० ॥

स्वपो नन्[2] ॥ ९१ ॥

सम्प्रसारणनिवारणाय नित्स्वरसिद्ध्यर्थञ्च पृथग्ग्रहणम् ॥ स्वपः । ५ । १ । नन् । १ । १ ॥ 'स्वप' धातोः कर्तृभिन्ने कारके भावे च 'नन्' प्रत्ययो भवति ॥ स्वप्नः ॥ ९१ ॥

सम्प्रसारण की निवृत्ति के लिये तथा नित् स्वर के लिये पृथक् ग्रहण है ॥

[स्वपः] 'स्वप' धातु से कर्तृभिन्न कारक और भाव में [नन्] 'नन्' प्रत्यय होता है ॥ जैसे—स्वप्नः ॥ ९१ ॥

उपसर्गे घोः किः[3] ॥ ९२ ॥

उपसर्गे । ७ । १ । घोः । ५ । १ । किः । १ । १ ॥ **'दाधाघ्वदाप्'**[4] इति घुसंज्ञा कृता तस्या इदानीं कार्य्यमुच्यते ॥

सोपसर्गाद् घुसंज्ञकाद् धातोः कर्तृभिन्ने कारके भावे च 'किः' प्रत्ययो भवति ॥

विधिः । निधिः । प्रतिनिधिः । प्रदिः । अन्तर्द्धिः[5] । केः किित्त्वादाकारलोपः ॥ ९२ ॥

'दाधा घ्वदाप्' इस सूत्र से 'घु' संज्ञा कही है अब उस संज्ञा का कार्य्य कहते हैं ॥

[उपसर्गे] उपसर्गपूर्वक [घोः] घुसंज्ञक धातुओं से कर्तृभिन्न कारक और भाव में [किः] 'कि' प्रत्यय होता है ॥

---

१. अ० ३ । २ । ११७ ॥ २. आ० सू० १४२८ ॥
३. आ० सू० १४२९ ॥ ४. अ० १ । १ । २० ॥
५. अन्तः शब्दस्याऽनुपसर्गेऽपि—**'अन्तर्धौ येनाऽदर्शनमिच्छति'** (अ० १ । ४ । २८) इत्यत्र अन्तर्द्धि-शब्दप्रयोगादुपसर्गवद्वृत्तिर्बोध्या ॥ ये तु— **अन्तः शब्दस्य-अड्-किविधि-षत्व-णत्वेषूपसर्गत्वं वाच्यम्'** इति ब्रुवन्ति तद् भाष्यानारूढत्वादुपेक्षणीयम् ॥

जैसे—विधिः । निधिः । प्रतिनिधिः । प्रदिः । प्रधिः । अन्तर्द्धिः ॥ 'कि' प्रत्यय के कित् होने से आकार का लोप हो जाता है ॥ ९२ ॥

कर्मण्यधिकरणे च[1] ॥ ९३ ॥

'घोः, किः' इत्यनुवर्त्तते । कर्मणि । ७ । १ । अधिकरणे । ७ । १ । च । [अ०] ॥ घञादीनामपवादः ॥

कर्मण्युपपदे धुसंज्ञकाद् धातोः अधिकरणकारके 'किः' प्रत्ययो भवति ॥ उदकानि धीयन्तेऽस्मिन्नुदधिः समुद्रः । संज्ञायामुदकशब्दस्य 'उद'[2] आदेशः [जलधिः । वारिधिः । तोयधिः । पयोधिः । यशोधिः] अधिकरण-ग्रहणं कर्तृभिन्नकारकभावनिवृत्त्यर्थम् । चकारः[केर]नुवर्त्तनार्थः ॥ ९३ ॥

यहां 'घोः, किः' पदों का अनुवर्त्तन है ॥ यह घञादि का अपवाद है ॥ [कर्मणि] कर्म उपपद हो तो धुसंज्ञक धातुओं से [**अधिकरणे च**] अधिकरण कारक में 'किः' प्रत्यय होता है ॥

जैसे—उदकानि धीयन्तेऽस्मिन्निति **उदधिः** समुद्रः । **जलधिः** । **वारिधिः** । **तोयधिः** । **पयोधिः** । **यशोधिः** ॥ संज्ञा में उदक शब्द को **'उदकस्योदः संज्ञायाम्'** से 'उद' आदेश हो जाता है ॥

अधिकरण-ग्रहण कर्तृभिन्नकारक और भाव की निवृत्ति के लिये है, चकार 'किः' प्रत्यय की अनुवृत्ति के लिये है ॥ ९३ ॥

स्त्रियां क्तिन्[3] ॥ ९४ ॥

अकर्तरि कारके भावे च, इत्यनुवर्त्तते । स्त्रियाम् । ७ । १ । क्तिन् । १ । १ ॥ स्त्रियामित्यधिकारः क्रियते **'नपुंसके भावे क्तः'**[4] इत्यतः प्राक् । अस्मिन्नधिकारे वाऽसरूपविधिर्नास्ति, अस्त्रियामिति प्रतिषेधात् ॥

सामान्यधातोः स्त्रीलिङ्गे कर्तृभिन्ने कारके भावे च 'क्तिन्' प्रत्ययो भवति ॥ दृष्टिः । मतिः । बुद्धिः । धृतिः ॥ उत्सर्गसूत्रमिदमस्याग्रेऽपवादा वक्ष्यन्ते ॥

वा०—स्त्रियां क्तिन्नाबादिभ्यश्च[5] ॥ १ ॥

आप्तिः । राद्धिः । दीप्तिः । उदाहरणमात्रमेतन्नतु परिगणनम् ॥ **'गुरोश्च हलः'**[6] इति 'अ' प्रत्ययः प्राप्तस्तस्य बाधनार्थं वार्त्तिकमिदम् ॥ ९४ ॥

---

१. आ० सू० १४३० ॥
२. **'उदकस्योदः संज्ञायाम्'** (अ० ६ । ३ । ५७) ॥
३. आ० सू० १४३१ ॥ ४. अ० ३ । ३ । ११४ ॥
५. अ० ३ । ३ । ९४ भा० ॥ आ० वा० १४३२ ॥
६. अ० ३ । ३ । १०३ ॥

यहां 'अकर्त्तरि, कारके, भावे च' इन पदों का अनुवर्त्तन है। यह उत्सर्ग सूत्र है, आगे इस के अपवाद कहेंगे ॥ 'स्त्रियाम्' यह अधिकार 'नपुंसके भावे क्तः' सूत्र तक है। इस अधिकार में वाऽसरूपविधि नहीं होती क्योंकि 'अस्त्रियाम्' ऐसा प्रतिषेध किया है। सामान्य धातु से [स्त्रियाम्] स्त्रीलिङ्ग में कर्तृभिन्न कारक और भाव में [क्तिन्] 'क्ति' प्रत्यय होता है ॥

जैसे—दृष्टिः। मतिः। बुद्धिः। धृतिः ॥

वा०—स्त्रियां क्तिन्नाबा०—'आप्ल्' आदि धातुओं से भावादिकों में 'क्ति' प्रत्यय हो ॥ जैसे—आप्तिः। राद्धिः। दीप्तिः ॥ ये उदाहरणमात्र हैं परिगणन नहीं। 'गुरोश्च हलः' इससे 'अ' प्रत्यय प्राप्त था उसको बाधने के लिये यह वार्त्तिक है ॥ ९४ ॥

स्थागापापचो भावे[1] ॥ ६५ ॥

'आतश्चोपसर्गे'[2] इत्यङ्प्राप्तस्तस्या[यम]पवादः ॥ स्थगापापचः। ५। १। भावे। ७। १ ॥ स्थादि-धातुभ्यो भावे स्त्रीलिङ्गे 'क्तिन्' प्रत्ययो भवति ॥

स्थितिः[3]। प्रस्थितिः। गीतिः। संगीतिः। उद्गीतिः। प्रपीतिः। संपीतिः। पक्तिः। पचो ग्रहणं केवले भावे क्तिन्विधानार्थम्। भाव-ग्रहणमकर्त्तरि कारक-निवृत्त्यर्थम् ॥

वा०—श्रुयजीषिस्तुभ्यः करणे[4] *॥ १ ॥*

श्रु, यजि, इषि, स्तु इत्येतेभ्यो धातुभ्यः करणकारके 'क्तिन्' प्रत्ययो भवति ॥

श्रूयतेऽनयेति श्रुतिः। इज्यतेऽनयेति 'इष्टिः'। इष्यतेऽनयेति 'इष्टिः'। स्तूयतेऽनयेति स्तुतिः ॥ १ ॥

वा०—ग्लाम्लाज्याहाभ्यो[5] *निः ॥ २ ॥*

क्तिनोऽपवादः। ग्लादिभ्यो 'निः' प्रत्ययो भवति ॥ ग्लानिः। म्लानिः। ज्यानिः। हानिः ॥ २ ॥ ६५ ॥

'आतश्चोपसर्गे' इससे 'अङ्' प्राप्त था उसका यह अपवाद है ॥ [स्था० पचः] स्था, गा, पा, पच इन धातुओं से स्त्रीलिङ्ग [भावे] भाव में 'क्तिन्' प्रत्यय होता है ॥

जैसे—स्थितिः। प्रस्थितिः। गीतिः। संगीतिः। उद्गीतिः। प्रपीतिः। संपीतिः। पक्तिः ॥

---

१. आ० सू० १४३६ ॥ २. अ० ३। ३। १०६ ॥

३. अव्यवस्था, व्यवस्था, संस्था इत्यादिषु **'व्यवस्थायामसंज्ञायाम्'** (अ० १। १। ३४) इत्यादिज्ञापकादिह क्तिन् प्रत्ययाभाव इति ध्येयम् ॥

४. अ० ३। ३। ९५ भा० ॥ आ० वा० १४३३ ॥

५. अ० ३। ३। ९५ ॥ आ० वा० १४३४ ॥

यहां 'पच' का ग्रहण केवल भाव में 'क्तिन्' बाधने के लिये है, तथा भाव-ग्रहण 'अकर्त्तरि च कारके' की निवृत्ति के लिये है ॥

वा०—श्रुयजी०—श्रु, यजि, इषि, स्तु इन धातुओं से करण-कारक में 'क्तिन्' प्रत्यय होता है ॥

जैसे—श्रूयतेऽनयेति श्रुतिः । इज्यतेऽनयेति 'इष्टिः । इष्यतेऽनयेति 'इष्टिः' । स्तूयतेऽनयेति स्तुतिः ॥

वा०—ग्लाम्ला०—यह वार्त्तिक 'क्तिन्' का अपवाद है ॥

ग्लादि धातुओं से 'निः' प्रत्यय होता है ॥ जैसे—ग्लानिः । म्लानिः । ज्यानिः । हानिः ॥ २ ॥ ९५ ॥

मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः[1] ॥ ९६ ॥

'भावे' इत्यनुवर्त्तते । भावे । ७ । १ । वृषेष० रा: । १ । ३ । उदात्तः । १ । १ ॥

मन्त्रे वैदिकप्रयोगविषये वृषादिधातुभ्यः स्त्रीलिङ्गे भावे 'क्तिन्' प्रत्ययो भवति स चोदात्तः ॥

नित्स्वरे प्राप्ते प्रत्ययस्योदात्तस्वरो विधीयते । वृष्टिः[2] । इष्टिः[3] । पक्तिः[4] । मतिः[5] । वित्तिः । भूतिः । वीतिः[6] । रातिः[7] ॥

'इष' धातोर्मन्त्रादन्यत्र करणे 'क्तिन्' वार्त्तिकेन भवति, तत्रोदात्तत्वमपि न भवति । पच' धातोः पूर्वसूत्रेण भावे क्तिन्, पुनर्विधानमुदात्तार्थम् । वृषादिभ्यो यथाप्राप्तं लोके प्रत्यया भवन्ति ॥ ९६ ॥

यहां 'भावे' पद का अनुवर्त्तन है ॥

[मन्त्रे] वैदिक प्रयोगविषय में [वृषे० रा:] वृषादि धातुओं से स्त्रीलिङ्ग भाव में 'क्तिन्' प्रत्यय होता है और वह [उदात्तः] उदात्त होता है ॥ नित् स्वर की प्राप्ति में प्रत्यय को उदात्त विधान किया है ॥

---

१. आ० सू० १४३७ ॥

२. यदेषां वृष्टिरसर्जि ॥ ऋ० १ । ३८ । ८ ।, १५२ ॥ ७ ।, ५ । ६३ । १ ।, एवं बहुत्र ॥

३. विश्वेदस्मै सुदिना सासदिष्टिः ॥ ऋ० ४ । ४ । ७ ॥

४. आदित् पक्तिः पुरोडाशं रिरिच्यात् ॥ ऋ० ४ । २४ । ५ ॥ ६ । २९ । ४ ॥

५. यदीमुपह्वरते साधते मतिर्ऋतस्य ॥ ऋ० १ । १४१ । १ ।, १४२ । ४ ।, ३ । ३९ । १ ॥ एवं बहुत्र ॥

६. शुचयो यन्ति वीतये ॥ अथ० २० । ६९ । ३ ॥

७. उत रातिरश्विना ॥ ऋ० १ । ३४ । १ ।, ८९ । २ ।, ११७ । १ ॥ एवमन्यत्रापि ॥

जैसे—वृष्टिः । इष्टिः । पक्तिः । मतिः । वित्तिः । भूतिः । वीतिः । रातिः ॥ 'इष' धातु को मन्त्र से अन्यत्र करण में 'क्तिन्' वार्त्तिक से होता है और वह उदात्त भी नहीं होता । 'पच' धातु से भाव में 'क्तिन्' प्रत्यय तो पूर्वसूत्र से सिद्ध ही था, पुनर्विधान उदात्तविधान के लिये है ॥ लौकिक प्रयोग में वृषादि धातुओं से यथाप्राप्त प्रत्यय होते हैं ॥ ९६ ॥

ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च[1] ॥ ९७ ॥

'उदात्त' इत्यनुवर्त्तते, मन्त्र इति निवृत्तम् । ऊति० कीर्त्तयः । १ । ३ । च । [अ०] ॥

ऊत्यादयः शब्दाः 'क्तिन्' प्रत्ययान्ता अन्तोदात्ता निपात्यन्ते ॥

'अव' धातोः क्तिनि परतो '**ज्वरत्वर०**[2]' इति सूत्रेण 'ऊठ्', ऊतिः ॥ 'यु-जु' धातुभ्यां क्तिन् तस्मिन्ननयोर्दीर्घत्वम् निपात्यते–यूतिः, जूतिः ॥ सातिरिति–'सन' धातोः [**जनसन०**[3]] इत्यनुनासिकस्याकारादेशः, [स्वरार्थं निपातनम्], अथवा 'षो अन्तः-कर्मणि' अस्मात् 'क्तिन्' '**द्यतिस्यति०**[4]' इति निपातनादित्वं न भवति ॥ हेतिरिति–'हन' धातोर्हे इत्यादेशः । अथवा '**हि गतिवृद्धौ च**[5]' इत्यस्य गुणादेशो निपातनात्, हेतिः ॥ '**कृत संशब्दने**[6]' 'इत्यस्मात्' 'क्तिन्' कीर्त्तिः[7] ॥ ९७ ॥

यहां 'उदात्तः' पद का अनुवर्त्तन है और 'मन्त्रे' पद की निवृत्ति हो जाती है ॥

[ऊति० कीर्त्तयः] ऊति, यूति, जूति, साति, हेति, कीर्त्ति ये शब्द 'क्तिन्' प्रत्ययान्त अन्तोदात्त निपातन हैं ॥

ऊतिः—'अव' धातु से 'क्तिन्' परे रहते '**ज्वरत्वर०**' इस सूत्र से ऊठ् हो जाता है ॥ यूतिः । जूतिः । 'यु' और 'जु' धातुओं को 'क्तिन्' परे दीर्घत्व निपातन है ॥ सातिः—'सन' धातु के अनुनासिक को '**जनसन०**' इस से आकारादेश होता है, यहां स्वर के लिये निपातन है । अथवा '**षो अन्तःकर्मणि**' इस धातु से 'क्तिन्' '**द्यतिस्यति०**' इस सूत्र से प्राप्त 'इत्व' निपातन से नहीं होता ॥

हेतिः—'हन' धातु को 'हे' यह आदेश निपातन है । अथवा '**हि गतिवृद्धौ च**' इस धातु से गुणादेश निपातन करके हो जाता है ॥

'कृत संशब्दने' इस धातु से 'क्तिन्' में कीर्त्तिः शब्द सिद्ध होता है ॥ ९७ ॥

---

१. आ० सू० १४३८ ॥
२. अ० ६ । ४ । २० ॥
३. अ० ६ । ४ । ४२ ॥
४. अ० ७ । ४ । ४० ॥
५. धा० स्वा० ११ ॥
६. धा० चुरा० ११२ ॥
७. अत्र '**ण्यासश्रन्थो युच्**' (अ० ३ । ३ । १०७) इति प्राप्तौ निपातनम् ॥

व्रजयजोर्भावे क्यप्[1] ॥ ९८ ॥

क्तिनोऽपवादः । उदात्त इत्यनुवर्त्तते । व्रजयजोः । ६ । २ । भावे । ७ । १ । क्यप् । १ । १ ॥

'व्रज-यज' धातुभ्यां स्त्रीलिङ्गे भावे[2] 'क्यप्' प्रत्ययो भवति, स चोदात्तः ॥ व्रज्या । इज्या । कित्त्वात् सम्प्रसारणम्, पित्करणमुत्तरसूत्रे तुगर्थम् ॥ ९८ ॥

यह सूत्र 'क्तिन्' का अपवाद है । यहां 'उदात्तः' पद का अनुवर्त्तन है ॥

[व्रजयजोः] 'व्रज' तथा 'यज' धातु से स्त्रीलिङ्ग [भावे] भाव में [क्यप्] 'क्यप्' प्रत्यय होता है और वह उदात्त होता है ॥

जैसे—व्रज्या । इज्या । 'क्यप्' के कित् होने से सम्प्रसारण और पित् अगले सूत्रों में तुक् विधान के लिये है ॥ ९८ ॥

संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः[3] ॥ ९९ ॥

भावे, [उदात्त] इत्यनुवर्त्[र्त्तें]ते, क्यप् च । संज्ञायाम् । ७ । १ । समज० भृञिणः । ५ । १ ॥

संज्ञायां सत्यां समजादिभ्यो भावे 'क्यप्' प्रत्ययो भवति, स चोदात्तः ॥

समजनं समज्या । निषद्या । निपत्या । मन्या । विद्या । सुत्या । शय्या । भृत्या । इत्या ॥

'संज्ञायाम्' इति किम्—भृतिः ॥ अस्मिन् सूत्रे भाव[4]ग्रहणानुवर्त्तनादकर्त्तृकारकस्य निवृत्तत्वाच्च कर्मणि स्त्रीलिङ्गे ण्यदेव भवति । तेन भार्य्या शब्दः सिद्ध्यति ॥

वा०—*क्यब्विधिरधिकरणे च*[5] ॥ १ ॥ समजन्ति तस्यां समज्या[6] ॥ ९९ ॥

---

१. आ० सू० १४३९ ॥

२. अत्र भाव-ग्रहणम्—**'अकर्त्तरि च कारके संज्ञायाम्'** इत्यस्य निवृत्त्यर्थमेव, अग्रिमसूत्रे स्त्रियां भावाधिकारोऽस्तीति वचनात् ॥

३. आ० सू० १४४० ॥

४. इहान्ये वृत्तिकारा 'भाव-ग्रहणं न स्वर्य्यते' इत्युक्त्वा कर्त्तृभिन्ने कारकेऽपि क्यप् प्रत्ययं विदधति, तदयुक्तम्—**'भृञोऽसंज्ञायाम्'** (अ० ३ । १ । ११२) इत्यत्र **'स्त्रियां भावाधिकारोऽस्तीति'** वचनात् । समजन्ति तस्यां समज्या इत्यत्र क्यब्विधानाय **'क्यब्विधिरधिकरणे च'** इति वार्त्तिकप्रणयनाच्चासंदिग्धा भावानुवृत्तिः, अन्यथाऽधिकरणे क्यब्विधानाय वार्त्तिकप्रणयनं व्यर्थं स्यात् । यत्तु काशिकाकृता तद्व्याख्यातृभिश्च 'भावाधिकारो भावव्यापारो वाच्यत्वेन विवक्षितः, न तु शास्त्रीयोऽधिकार' इत्युक्तं तत्तु प्रौढिवादमात्रम् ॥

५. अ० ३ । ३ । ९९ ॥

६. **संज्ञाया**मिति वचनात् **अजे**र्वीभावो न भवति, नियतवर्णानुपूर्वीकत्वात् संज्ञायाः ॥

यहां 'भावे' ['उदात्तः'] और 'क्यप्' पदों का अनुवर्त्तन है ॥

[संज्ञायाम्] संज्ञा हो तो [समज० त्रिणः] समज, निषद, निपत, मन, विद, षुञ्, शीङ्, भृञ्, इण् इन से स्त्रीलिङ्ग भाव में 'क्यप्' प्रत्यय और वह उदात्त होता है ॥

जैसे—समजनं समज्या । निषद्या । निपत्या । मन्या । विद्या । सुत्या । शय्या । भृत्या । इत्या ॥

'संज्ञायाम्' ग्रहण इसलिये है कि—भृतिः । इस सूत्र में भाव ग्रहण की अनुवृत्ति होने से तथा 'कर्तृभिन्न कारक' अर्थ के निवृत्त होने से कर्म में स्त्रीलिङ्ग में 'ण्यत्' ही होता है, अतः भार्य्या शब्द सिद्ध हो जाता है ॥

वा०—क्यब्विधि०—'क्यप्' प्रत्यय अधिकरण में भी कहना चाहिये । जैसे—समजन्ति तस्यां समज्या ॥ ९९ ॥

कृञः श च[1] ॥ १०० ॥

भावादि सर्वं निवृत्तम् । क्यबनुवर्त्तते । कृञः । ५ । १ । श । १ । १ । च । [अ०] ॥

वा०—*कृञः श चेति वा वचनम्*[2] ॥ १ ॥

'कृञ्' धातोः 'श' प्रत्ययो विधीयते स क्तिनो बाधकः स्यात्, एवमर्थं विकल्पः क्रियते क्तिन्नपि यथा स्यात् ॥

'कृञ्' धातोः [स्त्रियां] कर्तृभिन्ने कारके भावे च विकल्पेन 'श' प्रत्ययो भवति, पक्षे 'क्तिन्' चकारेणानुकर्षणात् 'क्यप् च' ॥ क्रिया । कृतिः । कृत्या ॥ १०० ॥

यहां भावादि सब निवृत्त है । 'क्यप्' पद का अनुवर्त्तन है ॥

वा०—कृञः श०—'कृञ्' धातु से जो 'श' प्रत्यय का विधान किया है, यह 'क्तिन्' का अपवाद हो जाता । अतः यहां विकल्प करके विधान किया जिससे 'क्तिन्' भी हो जावे ॥

[कृञः] 'कृञ्' धातु से स्त्रीलिङ्ग में कर्तृभिन्न कारक और भाव में विकल्प करके [शः] 'श' प्रत्यय होता है पक्ष में 'क्तिन्', चकार के अनुकर्षण से 'क्यप्' भी हो जाता है ॥

जैसे—क्रिया । कृतिः । कृत्या ॥ १०० ॥

---

१. आ० सू० १४४२ ॥

२. अ० ३ । ३ । १०० भा० ॥ आ० वा० १४४३ ॥

इच्छा[1] ॥ १०१ ॥

इच्छा । १ । १ ॥ 'इष' धातोः 'श' प्रत्ययस्तस्य सार्वधातुकत्वात् '**सार्वधातुके यक्**[2]' इति 'यक्' प्राप्तो निपातनात्[3] प्रतिषिध्यते । **इषुगमि०**[4] इति छत्वम् ॥

वा०—परिचर्य्यापरिसर्य्यामृगयाऽटाट्यानामुपसंख्यानं कर्त्तव्यम्[5] ॥ १ ॥

परिपूर्वाभ्यां चर-सृभ्यां 'क्तिन्' प्राप्तः स बाध्यते । मृगया । अटाट्येति प्रत्ययान्तत्वाद् 'अ' प्रत्ययः प्राप्तः स बाध्यते ॥

वा०—जागर्त्तेरकारो वा[6] ॥ २ ॥

'जागृ' धातोः 'क्तिन्' प्राप्तः स बाध्यते, 'अ' प्रत्ययः स्यात् पक्षे च 'शः' ॥ जागर्य्या । जागरा ॥ १०१ ॥

[इच्छा] 'इष' धातु से 'श' प्रत्यय होता है, 'श' प्रत्यय के सार्वधातुक होने से 'सार्वधातुके यक्' सूत्र से 'यक्' प्राप्त था, उसका निपातन से निषेध हो जाता है। 'इषुगमियमां छः' सूत्र से छकार हो जाता है ॥

वा०—परिचर्य्या०—परिचर्य्या । परिसर्य्या—परि-पूर्वक 'चर' तथा 'सृ' धातु से 'क्तिन्' प्राप्त था उसका निषेध वार्त्तिक ने किया ॥

मृगया । अटाट्या इस में 'णिच्' तथा 'यङ्' प्रत्ययान्त होने से 'अ' प्रत्यय प्राप्त था, उसका वार्त्तिक ने निषेध कर दिया ॥

वा०—जागर्त्ते०—यहां 'जागृ' धातु से 'क्तिन्' प्राप्त था उसको बाध कर 'अ' और 'श' प्रत्यय विकल्प करके विधान किये हैं ॥

जैसे—**जागर्य्या । जागरा ॥ १०१ ॥**

---

१. आ० सू० १४४४ ॥ २. अ० ३ । १ । ६७ ॥

३. अत्र भाष्यम्—**किं निपात्यते । इषेः शे यगभावः ॥** यगभाव इति वचनसामर्थ्यात् भावेऽत्र विधानम् ॥ (ख) ..... **एवं तर्हि यस्य स्त्रियामित्येतद्रूपं निपात्यते । कस्य चैतन्निपात्यते ? कान्तिकर्मणः ॥** (अ० ३ । १ । ७ भाष्ये) ॥ **इष इच्छायाम्**—तुदादिः ॥

४. अ० ७ । ३ । ७७ ।

५. अत्र भाष्यम्—**अत्यल्पमिदमुच्यते इच्छेति । इच्छापरिचर्य्यापरिसर्य्यामृगयाऽटाट्यानामुपसंख्यानं कर्त्तव्यम् । जागर्त्तेरकारो वा । जागर्य्या जागरा ॥** (ख) अ० ३ । ३ । १०१ भा० ॥ आ० वा० १४४५ ॥

६. अ० ३ । ३ । १०१ भा० ॥ आ० वा० १४४६ ॥

अ प्रत्ययात्[1] ॥ १०२ ॥

क्तिनोऽपवादः । अ[2] । १ । १ । प्रत्ययात् । ५ । १ ॥ प्रत्ययान्ताद् धातोः स्त्रीलिङ्गे कर्तृभिन्ने कारके भावे च 'अ' प्रत्ययो भवति ॥

जुगुप्सा । मीमांसा । चिकीर्षा । पुत्रीया । पुत्रकाम्या । पापचा । कण्डूया । गोपाया ॥ १०२ ॥

यह सूत्र 'क्तिन्' का अपवाद है ॥

[प्रत्ययात्] प्रत्ययान्त धातुओं से स्त्रीलिङ्ग विषयक कर्तृभिन्न कारक और भाव में [अ] 'अ' प्रत्यय होता है ॥

जैसे—जुगुप्सा । मीमांसा । चिकीर्षा । पुत्रीया । पुत्रकाम्या । पापचा । कण्डूया । गोपाया ॥ १०२ ॥

गुरोश्च हलः[3] ॥ १०३ ॥

क्तिनोऽपवादः । अ इत्यनुवर्त्तते । गुरोः । ५ । १ । च । [अ०] हलः । ५ । १ ॥

गुरुमतो हलन्ताद् धातोः स्त्रीलिङ्गे कर्तृभिन्ने कारके भावे च 'अ' प्रत्ययो भवति ॥

इन्दा । नन्दा । ईहा । ऊहा ॥

'गुरोः' इति किम्—चित्तिः । सिद्धिः ॥ 'हलः' इति किम्—क्रीतिः । नीतिः ॥ १०३ ॥

यह सूत्र 'क्तिन्' का अपवाद है । यहां 'अ' पद की अनुवृत्ति है ॥ [गुरोः] गुरुमान् [हलः] हलन्त धातु से स्त्रीलिङ्ग विषयक कर्तृभिन्न कारक और भाव में 'अ' प्रत्यय होता है ॥

जैसे—इन्दा । नन्दा । ईहा । ऊहा ॥

'गुरोः' ग्रहण इसलिये है कि—चित्तिः । सिद्धिः ॥ 'हलः' ग्रहण इसलिये है कि—क्रीतिः ।नीतिः ॥ यहां 'अ' नहीं होता ॥ १०३ ॥

षिद्भिदादिभ्योऽङ्[4] ॥ १०४ ॥

क्तिनोऽपवादः । षिद्भिदादिभ्यः । ५ । ३ । अङ् । १ । १ ॥ ष् इद्यस्य स षित्, भिदादयो गणपठिताः ॥

षिद्भ्यो भिदादिभ्यश्च धातुभ्यः स्त्रीलिङ्गेऽकर्त्तरि कारके भावे च 'अङ्' प्रत्ययो भवति ॥

---

१. आ० सू० १४४७ ॥
२. लुप्तविभक्तिको निर्देशः ॥
३. आ० सू० १४४८ ॥
४. आ० सू० १४४९ ॥

जृष्–जरा । **'ऋदृशोऽङि गुणः'**[1] इति प्रतिषेधविषयो गुणः ॥ त्रपूष्–त्रपा । क्षमूष्–क्षमा[2] ॥ भिदादिः–भिदा । छिदा । विदा ॥ वा०–भिदा[3] विदारण इति वक्तव्यम् । भित्तिरन्या । छिदा[3] द्वैधीकरण इति वक्तव्यम् ॥ छित्तिरन्या ॥ आरा[3] शस्त्र्यामिति वक्तव्यम् । आर्त्तिरन्या ॥ धारा[3] प्रपात इति वक्तव्यम् । धृतिरन्या ॥ गुहा[3] गि[4]र्य्योषध्योरिति वक्तव्यम् । गूढिरन्या ॥

अथ भिदादिगणः—भिदा । छिदा । विदा । क्षिपा । गुहा । श्रद्धा[5] । मेधा । गोधा । आरा[5] । हारा । कारा । क्षिया । भारा । धारा । रेखा । लेखा । चूडा । पीडा । वपा[5] । वसा[5] । सृजा[5] । मृजा[6] ॥ ऋपेः सम्प्रसारणं च ॥ कृपा[7] ॥ इति भिदादिगणः[8] ॥ येषु भिदादिशब्देषु वार्त्तिकैरर्था निर्दिष्टास्ते नियमार्थाः ॥ १०४ ॥

---

१. अ० ७ । ४ । १६ ॥

२. **'डुलभष् प्राप्तौ'** (भ्वा०) इत्यत्र धातोः षित्त्वात् 'लभा' इत्येव प्राप्नोति, परम्—**अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः'** (हयवरडिति सूत्रे) इति वचनात् क्तिन्नपि भवति ॥

३. अ० ३ । ३ । १०४ भा० ॥

४. गिरिशब्दोऽत्र गिर्य्यवयववाची **'गुहां प्रविष्टे परमे पराद्धे'** (कठो० ३ । १) इत्यादि-प्रयोगात् ॥

५. नास्ति प्रक्रियाकौमुद्याम् ॥ ६. नास्ति काशिका-प्रक्रियाकौमुद्योः ॥

७. तारा, क्षिपा, भारा, रेखा इत्यधिकाः प्रक्रियाकौमुद्याम् । कुटा, मृत्सा इत्यधिकौ प्रक्रिया-कौमुदीटीकायाम् ।

दया, रुजा, पृच्छा, चुरा, क्षिपा, तुला, क्षपा, लेखा, शोभा, सेधा, गदा, तारा, खेदा, इत्यधिकाः गणरत्नमहोदधौ ॥

८. आकृतिगणश्चायम् । तेन—चूडा, पीडा, ऊहा प्रभृतयो द्रष्टव्या इति गणरत्नमहोदधौ ॥

अर्था निर्दिश्यन्ते—

भिदा—विदारणम् । छिदा—द्वैधीकरणम् । विदा—लाभो ज्ञानं वा । क्षिपा—प्रेरणम् । गुहा—पर्वतकुहरम्, ओषधिविशेषश्च । श्रद्धा—सत्यधारणारूपो विश्वासः । मेधा—धारणारूपा बुद्धिः । गोधा—प्राणिविशेषः 'गोह' इति भाषायाम् । आरा—शस्त्री—ककचो वा । हारा—मुक्ता-फलमाला, मानमिति भोजः । कारा—गुप्तिः । 'अस्यैव कारावासः—कारागारो वा' । क्षिया—आचारभेदः । भारा—बोरा, इति भाषायाम् । तारा—ज्योतिः, ग० म०, तॄ प्लवनसन्तरणयोरिति न्यासः । धारा—प्रपातः । जलधारा, क्षीरधारा इति न्यासः । रेखा—राजिः=पङ्क्तिः, रिखि सौत्रो धातुर्लिखेः समानार्थः । अथवा लेखा—लिखेर्गुणः, पक्षे लकारस्य रेफादेशश्च तेन रेखा इति न्यासः । चूडा—केशसंघातः । चोदयते ('चुद समुच्छ्राये') दकारस्य डत्वमुपधादीर्घश्च (व्या० सुधानिधिः) । पीडा—अवगाहनम् । वपा—मेदोविशेषः । **'मेदस्तु वपा वसा'** इत्यमरः । मनुष्य वर्ग ६-४ ॥ सृजा—सर्जनम् ॥ मृजा—शरीरशुद्धिः ॥ कृपा—अनुग्रहविशेषः ॥

यह सूत्र 'क्तिन्' का अपवाद है ॥

[षित्] ष् इत् है जिन धातुओं का उन से तथा [भिदादिभ्यः] भिदादिकों से स्त्रीलिङ्ग विषयक कर्तृभिन्न कारक और भाव में [अङ्] 'अङ्' प्रत्यय होता है ॥

जैसे—जृष्—जरा । यहां 'ऋदृशोऽङि गुणः' इस सूत्र से प्रतिषेध विषय में गुण हो जाता है ॥ त्रपूष्—त्रपा । क्षमूष्—क्षमा ॥

भिदादिः—भिदा । छिदा । विदा ॥

वा० = भिदा विदारण०—भित्तिरन्या ॥ छिदा द्वैधीकरण०—छित्तिरन्या ॥ आरा शस्त्र्याम्—आर्त्तिरन्या ॥ धारा प्रपात०—धृतिरन्या ॥ गुहा गिर्योषध्यो०—गूढिरन्या ॥ भिदादि शब्दों में गणवार्त्तिकों ने जिन अर्थों का निर्देश किया है वह नियमार्थ समझने चाहियें ॥ १०४ ॥

चिन्तिपूजिकथिकुम्बिचर्चश्च[1] ॥ १०५ ॥

चिन्ति० चर्चः । ५ । १ । च । [अ०] । चिन्त्यादयः सर्वे धातवश्चुरादिस्थाः, ण्यन्तेभ्यस्तेभ्यो 'युच्' प्रत्ययः प्राप्तस्तस्यापवादोऽङ् विधीयते ॥

चिन्त्यादिधातुभ्यः [स्त्रियां] अकर्त्तरि कारके भावे च 'अङ्' प्रत्ययो भवति ॥

चिन्ता । पूजा । कथा । कुम्बा । चर्चा[2] ॥ १०५ ॥

चिन्ति आदि सब धातु चुरादिस्थ हैं उनके ण्यन्त होने से 'युच्' प्राप्त था उसका अपवाद 'अङ्' विधान किया ॥

[चिन्ति० चर्चः] चिन्ति, पूजि, कथि, कुम्बि, चर्च इन धातुओं से स्त्रीलिङ्ग विषयक कर्तृभिन्न कारक और भाव में 'अङ्' प्रत्यय होता है ॥

जैसे—चिन्ता । पूजा । कथा । कुम्बा । चर्चा । १०५ ॥

आतश्चोपसर्गे[3] ॥ १०६ ॥

क्तिनोऽपवादः । आतः । ५ । १ । [च । अ० ।] उपसर्गे । ७ । १ ॥ सोपसर्गेभ्य आकारान्तधातुभ्यः [स्त्रियां] अकर्त्तरि कारके भावे च 'अङ्' प्रत्ययो भवति ॥

संज्ञा । उपधा । अन्तर्द्धा[4] ॥ १०६ ॥

---

१. आ० सू० १४५० ॥

२. तोलयतेस्तुला अत्र '..... ...अतुलोपमाभ्याम्०' (अ० २ । ३ । ७२) इति निपातनाद् युच् न भवति, चकारस्यानुक्तसमुच्चयार्थत्वादित्यन्ये ॥

३. आ० सू० १४५१ ॥

४. अन्तः शब्दस्योपसर्गत्वे (अ० ३ । ३ । ९०) टिप्पणिर्द्रष्टव्या ॥

यह सूत्र 'क्तिन्' का अपवाद है ॥

[उपसर्गे] उपसर्गपूर्वक [आतः] आकारान्त धातुओं से स्त्रीलिङ्ग विषयक कर्तृभिन्न कारक और भाव में 'अङ्' प्रत्यय होता है ॥

जैसे—संज्ञा । उपधा । अन्तर्द्धा ॥ १०६ ॥

ण्यासश्रन्थो युच्[1] ॥ १०७ ॥

ण्यन्तानां प्रत्ययान्तत्वादासश्रन्थोश्च हलन्तगुरुमत्त्वाद् 'अः' प्राप्तस्तस्यापवादः ॥ ण्यासश्रन्थः । ५ । १ । युच् । १ । १ ॥ ण्यन्तेभ्य आसश्रन्थिभ्यां च धातुभ्यां [स्त्रियाम्], अकर्त्तरि कारके भावे च 'युच्' प्रत्ययो भवति ॥

कारणा । हारणा । पाचना । भावना । पाठना । आसना । श्रन्थना । श्रन्थधातोः क्र्यादिस्थस्य ग्रहणम् । चुरादिस्थस्य ण्यन्तत्वादेव सिद्धम् । चित्करणमन्तोदात्तार्थम् ॥

वा०—युच् प्रकरणे घट्टिवन्दिविदिभ्य उपसंख्यानम्[2] ॥ १ ॥

घट्टादीनां हलन्तगुरुमत्त्वाद् 'अ' प्राप्तः स बाध्यते ॥ घट्टना । वन्दना । वेदना ॥ १ ॥

वा०—इषेरनिच्छार्थस्य[3] ॥ २ ॥

क्तिन् बाधनार्थम् । अनिच्छार्थाद् 'इष' धातो 'युच्' । अन्वेषणा ॥ २ ॥

वा०—परेर्वा[4] ॥ ३ ॥

परिपूर्वादनिच्छार्थाद् 'इष' धातोर्वा 'युच्' पक्षे क्तिन्नेव ॥ अन्यां परीष्टिं चर । अन्यां पर्य्येषणां चर ॥ विशेषविहितः क्तिन्नपि भावे करणे च भवत्येव ॥ १०७ ॥

प्रत्ययान्त होने से ण्यन्तों को तथा आस, श्रन्थ को हलन्त गुरुमान् होने से 'अ' प्रत्यय प्राप्त था, उसका यह अपवाद है ॥

[ण्यासश्रन्थः] ण्यन्तों से तथा आस, श्रन्थ धातुओं से स्त्रीलिङ्ग विषयक कर्तृभिन्न कारक और भाव में [युच्] 'युच्' प्रत्यय होता है ॥

---

१. आ० सू० १४५२ ॥

२. अ० ३ । ३ । १०७ भा० ॥ आ० वा० १४५३ ॥

३. अ० ३ । ३ । १०७ भा० ॥ आ० वा० १४५४ ॥ (ख) **वित्तैषणायाः पुत्रैषणाया लोकैषणायाश्च व्युत्थाय भिक्षाचर्य्यं चरन्ति** । (बृ० उ० ३ । ५ । १) ॥

तथा च—**या एव पुत्रैषणा सा वित्तैषणा सा लोकैषणा** ॥ (बृ० उ० ३ । ५ । १) ॥

इति छान्दसप्रयोगो द्रष्टव्यः ॥ **कृतो बहुलम्** (अ० ३ । ३ । ११३ भा०) इति वचनाद्वा इच्छार्थकादपि 'इषे' 'युच्' भवति ॥

४. अ० ३ । ३ । १०७ भा० ॥ आ० वा० १४५५ ॥

जैसे—कारणा । हारणा । पाचना । भावना । पाठना । आसना । श्रन्थना ॥ यहां क्र्यादिगणस्थ 'श्रन्थ' का ग्रहण है क्योंकि चुरादिस्थ का 'णि' ग्रहण से ही ग्रहण हो जाता है ॥ चित्करण अन्तोदात्त के लिये है ॥

वा०—युच्-प्रकरणे घट्टिवन्दि०—घट्टि आदिकों को हलन्त गुरुमान् होने से 'अ' प्रत्यय प्राप्त था उसका अपवाद है ॥

जैसे—घट्टना । वन्दना । वेदना ॥ १ ॥

वा०—इषेरनि०—यह वार्त्तिक 'क्तिन्' के प्रतिषेध के लिये है ॥ अनिच्छार्थक 'इष' धातु से 'युच्' प्रत्यय हो । जैसे—**अन्वेषणा ॥**

वा०—परेर्वा—परि-पूर्वक अनिच्छार्थक 'इष' धातु से विकल्प करके 'युच्' प्रत्यय होता है, पक्ष में 'क्तिन्' ॥

जैसे—अन्यां परीष्टिं चर । अन्यां पर्यषणां चर ॥ विशेषविहित 'क्तिन्' भी भाव, करण में होता है ॥ १०७ ॥

रोगाख्यायां ण्वुल् बहुलम्[1] ॥ १०८ ॥

क्तिन्नादीनां सर्वेषामपवादः ॥ रोगाख्यायाम् । ७ । १ । ण्वुल् । १ । १ । बहुलम् । १ । १ ॥ रोगस्याख्या विशेषसंज्ञा तस्याम् । प्रत्ययान्तेन रोगाख्यायां सत्यां धातोः [स्त्रियाम्] अकर्त्तरि कारके भावे च बहुलं 'ण्वुल्' प्रत्ययो भवति । प्रच्छर्दिका[2] । प्रवाहिका[3] । विचर्चिका[4] । रोगविशेष[स्य] संज्ञा इमाः ॥ बहुलग्रहणात् क्वचिन्नापि भवति । शिरोत्तिः । अत्र क्तिन्नेव ॥

वा०—धात्वर्थनिर्देशे ण्वुल्[5] ॥ १ ॥

धात्वर्थो भावस्तस्य निर्देशे 'ण्वुल्' भवति ॥ का नामासिकाऽन्येष्वोहमानेषु । का नाम शायिकाऽन्येष्वधीयानेषु ॥ १ ॥

---

१. आ० सू० १४५६ ॥

२. वमनरोगः ॥ तल्लक्षणन्तु —
बीभत्सैर्हेतुभिश्चान्यैर्द्रुतमुत्क्लेशितो बलात् । छादयन्नाननं वेगैरर्दयन्नङ्गभञ्जनैः ।
निरुच्यते छर्द्दिरिति दोषो वक्त्रं प्रधावितः ॥ (सु० उ० अ० ४९ श्लो० ३)

३. 'मरोड़' इति भाषायाम् । तल्लक्षणन्तु—
वायुः प्रवृद्धो निचितं बलासं, नुदत्यधस्तादहिताशनस्य ।
प्रवाहतोऽल्पं बहुशो मलाक्तं, प्रवाहिकां तां प्रवदन्ति तज्ज्ञाः ॥
प्रवाहिका वातकृता सशूला पित्तात् सदाहा सकफा कफाच्च ।
सशोणिताः शोणितसम्भवास्तु ताः स्नेहरूक्षप्रभवा मतास्तु ॥
(सु० उ० अ० ४० श्लो० ३३ । ३४)

४. पामारोगः । 'खाज-खुजली' वा भाषायाम् ॥

५. अ० ३ । ३ । १०८ भा० ॥ आ० वा० १४५७ ॥

वा०—*इक्श्तिपौ धातुनिर्देशे*[1] ॥ २ ॥

धातवो यत्र कार्य्यार्थं सूत्रेष्वन्यत्र वा निर्देष्टव्यास्तत्र 'इक्श्तिपौ' प्रत्ययौ द्रष्टव्यौ ॥ पचेः प्रयोगं ब्रूहि । पचतेः प्रयोगं ब्रूहि ॥ सूत्रेषु—चिन्तिपूजि०[2] । भवतेरः[3] ॥ श्तिपि शित्पिदित्यनुबन्धद्वयकरणादकर्त्तरि सार्वधातुकेऽपि विकरणा भवन्त्येव ॥ भवतिः । पचतिः ॥ अतिङ्त्वात् कृत्संज्ञा ततः प्रातिपदिकत्वं च ॥ २ ॥

वा०—*वर्णात्कारः*[4] ॥ ३ ॥

वर्णमात्रात् 'कार' प्रत्ययो भवति ॥ अकारः । आकारः । इकारः । ईकारः ॥

वा०—*रादिफः*[5] ॥ ४ ॥

राद् रवर्णादिफः प्रत्ययो भवति न तु कारः ॥ रेफः[6] ॥ ४ ॥

---

१. अ० ३ । ३ । १०८ भा० ॥ आ० वा० १४५८ ॥ (ख) **'इक्श्तिपौ धातुनिर्देशे'** इत्युक्तं धात्वर्थनिर्देशेऽपि भवतः ।

यथा—**"आहो प्रभृतादिभ्यः" "गच्छतौ पारदारिकादिभ्यः"** (भा० वा० ४ । ४ । १) **ईक्षतेर्नाशब्दम्** (वेदा० १ । १ । ५) ॥

विकरणैरपि निर्देशो भवति—

यथा—**मन्यकर्मण्यना०** (अ० २ । ३ । १७) इति, **उपसर्गात् सुनोतिसुवतिस्यतिस्तौति-स्तोभतिस्थासेनयसेध०** (अ० ८ । ३ । ६५) इति च । अत एव 'श्तिपाशपाऽनुबन्धेन' इत्यादिप्राचा-मुक्तमुपपद्यते ॥

२. अ० ३ । ३ । १०५ ॥ ३. अ० ७ । ४ । ७३ ॥

४. अ० ३ । ३ । १०८ ॥ (ख) आ० वा० १४५९ ॥ (ग) **'वर्णात् कारः'** इत्युक्तं निपातरूपवर्णसमुदायादपि भवति—एवकारः । हुंकारः । अहङ्कारः । यद्वा—**'उच्चैस्तरां' वा वषट्-कारः'** (अ० १ । २ । ३५) इति निर्देशात् समुदायात् कारप्रत्ययः ॥

(घ) **अव्यवहितेन व्यञ्जनस्य** (वा० प्रा० १ । ३८) । अकारव्यवहितेन कारप्रत्ययेन व्यञ्जनस्य निर्देशो भवतीत्यर्थः ॥ यथा—ककारः, खकारः ॥ **स्वरैरपि** (वा० प्रा० १ । ४०) ॥ स्वरैरपि व्यञ्जनानां निर्देशो भवति । **यथा—नुः । चछयोः शम् ।** (वा० प्रा० १ । १३३ । १३४) अत्र उकारेण, अकारेण च निर्देशः । तथा पाणिनीयेऽपि—**सवाभ्यां वामौ** ॥ ३ । ४ । ९१ ॥ **नानुस्वारयमविसर्जनीयजिह्वामूलीयोपध्मानीयाः** (वा० प्रा०—१ । ४१) ॥ एते न कारप्रत्ययेन निर्देष्टव्याः, किन्तु स्वशब्दैरेव ॥

निर्देश इतिना (वा० प्रा०—१ । ३६) ॥ वर्णानामितिना निर्देशो भवति ॥ यथा—किति, खिति, गिति, घिति, ङिति कवर्गाः (वा० प्रा० ८ । ८) ॥

५. अ० ३ । ३ । १०८ भा० ॥ (ख) आ० वा० १४६० ॥

६. **'रादिफः'** इत्युक्तं, कारप्रत्ययोऽपि दृश्यते । यथा— **रकारादीनि नामानि रामस्तस्य रावण'** (वा० रा०—अर० कां० स० ३९ । श्लो० १७) ॥

वा०—*मत्वर्थाच्छः*[1] ॥ ५ ॥

मत्वर्थशब्दा 'च्छः' प्रत्ययो भवति ॥ मत्त्वर्थीयः[2] ॥ सूत्रे यत् बहुल-ग्रहणं तत्सर्वेषु वार्त्तिकेषु सम्बध्यते । तेन मत्वर्थशब्दस्याभत्वेऽप्यकारो लुप्यते ॥ ५ ॥

वा०—*इणजादिभ्यः*[3] ॥ ६ ॥

अजादिधातुभ्य 'इण्' प्रत्ययो भवति ॥ आजिः[4] । आतिः । प्रादिः ॥ ६ ॥

वा०—*इञ्वपादिभ्यः*[5] ॥ ७ ॥

वापिः[6] । वासिः । वादिः ॥ ७ ॥

वा०—*इक्कृष्यादिभ्यः*[7] ॥ ८ ॥

नव्यास्तु—स्त्रियामित्यस्यासम्बन्धात् वाऽसरूपविधिना कारप्रत्ययोऽपि भवतीत्याहुः ॥ **'क्वचिदपवादेऽप्युत्सर्गः प्रवर्त्तते'** इति दुर्घटवृत्तिः ॥

बहुलग्रहणात् क्वचिन्नापि भवति । यथा—**'रेण तुल्यं सुधीवनि—तद्यथा सुधीवा सुपीवेति ङीप् सन्नियोगेन र उच्यमानोऽसति ङीपि न भवति ॥** (भा०—१ । २ । १८) इति । एवं च कृत्वा प्रत्याहारसूत्रेष्वपि वर्णनिर्देश उपपन्नो भवति ॥

(ख) र **एफेन च** (वा०—प्रा० १ । ३९) ॥ र एफेन निर्दिश्यते, इतिना च । यथा—रेफः । रितिः ॥

१. अ० ३ । ३ । १०८ भा० ॥ (ख) आ० वा० १४६१ ॥

२. **'मत्वर्थाच्छः'**इत्युक्तम्, मतुबर्थशब्दादपि भवति यथा—**शैषिकान्मतुबर्थीयात्** (भा० ३ । १ । ७ सूत्रे) ॥

३. अ० १०८ भा० ॥ (ख) आ० वा० १४६२ ॥

४. **'पादस्य पदाज्यातिगोपहतेषु'** (अ० ६ । ३ । ५२) । इति निपातनात् **'अजेर्व्यघञपोः'** (अ० २ । ४ । ५६) इत्येजेर्वीभावो न भवति, बाहुलकाद्वा । **'अज्यतिभ्याञ्च'** (उणा० ४ । १३१) इत्युणादिसूत्रेणापि 'आजिआति' शब्दौ सिध्यतः, तत्राऽपि पूर्ववद् वीभावाभावो बोध्यः ।

५. अ० ३ । ३ । १०८ भा० ॥ (ख) आ० वा० १४६३ ॥

६. वापिः, वासिः, वादिः—**वसिवपियजिराजि०** (उ० ४ । १२५) इत्यादिसूत्रेणाऽपि **'इञ्'**-प्रत्ययान्ताः साध्यन्ते ।

उणादौ व्युत्पन्नान्यपि पदानि बहुलग्रहणस्य प्रपञ्चार्थमेवात्र पुनर्व्युत्पादितानि । प्रयोजनान्तरं वा मृग्यम् ॥

७. अ० ३ । ३ । १०८ भा० ॥ (ख) आ० वा० १४६४ ॥

कृषिः[1] । किरिः[2] । गिरिः ॥ ८ ॥

वा०—सम्पदादिभ्यः क्विप्[3] ॥ ९ ॥

सम्पत्[4] । विपत् । प्रतिपत् । आपत् । परिषत् ॥ इणजादिभ्य इत्यारभ्य चतुर्षु वार्त्तिकेषु परिगणनं नास्ति किन्त्वन्येऽपीदृशाः शब्दाः सिध्यन्ति । बहुलग्रहणं च सर्वेषु सम्बध्यते, तेन वार्त्तिकविहितानि कार्य्याणि बहुलं भवन्ति ॥ १०८ ॥

यह क्तिन् आदि सब प्रत्ययों का अपवाद है ॥

[रोगाख्यायाम्] यदि ण्वुल् प्रत्ययान्त से रोगविशेष की संज्ञा प्रतीत होती हो तो धातु से स्त्रीलिङ्ग, भाव तथा कर्तृभिन्न कारक में [बहुलम्] बहुल करके [ण्वुल्] 'ण्वुल्' प्रत्यय होता है ॥

जैसे—प्रच्छर्दिका । प्रवाहिका । विचर्चिका । ये रोगविशेष के नाम हैं । बहुल-ग्रहण से कहीं 'ण्वुल्' नहीं भी होता । जैसे—शिरोक्तिः । यहां 'क्तिन्' ही होता है ॥

---

१. उणादावपि **'इगुपधात् कित्'** (उ० ४ । १२०) इति सूत्रेण इन् प्रत्ययान्तः कृषिः शब्दः सिध्यति । स च नित्त्वादाद्युदात्तः प्राप्नोति परं **'अक्षैर्मा दीव्यः कृषिमित्कृषस्व'** (ऋ० १० । ३४ । १३) इत्यादौ सर्वत्राऽन्तोदात्त एव कृषिशब्द उपलभ्यते, वार्त्तिकेनापि 'इक्' प्रत्ययान्तोऽन्तोदात्त एव साध्यते, अतस्तत्राद्युदात्तस्वरप्राप्तिर्बाहुलकात् प्रतिविधेया । औणादिको नित्त्वादाद्युदात्तो भवतु, इक् प्रत्ययान्तश्चान्तोदात्तः, किं स्वरव्यत्ययेनेति चेत्, न आद्युदात्तस्य कृषि-शब्दस्यानुपलम्भात् । केचनोणादिवृत्तिकाराः **'इगुपधात् किः'** इत्येवं पठन्ति, तदप्ययुक्तम्—**'पूर्वेभि-र्ऋषिभिः'** (ऋ० १ । १ । २) **'शुचिर्विप्रः'** (ऋ० ८ । ४४ । २१) इत्यादिषु ऋषि-शुचि-प्रभृतिषु शब्देष्वाद्युदात्तत्वदर्शनात् । तस्माद्बहुत्र व्यत्ययकल्पनादेकत्रैव व्यत्ययकल्पना ज्यायसी ॥

२. उणादौ **'अच इः'** (उ० ४ । १३९) इति सूत्रेणापि किरि-गिरिशब्दौ सिध्यतः ॥

३. अ० ३ । ३ । १०८ भा० ॥ (ख) आ० वा० १४६५ ॥

४. **'सम्पदादिभ्यः क्विप्'** इत्युक्तम्, क्तिन्नपि भवति । यथा—सम्पत्तिः । विपत्तिः ॥

गणरत्नमहोदध्यनुसारं सम्पदादिर्गणः—

सम्पदादेः क्विप् क्तिरित्यनेन सम्पदादेः स्त्रियां भावेऽकर्त्तरि च कारके क्विप्-क्तिप्रत्ययौ भवतः ॥ सम्पत्तिः । सम्पत् । विपत्तिः । विपत् । व्यापत्तिः । व्यापत् । प्रतिपत्तिः । प्रतिपत् । संसत् । परिषत् । उपसत् । उपनिषत् । संवित् । निर्वित् । उपानत् । प्रावृट् । विप्रुट् । समित् । नीवृत् । उपावृत् । संयत् । प्रतिश्रुत् । उपस्रुत् । उपभृत् । विदेति जानात्यर्थ इत्यन्यः । समिध्यतेऽ-नया समित् । **वामन**मते क्तिप्रत्ययो द्रष्टव्यः ॥ क्रुत् । युत् । क्षुत् । तृट् । त्विट् । रुट् । रुक् । शुक् । ऋक् । मुत् । मृत् । गीः । अत्रापि क्तिप्रत्ययो वामनमतेन । **भोज**स्तु । क्तिप्रत्ययं न ददर्श । ह्रीतिः । **ह्रीः** ॥ भीतिः । भीः ॥ लूतिः । लूः ॥ भूतिः । भूः ॥ कृतिः । कृत् ॥ भित्तिः । भित् ॥ छित्तिः । छित् ॥ नुत्तिः । नुत् ॥ दृष्टिः । दृक् ॥ नष्टिः । नक् ॥ युक्तिः । युक् ॥ जूर्तिः । जूः ॥ ऊतिः । ऊः ॥ तूर्त्तिः । तूः ॥ श्रुतिः । श्रूः ॥ मूतिः । मूः ॥ शक्तिः । शक् ॥ नुतिः । नुत् ॥ भोजोऽपि क्तिक्विपौ ददर्श ॥ आकृतिगणोऽयम् ॥ तेन शासि-त्रै-कण्डूयप्रभृतयो द्रष्टव्याः ॥ इति सम्पदादिः ॥

वा०—धात्वर्थनि०—धात्वर्थ अर्थात् भाव के निर्देश में ण्वुल् प्रत्यय होता है ॥ जैसे—का नामासिकाऽन्येष्वोहमानेषु । का नाम शायिकाऽन्येष्वधीयानेषु ॥ १ ॥

वा०—इक्ष्तिपौ०—जहां कार्य के लिये सूत्र में या अन्यत्र धातु का निर्देश करना हो वहां 'इक्' और 'श्तिप्' प्रत्यय हो जाते हैं ॥ जैसे—पचेः प्रयोगं ब्रूहि । पचतेः प्रयोगं ब्रूहि ॥ सूत्रों में—चिन्तिपूजि० । भवतेरः ॥

'श्तिप्' में श् तथा प् इन दो अनुबन्धों के करने का यह प्रयोजन है कि अकर्तृवाची सार्वधातुक में भी विकरण हो जाते हैं। जैसे—भवतिः। पचतिः। अतिङ् होने से कृत्संज्ञा, पुनः प्रातिपदिकसंज्ञा होने से 'सु' आदि उत्पन्न हो जाते हैं ॥ २ ॥

वा०—वर्णात्कारः—वर्णमात्र से 'कार' प्रत्यय होता है ॥

जैसे—अकारः । आकारः । इकारः । ईकारः ॥ ३ ॥

वा०—रादिफः—र-वर्ण से 'इफ' प्रत्यय होता है ॥ जैसे—रेफः ॥ ४ ॥

वा०—मत्वर्थाच्छः—मत्यर्थ शब्द से 'छ' प्रत्यय होता है ॥ जैसे—मत्वर्थीयः ॥ सूत्र में जो बहुल ग्रहण किया है वह सब वार्त्तिकों में सम्बन्धित होता है। अतः बिना भी भ-संज्ञा के मत्वर्थ शब्द में अकार लोप हो जाता है ॥ ५ ॥

वा०—इणजादिभ्यः—'अज' आदि धातुओं से 'इण्' प्रत्यय होता है ॥ जैसे—आजिः । आतिः । आदिः ॥ ६ ॥

वा०—इञ् वपादिभ्यः—'वप' आदि धातुओं से 'इञ्' प्रत्यय होता है ॥ जैसे—वापिः । वासिः । वादिः ॥ ७ ॥

वा०—इक् कृष्यादिभ्यः—'कृषि' आदि धातुओं से 'इक्' प्रत्यय होता है ॥ जैसे—कृषिः । किरिः । गिरिः ॥ ८ ॥

वा०—सम्पदादि०—सम्पत् आदि में 'क्विप्' प्रत्यय होता है ॥ जैसे—सम्पत् । विपत् । प्रतिपत् । आपत् । परिषत् ॥ ९ ॥

इणजादि चार वार्त्तिकों में परिगणन नहीं किन्तु इस प्रकार के और भी शब्द सिद्ध हो जाते हैं ॥

बहुल-ग्रहण सब वार्त्तिकों से सम्बद्ध है अतः वार्त्तिक से विहित कार्य्य भी बहुल करके ही होते हैं ॥ १०८ ॥

संज्ञायाम्[1] ॥ १०९ ॥

ण्वुल्-इत्यनुवर्त्तते ।। संज्ञायाम् । ७ । १ ॥ प्रत्ययान्तेन संज्ञायां सत्यां धातोः [स्त्रियाम्] 'ण्वुल्' प्रत्ययो भवति ।।

उद्दालकपुष्पभञ्जिका । वारणपुष्पप्रवाहिका । आभ्यूषखादिका ॥ १०९ ॥

---

१. आ० सू० १४६६ ॥

यहां 'ण्वुल्' पद का अनुवर्त्तन है ॥

प्रत्ययान्त से [संज्ञायाम्] संज्ञा गम्यमान हो तो धातु से स्त्रीलिङ्ग में 'ण्वुल्' प्रत्यय होता है ॥

जैसे—उद्दालकपुष्पभञ्जिका । वारणपुष्पप्रवाहिका । आम्यूषखादिका ॥ १०९ ॥

विभाषाऽऽख्यानपरिप्रश्नयोरिञ् च[1] ॥ ११० ॥

अप्राप्तविभाषेयम् ॥ चकाराण्ण्वुलप्यनुवर्त्तते ॥ विभाषा । १ । १ आख्यानपरिप्रश्नयोः । ७ । २ । इञ् । १ । १ । च । [अ०] ॥ पूर्वं परिप्रश्नो भवति पश्चात्तस्याख्यानमुत्तरम् ॥

आख्यान-परिप्रश्नयोरर्थयोर्धातोर्विकल्पेन [स्त्रियाम्] 'इञ्', पक्षे यथाप्राप्तं प्रत्यया भवन्ति, चकाराण्ण्वुल् च ॥

परिप्रश्ने—कां कारिमकार्षीः । कां कारिकामकार्षीः । कां क्रियामकार्षीः । कां कृत्यामकार्षीः । कां कृतिमकार्षीः ॥ आख्याने—सर्वां कारिं, कारिकां, क्रियां, कृत्यां, कृतिं वाऽकार्षम् ॥

'आख्यानपरिप्रश्नयोः' इति किमर्थम्—कृतिः । हृतिः । धृतिः ॥ ११० ॥

पर्यायार्हणोत्पत्तिषु ण्वुच्[2] ॥ १११ ॥

पर्य्या० त्तिषु । ७ । ३ । ण्वुच् । १ । १ ॥ पर्य्याय, अर्ह, ऋण, उत्पत्ति इत्येतेषु प्रत्ययार्थेषु धातोः [स्त्रियाम्] विकल्पेन[3] 'ण्वुच्' प्रत्ययो भवति ॥

पर्य्याये—भवतः शायिका । मम जागरिका ॥ अर्हे—इक्षुभक्षिकामर्हति भवान् । उत्कृष्टामासिकामर्हति भवान् ॥ ऋणे—अन्नदायिकां मे धारयसि ॥ आम्रभक्षिकां मे

---

१. आ० सू० १४६७ ॥ २. आ० सू० १४६८ ॥

३. विभाषेत्यनुवर्त्तते—अग्रिमसूत्रे विभाषेति निवृत्तमित्युक्तत्वात् । तथा चान्येऽप्याहुः—विभाषेत्येव 'चिकीर्षोत्पद्यते' इति **काशिका** । 'वा ण्वुच् स्यात्' **इत्यन्नंभट्टः** । **'आक्रोशे नञ्यनिः'** इत्यत्र विभाषेति 'निवृत्तम्' इति **सिद्धान्तसुधानिधिः** ॥

धारयसि ।। उत्पत्तौ-इक्षुभक्षिकां म उदपादि भवान् ।। [पक्षे—तव चिकीर्षा, मम चिकीर्षा । तव क्रिया । मम क्रिया] प्रत्ययान्तरविधानं स्वरार्थम् ।। १११ ।।

[पर्य्या० त्तिपु] पर्य्याय (परिपाटी = क्रम) अर्ह (योग्यता) ऋण, (दूसरे का द्रव्य धारण करना) उत्पत्ति (जन्म) इन अर्थों में धातु से स्त्रीलिङ्ग में विकल्प से [**ण्वुच्**] 'ण्वुच्' प्रत्यय होता है ।।

पर्य्याय में—भवतः शायिका । मम जागरिका ।। अर्ह में—इक्षुभक्षिकामर्हति भवान् । उत्कृष्टामारिकामर्हति भवान् ।। ऋण में अन्नदायिकां मे धारयसि । आम्रभक्षिकां मे धारयसि ।। उत्पत्ति में—इक्षुभक्षिकां म उदपादि भवान् ।। द्वितीय पक्ष में—तव चिकीर्षा । मम चिकीर्षा । तव क्रिया । मम क्रिया ।। प्रत्ययान्तरकरण स्वर के लिये है ।। १११ ।।

आक्रोशे नञ्यनिः[1] ।। ११२ ।।

विभाषा इति निवृत्तम् । क्तिन्नादीनां सर्वेषामपवादः ।। आक्रोशे । ७ । १ । नञि । ७ । १ । अनिः । १ । १ ।।

आक्रोशे गम्यमाने नञ्पूर्वाद् धातोः [स्त्रियां] कर्तृरहिते कारके भावे च 'अनिः' प्रत्ययो भवति ।।

दुष्टस्याजननिरेवास्तु ! अकरणिस्ते सदा भूयात् !!!

'आक्रोशे' इति किम्—अक्रिया कटस्यास्य ।। 'नञि' इति किम्—संस्थितिस्ते भूयात् ।। ११२ ।।

यहां 'विभाषा' पद की निवृत्ति हुई । यह सूत्र क्तिन् आदि सब का अपवाद है ।।

[आक्रोशे] आक्रोश गम्यमान हो तो [नञि] नञ्-पूर्व धातु से स्त्रीलिङ्ग में कर्तृभिन्न कारक और भाव में [अनिः] 'अनि' प्रत्यय होता है ।।

जैसे—दुष्टस्याजननिरेवास्तु । अकरणिस्ते सदा भूयात् ।।

'आक्रोशे' ग्रहण इसलिये है कि—अक्रिया कटस्यास्य ।। 'नञि' ग्रहण इसलिये है कि—संस्थितिस्ते भूयात् ।। ११२ ।।

कृत्यल्युटो बहुलम्[2] ।। ११३ ।।

अकर्त्तरि कारके भावे चेतः सूत्रात् पूर्वमेव सर्वं निवर्त्तते स्त्रीलिङ्गाधिकारश्च ।। कृत्यल्युटः । १ । ३ । बहुलम् । १ । १ ।। कृत्याश्च ल्युट् च ते ।। कृत्यसंज्ञकाः प्रत्ययाः ल्युट् च विहितेष्वर्थेषु बहुलं भवन्ति ।।

अर्थाद् येषु विहितास्तेषु नापि भवन्त्यविहितेषु च भवन्ति । भावकर्मणोः कृत्या विधीयन्ते, ततोऽन्यत्रापि दृश्यन्ते—छेद्यः खड्गः । लव्यं दात्रम् । अत्र करणे यत् ।। तथा

१. आ० सू० १४६९ ।। २. आ० सू० ९१८ ।।

करणाधिकरणे भावे च ल्युड् विधीयते । प्रस्कन्दनम् । प्रपतनम् । अत्रापादानेऽपि दृश्यते ॥

वा०—कृल्ल्युट इति वक्तव्यम् ॥ १ ॥ कृतो बहुलमिति वा[1] ॥

कृतो बहुलमिति पक्षो ज्यायान् । कृत्संज्ञा च कृत्यानां ल्युटश्च, तेन सर्वेषां ग्रहणं भविष्यति ॥ कृत्संज्ञकाः प्रत्यया विहितार्थेषु बहुलं स्युः । तेनेदमपि सिद्धं भवति । पादाभ्यां ह्रियत इति पादहारकः, अत्र करणे ण्वुल् । गले चोप्यते गलेचोपकः, अत्राधिकरणे च । कर्त्तरि विहिता अन्यत्रापि भवन्ति ॥ ११३ ॥

इस सूत्र से पूर्व अकर्त्तरि, कारके, भावे तथा क्रियाम्, इन पदों की निवृत्ति हो जाती है ॥

[कृत्यल्युटः] 'कृत्य' संज्ञक प्रत्यय और 'ल्युट्' विहितार्थों में [बहुलम्] बहुल करके होते हैं ॥ अर्थात् जिन अर्थों में विहित हैं उन में नहीं भी होते, और जिन अर्थों में विहित नहीं उन अर्थों में भी हो जाते हैं ॥ भाव और कर्म में कृत्यों का विधान किया है, इससे भिन्न में भी देखे जाते हैं । जैसे—**छेद्यः** खड्गः । **लव्यं** दात्रम् । यहां करणकारक में 'यत्' प्रत्यय होता है । इसी प्रकार ल्युट् प्रत्यय का विधान करण, अधिकरण और भाव में किया है, किन्तु-**प्रस्कन्दनम् । प्रपतनम् ।** इत्यादि उदाहरणों में अपादान में भी देखा जाता है ॥

वा०—कृल्ल्युट०—इस वार्त्तिक में 'कृतो बहुलम्' यह पक्ष महाभाष्यानुसारी होने से ठीक है, क्योंकि कृत्संज्ञा कृत्य प्रत्ययों की तथा ल्युट् की भी है, अतः उससे सब का ग्रहण हो जायगा ॥ कृत्संज्ञक प्रत्यय विहितार्थों में बहुल करके होते हैं । इससे 'पादाभ्यां ह्रियते **पादहारकः**' यहां करण में, तथा 'गले चोप्यते गलेचोपकः' यहां अधिकरण में 'ण्वुल्' सिद्ध हो जाता है अर्थात् कर्त्ता में विहित हैं परन्तु बहुलग्रहण से अन्यत्र भी हो जाते हैं ॥ ११३ ॥

नपुंसके भावे क्तः[2] ॥ ११४ ॥

नपुंसके । ७ । १ । **भावे** । ७ । १ । **क्तः** । १ । १ ॥ नपुंसकलिङ्गे भावे धातुमात्रात् 'क्त[3]ः' प्रत्ययो भवति ॥

हसितम् । सुप्तम् । नृत्तम् । शयितम् । वाऽसरूपेण घञादयोऽपि भवन्ति । हासः ॥ ११४ ॥

[**नपुंसके**] नपुंसकलिङ्ग [**भावे**] भाव में धातुमात्र से [**क्तः**] 'क्त' प्रत्यय होता है ॥

जैसे—**हसितम् । सुप्तम् । नृत्तम् । शयितम् ॥** वाऽसरूप विधि से घञादि भी हो जाते हैं, जैसे—**हासः ॥ ११४ ॥**

---

१. अ० ३ । ३ । ११३ भा० ॥ २. आ० सू० १४७० ॥

३. इदं तु कालसामान्ये क्तस्य विधानम् । अत एव **'क्तस्य च वर्त्तमाने'** (अ०—२ । ३ । ६७) इत्यत्र वार्त्तिकम्—**'क्तस्य वर्त्तमाने नपुंसके भाव उपसंख्यानम्' * । क्तस्य च वर्त्तमाने नपुंसके भाव उपसंख्यानं कर्त्तव्यम् । छात्रस्य हसितम् । नटस्य भुक्तम् । मयूरस्य नृत्तम् । कोकिलस्य व्याहृतमिति ॥** (अ० २ । ३ । ६७ भाष्ये) ॥

ल्युट् च[1] ॥ ११५ ॥

नपुंसके, भावे इत्यनुवर्त्तते । ल्युट् । १ । १ । च । [अ०] ॥

नपुंसके भावे धातोः 'ल्युट्' प्रत्ययो भवति । हसनम् । [दर्शनम् ।] नर्त्तनम् । शोभनम् । पृथग्योग उत्तरार्थः[2] ॥ ११५ ॥

यहां 'नपुंसके, भावे' पदों का अनुवर्तन है ॥

नपुंसक भाव में धातु से [ल्युट् च] 'ल्युट्' प्रत्यय होता है ॥

जैसे—हसनम् । नर्त्तनम् । शोभनम् ॥ पृथक्सूत्र करने का यह प्रयोजन है कि आगे के सूत्रों में अनुवृत्ति जावे ॥ ११५ ॥

कर्मणि च येन संस्पर्शात् कर्त्तुः शरीरसुखम्[3] ॥ ११६ ॥

नपुंसके, भावे, ल्युड् इत्यनुवर्त्तते ॥ कर्मणि । ७ । १ । च । [अ०] । येन । ३ । १ । संस्पर्शात् । ५ । १ । कर्त्तुः । ६ । १ । शरीरसुखम् । १ । १ ॥ शरीरस्य सुखं शरीरसुखमिति षष्ठीतत्पुरुषः ॥

येन साधकतमेन कर्मणा संस्पृश्यमानस्य कर्त्तुः शरीरसुखं भवति तस्मिन् कर्मण्युपपदे धातोर्नपुंसके भावे 'ल्युट्' प्रत्ययो भवति ॥

दुग्धपानम् [सुखम्] । [पयःपानं सुखम्] । घृतपानम् [सुखम्] । पूर्वसूत्रेण ल्युट्सिद्धे उपपदनियमेन नित्यसमासार्थ आरम्भः । **उपपदमतिङ्**[4] इति नित्यसमासो यथा स्यात्, अन्यथा वाक्यमपि प्रसज्येत ॥

'कर्मणि' इति किम्—रथेन यानं सुखम् ॥ 'संस्पर्शात्' इति किम्—ब्रह्मण उपासनं सुखम् ॥ 'कर्त्तुः' इति किम्—गुरोः स्नापनं सुखम् । स्नापनस्य कर्त्ता शिष्यः ॥ 'शरीर' ग्रहणं किमर्थम्—वेदस्य पठनं सुखम् ॥ ['सुखम्' इति किम्—] कण्टकानां मर्दनं दुःखम् ॥ ११६ ॥

यहां 'नपुंसके भावे ल्युट्' इन तीनों पदों का अनुवर्त्तन है । 'शरीरसुखम्' यहां षष्ठीसमास है ॥

[येन] जिस साधकतम कर्म के [संस्पर्शात्] स्पर्श करने से [कर्त्तुः] कर्त्ता को [शरीरसुखम्] शरीरसुख उत्पन्न हो ऐसा [कर्मणि] कर्म उपपद हो तो धातु से 'ल्युट्' प्रत्यय हो ॥

जैसे—दुग्धपानं सुखम् । घृतपानं सुखम् । पयःपानं सुखम् ॥

पूर्वसूत्र से 'ल्युट्' सिद्ध ही था, पुनः विधान इसलिये है कि 'उपपदमतिङ्' इस नियम से नित्यसमास हो अन्यथा पक्ष में वाक्य की भी प्राप्ति होती ॥

---

१. आ० सू० १४७१ ॥
२. क्ताननुवृत्त्यर्थ इति वा ॥
३. आ० सू० १४७२ ॥
४. अ० २ । २ । १९ ॥

'कर्मणि' ग्रहण इसलिये है कि—रथेन यानं सुखम् ॥ 'संस्पर्शात्' ग्रहण इसलिये है कि—ब्रह्मण उपासनं सुखम् ॥ 'कर्तुः' ग्रहण इसलिये है कि—गुरोः स्नापनं सुखम् । यहां स्नापन का कर्ता शिष्य है ॥ 'शरीर' ग्रहण इसलिये है कि—वेदस्य पठनं सुखम् ॥ 'सुखम्' ग्रहण इसलिये है कि—कण्टकानां मर्दनं दुःखम् ॥ ११६ ॥

करणाधिकरणयोश्च[1] ॥ ११७ ॥

ल्युट्-इत्यनुवर्त्तते । करणाधिकरणयोः । ७ । २ । च । [अ०] ॥

धातोः करणेऽधिकरणे च कारके 'ल्युट्' प्रत्ययो भवति ॥

इध्मप्रव्रश्चनः । पलाशशातनः ॥ अधिकरणे—[गो] दोहनी । अन्नरक्षणी । सक्तुधानी । घृतरक्षणं पात्रम् ॥ ११७ ॥

यहां 'ल्युट्' इस पद का अनुवर्त्तन है ॥

धातु से [करणाधिकरणयोः] करण और अधिकरण कारक में 'ल्युट्' प्रत्यय होता है ॥

जैसे—इध्मप्रव्रश्चनः । पलाशशातनः ॥ अधिकरण में—[गो] दोहनी । अन्नरक्षणी । सक्तुधानी । घृतरक्षणं पात्रम् ॥ ११७ ॥

पुंसि संज्ञायां घः प्रायेण[2] ॥ ११८ ॥

करणाधिकरणयोरित्यनुवर्त्तते ॥ पुंसि । ७ । १ । संज्ञायाम् । ७ । १ । घः । १ । १ । प्रायेण । ३ । १ ॥ प्रायेण क्वचिदित्यर्थः ॥

संज्ञायां सत्यां धातोः करणाधिकरणयोः पुल्लिङ्गकारकयोरभिधेययोर्धातोः प्रायेण क्वचिद् 'घः' प्रत्ययो भवति ॥

दन्तच्छदः[3] । उरश्छदः ॥ अधिकरणे—आकरः[4] । आलयः ॥

'पुंसि' इति किम्—प्रसाधनम् ॥ 'संज्ञायामिति किम्—प्रहरणः खड्गः । '**ऋतेरीयङ्**[5]' इति ज्ञापकात् कृत्स्थस्य प्रत्ययादेर्घकारस्य 'इय्' आदेशो न भवति, एवं कृत्स्थानां फढखछघां प्रत्ययादीनामायन्नादयो न भवन्तीति ॥ ११८ ॥

यहां 'करणाधिकरणयोः' पद का अनुवर्त्तन है ॥

[संज्ञायाम्] संज्ञा गम्यमान हो तो धातु से करण और अधिकरण में [पुंसि] पुल्लिङ्ग कारक अभिधेय होने पर [प्रायेण] प्रायः करके [घः] 'घ' प्रत्यय होता है ॥

जैसे—दन्तच्छदः । उरश्छदः ॥ अधिकरण में—आकरः । आलयः ॥

---

१. आ० सू० १४७४ ॥ २. आ० सू० १४७५ ॥

३. दन्ताश्छाद्यन्ते येनासौ दन्तच्छदः 'ओष्ठः' ॥

४. एत्यास्मिन् कुर्वन्तीत्याकरः ॥ ५. अ० ३ । १ । २९ ॥

'पुंसि' ग्रहण इसलिये है कि—प्रसाधनम् ।। 'संज्ञायाम्' ग्रहण इसलिये है कि—प्रहरणः खड्गः । यहां 'घ' नहीं होता ।।

'ऋतेरीयङ्' इस ज्ञापक से कृत् प्रत्ययों के आदि घकार को 'इय्' आदेश नहीं होता, इसी प्रकार कृत्प्रत्ययों के आदि में जो फ, ढ, ख, छ, घ हैं उनको 'आयन्' आदि आदेश नहीं होते ।। ११८ ।।

गोचरसंचरवहव्रजव्यजापणनिगमाश्च[1] ।। ११९ ।।

गोचर० गमाः । १ । ३ । च । [अ०] ।। गोचर, संचर, वह, व्रज, व्यज, आपण, निगम इत्येते शब्दाः 'घ' प्रत्ययान्ताः करणाधिकरणयोः पुंसि निपात्यन्ते । वक्ष्यमाणसूत्रेण[2] 'घञ्' प्राप्तस्तस्यापवादः ।।

गावश्चरन्त्यस्मिन् स गोचरः । संचरत्यनेन स संचरः । वहन्ति येन स वहः । व्रजन्ति येन स व्रजो वाहनम् । व्यजन्ति येन स व्यजः । **'अजेर्व्यघञपोः'**[3] इति वीभावो निपातनान्न भवति ।।

आपणन्ते येषु त आपणा हाटकाः । नितरां गच्छन्ति प्राप्नुवन्ति ज्ञानं यस्मिन् स निगमो वेदः ।। ११९ ।।

[गोचर० गमाः] गोचर, संचर, वह, व्रज, व्यज, आपण, निगम ये शब्द करण और अधिकरण में पुल्लिङ्ग विषय में 'घ' प्रत्ययान्त निपातन हैं । अगले सूत्र से 'घञ्' प्राप्त था उसका यह अपवाद है ।।

जैसे—गोचरः । संचरः । वहः । व्रजः । व्यजः—यहां 'वी' भाव निपातन से नहीं होता ।। आपणः । निगमो वेदः ।। ११९ ।।

अवे तॄस्त्रोर्घञ्[4] ।। १२० ।।

करणाधिकरणयोः, पुंसि-संज्ञायां-प्रायेण इत्यनुवर्त्तते । अवे । ७ । १ । तॄस्त्रोः । ६ । २ । घञ् । १ । १ ।। अवपूर्वाभ्यां 'तॄ-स्तॄ' धातुभ्यां[5] करणाधिकरणयोः प्रायेण क्वचिद् 'घञ्' प्रत्ययो भवति ।।

---

१. आ० सू० १४७७ ।। २. अ० २ । ४ । ५६ ।।

३. आ० सू० १४७८ ।।

४. धातोरर्थयोश्च समसंख्यात्वेप्यस्वरितत्वाद्यथासंख्यं न भवति । तथा च भाष्यम्—'''' ''''' **अथवैवं वक्ष्यामि 'यथासंख्यमनुदेशः समानां स्वरितेन' इति । एवमपि स्वरितं दृष्ट्वा सन्देहः स्यात्—न ज्ञायते किमयं सप्तसंख्यार्थः, आहोस्विदधिकारार्थं इति ? ।। सन्देहमात्रमेतद्भवति सर्वसन्देहेषु चेदमुपतिष्ठते—'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्' इति । समसंख्यार्थं इति व्याख्यास्यामः** (अ०—१ । ३ । १० । सूत्रभाष्ये)

(ख)—'संज्ञायाम्' पदस्याऽनुवृत्तौ सत्यामपि **'अवतारो नद्याः, अवतारः सागरस्य'** इत्यादिलक्ष्यानुरोधादत्र न सम्बध्यते; यत्तु **काशिकाकृता** 'कथमवतारो नद्याः, नहीयं संज्ञा

अवतारः । अवस्तारः । प्रायग्रहणादवतरः, अवस्तर इत्यपि भवति ॥ १२० ॥

यहां 'करणाधिकरणयोः' तथा ['पुंसि, सञ्ज्ञायाम्, प्रायेण'] इन पदों का अनुवर्त्तन है ॥

[**अवे**] अव-पूर्वक [**तॄस्त्रोः**] 'तॄ' 'स्तृ' धातुओं से करण और अधिकरण कारक में प्रायः करके [**घञ्**] 'घञ्' प्रत्यय होता है ॥

जैसे—अवतारः । अवस्तारः । प्राय ग्रहण से 'अवतरः' और 'अवस्तरः' यह भी हो जाता है ॥ १२० ॥

हलश्च[1] ॥ १२१ ॥

करणाधिकरणयोः, पुंसि, संज्ञायां, प्रायेण इत्यनुवर्त्तते ॥ हलः । ५ । १ । च । [अ०] ॥ हलन्ताद् धातोः पुल्लिङ्गयोः [करणाधिकरणयोः] कारकयोः संज्ञायां सत्यां प्रायेण 'घञ्' प्रत्ययो भवति ॥

'पुंसि संज्ञायां घः प्रायेण'[2] इति सामान्यविहितस्यापवादः ॥

वेदः । वेषः । मार्गः । अपामार्गः । बन्धः । वागः—वजन्ति गच्छन्ति यस्मिन्निति वज—धातोः प्रयोगः ॥ प्रायवचनात्[3]—कषः । निकषः । अत्र घ एव भवति ॥ १२१ ॥

यहां 'करणाधिकरणयोः, पुंसि, संज्ञायाम्, प्रायेण' इन पदों की अनुवृत्ति है ॥

[**हलः**] हलन्त धातु से पुल्लिङ्ग करण अधिकरण कारक में संज्ञा गम्यमान हो तो प्रायः करके 'घञ्' प्रत्यय होता है ॥ पुंसि संज्ञायां घः प्रायेण' इससे सामान्य प्राप्त 'घ' का यह अपवाद है ॥

जैसे—वेदः । वेषः । मार्गः । अपामार्गः । बन्धः । वागः ॥ प्रायवचन से कषः, निकषः, यहां 'घ' ही होता है ॥ १२१ ॥

अध्यायन्यायोद्यावसंहाराश्च[4] ॥ १२२ ॥

अध्याय० हाराः । १ । ३ । च । [अ०] ॥ अध्यायादयः शब्दाः पुंसि संज्ञायां करणाधिकरणयोः कारकयोर्घञन्ता निपात्यन्ते ॥

हलन्ताद् 'घञ्' विधीयते, अध्यायादिष्वजन्ताद् घः प्राप्तस्तद्बाधनार्थम् ॥ अधीयतेऽस्मिन्नित्यध्यायः । नीयन्तेऽनेन कार्य्याणीति न्यायः । उद्युवन्त्यस्मिन्नित्युद्यावः । संह्रियन्तेऽनेन इति संहारः ॥

प्रायवचनानुवृत्तेरसंज्ञायामपि भवति, इत्युक्तं तन्न—**'नह्यु पाधेरुपाधिर्भवति विशेषणस्य वा विशेषणम्'** इत्येतस्य (अ०—१ । २ । २ । भा० । सिद्धान्तितत्वात् ॥ तेन—प्रायग्रहणं घञैव सम्बध्यते न संज्ञायामित्यनेन ॥

१. आ० सू० १४७९ ॥ २. अ० ३ । ३ । ११८ ॥

३. एतेन गोचरादिसूत्रे 'चकारोऽनुक्तसमुच्चयार्थः' इति काशिकाकृदुक्तं प्रत्युक्तम् ॥

४. आ० सू० १४८२ ॥

वा०—*घञ्विधावाहाराधारावायानामुपसंख्यानम्*[1] ॥ १ ॥

अवह्रियन्तेऽस्मिन्नवहारः । आध्रियन्तेऽस्मिन्नाधारः । एत्यैतस्मिन् वयन्त्यावायः ॥ अत्र **जयादित्यादिभि**राधारावाय-शब्दौ सूत्रे पठित्वा व्याख्यातौ । चकारोऽनुक्तसमुच्चयार्थ इत्यवहार-शब्दः साधितः । महाभाष्ये च वार्त्तिकं पठितमस्ति, यदि सूत्रेणैव सिद्धाः स्युर्वार्त्तिकं पुनः किमर्थं स्यात्, इदानीन्तनेषु पुस्तकेष्वपि सूत्रान्त आधारावाय-शब्दौ मुद्रितौ लिखितौ च दृश्येते, अतो ज्ञायते बहुकालादारभ्य सूत्रे केनचिन्मेलितौ, **कैय्यटेना**ऽपि लिखितं[2]—"अध्यायसूत्रे आधारवाय-शब्दौ वार्त्तिकदर्शनादभियुक्तैः प्रक्षिप्तौ" । महाभाष्येऽपि '**परिमाणाख्यायां सर्वेभ्यः**[3]' इत्यस्य सूत्रस्य व्याख्यानेऽध्यायादयः सर्वे शब्दा लिखिताः, तत्र यथा पुस्तकेषु सूत्रं दृष्टं तथा शोधकैर्महाभाष्यमपि शोधितम् । अव्यवस्थाकारिणा शास्त्रेण न भवितव्यम्, यदाऽऽधारावाय-शब्दौ सूत्रे वार्त्तिके चैकप्रयोजनायोभयत्र स्याताम्, अतो ज्ञायतेऽपाणिनीयावेव, **जयादित्यादीनां** च व्याख्यानं सर्वथाऽसङ्गतम् ॥ १२२ ॥

[अध्याय० हाराः] अध्याय, न्याय, उद्याव, संहार ये शब्द संज्ञा हों तो पुल्लिङ्ग करण अधिकरण कारक में 'घञ्' प्रत्ययान्त निपातन हैं ॥

हलन्तों से 'घञ्' का विधान है, अध्याय-आदि अजन्तों से 'घ' प्राप्त था उसको बाधने के लिये सूत्र है ॥

जैसे—अध्यायः । न्यायः । उद्यावः । संहारः ॥

वा०—घञ् विधावा०—'घञ्' प्रत्यय के विधान में आहार, आधार, आवाय, इनका भी उपसंख्यान करना चाहिये ॥ जैसे—अवहारः । आधारः । आवायः ॥

यहां जयादित्यादिकों ने आधार, आवाय शब्द सूत्र में पढ़ कर व्याख्यात किये हैं । चकार को अनुक्तसमुच्चायक मान कर अवहार शब्द सिद्ध किया है । महाभाष्य में यह वार्त्तिक पढ़ा है, यदि सूत्र से ही ये सिद्ध हो जाते तो पुनः वार्त्तिकपाठ का क्या प्रयोजन ? आज कल पुस्तकों में भी सूत्र के अन्त में आधार, आवाय शब्द मुद्रित तथा लिखित देखे जाते हैं । अतः यह जाना जाता है कि—चिरकाल से किसी ने सूत्र में मिला दिये हैं ।• कैय्यट ने भी लिखा है कि—'अध्याय०' इस सूत्र में आधार, आवाय शब्द वार्त्तिक में देखे जाने से अभियुक्तों ने सूत्र में प्रक्षिप्त किये हैं । महाभाष्य में भी 'परिमाणाख्यायां सर्वेभ्यः' इस सूत्र के व्याख्यान में अध्यायादि सारे शब्द लिखे हैं । वहां जैसा पुस्तकों में सूत्र देखा तैसा शोधकों ने महाभाष्य में भी शुद्ध कर दिया । शास्त्र में अव्यवस्था नहीं होती क्योंकि यदि सूत्र और वार्त्तिक दोनों ही आधार, आवाय इन शब्दों की सिद्धि करें तो एक से ही सिद्ध हो जाने पर दूसरे का क्या काम रह जाता है । इससे यह सिद्ध होता है कि—सूत्रों में इन शब्दों का पाठ अपाणिनीय ही है । इससे जयादित्यादिकों का व्याख्यान भी अपाणिनीय ही सिद्ध होता है । अन्यत्र भी इसी प्रकार समझ लेना चाहिये ॥ १२२ ॥

---

१. अ० ३ । ३ । १२१ भा० ॥ आ० वा० १४८० ॥

२. अ० ३ । ३ । १२१ । सू० भाष्ये ॥ ३. अ० ३ । ३ । २० ॥

उदङ्कोऽनुदके[1] ॥ १२३ ॥

उदङ्कः । १ । १ । अनुदके । ७ । १ । अनुदके = उदकभिन्ने पदार्थेऽभिधेये उत्पूर्वाद् 'अञ्चु' धातो 'घञ्' प्रत्ययो निपात्यते ॥ घृतमुदच्यतेऽस्मिन्निति, घृतोदङ्कः । तैलोदङ्कः ।

'अनुदके' इति किम्—उदकोदञ्चनः[2], अत्र **'करणाधिकरणयोश्च[3]'** इति ल्युट् । उदङ्क इत्यत्र पूर्वसूत्रेण घञ् सिद्ध एव पुनरुदकप्रतिषेधार्थ आरम्भः ॥ १२३ ॥

[अनुदके] उदकभिन्न पदार्थ अभिधेय हो तो [**उदङ्कः**] उत्पूर्वक 'अञ्चु' धातु से 'घञ्' प्रत्यय का निपातन है ॥

जैसे—**घृतोदङ्कः । तैलोदङ्कः ।** घी डाला जाता है जिसमें वह घी की कुप्पी 'घृतोदङ्क' इसी प्रकार तेल का पात्र 'तैलोदङ्क' कहाता है ॥

'अनुदके' ग्रहण इसलिये है कि—**उदकोदञ्चनः ।** यहां 'करणाधिकरणयोश्च' इससे 'ल्युट्' हो जाता है ॥

'उदङ्कः' इसमें पूर्वसूत्र से 'घञ्' सिद्ध ही था पुनः उदकविषय में प्रतिषेध के लिये सूत्र है ॥ १२३ ॥

जालमानायः[4] ॥ १२४ ॥

जालम् । १ । १ । आनायः । १ । १ ॥ हलन्ताद् 'घञ्' विधीयतेऽजन्ताद् घ प्राप्तस्तस्यापवादः ॥

जालेऽभिधेये आनाय इत्याङ् पूर्वान् 'नी' धातोः करणकारके 'घञ्' प्रत्ययो निपात्यते ॥

आनयन्त्यनेनेत्यानायो मत्स्यानाम् । आनायो मृगाणाम् ॥

'जालम्' इति किम्—आनयः ॥ १२४ ॥

हलन्तों से 'घञ्' कहा है, अजन्तों से 'घ' प्राप्त था उसका यह अपवाद है ॥

[जालम्] जाल अभिधेय हो तो [**आनायः**] यह आङ्-पूर्वक 'नी' धातु से करणकारक में 'घञ्' प्रत्ययान्त निपातन है ॥

जैसे—**आनायो मत्स्यानाम् । आनायो मृगाणाम् ॥**

---

१. आ० सू० १४८२ ॥

२. घञोऽभावे घप्रत्ययो न प्रत्युदाह्रियते विशेषाभावात् । घप्रत्यये प्रत्ययस्वरेणोत्तरपदान्तोदात्तत्वं भवति घञ्यपि **'चायो०'** (अ० ६ । २ । १४४) इत्यादिना स एव स्वरः ॥

३. अ० ३ । ३ । ११७ ॥

४. आ० सू० १४८३ ॥

'जालम्' ग्रहण इसलिये है कि—आनयः । यहां 'घ' हो जाता है ॥ १२४ ॥

खनो घ च[1] ॥ १२५ ॥

करणाधिकरणयोः, घञ् इत्यनुवर्त्तते । खनः । ५ । १ । घ[2] । १ । १ । च । [अ०] ॥ 'खन' धातोः करणाधिकरणकारकयो 'घ' प्रत्ययो भवति चकाराद् 'घञ्' च ॥

आख[न]न्त्यनेनास्मिन् वा आखनः[3], आखानः[4] ॥

वा०—खनो डडरेकेकवकाः[5] ॥ १ ॥

'खन' धातोः परे ड, डर, इक, इकवक चत्वारः प्रत्ययाः करणाधिकरणयो भवन्ति ॥ ड—आखः । डर—आखरः । डित्त्वादुभयत्र टिलोपः । इक—आखनिकः । इकवक—आखनिकवकः ॥ १२५ ॥

यहां 'करणाधिकरणयोः' और 'घञ्' पद का अनुवर्त्तन है ॥

[खनः] 'खन' धातु से करण और अधिकरण कारक में [घ] 'घ' प्रत्यय और [च] चकार से 'घञ्' प्रत्यय भी हो जाता है ॥

जैसे—आखनः । आखानः ॥

वा०—खनो डड०—खन धातु से परे ड, डर, इक, और इकवक ये चार प्रत्यय करण और अधिकरण कारक में होते हैं ॥ १ ॥

जैसे—ड—आखः । डर—आखरः । प्रत्यय के डित् होने से दोनों उदाहरणों में टिलोप हो जाता है । इक—आखनिकः । इकवक—आखनिकवकः ॥ १२५ ॥

---

१. आ० सू० १४८४ ॥

२. **'सुपां सुलुक्०'** (अ० ७ । १ । ३९) इति सोर्लुक् ॥

३. भगः—**'खनो घ च'** (अ० ३ । ३ । १२५) इति च-शब्दात् घः कुत्वमिति साधवः ॥

हरदत्तस्तु—"घित्करणं किमर्थं यावता न खनः कश्चिदवयवः कुत्वभागस्ति ? ज्ञापनार्थन्तु—एतज्ज्ञापयत्यन्येभ्योप्ययं भवतीति । तेन—भजेर्भगः, पदेः पदम्, खल सञ्चलने (भ्वा०) अधिकरणे घः खल एवमादि-सिद्धं भवतीति" ॥ अन्येप्येवमाहुः ॥

अत एव **'हृद्भगसिन्ध्वन्ते०'** (अ० ७ । ३ । १९) इत्यत्र भगपदस्य, कल्याण्यादिषु 'सुभग-दुर्भग-पदयोश्च पाठः प्रकल्पते ॥

४. आखनादयः खनित्रवचना इति **हरदत्तः** ॥

५. अ० ३ । ३ । १२५ भा० ॥ (ख) आ० पा० १४८५ ॥

ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्[1] ॥ १२६ ॥

करणाधिकरणयोरिति निवृत्तम् । ईषद्दुःसुषु । ७ । ३ । कृच्छ्राकृच्छ्रार्थेषु । ७ । ३ । खल् । १ । १ ॥ कृच्छ्राकृच्छ्रे यथायोग्येनार्थौ[2] येषां तेषु, दुःशब्दस्य कृच्छ्रार्थः, अकृच्छ्रार्थ इतरयोः ॥

कृच्छ्राऽर्थदुरुपपदादकृच्छ्रार्थेषत्सूपपदाच्च धातोः 'खल्[3]' प्रत्ययो भवति ॥ ईषत्करः कटस्तेन । ईषद्गमो ग्रामो भवता । दुष्पठा विद्या भवता । दुष्करः पाको भवता । सुकरः पाको भवता । सुपठा विद्या भवता । **'तयोरेव कृत्यक्तखलर्थाः[4]'** इति भावकर्मणोः 'खल्' भवति । घञादिभ्यो विप्रतिषेधाद्बाधकत्वाच्च खल् भवति । ईषच्चयः । सुचयः । ईषल्लवः । अत्रेवर्णान्ताद् अच्, उवर्णान्ताद् अप् च प्राप्तो विप्रतिषेधेन खलेव भवति ॥ १२६ ॥

यहां 'करणाधिकरणयोः' पद की निवृत्ति है ॥

[कृच्छ्राकृच्छ्रार्थेषु] कृच्छ्र (दुःख) अर्थ वाला दुर् और अकृच्छ्र (दुःखभिन्न) अर्थ वाले ईषत्, सु ये उपपद हों तो धातु से 'खल्' प्रत्यय होता है । जैसे—ईषत्करः कटस्तेन । ईषद्गमो ग्रामो भवता । दुष्पठा विद्या भवता । दुष्करः पाको भवता । सुकरः पाको भवता । सुपठा विद्या भवता ॥

'तयोरेव कृत्यक्तखलर्थाः' इस सूत्र से भाव कर्म में 'खल्' प्रत्यय होता है, विप्रतिषेध तथा बाधक होने से 'खल्' घञादि प्रत्ययों को बाध लेता है ॥ जैसे—ईषच्चयः । सुचयः । ईषल्लवः । यहां इवर्णान्तों से 'अच्' उवर्णान्तों से 'अप्' प्राप्त था, विप्रतिषेध से 'खल्' ही होता है ॥ १२६ ॥

कर्तृकर्मणोश्च भूकृञोः[5] ॥ १२७ ॥

पूर्वं सूत्रं सर्वमनुवर्त्तते । कर्तृकर्मणोः । ७ । २ । च । [अ० ।] भूकृञोः । ६ । २ ॥ कर्तृकर्मग्रहणमुपपदसंज्ञार्थम् । **'उपपदमतिङ्[6]'** इति नित्यसमासो यथा स्यात्, न त्वभिधेयार्थौ ॥

वा०—खल् कर्तृकर्मणोश्च्व्यर्थयोः[7] ॥ १ ॥

---

१. आ० सू० १४८६ ॥
२. **'तृतीया सप्तम्योर्बहुलम्'** (अ० २ । ४ । ८२) इत्यम्न भवति ॥
३. लकारः स्वरार्थः । खित्करणमुत्तरत्र मुमर्थम् ॥
४. अ० ३ । ४ । ७० ॥
५. आ० सू० १४९० ॥
६. अ० २ । २ । १९ ॥
७. अ० ३ । ३ । १२७ ॥

च्व्यर्थकर्तृकर्मोपपदाभ्यां कृच्छ्राकृच्छ्रार्थेषददुःसुपूर्वाभ्यां भू-कृञ् धातुभ्यां[1] 'खल्' प्रत्ययो भवति ।।

अनाढ्येन भवता ईषदाढ्येन शक्यं भवितुम्—ईषदाढ्यंभवं भवता । दुराढ्यं-भवं भवता । स्वाढ्यंभवं भवता ।। अनाढ्य ईषदाढ्यः क्रियत इति--ईषदाढ्यंकरो देवदत्तः । दुराढ्यंकरः । स्वाढ्यंकरः ।।

'च्व्यर्थयोः' इति किम्—आढ्येन सुभूयते । अत्र सु-शब्दस्य गतित्वाद् धातोः प्राक् प्रयोगः । स्वाढ्यंभवं भवतेत्यादौ तु खलः खित्त्वाद् धातोः पूर्वं कर्तृकर्मणी मुमर्थं प्रयुज्येते ।। १२७ ।।

यहां पूर्वसूत्र का अनुवर्त्तन है । कर्तृ कर्म का ग्रहण उपपद संज्ञा के लिये है, जिससे कि 'उपपदमतिङ्' इस सूत्र से नित्य समास हो, अर्थ के लिये नहीं ।।

वा०—खल् कर्तृकर्मणो०—[कर्तृकर्मणोः] च्व्यर्थ कर्त्ता कर्म उपपद हों, कृच्छ्र और अकृच्छ्रार्थ में वर्त्तमान ईषद्-दुः-सु पूर्व हों तो [भूकृञोः] 'भू' तथा 'कृञ्' धातु से 'खल्' प्रत्यय होता है ।।

जैसे—अनाढ्येन भवता ईषदाढ्येन शक्यं भवितुम्—ईषदाढ्यम्भवं भवता । दुराढ्यं-भवं भवता । स्वाढ्यंभवं भवता ।। अनाढ्य ईषदाढ्यः क्रियत इति—ईषदाढ्यङ्करो देवदत्तः । दुराढ्यङ्करः । स्वाढ्यङ्करः ।।

'च्व्यर्थयोः' ग्रहण इसलिये है कि—आढ्येन सुभूयते । यहां सु-शब्द की गति-संज्ञा होने से धातु से पूर्व प्रयोग होता है ।।

'स्वाढ्यंभवं भवता' इत्यादि उदाहरणों में 'खल्' के खित् होने से 'मुम्' विधान के लिये धातु से पूर्व कर्त्ता और कर्म का प्रयोग किया जाता है ।। १२७ ।।

आतो युच् ।। १२८ ।।

ईषदादयोऽनुवर्त्तन्ते । कर्तृकर्मणोरिति निवृत्तम् । आतः । ५ । १ । युच् । १ । १ ।। खलोऽपवादः ।।

कृच्छ्राकृच्छ्रार्थेषददुःसूपपदेभ्य आकारान्तधातुभ्यो 'युच्' प्रत्ययो भवति ।।

ईषत्पानं दुग्धं भवता । दुष्पानम् । सुपानम् । ईषद्दानः । दुर्दानः । सुदानः ।। युजपि खलर्थत्वाद्भावकर्मणोर्भवति ।। १२८ ।।

यहां ईषदादि का अनुवर्त्तन है, कर्तृकर्मणोः' का नहीं ।।

---

१. यत्त्वत्र वृत्तिकारादयो यथासंख्यं प्रत्यय-विधानमाहुः, तद्भाष्यविरोधादयुक्तम् । तथा च भाष्यम्—

'कर्तृकर्मणी ह्ये भूकृञौ ह्यौ तत्र संख्यातानुदेशः प्राप्नोति' (अ० १ । ३ । १० भाष्ये) अनिष्ट एवात्र संख्यातानुदेश इति भाष्याभिप्रायः ।।

२. आ० सू० १४९१ ।।

कृच्छ्र और अकृच्छ्र अर्थ वाले ईषद्-दुः-सु उपपद हों तो [आतः] आकारान्त धातु से [युच्] 'युच्' प्रत्यय होता है ॥

जैसे—ईषत्पानं दुग्धं भवता । दुष्पानम् । सुपानम् । ईषद्दानः । दुर्दानः । सुदानः । युच् प्रत्यय भी खलर्थ होने से भाव और कर्म में होता है ॥ १२८ ॥

छन्दसि गत्यर्थेभ्यः[1] ॥ १२९ ॥

छन्दसि । ७ । १ । गत्यर्थेभ्यः । ५ । ३ ॥ गतिरर्थो येषां ते गत्यर्थास्तेभ्यः, कृच्छ्राकृच्छ्रार्थेष्वीषदादिषूपपदेषु गत्यर्थधातुभ्यो वैदिकप्रयोगविषये 'युच्' प्रत्ययो भवति ॥

ईषत्सदनः[2] । दुःसदनः[2] । सुसदनः[2] । ईषत्सर्पणः[3] । दुःसर्पणः[3] । सुसर्पणः[3] । खलोऽपवादः ॥ १२९ ॥

[गत्यर्थेभ्यः] गति अर्थ वाले धातुओं से कृच्छ्राकृच्छ्रार्थक ईषद् दुः सु उपपद हों तो [छन्दसि] वैदिकप्रयोगविषय में 'युच्' प्रत्यय होता है ॥

जैसे—ईषत्सदनः । दुःसदनः । सुसदनः । ईषत्सर्पणः । दुःसर्पणः । सुसर्पणः । यह सूत्र 'खल्' का अपवाद है ॥ १२९ ॥

अन्येभ्योऽपि दृश्यते[4] ॥ १३० ॥

छन्दसि इत्यनुवर्त्तते । अन्येभ्यः । ५ । ३ । अपि । [अ०] । दृश्यते । [क्रियापदम्] ॥

गत्यर्थादितरेभ्यश्च छन्दसि 'युच्' प्रत्ययो दृश्यते ॥ सुदोहनामकृणोद् ब्रह्मणे गाम्[5] ॥

वा०—भाषायां शासियुधिदृशिधृषिभ्यो युच्[1] ॥ १ ॥

भाषायां लौकिकशब्दप्रयोगेषु शास्यादिभ्यो 'युच्' प्रत्ययो दृश्यते ॥

दुःशासनः । दुर्योधनः । दुर्दर्शनः । दुर्धर्षणः ॥

वा०—मृषेश्चेति वक्तव्यम् ॥ २ ॥ दुर्मर्षणः ॥ १३० ॥

यहां 'छन्दसि' पद का अनुवर्त्तन है ॥

[अन्येभ्यः] गत्यर्थकों से इतर धातुओं से [अपि] भी छन्द में 'युच्' प्रत्यय [दृश्यते] देखा जाता है ॥ जैसे—सुदोहनामकृणोद् ब्रह्मणे गाम् ॥

वा०—भाषायां शासियुधि०—भाषा में अर्थात् लौकिक शब्द प्रयोग में 'शासि' आदि धातुओं से 'युच्' प्रत्यय देखा जाता है ॥

---

१. आ० सू० १४९२ ॥ २. अनुपलब्धमूलानीमानि ॥
३. आ० सू० १४९३ ॥ ४. अनुपलब्धमूलमिदम् ॥
५. अ० ३ । ३ । १३० भा० ॥ आ० वा०—१४९४ ॥

जैसे—दुःशासनः । दुर्योधनः । दुर्दर्शनः । दुर्धर्षणः ॥

वा०—मृषेश्च०—भाषा में 'मृष' से भी 'युच्' कहना चाहिये ॥ जैसे—दुर्मर्षणः ॥१३०॥

वर्त्तमानसामीप्ये वर्त्तमानवद्वा[1] ॥ १३१ ॥

वर्त्तमानसामीप्ये । ७ । १ । वर्त्तमानवत् । [अ० ।] वा । [अ०] ॥ समीपस्य भावः सामीप्यम्, वर्त्तमानस्य सामीप्यं वर्त्तमानसामीप्यम् । वर्त्तमान इव वर्त्तमानवत्, सप्तमीसमर्थाद्वतिः । वर्त्तमानाधिकारो '**वर्त्तमाने लट्**[2]' इत्यारभ्य '**उणादयो बहुलम्**[3]' इति पर्य्यन्तम्—तत्र याभ्यः प्रकृतिभ्यो येन विशेषणेन ये प्रत्यया विहितास्ताभ्यः प्रकृतिभ्यस्तेनैव विशेषणेन ते प्रत्यया वर्त्तमानसामीप्ये भूते भविष्यति च काले विकल्पेन भवन्ति, पक्षे यथाविहिताः ॥

देवदत्त कदाऽपाक्षीः ? । एष पचामि । एष पचन् । एष पचमानः । एष उत्पचिष्णुः । एषोऽपाक्षम् । एष पक्ववान् ॥ देवदत्त कदाऽलङ्कृतम् ? । एषोऽलङ्करोमि । एषोऽलङ्कुर्वन् । एषोऽलङ्कुर्वाणः । एषोऽस्म्यलङ्करिष्णुः । एषोऽलमकार्षम् । एषोऽलङ्कृतवान् ॥ देवदत्त कदा पक्ष्यसि ? । एष पचामि । एष पचन् । एष पचमानः । एष उत्पचिष्णुः । एष [प]क्ष्यामि ॥

वत्करणं किमर्थम्[4]—वर्त्तमाने ये प्रत्यया विहितास्ते वर्त्तमानसामीप्ये [धातुमात्रात्] विभाषा मा भूवन् । वत्करणेन वर्त्तमाने यथा विहितास्तथैव भवन्ति ॥१३१॥

'वर्त्तमाने लट्' से 'उणादयो बहुलम्' तक वर्त्तमान का अधिकार है। उसमें जिन धातुओं से जिस विशेषण के साथ जो प्रत्यय कहा है वह उन ही विशेषणयुक्त प्रकृतियों से [**वर्त्तमानसामीप्ये**] वर्त्तमान काल के समीप जो भूत और भविष्यत् काल हैं उसमें वर्त्तमान काल की भांति [**वा**] विकल्प करके प्रत्यय होते हैं, पक्ष में यथाविहित होते हैं ॥

जैसे—देवदत्त कदाऽपाक्षीः ? । एष **पचामि** । एष **पचन्** । एष **पचमानः** । एष उत्पचिष्णुः । एषोऽपाक्षम् । एष पक्ववान् ॥ देवदत्त कदाऽलङ्कृतम् ? । एषोऽलङ्करोमि । एषोऽलङ्कुर्वन् । एषोऽलङ्कुर्वाणः । एषोऽस्म्यलङ्करिष्णुः । एषोऽलमकार्षम् । एषोऽलङ्कृतवान् ॥ देवदत्त कदा पक्ष्यसि ? । एष पचामि । एष पचन् । एष पचमानः । एष उत्पचिष्णुः । एष **पक्ष्यामि** ॥

'वत्करण' इसलिये है कि—वर्त्तमान में जो प्रत्यय विहित हैं वे वर्त्तमानसामीप्य में धातुमात्र से विकल्प करके न हों, 'वत्' करने से वर्त्तमान में जैसे विहित हैं वैसे ही होते हैं ॥ १३१ ॥

---

१. आ० सू० ७६० ॥ २. अ० ३ । २ । १२३ ॥

३. अ० ३ । ३ । १ ॥

४. अत्र भाष्यम्—**वत्करणं किमर्थम् । 'वर्त्तमानसामीप्ये वर्त्तमाने वा' इतीयत्युच्यमाने वर्त्तमाने ये प्रत्यया विहितास्ते वा वर्त्तमानसामीप्ये धातुमात्रात्स्युः । वत्करणे पुनः क्रियमाणे न दोषो भवति ॥**

आशंसायां भूतवच्च[1] ॥ १३२ ॥

वर्त्तमानवद् वा-इत्यनुवर्त्तते । वर्त्तमानसामीप्य इति निवृत्तम् । आशंसायाम् । ७ । १ । भूतवत् । [अ० ।] च । [अ०] ॥

'**आङः शसि इच्छायाम्**[2]'इत्यस्माद् धातोः '**गुरोश्च हलः**[3]' इत्यकार-प्रत्ययः । अप्राप्तस्येष्टस्य पदार्थस्य प्राप्तुमिच्छा [आशंसा], सा च भविष्यत्-कालविषया भवति । भूत इव भूतवत् । सामान्यातिदेशे विशेषस्यातिदेशो न भवतीति नियमोऽस्ति, अतः सामान्यातिदेशेऽनद्यतनपरोक्षभूतयोर्ग्रहणं न भविष्यति, तेन—'**परोक्षे लिट्**[4]',' **अनद्यतने लङ्**[5]' इति लकारौ न भवतः ॥

आशंसायां गम्यमानायां धातोर्विकल्पेन भूतवत् प्रत्यया भवन्ति, चकाराद् वर्त्तमानवच्च, पक्षे चाशंसाविषयो 'लट्' ॥

मेघश्चेदवर्षीत्, वृष्टो, वर्षति, वर्षिष्यति वा धान्यमवाप्स्म, उप्तवन्तः, वपामः, वप्स्यामो वा ॥

'आशंसायाम्' इति किमर्थम्—आगमिष्यति देवदत्तः ॥ १३२ ॥

यहां 'वर्त्तमानवत्' तथा 'वा' इन पदों का अनुवर्त्तन है, 'वर्त्तमानसामीप्ये' इस पद का निवर्त्तन है ॥

'आङः शसि इच्छायाम्' इस धातु से 'गुरोश्च हलः' इस सूत्र से 'अकार' प्रत्यय होकर 'आशंसा' रूप बनता है । अप्राप्त इष्टपदार्थ की प्राप्ति की इच्छा आशंसा कहाती है, वह भविष्यत् काल का विषय है ॥

भूत की भांति = भूतवत् । सामान्य के अतिदेश में विशेष का अतिदेश नहीं होता यह नियम है । अतः सामान्य अतिदेश में अनद्यतन तथा परोक्षभूत का ग्रहण नहीं होगा, इस कारण 'परोक्षे लिट्' तथा 'अनद्यतने लङ्' इन दो लकारों का ग्रहण नहीं होता ॥

[आशंसायाम्] आशंसा गम्यमान हो तो धातु से विकल्प करके [भूतवत्] भूतकाल की भांति प्रत्यय होते हैं [च] चकार से वर्त्तमानवत् भी, पक्ष में—आशंसाविषयक 'लट्' भी होता है ॥

जैसे—मेघश्चेदवर्षीत्, वृष्टो, वर्षति, वर्षिष्यति व, धान्यमावाप्स्म, उप्तवन्तः, वपामः, वप्स्यामो वा ॥

'आशंसा' ग्रहण इसलिये है कि—आगमिष्यति देवदत्तः ॥ १३२ ॥

---

१. आ० सू० ७६१ ॥
२. धा० भ्वा० ६१९ ॥
३. अ० ३ । ३ । १०३ ॥
४. अ० ३ । २ । ११५ ॥
५. अ० ३ । २ । १११ ॥

क्षिप्रवचने लृट्[1] ॥ १३३ ॥

पूर्वसूत्रेण भूतवदतिदेशः प्राप्तस्तस्यायमपवादः । आशंसायामित्यनुवर्त्तते । क्षिप्रवचने । ७ । १ । लृट् । १ । १ ॥

आशंसायां गम्यमानायां क्षिप्रार्थवाचिशब्दोपपदाद् धातो 'लृट्' लकारो भवति ॥ उपाध्यायश्चेदागतः क्षिप्रमध्येष्यामहे, शीघ्रमध्येष्यामहे, त्वरितमध्येष्यामहे ॥

वचनग्रहणं क्षिप्रशब्दस्य पर्य्यायवाचिनां ग्रहणार्थम् ॥ १३३ ॥

पूर्वसूत्र से भूतवत् अतिदेश प्राप्त था, उसका यह अपवाद है । यहां 'आशंसायाम्' पद का अनुवर्त्तन है ॥

आशंसा गम्यमान हो और [क्षिप्रवचने] क्षिप्रार्थवाची शब्द उपपद हो तो धातु से [लृट्] 'लृट्' लकार होता है ॥

जैसे—उपाध्यायश्चेदागतः क्षिप्रमध्येष्यामहे । शीघ्रमध्येष्यामहे । त्वरितमध्येष्यामहे ॥

'वचन' ग्रहण इसलिये किया है कि—क्षिप्रशब्द के पर्यायवाचियों का भी ग्रहण हो जाय ॥ १३३ ॥

आशंसावचने लिङ्[2] ॥ १३४ ॥

भूतवच्चेत्यस्यैवापवादः । आशंसावचने । ७ । १ । लिङ् । १ । १ ॥ आशंसा उक्तार्था । सा उच्यतेऽनेन शब्देन तस्मिन् । आशंसावाचिशब्दोपपदाद् धातो 'लिङ्' लकारो भवति ॥

उपाध्यायश्चेदागत आशंसे युक्तोऽधीर्याय, इच्छामि युक्तोऽधीयीय ॥

'क्षिप्रवचने' 'आशंसावचने' च द्वयोरुपपदयोः परविप्रतिषेधाल्लिङेव[3] भवति । उपाध्यायश्चेदागत आशंसे क्षिप्रमधीयीय ॥ वचनग्रहणमत्रापि पर्य्यायग्रहणार्थम् ॥१३४॥

यह भी भूतवत् अतिदेश का अपवाद है ॥ आशंसा जिस पद से प्रतीत हो वह 'आशंसा-वचन' कहाता है ॥

[आशंसावचने] आशंसावाची शब्द उपपद हो तो धातु से [लिङ्] 'लिङ्' लकार होता है ॥

जैसे—उपाध्यायश्चेदागत आशंसे युक्तोऽधीयीय । इच्छामि युक्तोऽधीयीय ॥

---

१. आ० सू० ७६२ ॥ २. आ० सू० ७६३ ॥

३. भाष्ये तु—**क्षिप्रवचने लृट् आशंसावचने लिङ् भवति विप्रतिषेधेन । क्षिप्रवचने लृट् भवतीत्यस्यावकाशः—उपाध्यायश्चेदागतः क्षिप्रमध्येष्यामहे । आशंसावचने लिङ् भवतीत्यस्यावकाशः—उपाध्यायश्चेदागत आशंसे युक्तोऽधीयीय । इहोभयं प्राप्नोति—उपाध्यायश्चेदागत आशंसे क्षिप्रमधीयीय । लिङ् भवति विप्रतिषेधेन ॥**

क्षिप्रवचन और आशंसावचन उपपद होने पर परविप्रतिषेध से 'लिङ्' ही होता है ॥ जैसे—उपाध्यायश्चेदागत आशंसे क्षिप्रमधीयीय ॥ यहां भी वचनग्रहण पर्य्याय के ग्रहण के लिये है ॥ १३४ ॥

नानद्यतनवत् क्रियाप्रबन्धसामीप्ययोः[1] ॥ १३५ ॥

न । [अ०] । अनद्यतनवत् [अ०] । क्रियाप्रबन्धसामीप्ययोः । ७ । २ ॥ अनद्यतन इत्रानद्यतनवत् । भूताऽनद्यतने लङ् विहितो भविष्यदनद्यतने च लुट् तयोः प्रतिषेधः ॥

क्रियायाः प्रबन्धः सामीप्यं च तयोः । क्रियाप्रबन्धो नैरन्तर्य्येण क्रियाया अनुष्ठानम् । क्रियायाः प्रबन्धे सामीप्ये च सत्यनद्यतनवत् प्रत्यया न भवन्ति ॥

क्रियाप्रबन्धे—यावज्जीवमध्यापिपत् । यावज्जीवमध्यापयिष्यति । यावज्जीवमिति णमुल् प्रयोगः ॥ सामीप्ये—येयं प्रतिपदतिक्रान्ता तस्यां विद्युदपप्तत् । वृक्षमभैत्सीत् । मार्गमरौत्सीत् ॥ योऽयं रविवार आगामी, एतस्मिन् नगरान्तरं यास्यामः । धनं दास्यामः । पुस्तकं ग्रहीष्यामः ॥

अस्मिन् सूत्रे द्वयोः प्रतिषेधयोरेतत्प्रयोजनम् । प्रत्ययविधिर्माभूत् । अद्यतनवन्नेत्युक्ते लटः प्रतिषेधः स्यात् । लङ्लुटौ तु प्राप्नुयातामेव[2] ॥ १३५ ॥

भूतानद्यतन 'लङ्' विहित है, भविष्यत् अनद्यतन में 'लुट्' उन दोनों का प्रतिषेध है ॥ क्रिया का निरन्तर अनुष्ठान क्रियाप्रबन्ध कहाता है ॥

[क्रियाप्रबन्धसामीप्ययोः] क्रियाप्रबन्ध और सामीप्य अर्थ हो तो [अनद्यतनवत्] अनद्यतनवत् प्रत्यय [न] नहीं होते ॥ जैसे—क्रियाप्रबन्ध में—यावज्जीवमध्यापिपत् । यावज्जीवमध्यापयिष्यति । 'यावज्जीवम्' यह णमुल् प्रत्ययान्त का प्रयोग है ॥ सामीप्य में—येयं प्रतिपदतिक्रान्ता तस्यां विद्युदपप्तत् । वृक्षमभैत्सीत् । मार्गमरौत्सीत् । योऽयं रविवार आगामी, एतस्मिन्नगरान्तरं यास्यामः । धनं दास्यामः । पुस्तकं ग्रहीष्यामः ॥

इस सूत्र में दो प्रतिषेधों का यह प्रयोजन है कि—अनद्यतनप्रत्ययविधि न हो । अद्यतनवत् न हो, ऐसा कहने से 'लट्' का तो प्रतिषेध हो जाता परन्तु 'लङ्' और 'लुट्' तो हो ही जाते ॥ १३५ ॥

---

१. आ० सू० ७६४ ॥

२. अत्र भाष्यम्—**किमर्थमिमौ द्वौ प्रतिषेधावुच्येते । न अद्यतनवदित्येवोच्येत । नानद्यतनवत् प्रतिषेधे लङ्लुटोः प्रतिषेधो द्रष्टव्यः । अद्यतनवचने हि सति विधानमिदं विज्ञायेत । तत्र को दोषः ? । तत्र लड्विधिः प्रसज्येत । लुङोऽपि विषये लृट् स्यात्, लृटश्च विषये लुङ् स्यात् । अद्य पुनरयं द्वौ प्रतिषेधावुक्त्वा तूष्णीमास्ते । यथाप्राप्तमेवाद्यतने भविष्यति ॥**

भविष्यति मर्य्यादावचनेऽवरस्मिन्[1] ॥ १३६ ॥

नानद्यतनवत्, इत्यनुवर्त्तते[2] । भविष्यति । ७ । १ । मर्यादावचने । ७ । १ । अवरस्मिन् । ७ । १ ॥ मर्यादोच्यतेऽनेन तस्मिन् । अवरभागे मर्य्यादावचन उपपदे धातोर्भविष्यत्कालेऽनद्यतनवत्प्रत्ययो न भवति । योऽयमध्वा गन्तव्य आपाटलिपुत्रात्तस्य यदवरं कौशाम्ब्यास्तत्र स्थास्यामः । स्नानादिकं करिष्यामः । आरंस्यामः ॥

'भविष्यति' इति किम्—योऽयमध्वा गत आपाटलिपुत्रात्तस्य यदवरं साकेतात्तत्र युक्ता अध्यैमहि । अत्रानद्यतने लङेव ॥ 'मर्यादावचने' इति किम्—योऽयमध्वाऽपरिमाणो गन्तव्यस्तस्य यदवरं साकेतात्तत्र युक्ता अध्येतास्महे ॥ 'अवरस्मिन्' इति किम्—योऽयमध्वा गन्तव्य आपाटलिपुत्रात्तस्य यत्परं साकेतात्तत्र सक्तून् पातास्मः ॥ अत्रोभयत्रानद्यतनभविष्यति लुट् ॥ १३६ ॥

इस सूत्र में 'न–अनद्यतनवत्' पदों का अनुवर्त्तन है ॥

[अवरस्मिन्] अवर प्रविभाग अर्थात् उरले भाग को लेकर [मर्यादावचने] मर्यादा को कहने वाला उपपद हो तो धातु से [भविष्यति] भविष्यत् काल में अनद्यतनवत् प्रत्यय नहीं होते ॥

जैसे—योऽयमध्वा गन्तव्य आपाटलिपुत्रात्तस्य यदवरं कौशाम्ब्यास्तत्र स्थास्यामः । स्नानादिकं करिष्यामः । आरंस्यामः ॥

'भविष्यति' ग्रहण इसलिये है कि—योऽयमध्वा गत आपाटलिपुत्रात्तस्य यदवरं साकेतात्तत्र युक्ता अध्यैमहि । यहां अनद्यतन में 'लङ्' ही होता है ॥ 'मर्य्यादावचने' ग्रहण इसलिये है कि—योऽयमध्वाऽपरिमाणो गन्तव्यस्तस्य यदवरं साकेतात्तत्र युक्ता अध्येतास्महे ॥' अवरस्मिन्' ग्रहण इसलिये है कि—योऽयमध्वा गन्तव्य आपाटलिपुत्रात्तस्य यत्परं साकेतात् तत्र सक्तून् पातास्मः । यहां दोनों उदाहरणों में अनद्यतनभविष्यत् में 'लुट्' हो जाता है ॥ १३६ ॥

कालविभागे चानहोरात्राणाम्[3] ॥ १३७ ॥

पूर्वं सूत्रं सर्वमनुवर्त्तते । पूर्वेणैव सिद्धेऽनहोरात्राणामिति प्रतिषेधार्थं आरम्भः ।

कालविभागे । ७ । १ । च । [अ०] । अनहोरात्राणाम् । ६ । ३ ॥ कालस्य विभागः कालविभागः । भविष्यत्यनहोरात्राणां कालविभागेऽवरस्मिन् मर्य्यादावचन उपपदे धातोरनद्यतनवत् प्रत्ययो न भवति ॥

योऽयं मास आगामी तस्य यावरा पौर्णमासी तस्यां यक्ष्यामहे । पठनमारप्स्यामहे ॥

---

१. आ० सू० ७६५ ॥

२. **अक्रियाप्रबन्धार्थोऽयमारम्भः** (अ० ३ । ३ । ३६) इति भाष्ये ॥

३. आ० सू० ७६६ ॥

'भविष्यति' इति किम्—योऽयं मासोऽतीतस्तस्य यदवरममावास्यायास्तत्रौदनमभुञ्ज्महि ।। 'मर्य्यादावचने' इति किम्—योऽयमपरिमितः काल आगामी तस्य यदवरं माध्यास्तत्र युक्ता अध्येतास्महे ।। 'अवरस्मिन्' इति किम्—परस्मिन् मर्यादावचने वक्ष्यमाणसूत्रेण विभाषा यथा स्यात् ।। 'अनहोरात्राणाम्' इति किम्—अहोरात्राणामहोरात्रैश्च विभागेऽनद्यतनवत्प्रतिषेधो माभूत् । योऽयं त्रिंशद्रात्र आगामी तस्य योऽवरः पञ्चदशरात्रः । योऽयं मास आगामी तस्य योऽवरः पञ्चदशरात्रः । योऽयं त्रिंशद्रात्र आगामी तस्य योऽवरोऽर्धमासस्तत्र युक्ता अध्येतास्महे । अत्र सर्वत्रानद्यतनविहिताः प्रत्यया भवन्त्येव । सामान्येनानद्यतने लङ्लुटौ विधीयेते तयोरेवायं सर्वः प्रतिषेधः ।। १३७ ।।

यहां पूर्वसूत्र से सब पदों की अनुवृत्ति आ रही है । पूर्वसूत्र से ही सिद्ध था पुनः अहोरात्र-विषय में प्रतिषेध के लिये यह सूत्र है ।।

[कालविभागे] समय की मर्य्यादा के विभाग में उरले विभाग की अपेक्षा हो तो भविष्यत्काल में अनद्यतनवत् प्रत्यय न हों, यदि वह मर्यादा-विभाग [अनहोरात्राणाम्] अहोरात्रसम्बन्धी न हो ।।

योऽयं मास आगामी तस्य यावरा पौर्णमासी तस्यां यक्ष्यामहे । पठनमारप्स्यामहे ।।

'भविष्यति' ग्रहण इसलिये है कि—योऽयं मासोऽतीतस्तस्य यदवरममावास्यायास्तत्रौदनमभुञ्ज्महि ।। 'मर्य्यादावचने' ग्रहण इसलिये है कि—योऽयमपरिमितः काल आगामी तस्य यदवरं माध्यास्तत्र युक्ताऽध्येतास्महे ।। 'अवरस्मिन्' ग्रहण इसलिये है कि—परली मर्य्यादा को कहने वाला उपपद हो तो अगले सूत्र से विकल्प हो जाय ।। 'अनहोरात्राणाम्' ग्रहण इसलिये है कि—जहां दिन और रात का विभाग हो अथवा दिन और रात के द्वारा विभाग हो, वहां अनद्यतनवत् विधि का प्रतिषेध न हो । जैसे—योऽयं त्रिंशद्रात्र आगामी तस्य योऽवरः पञ्चदशरात्रः । योऽयं मास आगामी तस्य योऽवरः पञ्चदशरात्रः । योऽयं त्रिंशद्रात्र आगामी तस्य योऽवरोऽर्धमासस्तत्र युक्ताऽध्येतास्महे ।। यहां सब स्थानों में अनद्यतन में विहित प्रत्यय होते हैं । सामान्यतया अनद्यतन में, 'लङ्-लुट्' का विधान है अतः इन दोनों का ही प्रतिषेध है ।। १३७ ।।

परस्मिन्विभाषा[1] ।। १३८ ।।

प्राप्तविभाषेयम् । अवरस्मिन् पूर्वेण प्रतिषेध उच्यते । परस्मिन् विधिरेव प्राप्तो विकल्प उच्यते । भविष्यति मर्य्यादावचने कालविभागे चानहोरात्राणामिति सर्वमनुवर्त्तते । परस्मिन् । ७ । १ । विभाषा । १ । १ ।।

भविष्यत्यनहोरात्राणां कालविभागे परस्मिन् मर्य्यादावचन उपपदे धातोरनद्यतनवत् प्रत्ययो विकल्पेन भवति ।।

योऽयं संवत्सर आगामी तस्य यत्परं कार्त्तिक्यास्तत्र युक्ता अध्येष्यामहे । तत्र युक्ता अध्येतास्महे । तत्र सक्तून् पास्यामः । तत्र सक्तून् पातास्मः ।।

---

१. आ० सू० ७६७ ।।

'अनहोरात्राणाम्' इति किम्—योऽयं मास आगामी तस्य यः परः पञ्चदशरात्रस्तत्र युक्ता अध्येतास्महे ।। 'भविष्यति' इति किम्—योऽयं मासो व्यतीतस्तस्य या परा सप्तमी तत्र गृहमगच्छम् । तत्र सर्वानमिलम् ।। 'मर्य्यादावचने' इति किम्—योऽयमपरिमितः काल आगामी तस्य यत्परं कार्त्तिक्यास्तत्र युक्ता अध्येतास्महे ।। 'कालविभागे' इति किम्—योऽयमध्वा गन्तव्य आपाटलिपुत्रात्तस्य यत्परं कौशाम्ब्यास्तत्रारन्तास्महे । अत्र सर्वत्र प्रत्युदाहरणेष्वनद्यतनवत् प्रत्यया भवन्त्येव ।। १३८ ।।

यहां प्राप्तविभाषा है । अवरविभाग में पूर्वसूत्र से प्रतिषेध कहा है । परविभाग में विधि की प्राप्ति में अब विकल्प करके विधान किया है ।।

यहां 'भविष्यति, मर्य्यादावचने, कालविभागे, च, अनहोरात्राणाम्' इन सब पदों का अनुवर्त्तन है ।।

भविष्यत्काल में अहोरात्र को छोड़ कर कालविभाग में [परस्मिन्] परभाग की अपेक्षा में मर्य्यादावाची उपपद हो तो धातु से अनद्यतनवत् प्रत्यय [**विभाषा**] विकल्प से होता है ।।

जैसे—योऽयं संवत्सर आगामी तस्य यत्परं कार्त्तिक्यास्तत्र युक्ताऽध्येष्यामहे । तत्र युक्ता अध्येतास्महे । तत्र सक्तून् पास्यामः, तत्र सक्तून पातास्मः ।।

'अनहोरात्राणाम्' ग्रहण इसलिये है कि—योऽयं मास आगामी तस्य यः परः पञ्चदशरात्रस्तत्र युक्ता अध्येतास्महे ।। 'भविष्यति' ग्रहण इसलिये है कि—योऽयं मासो व्यतीतस्तस्य या परा सप्तमी तत्र गृहमगच्छम् । तत्र सर्वानमिलम् ।। 'मर्य्यादावचने' ग्रहण इसलिये है कि—योऽयमपरिमितः काल आगामी तस्य यत्परं कार्त्तिक्यास्तत्र युक्ता अध्येतास्महे ।। 'कालविभागे' ग्रहण इसलिये है कि—योऽयमध्वा गन्तव्य आपाटलिपुत्रात्तस्य यत् परं कौशाम्ब्यास्तत्रारन्तास्महे । यहां सब प्रत्युदाहरणों में अनद्यतनवत् प्रत्यय हो जाते हैं ।। १३८ ।।

लिङ्निमित्ते लृङ् क्रियातिपत्तौ[1] ।। १३९ ।।

भविष्यति-इत्यनुवर्त्तते । अन्यत्सर्वं निवृत्तम् । लिङ्निमित्ते । ७ । १ । लृङ् । १ । १ । क्रियातिपत्तौ । ७ । १ ।। लिङो निमित्तं [लिङ्निमित्तं] लिङर्थो हेतुहेतुमदित्यादयः । क्रियाया अतिपत्तिरनिष्पन्नता तस्याम् ।। लिङ्निमित्ते भविष्यत्काले क्रियातिपत्तौ सत्यां धातो 'लृङ्' प्रत्ययो भवति ।।

अभोक्ष्यत भवान् मांसेन यदि मत्समीप आसिष्यत् । अभोक्ष्यत भवान् घृतेन यदि मत्समीप आसिष्यत ।।

'भविष्यति' इति किम्—अध्यैषि शीघ्रं यद्यहं तत्रासम् ।। 'लिङ्निमित्ते' इति किम्—पठिष्याम्यवश्यम्[2] ।। 'क्रियातिपत्तौ' इति किम्—यद्यनित्यः शब्दः स्यात्तदैतद्युक्तं स्यात् ।। १३९ ।।

यहां 'भविष्यति' पद का अनुवर्त्तन है, और सब निवृत्त है ।।

---

१. आ० सू० ९३ २. अत्र क्रियातिपत्तिरपि नास्ति ।।

[लिङ्निमित्ते] भविष्यत्कालविषयक हेतुहेतुमद्भावादि 'लिङ्' लकार के निमित्त होने पर [क्रियातिपत्तौ] क्रिया की अतिपत्ति अर्थात् असिद्धि गम्यमान हो तो धातु से [लृङ्] 'लृङ्' प्रत्यय होता है ॥

जैसे—अभोक्ष्यत भवान् मांसेन यदि मत्समीप आमिष्यत । अभोक्ष्यत भवान् घृतेन यदि मत्समीप आमिष्यत ॥

'भविष्यति' ग्रहण इसलिये है कि—अध्यैषि शीघ्रं यद्यहं तत्रासम् ॥ 'लिङ्निमित्ते' ग्रहण इसलिये है कि—पठिष्याम्यवश्यम् ॥ 'क्रियातिपत्तौ' ग्रहण इसलिये है कि—यद्यनित्यः शब्दः स्यात्तदैतद् युक्तं स्यात् ॥ १३९ ॥

भूते च[1] ॥ १४० ॥

पूर्वं सूत्रं सर्वमनुवर्त्तते । भूते । ७ । १ । च । [अ०] ॥ भूते लिङ्निमित्ते क्रियातिपत्तौ 'लृङ्' प्रत्ययो भवति ॥

दृष्टो मया भिक्षुको बुभुक्षया पीडितः, अपरञ्च भोजयिताऽन्विष्यमाणः, यदि स भिक्षुकमद्रक्ष्यत्, तर्ह्यवश्यमभोजयिष्यत् ॥

'भूते च' इति सूत्रमधिकारार्थम्[2] ॥ १४० ॥

यहां पूर्व सूत्र से सब पदों का अनुवर्त्तन है ॥ 'भूते च' अधिकार 'लिङ् च' तक है ॥

[भूते] भूतविषयक लिङ्निमित्त होने पर क्रियातिपत्ति गम्यमान हो तो धातु से 'लृङ्' प्रत्यय होता है ॥

जैसे—दृष्टो मया भिक्षुको बुभुक्षया पीडितः, अपरश्च भोजयिताऽन्विष्यमाणः, यदि स भिक्षुकमद्रक्ष्यत् तर्ह्यवश्यमभोजयिष्यत् ॥ १४० ॥

वोताप्योः[3] ॥ १४१ ॥

लिङ्निमित्ते लृङ् क्रियातिपत्तौ–इत्यपि सर्वमनुवर्त्तते । वा । [अ०] । आ । [अ०] । उताप्योः । ७ । २ ॥ आङ्शब्दोऽत्र मर्य्यादायाम् ॥

'उताप्योः समर्थयोर्लिङ्' इत्यस्मात् प्राक् लिङ्निमित्ते क्रियातिपत्तौ भूते विभाषा 'लृङ्' भवतीत्यधिकारः । अर्थाद् भूतविकल्पाधिकारो लृङा सह सम्बध्यते न त्वन्येन ॥

[कथं नाम अत्र भवान् वृषलमयाजयिष्यत्, याजयेद् वा]

वा०—*भूते लृङुताप्या[4]दिषु[5]* ॥ १ ॥

---

१. आ० सू० ७६८ ॥

२. अनुवृत्तपूर्वसूत्रकोऽयमधिकारः **'लिङ् च'** (अ० ३ । ३ १५९) इति यावत् ॥

३. आ० सू० ७६९ ॥

४. आदिशब्दग्रहणाद् 'भूते' इत्यधिकारः **'लिङ् च'** (अ० ३ । ३ । १५९) इति यावदनुवर्त्तत इति ज्ञाप्यते ॥

५. वार्त्तिकमिदं भाष्ये **'भूते च'** (अ० ३ । ३ । १४० भाष्ये) इत्यत्र पठ्यते ॥

उताध्यैष्यत । अप्यध्यैष्यत । विकल्पाधिकार उतापिभ्यां प्राग् वेदितव्यः ॥ १४१ ॥

यहां 'लिङ्निमित्ते-लृङ्-क्रियातिपत्तौ, इन सब पदों का अनुवर्त्तन है। यहां आङ्-शब्द मर्य्यादा में है ॥

'उताप्योः समर्थयोर्लिङ्' इस सूत्र से पूर्व भूतकाल में लिङ् के निमित्त होने पर क्रियातिपत्ति में 'लृङ्' [वा] विकल्प करके होता है ॥ यह अधिकार समझना चाहिये अर्थात् भूत और विकल्पाधिकार का 'लृङ्' के साथ सम्बन्ध है अन्य के साथ नहीं ॥

जैसे—कथं नाम तत्र भवान् वृषलमयाजयिष्यत्, याजयेद्वा ॥

वा०—भूते लृङ्०—उताप्यादि उपपद हों तो भूत में 'लृङ्' होता है ॥

जैसे—उताध्यैष्यत । अप्यध्यैष्यत ॥

विकल्प का अधिकार 'उतापि' शब्द से पूर्व पूर्व जानना चाहिये ॥ १४१ ॥

गर्हायां लडपिजात्वोः[1] ॥ १४२ ॥

[गर्हायां०] इत्यादिसूत्रेषु कालत्रयें सामान्येन विधानम् । नीचकर्मणः कथन-प्रवृत्तिर्गर्हा ॥ गर्हायाम् । ७ । १ । लट् । १ । १ । अपिजात्वोः । ७ । २ ॥

गर्हायां गम्यमानायामपिजात्वोरुपपदयोः कालत्रये सर्वापवादो 'लट्' प्रत्ययो भवति ॥

अपि तत्र भवान् मांसं खादति गर्हितमेतत् । जातु तत्र भवान् मांसं खादति गर्हितमेतत् ॥ १४२ ॥

(गर्हायां०) इत्यादि सूत्रों से सामान्य करके तीन काल में प्रत्यय विधान है ॥

[गर्हायाम्] गर्हा (नीच कर्म के कथन की प्रवृत्ति) गम्यमान हो, [अपिजात्वोः] अपि और 'जातु' उपपद हों तो तीनों कालों में सब का अपवाद [लट्] 'लट्' लकार होता है ॥

जैसे—अपि तत्र भवान् मांसं खादति गर्हितमेतत् । जातु तत्र भवान् मांसं खादति गर्हितमेतत् ॥ १४२ ॥

विभाषा कथमि लिङ् च[2] ॥ १४३ ॥

चकारग्रहणात् 'गर्हायां-लट्' इत्यनुवर्त्तते । विभाषा । [अ० ।] कथमि । ७ । १ । लिङ् । १ । १ ॥ च [अ०] ॥

गर्हायां सत्यां कथंशब्द उपपदे धातोः कालत्रये 'लिङ्' वा 'ल्लट्' विकल्पेन भवतः । पक्षे [यथाविहितम्], लिङ्निमित्ते क्रियातिपत्तौ भूते वा 'लृङ्', [भविष्यति नित्यम्] ॥

१. आ० सू० ७७० ॥ २. आ० सू० ७७१ ॥

कथं नाम भवान् ब्राह्मणं क्रोशेत् । कथं नाम भवान् ब्राह्मणं क्रोशति । कथं नाम भवान् ब्राह्मणं क्रोक्ष्यति । कथं नाम भवान् ब्राह्मणं क्रोष्टा । कथं [नाम] भवान् ब्राह्मणमक्रोशत् । कथं [नाम] भवान् ब्राह्मणं चुक्रोश । लृङ्—कथं [नाम] भवान् ब्राह्मणमक्रोक्ष्यत् । यत्र लिङ्निमित्ते क्रियातिपत्तौ भूते विकल्पेन लृङुच्यते , तत्र लृङ्-पक्षे सामान्यभूते लुङपि भवति । कथं [नाम] भवान् ब्राह्मणमक्रुक्षत् ॥ १४३ ॥

चकार ग्रहण से 'गर्हायाम्' और 'लट्' पदों का अनुवर्त्तन है ॥

गर्हा गम्यमान हो और [कथमि] 'कथं' शब्द उपपद हो तो धातु से तीनों कालों में [लिङ्] 'लिङ्' और चकार से 'लट्' प्रत्यय [**विभाषा**] विकल्प से होते हैं, पक्ष में—यथा-विहित प्रत्यय होते हैं । लिङ्निमित्त में क्रियातिपत्ति हो तो भूत में विकल्प से 'लृङ्' होता है, और भविष्यत् में नित्य ॥

जैसे—कथं नाम भवान् ब्राह्मणं क्रोशेत् । कथं नाम भवान् ब्राह्मणं क्रोशति । कथं नाम भवान् ब्राह्मणं क्रोक्ष्यति । कथं नाम भवान् ब्राह्मणं क्रोष्टा । कथं नाम भवान् ब्राह्मणमक्रोशत् । कथं नाम भवान् ब्राह्मणं चुक्रोश । लृङ्—कथं नाम भवान् ब्राह्मणमक्रोक्ष्यत् ॥

जहां भूतविषयक लिङ्निमित्त में क्रियातिपत्ति होने पर विकल्प से लृङ् कहा, वहां लृङ् के पक्ष में सामान्यभूत में 'लुङ्' भी होता है ॥ जैसे—कथं नाम भवान् ब्राह्मणमक्रुक्षत् ॥ १४३ ॥

किंवृत्ते लिङ्लृटौ[1] ॥ १४४ ॥

गर्हायामित्यनुवर्त्तते । विभाषेति निवृत्तम् । किंवृत्ते । ७ । १ । लिङ्लृटौ । १ । २ ॥ किंवृत्ते [इत्यत्र] लिङि प्रकृते पुनर्ग्रहणं लण् निवृत्त्यर्थम् ॥

गर्हायां गम्यमानायां किंवृत्ते किंशब्दस्य प्रयोग उपपदे धातोः सामान्यकाले सर्वलकारापवादौ लिङ्-लृटौ भवतः । तथा किंशब्दस्य प्रयोग उपपदे धातोर्लिङ्निमित्ते क्रियातिपत्तौ भूते विकल्पेन 'लृङ्' भवति, पक्षे यथा प्राप्तः ॥

कतरो विद्यां निन्देत् । कतरो विद्यां निन्दिष्यति । लृङ्—कतरो वेदमनिन्दिष्यत् ॥ १४४ ॥

यहां 'गर्हायाम्' पद का अनुवर्त्तन है, विभाषा पद का नहीं ॥

लिङ् के अनुवर्त्तन होने पर पुनः लिङ् का ग्रहण 'लट्' की निवृत्ति के लिये है ॥

गर्हा गम्यमान हो तथा [**किंवृत्ते**] 'किं' शब्द का प्रयोग उपपद हो तो धातु से सामान्य-काल में सब लकारों के अपवाद [**लिङ्लृटौ**] 'लिङ्' और 'लृट्' प्रत्यय होते हैं ॥ तथा 'किं' शब्द का प्रयोग उपपद होने पर धातु से लिङ्निमित्त में क्रियातिपत्ति गम्यमान हो तो भूतकाल में विकल्प से 'लृङ्' होता है, पक्ष में—यथाप्राप्त प्रत्यय हो जाते हैं ॥

जैसे—कतरो विद्यां निन्देत् । कतरो विद्यां निन्दिष्यति । लृङ्—कतरो वेदमनिन्दिष्यत् ॥ १४४ ॥

---

१. आ० सू० ७७२ ॥

अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि[1] ॥ १४५ ॥

पूर्वं सूत्रं सर्वमनुवर्त्तते । अनवक्लृप्त्यमर्षयोः । ७ । २ । अकिंवृत्ते । ७ । १ । अपि [अ०] । अनवक्लृप्तिरसंभावना । अमर्षोऽसहनम् ॥

अनवक्लृप्त्यमर्षयोरभिधेययोः किंवृत्तेऽकिंवृत्ते चोपपदे धातोः सामान्यकाले सर्वलकारापवादौ लिङ्-लृटौ प्रत्ययौ भवतः ॥

अनवक्लृप्तौ—नावकल्पयामि न संभावयामि । यद्भवान् मांसं भुञ्जीत । कथंचिद्भवान् मांसं भुञ्जीत । कदाचिद्भवान् मांसं भुञ्जीत ॥ नावकल्पयामि न संभावयामि यद्भवान् मांसं भोक्ष्यते । कथंचिद्भवान् मांसं भोक्ष्यते । कदाचिद्भवान् मांसं भोक्ष्यते ॥ अमर्ष—न मर्षयामि न सहे यद्भवान् देशान्तरं गच्छेत् । कथंचिद्भवान् देशान्तरं गच्छेत् । कदाचिद्भवान् देशान्तरं गच्छेत् ॥ न मर्षयामि न सहे यद्भवान् देशान्तरं गमिष्यति । कथंचिद्भवान् देशान्तर गमिष्यति । कदाचिद्भवान् देशान्तरं गमिष्यति ॥ तथाऽनवक्लृप्त्यमर्षयोरभिधेययोः किंवृत्तेऽकिंवृत्ते चोपपदे लिङ्निमित्ते क्रियातिपत्तौ भूतकाले विकल्पेन लृङ्, पक्षे लिङ्लृटावुदाहृतौ । नावकल्पयामि न संभावयामि न मर्षयामि न सहे यद्भवान् वेदमनिन्दिष्यत् । कथंचिद्भवान् वेदमनिन्दिष्यत् । कदाचिद्भवान् वेदमनिन्दिष्यत् ॥ १४५ ॥

यहां पूर्वसूत्र के सब पदों का अनुवर्त्तन है । अनवक्लृप्ति = असम्भावना, अमर्ष = असहन को कहते हैं ॥

[अनवक्लृप्त्यमर्षयोः] अनवक्लृप्ति और अमर्ष अभिधेय हों तो [अकिंवृत्तेऽपि] किंवृत्त और अकिंवृत्त उपपद होने पर सामान्यकाल में सब लकारों के अपवाद 'लिङ्' और 'लृट्' प्रत्यय होते हैं ॥

जैसे—अनवक्लृप्ति में—नावकल्पयामि न संभावयामि यद्भवान् मांसं भुञ्जीत । कथंचिद्भवान् मांसं भुञ्जीत । कदाचित् भवान् मांसं भुञ्जीत ॥ नावकल्पयामि न संभावयामि यद्भवान् मांसं भोक्ष्यते । कथंचिद्भवान् मांसं भोक्ष्यते । कदाचिद् भवान् मांसं भोक्ष्यते ॥ अमर्ष में—न मर्षयामि न सहे यद्भवान् देशान्तरं गच्छेत् । कथंचिद्भवान् देशान्तरं गच्छेत् । कदाचिद्भवान् देशान्तरं गच्छेत् ॥ न मर्षयामि न सहे यद्भवान् देशान्तरं गमिष्यति । कथंचिद्भवान् देशान्तरं गमिष्यति । कदाचिद्भवान् देशान्तरं गमिष्यति ॥

अनवक्लृप्ति और अमर्ष अभिधेय होने पर किंवृत्त तथा अकिंवृत्त उपपद हों तो लिङ्निमित्त तथा क्रियातिपत्ति होने पर भूतकाल में विकल्प से 'लृङ्', तथा पक्ष में 'लिङ्-लृट्' का उदाहरण दिया है ॥

जैसे—नावकल्पयामि न सम्भावयामि, न मर्षयामि न सहे यद्भवान् वेदमनिन्दिष्यत् । कथंचिद्भवान् वेदमनिन्दिष्यत् । कदाचिद्भवान् वेदमनिन्दिष्यत् ॥ १४५ ॥

---

१. आ० सू० ७७३ ॥

किंकिलास्त्यर्थेषु लृट्[1] ॥ १४६ ॥

अनवक्लृप्त्यमर्षयोरित्यनुवर्त्तते । किंकिलास्त्यर्थेषु । ७ । ३ । लृट् । १ । १ ॥ किंकिलेति क्रोधद्योतकः समुदायो गृह्यते । अस्ति, भवति, विद्यते, इत्यस्त्यर्थाः । लृड्-ग्रहणं लिङ्निवृत्यर्थम् ॥

अनवक्लृप्त्यमर्षयोरभिधेययोः किंकिलास्त्यर्थेषूपपदेषु धातोः सामान्यकाले सर्वलकारापवादो 'लृट्' प्रत्ययो भवति ॥

न संभावयामि किंकिल भवान् धान्यं न दास्यति । न मर्षयामि किंकिल भवान् धान्यं न दास्यति । न संभावयामि न सहे, अस्ति भवति विद्यते वा भवान् मां त्यक्ष्यति । लिङ्निमित्ताभावादत्र लृङ् न भवति ॥ १४६ ॥

यहां 'अनवक्लृप्त्यमर्षयोः' पद का अनुवर्त्तन है ।' किंकिल' यह पदसमुदाय क्रोध का द्योतक है । 'अस्त्यर्थ' पद से यहां अस्ति, भवति, विद्यते इनका ग्रहण है ॥ 'लृट्' का ग्रहण 'लिङ्' की निवृत्ति के लिये है ॥

अनवक्लृप्ति और अमर्ष अभिधेय हों और [किंकिलास्त्यर्थेषु] किंकिल तथा अस्त्यर्थक उपपद हों तो धातु से सामान्यकाल में सब लकारों का अपवाद [लृट्] 'लृट्' प्रत्यय होता है ॥

जैसे—न सम्भावयामि किंकिल भवान् धान्यं न दास्यति । न मर्षयामि किंकिल भवान् धान्यं न दास्यति । न सम्भावयामि न सहे अस्ति भवति विद्यते वा भवान् मां त्यक्ष्यति । लिङ्-निमित्त का अभाव होने से यहां 'लृङ्' नहीं होता ॥ १४६ ॥

जातुयदोर्लिङ्[2] ॥ १४७ ॥

अनवक्लृप्त्यमर्षयोरित्यनुवर्त्तते । जातुयदोः । ७ । २ । लिङ् । १ । १ ॥

अनवक्लृप्त्यमर्षयोरभिधेययोर्जातुयदित्युपपदाद् धातोः सामान्यकाले सर्वलकारापवादो 'लिङ्' भवति । न संभावयामि जातु भवान् धर्मं त्यजेत्, यद्भवान् धर्मं त्यजेत् । न मर्षयामि न सहे जातु भवान् ब्राह्मणं हन्यात्, यद् भवान् ब्राह्मणं हन्यात् ॥

वा०—जातुयदोर्लिङ्विधाने यदायद्योरुपसंख्यानम्[3] ॥ १ ॥

यदायदीत्युपपदादपि धातोर्लिङ् भवति । न संभावयामि न मर्षयामि यदा भवद्विधः क्षत्रियं याजयेत् । यदि भवद्विधः क्षत्रियं याजयेत् । तथाऽनवक्लृप्त्यमर्षयोरभिधेययोर्जातुयदित्युपपदाद् धातोर्लिङ्निमित्ते क्रियातिपत्तौ सामान्यभूते विकल्पेन लृङ्, पक्षे लिङेव । न मर्षयामि न संभावयामि जातु भवद्विधः क्षत्रियमयाजयिष्यत् । यद्भवद्विधः क्षत्रियमयाजयिष्यत् । पक्षे भूतेऽपि सर्वापवादत्वाल्लिङ् भवति स उदाहृतः ॥ १४७ ॥

---

१. आ० सू० ७७४ ॥ २. आ० सू० ७७५ ॥

३. अ० ३ । ३ । १४७ भा० ॥ आ० वा० ७७६ ॥

यहां 'अनवक्लृप्त्यमर्षयोः' पद का अनुवर्त्तन है ॥

अनवक्लृप्ति और अमर्ष अभिधेय हों तो [जातुयदोः] जातु और यत् उपपद होने पर धातु से सामान्यकाल में सब लकारों का अपवाद [लिङ्] 'लिङ्' प्रत्यय होता है ॥

जैसे—न सम्भावयामि जातु भवान् धर्मं त्यजेत् । यद्भवान् धर्मं त्यजेत् । न मर्षयामि न सहे जातु भवान् ब्राह्मणं हन्यात् । यद्भवान् ब्राह्मणं हन्यात् ॥

वा०—जातुयदोर्लिङ्०—पूर्वोक्त लिङ्विधान में 'यदा यदि' उपपद होने पर भी धातु से 'लिङ्' प्रत्यय होता है ऐसा कहना चाहिये ॥

न सम्भावयामि न मर्षयामि यदा भवद्विधः क्षत्रियं याजयेत् । यदि भवद्विधः क्षत्रियं याजयेत् । तथा अनवक्लृप्ति और अमर्ष अभिधेय हों, जातु और यत् उपपद हों तो धातु से लिङ्-निमित्त में क्रियातिपत्ति गम्यमान होने पर सामान्यभूत में विकल्प से 'लृङ्', पक्ष में 'लिङ्' ही होता है ॥

जैसे—न मर्षयामि न सम्भावयामि जातु भवद्विधः क्षत्रियमयाजयिष्यत् । यद्भवद्विधः क्षत्रियमयाजयिष्यत् । पक्ष में—भूतकाल में भी सब लकारों का अपवाद होने से 'लिङ्' होता है । उसका उदाहरण दे चुके हैं ॥ १४७ ॥

यच्चयत्रयोः[1] ॥ १४८ ॥

अनवक्लृप्त्यमर्षयोरित्यनुवर्त्तते । यच्चयत्रयोः । ७ । २ । यच्चेति समुदायो गृह्यते ॥

अनवक्लृप्त्यमर्षयोर्गम्यमानयोर्यच्चयत्रेतिशब्दद्वयपूर्वाद् धातोः सामान्यकाले सर्वलकाराऽपवादो 'लिङ्' भवति ॥

न संभावयामि यच्च भवद्विधोऽनृतं वदेत् । यत्र भवद्विधोऽनृतं वदेत् । न मर्षयामि यच्च त्वं वदेः, यत्र त्वं वदेः ॥ तथाऽनवक्लृप्त्यमर्षयोरभिधेययोर्यच्चयत्रोपपदाद् धातोर्लिङ्निमित्ते क्रियातिपत्तौ भूतसामान्ये विकल्पेन लृङ्, पक्षे लिङुदाहृतः । न संभावयामि यच्च भवाननृतमवदिष्यत् । न मर्षयामि यत्र भवान् मामत्यक्ष्यत् ॥१४८॥

यहां अनवक्लृप्त्यमर्षयोः' पद का अनुवर्त्तन है । यहां यच्च इस पदसमुदाय का ग्रहण है ॥

अनवक्लृप्ति और अमर्ष गम्यमान हों तथा [यच्चयत्रयोः] यच्च और यत्र उपपद हों तो धातु से सामान्यकाल में सब लकारों का अपवाद 'लिङ्' होता है ॥

जैसे—न सम्भावयामि यच्च भवद्विधोऽनृतं वदेत्, यत्र भवद्विधोऽनृतं वदेत् । न मर्षयामि यच्च त्वं वदेः । यत्र त्वं वदेः । तथा अनवक्लृप्ति और अमर्ष अभिधेय होने पर यच्च यत्र उपपद हों तो धातु से लिङ्निमित्त में क्रियातिपत्ति गम्यमान हो तो सामान्यभूतकाल में विकल्प से लृङ्, पक्ष में लिङ् भी होता है ॥ लिङ् का उदाहरण ऊपर दे दिया है ॥

जैसे—न सम्भावयामि यच्च भवाननृतमवदिष्यत् । न मर्षयामि यत्र भवान् मामत्यक्ष्यत् ॥ १४८ ॥

---

१. आ० सू० ७७७ ॥

गर्हायाञ्च[1] ॥ १४९ ॥

'अनवक्लृप्त्यमर्षयोः' इति निवृत्तम्, यच्चयत्रयोः लिङित्यनुवर्त्तते । गर्हायाम् । ७ । १ । च [अ०] ॥ गर्हायां निन्दायामभिधेयायां यच्चयत्रोपपदाद् धातोः सामान्यकाले सर्वलकारापवादो 'लिङ्' भवति ॥ यच्च भवान् मांसं खादेत् । यत्र भवान् मांसं खादेत्, गर्हितमेतत् ॥ तथा लिङ्निमिते क्रियातिपत्तौ सामान्यभूते पूर्ववल्लृङ् । यच्च भवानेतदकरिष्यत् । यत्र भवानेतदकरिष्यत्, अन्याय्यमेतत् ॥ पक्षे सामान्यभूते लिङेव भवति ॥ १४९ ॥

यहां 'अनवक्लृप्त्यमर्षयोः' इस पद की निवृत्ति हो जाती है। परन्तु 'यच्चयत्रयोः' और 'लिङ्' इन पदों का अनुवर्त्तन है ॥

[गर्हायाम्] गर्हा अर्थात् निन्दा अभिधेय हो तो 'यच्च' और 'यत्र' उपपद होने पर धातु से सामान्यकाल में सब लकारों का अपवाद 'लिङ्' प्रत्यय होता है ॥

जैसे—यच्च भवान् मांसं खादेत् । यत्र भवान् मांसं खादेत्, गर्हितमेतत् ॥ तथा लिङ्-निमित्त में क्रियातिपत्ति गम्यमान होने पर सामान्यभूत में पूर्ववत् 'लृङ्' होता है। जैसे—यच्च भवानेतदकरिष्यत् । यत्र भवानेतदकरिष्यत्, अन्याय्यमेतत् । पक्ष में—सामान्यभूत में 'लिङ्' ही होता है ॥ १४९ ॥

चित्रीकरणे च[2] ॥ १५० ॥

'यच्चयत्रयोः' इत्यनुवर्त्तते, गर्हायामिति न । चित्रीकरणे । ७ । १ । च [अ०] ॥ चित्रीकरणमाश्चर्यमद्भुतम् ॥

चित्रीकरणे गम्यमाने यच्चयत्रोपपदाद् धातोः सामान्यकाले सर्वलकारापवादो 'लिङ्' भवति ॥

यच्च भवान् सदसि वदेत् । यत्र भवान् सदसि वदेत्, आश्चर्यमेतत् । तथा यच्च भवान् सदस्यवदिष्यत् । यत्र भवान् सदस्यवदिष्यदाश्चर्य्यमेतत् । अत्र पूर्ववत् सामान्यभूते लृङ् । पक्षे सर्वापवादो लिङुदाहृतः ॥ १५० ॥

इस सूत्र में 'यच्चयत्रयोः' पद का अनुवर्त्तन है । 'गर्हायाम्' पद का नहीं ॥ चित्रीकरण' आश्चर्य्य तथा अद्भुत् को कहते हैं ॥

[चित्रीकरणे] आश्चर्य्य गम्यमान हो तो 'यच्च यत्र' उपपद होने पर धातु से सामान्यकाल में सब लकारों का अपवाद 'लिङ्' प्रत्यय होता है ॥

जैसे—यच्च भवान् सदसि वदेत् । यत्र भवान् सदसि वदेत् । आश्चर्य्यमेतत् ॥

तथा—यच्च भवान् सदस्यवदिष्यत् । यत्र भवान् सदस्यवदिष्यत्, आश्चर्य्यमेतत् ॥ यहां पहिले की भांति सामान्यभूत में 'लृङ्', पक्ष में—सब लकारों का अपवाद' लिङ्' होता है ॥१५०॥

---

१. आ० सू० ७७८ ॥ २. आ० सू० ७७९ ॥

शेषे लृङयदौ[1] ॥ १५१ ॥

यच्चयत्रयोरिति नानुवर्त्तते लिङ् च । चित्रीकरण इत्यनुवर्त्तते । शेषे । ७ । १ । लृट् । १ । १ । अयदौ । ७ । १ ॥ यच्चयत्रापेक्षायां चित्रीकरणं शेषस्तस्मिन् ॥

शेषे चित्रीकरणे गम्यमाने यदिभिन्नोपपदाद् धातोः सामान्यकाले सर्वलकारापवादो 'लृङ्' भवति ॥ बधिरो नाम व्याकरणमध्येष्यते । अन्धो नाम मार्गे क्षिप्रं यास्यति, आश्चर्यमेतत् ॥

'शेषे' इति किम्—यच्च यत्र वा त्वं वदेः, आश्चर्यमेतत् । 'अयदौ' इति किम्—आश्चर्यं यदि बुद्धिहीनोऽधीयीत । अत्रोभयत्र लिङेव भवति । अत्र लिङ्निमित्ताभावाल्लृङ् न भवति । विकल्पग्रहणमत्र[2] निवृत्तम् । [इतोऽग्रे] भूते चेति सामान्येनाधिकारः स त्वनुवर्त्तत एव । तस्मिन् भूतसामान्ये लिङ्निमित्ते क्रियातिपत्तौ नित्यं लृङ् भविष्यति । अन्यविधानं च सामान्यकाले ॥ १५१ ॥

इस सूत्र में 'यच्चयत्रयोः' और 'लिङ्' इन पदों की निवृत्ति है, 'चित्रीकरणे' इस पद का अनुवर्त्तन है ॥

[शेषे] शेष (यच्च यत्र की अपेक्षा में) चित्रीकरण गम्यमान हो तो [अयदौ] यदि भिन्न उपपद होने पर धातु से सामान्यकाल में सब लकारों का अपवाद [लृट्] 'लृट्' प्रत्यय होता है ॥

जैसे—बधिरो नाम व्याकरणमध्येष्यते, अन्धो नाम मार्गे क्षिप्रं यास्यति, आश्चर्य्यमेतत् ॥

'शेषे' ग्रहण इसलिये है कि—यच्च यत्र वा त्वं वदेः, आश्चर्य्यमेतत् ॥ 'अयदौ' ग्रहण इस लिये है कि—आश्चर्य्यं यदि बुद्धिहीनोऽधीयीत । यहां दोनों स्थानों पर लिङ् ही होता है । यहां लिङ्निमित्त का अभाव होने से लृङ् नहीं होता ॥

इस सूत्र में विकल्प का निवर्त्तन है ॥ 'भूते' यह सामान्य अधिकार तो अनुवर्त्तित ही है । उस सामान्यभूत में लिङ्निमित्त होने पर क्रियातिपत्ति में नित्य लृङ् होता है । और विधान तो सामान्यकाल में है ॥ १५१ ॥

उताप्योः समर्थयोर्लिङ्[3] ॥ १५२ ॥

उताप्योः । ७ । २ । समर्थयोः । ७ । २ । लिङ् । १ । १ ॥ समर्थयोः समानार्थयोः ॥

समर्थयोरुताप्योरुपपदयोर्धातोः सामान्यकाले सर्वलकारापवादो 'लिङ्' भवति ॥ उताधीयीत । अप्यधीयीत । वाढमध्येष्यतेऽधीते वेत्यर्थः ॥

---

१. आ० सू० ७८० ॥

२. अत्र भाष्यम्—·····**तदाचार्य्यः सुहृद्भूत्वाऽन्वाचष्टे—विभाषा गर्हाप्रभृतौ प्रागुतापिभ्याम्** । अ० ३ । ३ । १४९ भा० ॥

३. आ० सू० ७८१ ॥

'समर्थयोः' इति किम्—उत दण्डः पतिष्यति । उतशब्दोऽत्र प्रश्ने । अपि धास्यति द्वारम् । अपिशब्दोऽत्राच्छादनेऽतो भिन्नार्थौ । लिङ्निमित्ते क्रियातिपत्तौ भूतसामान्ये नित्यं 'लृङ्' । उताध्यैष्यत । अप्यध्यैष्यत ॥ १५२ ॥

[समर्थयोः] समान अर्थवाले [उताप्योः] उत-अपि उपपद हों तो धातु से सामान्य-काल में सब लकारों का अपवाद [लिङ्] लिङ् होता है ॥

जैसे--उताऽधीयीत । अप्यधीयीत । वाढमध्येष्यते, अधीते वा—यह अर्थ हुआ ॥

'समर्थयोः' ग्रहण इसलिये है कि—उत दण्डः पतिष्यति । यहां 'उत' शब्द प्रश्न में है । अपिधास्यति द्वारम् । यहां 'अपि' शब्द आच्छादन अर्थ में है, अतः ये दोनों 'उत-अपि' भिन्नार्थक हैं ॥

लिङ्निमित्त होने पर क्रियातिपत्ति में नित्य लृङ् प्रत्यय होता है । जैसे—उताध्यैष्यत । अप्यध्यैष्यत ॥ १५२ ॥

कामप्रवेदनेऽकच्चिति[1] ॥ १५३ ॥

'लिङ्' इत्यनुवर्त्तते । कामप्रवेदने । ७ । १ । अकच्चिति । ७ । १ ॥ कामः कामना स्वेच्छा तस्याः प्रवेदनं ज्ञापनं तस्मिन् ॥

कामप्रवेदने सति कच्चिद्भिन्न उपपदे धातोः सामान्यकाले सर्वलकारापवादो 'लिङ्' भवति ॥ कामो मे भुञ्जीत भवान् । इच्छा मे भुञ्जीत भवान् । अभिलाषा मे भुञ्जीत भवान् ॥

'अकच्चिति' इति किम्—कामो मे कच्चिद् भोक्ष्यते भवान् । लिङ्निमित्ते क्रियातिपत्तौ भूतसामान्ये नित्यं लृङ् । कामो मेऽपठिष्यद्भवान् ॥ १५३ ॥

यहां 'लिङ्' पद का अनुवर्त्तन है ॥ कामप्रवेदन अर्थात् अपनी इच्छा का प्रकट करना ॥

[कामप्रवेदने] कामप्रवेदन गम्यमान हो तो [अकच्चिति] 'कच्चित्' से भिन्न अन्य उपपद होने पर धातु से सामान्यकाल में सब लकारों का अपवाद 'लिङ्' प्रत्यय होता है ॥

जैसे—कामो मे भुञ्जीत भवान् । इच्छा मे भुञ्जीत भवान् । अभिलाषा मे भुञ्जीत भवान् ॥

'अकच्चिति' ग्रहण इसलिये है कि—कामो मे कच्चिद्भोक्ष्यते भवान् । यहां लिङ् नहीं होता ॥

लिङ्निमित्त में क्रियातिपत्ति गम्यमान होने पर सामान्यभूत में नित्य लृङ् होता है ॥ जैसे—कामोऽमेऽपठिष्यद्भवान् ॥ १५३ ॥

---

१. आ० सू० ७८२ ।

सम्भावनेऽलमिति चेत्सिद्धाप्रयोगे[1] ॥ १५४ ॥

'लिङ्' इत्यनुवर्त्तते । संभावने । ७ । १ । अलम् । अ० । इति [अ०] । चेत् [अ०] । सिद्धाप्रयोगे । ७ । १ ॥ संभावनमनुमानम् । अलं शब्दोऽत्र समर्थवाची । यद् दृष्ट्वाऽनुमीयते तदलं समर्थो भवेत् । तस्य चालंशब्दस्याप्रयोगोऽर्थमात्रं स्यात्, तत्रास्य प्रयोगो मा भूत् ॥ ईदृशे संभावनेऽर्थे वर्त्तमानाद्धातोः सामान्यकाले सर्वलकारापवादो 'लिङ्' भवति । अपि भित्तिं शिरसा पातयेत् । अपि वृक्षं हस्तेन त्रोटयेत् । अप्युष्ट्रं धावत्यारोहेत् । कंचिन् मनुष्यं दृष्ट्वाऽनुमीयते, एवमयं कर्त्तुं योग्योऽस्ति । अलमर्थो गम्यते न तु प्रयुज्यते ॥

'अलम्' इति किम्—पिपासार्त्तो मृगोऽवश्यं पास्यति जलम् । 'सिद्धाप्रयोगे' इति किम्—अलं देवदत्तो हस्तिनं हनिष्यति ॥

[लिङ्निमित्ते] क्रियातिपत्तौ भूतसामान्ये नित्यं 'लृङ्' । अपि सिंहं शस्त्रहीनोऽहनिष्यत् । अत्रापि यत्रालमर्थो भवेत्तत्र लृङेव ॥ १५४ ॥

यहां 'लिङ्' पद का अनुवर्त्तन है ॥ सम्भावन = अनुमान को कहते हैं ॥ अलं शब्द यहां समर्थवाची है, अर्थात् जिसे देख कर यह अनुमान किया जा सके कि यह अलम् अर्थात् समर्थ है । जहां अलं शब्द के प्रयोग के विना उसके अर्थ की प्रतीति होती हो, ऐसी अवस्था में [सम्भावने] सम्भावन अर्थ में वर्त्तमान धातु से सामान्यकाल में सब लकारों का अपवाद लिङ् प्रत्यय होता है ॥

जैसे—अपि भित्तिं शिरसा पातयेत् । अपि वृक्षं हस्तेन त्रोटयेत् । अप्युष्ट्रं धावत्यारोहेत् ॥ किसी मनुष्य को देखकर यह अनुमान किया जाता है कि—यह ऐसा करने के योग्य है । यहां अलमर्थ तो जाना जाता है परन्तु 'अलं' शब्द का प्रयोग नहीं ॥

'अलम्' ग्रहण इसलिये है कि—पिपासार्त्तो मृगोऽवश्यं पास्यति जलम् ॥ 'सिद्धाप्रयोगे' ग्रहण इसलिये है कि—अलं देवदत्तो हस्तिनं हनिष्यति । यहां उभयत्र 'लिङ्' नहीं होता । लिङ्-निमित्त में क्रियातिपत्ति गम्यमान होने पर सामान्यभूतकाल में नित्य 'लृङ्' होता है ॥ जैसे—अपि सिंहं शस्त्रहीनोऽहनिष्यत् ॥ इस विषय में भी जहां अलमर्थ हो वहां 'लृङ्' ही होता है ॥ १५४ ॥

विभाषा धातौ सम्भावनवचनेऽयदि[2] ॥ १५५ ॥

प्राप्तविभाषेयम् । पूर्वसूत्रेण नित्ये प्राप्ते विकल्प उच्यते । पूर्वसूत्रं सर्वमनुवर्त्तते ॥

विभाषा [अ०] । धातौ । ७ । १ । संभावनवचने । ७ । १ । अयदि । ७ । १ ॥ संभावनमुच्यतेऽनेन स संभावनवचनस्तस्मिन्, सिद्धाप्रयोगेऽलमर्थे सति यच्छब्दरहिते संभावनवचने धातावुपपदे धातोः सामान्यकाले विकल्पेन 'लिङ्' भवति । पक्षे लृट् सामान्यभविष्यत्त्वात् । संभावयामि भवान् पाठयेत् । संभावयामि भवान् पाठयिष्यति । क्रियातिपत्तौ भूते च नित्यं लृङ् । संभावयामि भवानपाठयिष्यत् ॥

'अयदि' इति किम्—संभावयामि यदध्यापयेद्भवान् ॥ १५५ ॥

---

१. आ० सू० ७८३ ॥ २. आ० सू० ७८४ ॥

यह सूत्र प्राप्तविभाषा है। पूर्वसूत्र से नित्य की प्राप्ति में विकल्प कहा है ॥ पूर्वसूत्र से सब पदों की अनुवृत्ति आती है ॥

'अलं' शब्द के प्रयोग के विना उसके अर्थ की प्रतीति होती हो तथा [अयदि] यच्छब्द-वर्जित [सम्भावनवचने] सम्भावन अर्थ को कहने वाला [धातौ] धातु उपपद हो तो धातु से सामान्यकाल में [विभाषा] विकल्प करके 'लिङ्' होता है, पक्ष में—सामान्यभविष्यत् होने से 'लृट्' प्रत्यय हो जाता है ॥

जैसे—सम्भावयामि भवान् पाठयेत् । सम्भावयामि भवान् पाठयिष्यति । क्रियातिपत्ति गम्यमान होने पर भूत में नित्य 'लृङ्' होता है ॥ जैसे—सम्भावयामि भवानपाठयिष्यत् ॥

'अयदि' ग्रहण इसलिये है कि—सम्भावयामि यदध्यापयेद्भवान् ॥ १५५ ॥

हेतुहेतुमतोर्लिङ्[1] ॥ १५६ ॥

हेतुहेतुमतोः । ७ । २ । लिङ् । १ । १ ॥ हेतु कारणं, हेतुमत्कार्य्यम् ॥

वा०—हेतुहेतुमतोर्लिङ् वा ॥ १ ॥

हेतुहेतुमतोरर्थयोर्धातोर्भविष्यति काले विभाषा 'लिङ्' भवति । पक्षे च लृट् ॥ दक्षिणेन चेद्यायान्न शकटं पर्य्याभवेत् । दक्षिणेन चेद्यास्यति न शकटं पर्य्याभविष्यति । दक्षिणेन यानं हेतुः । अपर्य्याभवनं हेतुमत् ॥

वा०—भविष्यदधिकारे च ॥ २ ॥

अस्मिन् प्रकरणे सामान्यकालाधिकारोऽस्ति । तत्र नियमार्थं वार्त्तिकं, न त्वन्यस्मिन् काले हेतौ हेतुमति च लिङ् स्यात् । तेन नियमेनात्र न भवति—वर्षतीति धावति, हन्तीति पलायते । भूते पूर्ववन्नित्यं 'लृङ्' । दक्षिणेन चेदयास्यन्न शकटं पर्य्याभविष्यत् ॥ १५६ ॥

हेतु = कारण तथा हेतुमत् कार्य्य कहलाता है ॥

वा०—हेतुहेतुमतो०—[हेतुहेतुमतोः] हेतु और हेतुमान् अर्थ में धातु से भविष्यत्काल में विकल्प से [लिङ्] 'लिङ्' प्रत्यय होता है, और पक्ष में 'लृट्' ॥

जैसे—दक्षिणेन चेद्यायान्न शकटं पर्य्याभवेत् । दक्षिणेन चेद्यास्यति न शकटं पर्य्याभविष्यति ॥

यहां दक्षिण से जाना हेतु और अपर्य्याभवन = न गिरना हेतुमत् अर्थात् कार्य्य है ॥

वा०—भविष्यद०—इस प्रकरण में सामान्यकाल का अधिकार है, अतः यह वार्त्तिक नियम के लिये है कि—अन्य काल में हेतु तथा हेतुमान् में 'लिङ्' न हो । उस नियम से यहां नहीं होता—वर्षतीति धावति । हन्तीति पलायते । भूतविषय में तो पूर्ववत् नित्य 'लृङ्' हो जाता है ॥ जैसे—दक्षिणेन चेदयास्यन्न शकटं पर्य्याभविष्यत् ॥ १५६ ॥

---

१. आ० सू० ७८५ ॥

इच्छार्थेषु लिङ्लोटौ[1] ॥ १५७ ॥

इच्छार्थेषु । ७ । ३ । लिङ्लोटौ । १ । २ ॥ इच्छार्थो येषां तेषु । इच्छार्थेषु धातुषूपपदेषु धातोः सामान्यकाले सर्वलकारापवादौ लिङ्लोटौ प्रत्ययौ भवतः । इच्छामि भुञ्जीत भवान् । इच्छामि भुङ्क्ताम्भवान् ॥

वा०—*कामप्रवेदनं चेत् ॥ १ ॥*

कामस्य स्वेच्छायाः प्रवेदनं प्रकाशनं यदि स्यात्तदास्य सूत्रस्य प्रवृत्तिः स्यात् । तथैवोदाहृतम् ॥

'कामप्रवेदनम्' इति किम्—इह मा भूत् । इच्छन् कटं करोति ॥ १५७ ॥

[इच्छार्थेषु] इच्छार्थ वाले धातु उपपद हों तो धातु से सामान्यकाल में सब लकारों के अपवाद [लिङ्लोटौ] 'लिङ्' और 'लोट्' प्रत्यय होते हैं ॥

जैसे—इच्छामि **भुञ्जीत** भवान् । इच्छामि भुङ्क्तां भवान् ॥

वा०—**कामप्रवेदनं चेत्**—'कामप्रवेदन' अर्थात् अपनी इच्छा का प्रकाश करना यदि हो तब इस सूत्र की प्रवृत्ति है । ऐसे ही उदाहरण दिये हैं ॥

'कामप्रवेदनम्' ग्रहण इसलिये है कि=यहां न हो 'इच्छन् कटं करोति' ॥ १५७ ॥

समानकर्तृकेषु तुमुन्[2] ॥ १५८ ॥

इच्छार्थेष्वित्यनुवर्त्तते । समानकर्तृकेषु । ७ । ३ । तुमुन् । १ । १ ॥ लिङ्-लोटोरपवादस्तुमुन् विधीयते ॥

समानकर्तृकेष्विच्छार्थेषु धातुषूपपदेषु धातोः सामान्यकाले 'तुमुन्' प्रत्ययो भवति । इच्छामि भोक्तुम् । कामये भोक्तुम् । वाञ्छामि भोक्तुम् । अत्रेच्छाया भोजनस्य च कर्त्तैक एव ॥

'समानकर्तृकेषु' इति किम्—देवदत्तं भुञ्जा[न]मिच्छति यज्ञदत्तः ॥ १५८ ॥

यहां 'इच्छार्थेषु' पद का अनुवर्त्तन है । 'लिङ्-लोट्' के अपवाद 'तुमुन्' प्रत्यय का विधान है ।

[**समानकर्तृकेषु**] समानकर्तृक इच्छार्थक धातु उपपद हों तो धातु से सामान्यकाल में [तुमुन्] 'तुमुन्' प्रत्यय होता है ॥

जैसे—इच्छामि **भोक्तुम्** । कामये **भोक्तुम्** । वाञ्छामि **भोक्तुम्** । यहां इच्छा और भोजन का कर्त्ता एक ही है ॥

'समानकर्तृकेषु' ग्रहण इसलिये है कि—देवदत्तं भुञ्जानमिच्छति यज्ञदत्तः ॥ १५८ ॥

---

१. आ० सू० ७८६ ॥ २. आ० सू० १३२७ ॥

लिङ् च[1] ॥ १५९ ॥

'इच्छार्थेषु समानकर्तृकेषु' इत्यनुवर्त्तते । पृथग्योग उत्तरार्थः । लिङ् । १ । १ । च । [अ०] ॥

समानकर्तृकेष्विच्छार्थेषु धातुपूपपदेषु धातोर्लिङपि भवति ॥ अध्यापयेयमि-[ती]च्छति । अधीयीयेति वाञ्छति । भुञ्जीयेत्यभिलषति ॥

अग्रे च वर्त्तमानाधिकारः । अत्रैव 'भूते लृङ्' निवर्त्तते । सामान्यकालविधायकं प्रकरणं निवृत्तम् ॥ १५९ ॥

यहां 'इच्छार्थेषु' और 'समानकर्तृकेषु' पदों का अनुवर्त्तन है, पृथक् सूत्र उत्तरसूत्रों में अनुवृत्ति के लिये है ॥

समानकर्तृक इच्छार्थक धातु उपपद हों तो धातु से [लिङ् च] 'लिङ्' भी होता है ॥

जैसे—अध्यापयेयमितीच्छति । अधीयीय–इति वाञ्छति । भुञ्जीय–इत्यभिलषति ॥

आगे वर्त्तमान का अधिकार है । अतः 'भूते–लृङ्' यहीं निवृत्त हो जाता है, और सामान्य-कालविधायक प्रकरण भी समाप्त हुआ ॥ १५९ ॥

इच्छार्थेभ्यो विभाषा वर्त्तमाने[2] ॥ १६० ॥

'लिङ्' इत्यनुवर्त्तते । इतोऽग्रे पादपर्य्यन्तं वर्त्तमानाधिकारः । तत्र सामान्य-विहितस्य '**वर्त्तमाने लट्**[3]' इत्यादिप्रकरणस्य विशेषत्वेनापवादा उच्यन्ते । अर्थाद्वि-ध्यादिषु वर्त्तमाने 'लट्' न भविष्यति ॥ इच्छार्थेभ्यः । ५ । ३ । विभाषा [अ०] । वर्त्तमाने । ७ । १ ॥

इच्छार्थेभ्यो धातुभ्यो वर्त्तमानकाले विकल्पेन लिङ्, पक्षे च लडेव भवति । इच्छेत् । इच्छति । कामयेत । कामयते । वाञ्छेत् । वाञ्छति ॥ १६० ॥

यहां 'लिङ्' पद का अनुवर्त्तन है । यहां से आगे पाद की समाप्ति तक वर्त्तमान का अधिकार है । सामान्यविहित जो 'वर्त्तमाने लट्' इत्यादि प्रकरण है उसके विशेष अपवाद कहे हैं । अर्थात् विध्यादि अर्थों में वर्त्तमानकाल में 'लट्' नहीं होगा ॥

[इच्छार्थेभ्यः] इच्छार्थक धातुओं से [वर्त्तमाने] वर्त्तमानकाल में [विभाषा] विकल्प से 'लिङ्' होता है, पक्ष में 'लट्' ही होता है ॥

जैसे—इच्छेत् । इच्छति । कामयेत । कामयते । वाञ्छेत् । वाञ्छति ॥ १६० ॥

---

१. आ० सू० ७८७ ॥ २. आ० सू० ७८८ ॥

३. अ० ३ । २ । १२३ ॥

विधिनिमन्त्रणामन्त्रणाऽधीष्टसम्प्रश्नप्रार्थनेषु लिङ्[1] ॥ १६१ ॥

लिङित्यनुवर्त्तमाने पुनर्लिङ्ग्रहणं विभाषानिवृत्यर्थम् । वर्त्तमान इत्यनुवर्त्तते ॥ विधि० प्रार्थनेषु । ७ । ३ । लिङ् । १ । १ ॥ विधिर्नाम प्रेषणम् । निमन्त्रणम्[2] = निकटस्थान् जनानाहूय तेषां शास्त्रानुसारेण सत्कारः । आमन्त्रणम् = दूरस्थानां सत्कारायाह्वानम् । अधीष्टम् = सत्कारपूर्विका व्यापारणा । संप्रश्नः = संदिग्धस्य निश्चयार्थं प्रच्छनम् । प्रार्थना = याच्ञा ॥

विध्यादिष्वर्थेषु धातोर्वर्त्तमानकाले 'लिङ्' प्रत्ययो भवति । वर्त्तमानाधिकारस्यापवादः ॥

विधौ—ओदनं पचेत् । ग्रामं गच्छेत् । जनान् सत्कुर्यात् । विद्यां पठेत् ॥ निमन्त्रणे—अद्येह भवान् भुञ्जीत ॥ आमन्त्रणे—इह भवानासीत ॥ अधीष्टे—माणवकं मे भवानुपनयेत् ॥ संप्रश्ने—किं[3] भवान् न्यायमधीयीत ॥ प्रार्थना[याम्]—भवदनुकम्पातो व्याकरणमधीयीय ॥

विध्यादिविशिष्टेषु कर्त्रादिषु लिङ् भवतीति । तेन देवदत्तो भवन्तमामन्त्रयते । अत्र धात्वर्थात्प्रत्ययार्थ आमन्त्रणं पृथङ्नास्तीति 'लिङ्' न भविष्यति ॥ १६१ ॥

'लिङ्' अनुवर्त्तमान होने पर फिर लिङ्ग्रहण 'विभाषा' पद की निवृत्ति के लिये है । यहां वर्त्तमाने' पद का अनुवर्त्तन है ॥

विधि = आज्ञा । निमन्त्रण = निकटवर्त्ती पुरुषों को बुलाकर उनका शास्त्रानुकूल सत्कार करना । आमन्त्रण = दूरस्थ मनुष्यों को सत्कार के लिये बुलाना । अधीष्ट = सत्कारपूर्वक प्रेरणा । सम्प्रश्न = सन्दिग्ध के निश्चय के लिये पूछना । प्रार्थना = याच्ञा कहाती है ॥

[विधि० **प्रार्थनेषु**] विधि, निमन्त्रण, आमन्त्रण, अधीष्ट, सम्प्रश्न, प्रार्थना इन अर्थों में धातु से वर्त्तमानकाल में [**लिङ्**] 'लिङ्' प्रत्यय होता है ॥

वर्त्तमान अधिकार का यह अपवाद है । विधि में—ओदनं पचेत् । ग्रामं गच्छेत् । जनान् सत्कुर्यात् । विद्यां पठेत् । निमन्त्रण में—अद्येह भवान् भुञ्जीत । आमन्त्रण में—इह भवानासीत । अधीष्ट में—माणवकं मे भवानुपनयेत् । सम्प्रश्न में—किं भवान् न्यायमधीयीत । प्रार्थना में—भवदनुकम्पातो व्याकरणमधीयीय । विध्यादिविशिष्ट कर्त्ता आदि में 'लिङ्' होता है, अतः—

---

१. अ० सू० ७७ ॥

२. अत्र भाष्यम्—**अथ निमन्त्रणामन्त्रणयोः को विशेषः । सन्निहितेन निमन्त्रणं भवति । असन्निहितेनामन्त्रणम् । नैषोऽस्ति विशेषः । असन्निहितेनापि निमन्त्रणं भवति सन्निहितेन चामन्त्रणम् । एवं तर्हि यन्नियोगतः कर्त्तव्यं तन्निमन्त्रणम् । किं पुनस्तत् । हव्यं कव्यञ्च । ब्राह्मणेन सिद्धं भुज्यतामित्युक्तेऽधर्मः प्रत्याख्यातुः । आमन्त्रणे कामचारः** (अ० ३ । ३ । ६१) ॥

३. अधीच्छामः—किं, इत्यादीनि पदानि तदर्थबोधनपराणि, तेषामभावेऽपि अधीष्टसंप्रश्नादीनामर्थानां प्रतीतिसम्भवात् ॥

'देवदत्तो भवन्तमामन्त्रयते' यहां धात्वर्थ से प्रत्ययार्थ आमन्त्रण पृथक् नहीं रह जाता इस कारण 'लिङ्' नहीं होता ॥ १६१ ॥

लोट् च[1] ॥ १६२ ॥

विध्यादिष्वित्यनुवर्त्तते । लोट् । १ । १ च । [अ०] ॥ पृथक्करणमुत्तरार्थम् ॥ कर्त्रा [दि] विशिष्टेषु विध्यादिषु वर्त्तमानकाले धातो 'लोट्' प्रत्ययो भवति ॥

विधौ—वाराणसीं गच्छतु भवान् । भोजनं करोतु भवान् ॥ निमन्त्रणे—अद्येह भुङ्क्ताम्भवान् ॥ आमन्त्रणे—अमुत्रास्ताम्भवान् ॥ अधीष्टे—अधीच्छाम इह भवान् मासं निवसतु ॥ संप्रश्ने—किं भवान् व्याकरणमधीताम् ॥ प्रार्थना-[याम्]-न्यायं पाठयतु भवान् । वेदं पाठयतु भवान् ॥ १६२ ॥

यहां 'विधि० प्रार्थनेषु' पद की अनुवृत्ति है। उत्तरसूत्रों में अनुवृत्ति के लिये पृथक् सूत्र किया है ॥

कर्त्रादिविशिष्ट विधि आदि अर्थ हों तो वर्त्तमान काल में धातु से [लोट् च] 'लोट्' प्रत्यय होता है ॥

जैसे—विधि में—वाराणसीं गच्छतु भवान् । भोजनं करोतु भवान् ॥ निमन्त्रण में—अद्येह भुङ्क्तां भवान् ॥ आमन्त्रण में—अमुत्रास्तां भवान् ॥ अधीष्ट में—अधीच्छाम इह भवान् मासं निवसतु ॥ सम्प्रश्न में—किं भवान् व्याकरणमधीताम् ॥ प्रार्थना में—न्यायं पाठयतु भवान् । वेदं पाठयतु भवान् ॥ १६२ ॥

प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च[2] ॥ १६३ ॥

चकारात्लोडप्यनुवर्त्तते । प्रैषाति० कालेषु । ७ । ३ । कृत्याः । १ । ३ । च । [अ०] ॥ प्रेषणम्=प्रैषः । अतिसर्जनमतिसर्गः[3] । प्राप्तः कालः=प्राप्तकालः ॥

प्रैषादिष्वर्थेषु वर्त्तमानाद् धातोः कृत्यसंज्ञकाः प्रत्यया भवन्ति, चकारा 'ल्लोट्' च ॥ ग्रामो गन्तव्यः । भोजनं करणीयम् । कार्यम् । कृत्यम् ॥ लोट्=प्रेषितो भवान् गच्छतु ग्रामम्, [अतिसृष्टः, प्राप्तकालः] ॥ १६३ ॥

चकार ग्रहण से यहां 'लोट्' पद का अनुवर्त्तन है ॥ प्रैष=प्रेरणा करना । अतिसर्ग=इच्छापूर्वक आज्ञा देना । प्राप्तकाल=समय का उपस्थित होना ॥

[प्रैषातिसर्ग०] प्रैष, अतिसर्ग, प्राप्तकाल इन अर्थों में वर्त्तमान धातु से [कृत्याः] कृत्यसंज्ञक प्रत्यय होते हैं, चकार से 'लोट्' भी हो जाता है ॥

जैसे—ग्रामो गन्तव्यः । भोजनं करणीयम् । कार्य्यम् । कृत्यम् ॥ लोट्—प्रेषितो भवान् गच्छतु ग्रामम्, अतिसृष्टः, प्राप्तकालः ॥ १६३ ॥

---

१. आ० सू० ६४ ॥ २. आ० सू० ७८९ ॥

३. कामचाराभ्यनुज्ञा ॥

लिङ् चोर्ध्वमौहूर्त्तिके[1] ॥ १६४ ॥

पूर्वं सूत्रं सर्वमनुवर्त्तते ॥ लिङ् । १ । १ । च । [अ०] । ऊर्ध्वमौहूर्त्तिके । ७ । १ ॥ प्रैषादिषु गम्यमानेषूर्ध्वमौहूर्त्तिके काले धातो 'लिङ्' चात् कृत्याश्च भवन्ति ॥

मुहूर्त्त[स्य] पश्चाद्भवता ग्रामो गन्तव्यः । भोजनं कर्त्तव्यम् । करणीयम् । कार्य्यं वा । मुहूर्त्तस्य पश्चाद् ग्रामं गच्छेत्, गच्छतु वा [भवानिह प्रेषितः' अतिसृष्टः' प्राप्तकालो वा] ॥ १६४ ॥

यहां पूर्वसूत्रों से सब पदों की अनुवृत्ति है ॥

प्रैष, अतिसर्ग, प्राप्तकाल ये अर्थ गम्यमान हों तो [**ऊर्ध्वमौहूर्त्तिके**] दो घड़ी से ऊपर काल कहने में धातु से 'लिङ्' प्रत्यय [च] और चकार से 'कृत्य' प्रत्यय भी होते हैं ॥

जैसे—मुहूर्त्तस्य पश्चाद्भवता ग्रामो गन्तव्यः । भोजनं कर्त्तव्यम्, करणीयम्, कार्य्यं वा । मुहूर्त्तस्य पश्चाद् ग्रामं गच्छेत्, गच्छतु वा । भवानिह प्रेषितः, अतिसृष्टः, प्राप्तकालो वा ॥ १६४ ॥

स्मे लोट्[2] ॥ १६५ ॥

कृत्यानां लिङश्चापवादः । प्रैषादिषूर्ध्वमौहूर्त्तिक इत्यनुवर्त्तते । स्मे । ७ । १ । लोट् । १ । १ ॥

प्रैषादिषु गम्यमानेषु ऊर्ध्वमौहूर्त्तिके काले स्मोपपदाद् धातो 'लोट्' प्रत्ययो भवति ॥ ऊर्ध्वं मुहूर्त्ताद्भवान् भुनक्तु[3] स्म । ग्रामं गच्छतु स्म । शिष्यं पाठयतु स्म ॥ १६५ ॥

यह सूत्र कृत्यप्रत्ययों का तथा 'लिङ्' का अपवाद है । यहां 'प्रैषादिषु' तथा 'ऊर्ध्वमौहूर्त्तिके' इन दोनों पदों का अनुवर्त्तन है ॥

प्रैषादि अर्थ गम्यमान हों तो दो घड़ी से ऊपर के काल में [**स्मे**] स्म शब्द उपपद होने पर धातु से [**लोट्**] 'लोट्' प्रत्यय होता है ॥

जैसे—ऊर्ध्वं मुहूर्त्ताद्भवान् भुनक्तु स्म । ग्रामं गच्छतु स्म । शिष्यं पाठयतु स्म ॥१६५॥

अधीष्टे च[4] ॥ १६६ ॥

'स्मे लोट्' इत्यनुवर्त्तते । अधीष्टे लिङपि प्राप्तस्तस्यापवादः । अधीष्टे । ७ । १ । च । [अ०] ॥

---

१. आ० सू० ७९० ॥ २. आ० सू० ७९१ ॥

३. **'भुजोऽनवने'** (अ० १ । २ । ६६) इत्यवने (पालने) आत्मनेपदाभावः ।

४. आ० सू० ७९२ ॥

अधीष्टे गम्यमाने स्मोपपदाद् धातोर्वर्त्तमानकाले 'लोट्' प्रत्ययो भवति ।। अधीच्छामि ब्राह्मण बालानध्यापय स्म । अधीच्छामि राजन्नग्निहोत्रं जुहुधि [स्म] ।। १६६ ।।

यहां 'स्मे' 'लोट्' पदों का अनुवर्त्तन है । अधीष्ट में 'लिङ्' भी प्राप्त था उसका यह अपवाद है ।।

[अधीष्टे] सत्कारपूर्विका चेष्टा गम्यमान हो तो स्म उपपद होने पर धातु से वर्त्तमान काल में 'लोट्' प्रत्यय होता है ।।

जैसे—अधीच्छामि ब्राह्मण बालानध्यापय स्म । अधीच्छामि राजन्नग्निहोत्रं जुहुधि स्म ।। १६६ ।।

कालसमयवेलासु तुमुन्[1] ।। १६७ ।।

प्रैषादयोऽत्रानुवर्त्तन्ते । काल० वेलासु । ७ । ३ । तुमुन् । १ । १ ।।

प्रैषादिषु गम्यमानेषु कालसमयवेलासु[2] शब्दत्रयोपपदेषु धातोर्वर्त्तमानकाले 'तुमुन्' प्रत्ययो भवति ।। कालो भोक्तुम् । समयो भोक्तुम् । वेला भोक्तुम् ।।

'प्रैषादिषु' इति किमर्थम्—इह मा भूत्—कालः पचति भूतानि कालः संहरति प्रजाः[3] । अत्र प्रैषादयो न सन्तीति तुमुनभावः ।। १६७ ।।

यहां 'प्रैषादिषु' पद का अनुवर्त्तन है ।।

प्रैषादि अर्थ गम्यमान हों तो [काल-समय-वेलासु] काल, समय, वेला ये तीन शब्द उपपद हों तो धातु से वर्त्तमानकाल में [तुमुन्] 'तुमुन्' प्रत्यय होता है ।।

जैसे—कालो भोक्तुम् । समयो भोक्तुम् । वेला भोक्तुम् ।।

'प्रैषादिषु' ग्रहण इसलिये है कि—कालः पचति भूतानि कालः संहरति प्रजा । यहां प्रैषादि के न होने से 'तुमुन्' नहीं होता ।। १६७ ।।

लिङ् यदि[4] ।। १६८ ।।

पूर्वसूत्रेण तुमुन् प्राप्तस्तस्यापवादः । कालादयोऽनुवर्त्तन्ते । [लिङ्] । १ । १ । यदि । ७ । १ ।।]

कालादिषूपपदेषु यच्छब्दपूर्वाद् धातोर्वर्त्तमानकाले 'लिङ्' प्रत्ययो भवति ।। कालो यद् भुञ्जीत । समयो यद् भुञ्जीत । वेला यद् भुञ्जीत ।।

---

१. आ० सू० १३३० ।।

२. 'पर्य्यायोपादानं पर्य्यायान्तरनिवृत्त्यर्थम् । अन्ये त्वाहुः—अवसरो भोक्तुमित्यादावपि तुमुन् दृश्यते····· तस्मादर्थग्रहणार्थं पर्य्यायोपादानम् । यथा—**निमित्तकारणहेतुषु** (अ०२ । ३ । २८) इत्यत्र' इति हरदत्तः ।।

३. चा० नी० अ० ६ । श्लो० ७ ।। ४. आ० सू० ७९३ ।।

'यदि' इति किम्—कालः पठितुम् ॥ १६८ ॥

पूर्वसूत्र से तुमुन् प्राप्त था उस का यह अपवाद है। यहां कालादिकों का अनुवर्त्तन है ॥

कालादि उपपद होने पर [यदि] यच्छब्दपूर्वक धातु से वर्त्तमानकाल में [लिङ्] 'लिङ्' प्रत्यय होता है ॥

जैसे—कालो यद् भुञ्जीत। समयो यद् भुञ्जीत। वेला यद् भुञ्जीत ॥

'यदि' ग्रहण इसलिये है कि—कालः पठितुम्। यहां 'तुमुन्' ही होता है ॥ १६८ ॥

अर्हे कृत्यतृचश्च[1] ॥ १६९ ॥

'लिङ्' अनुवर्त्तते। अर्हे। ७। १। कृत्यतृचः। १। ३। च। [अ०] ॥

अर्हे योग्ये कर्त्तरि वाच्ये धातोर्वर्त्तमानकाले कृत्यतृचः प्रत्यया भवन्ति, चकारा-'ल्लिङ्' च ॥

पठितव्या विद्या भवता, पाठ्या वा, पठनीया वा। पठिता विद्यायाः भवान्। पठेद्विद्यां भवान्। अर्हेत् सत्कारं भवान्। पठितुं योग्योऽस्तीत्यर्थः ॥

स्त्र्यधिकारात् प्राग्[2] वाऽसरूपविधिर्भवति। अग्रे तु साकल्येन न प्रवर्त्ततेऽतोऽर्हे विहितो लिङ् कृत्यतृचां बाधकः स्यादतोऽयमारम्भः ॥ १६९ ॥

यहां 'लिङ्' पद का अनुवर्त्तन है ॥

[अर्हे] योग्य कर्त्ता कहने में धातु से वर्त्तमानकाल में [कृत्यतृचः] 'कृत्य' और 'तृच्' प्रत्यय होते हैं [च] और चकार से 'लिङ्' भी होता है ॥

जैसे—पठितव्या विद्या भवता। पाठ्या वा। पठनीया वा। पठिता विद्यायाः भवान्। पठेद्विद्यां भवान्। अर्हेत् सत्कारं भवान्। अर्थात् आप पढ़ने योग्य हैं ॥

स्त्र्यधिकार के पूर्व पूर्व वाऽसरूपविधि होती है। आगे पूर्णतया वाऽसरूपविधि नहीं होती अतः अर्हे अर्थ में विहित 'लिङ्', 'कृत्य' और 'तृच्' का बाधक हो जाता इस कारण यह सूत्र रचा है ॥ १६९ ॥

आवश्यकाधमर्ण्ययोर्णिनिः[3] ॥ १७० ॥

आवश्यकाधमर्ण्ययोः। ७। २। णिनिः। १। १ ॥

---

१. आ० सू० ७९४ ॥

२. अत्र तु भाष्यम्—विध्यर्थं तु स्त्रियाः प्रागिति वचनात्* । विध्यर्थं तु प्रैषादिषु कृत्यानां वचनम्। अयं प्रैषादिष्वर्थेषु लोड् विधीयते स विशेषविहितः सामान्यविहितान् कृत्यान् बाधेत। वासरूपेण कृत्या अपि भविष्यन्ति। न स्युः। किं कारणम्। स्त्रियाः प्रागिति वचनात्। प्राक् स्त्रिया वाऽसरूपः। (अ० ३। ३। १६३ भाष्ये) ॥

३. आ० सू० १४९६ ॥

आवश्यकमवश्यं कर्त्तव्यता । आधमर्ण्यम् = ऋणता ।। तद्विशिष्टे कर्त्तरि वाच्ये धातोर्वर्त्तमानकाले 'णिनिः' प्रत्ययो भवति । धर्मोपदेशी । अवश्यं धर्मं उपदेष्टव्य इति तस्य प्रतिज्ञा । प्रातःस्नायी । अवश्यं प्रातः स्नानीयम् [इति तस्य प्रतिज्ञा] ।। आधमर्ण्ये—शतं दायी । सहस्रं दायी । अत्र '**अकेनोर्भविष्यदाधमर्ण्ययोः**'[1] इति षष्ठीप्रतिषेधः, अतः समासो न भवति ।। १७० ।।

[आवश्यकाधमर्ण्ययोः] आवश्यक और आधमर्ण्य अर्थविशिष्ट कर्त्ता वाच्य हो तो धातु से वर्त्तमानकाल में [णिनिः] 'णिनि' प्रत्यय होता है ।।

जैसे—धर्मोपदेशी । अर्थात् अवश्य ही धर्म का उपदेश करने की प्रतिज्ञा वाला ।। प्रातः-स्नायी । अवश्य प्रातः स्नान करने वाला ।।

आधमर्ण्य में—शतं दायी । सहस्रं दायी । यहां 'अकेनोर्भविष्यदाधमर्ण्ययोः' इस सूत्र से षष्ठी का प्रतिषेध हो जाता है, इस कारण समास नहीं होता है ।। १७० ।।

कृत्याश्च[2] ।। १७१ ।।

'आवश्यकाधमर्ण्ययोः' इत्यनुवर्त्तते । कृत्याः । १ । ३ । च । [अ०] ।।

आवश्यकाधमर्ण्य-विशिष्टेऽर्थे धातोर्वर्त्तमानकाले कृत्या भवन्ति ।।

ब्राह्मणेन षडङ्गो वेदोऽध्येयो ज्ञेयश्च[3] । ब्राह्मणेन षडङ्गसहितस्य वेदस्याध्ययनमवश्यं कर्त्तव्यम् ।। आधमर्ण्ये—शतं दातव्यम् । सहस्रं देयम् । शतं सहस्रं वाऽस्योपरि ऋणमस्ति ।। १७१ ।।

यहां 'आवश्यकाधमर्ण्ययोः' पद का अनुवर्त्तन है ।।

आवश्यक और आधमर्ण्य में धातु से वर्त्तमानकाल में [कृत्याश्च] 'कृत्य' प्रत्यय होते हैं ।।

जैसे—ब्राह्मणेन षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति, अर्थात् ब्राह्मण को चाहिये कि षडङ्ग सहित वेद का अध्ययन करे ।। आधमर्ण्य में—शतं दातव्यम् । सहस्रं देयम् । अर्थात् सौ या हजार रुपया इस पर ऋण है ।। १७१ ।।

शकि लिङ् च[4] ।। १७२ ।।

'कृत्याः' इत्यनुवर्त्तते । शकि । ७ । १ । लिङ् । १ । १ । च । [अ०] ।।
शकीति प्रकृत्यर्थोऽभिधीयते ।।

---

१. अ० २ । ३ । ७० ।। २. आ० सू० १४९७ ।

३. महाभाष्यस्य पस्पशाह्निके त्वेवम्—**ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च** ।। अत्र तु केचित्—कर्त्तरि वाच्येऽयं विधिः, तत् पक्षे—**भव्यगेय०** (अ० ३ । ४ । ६८) आदयः कर्त्तृवाचिनः कृत्या अत्रोदाहर्त्तव्याः ।।

४. आ० सू० ७९५ ।।

शक्त्यर्थविशिष्टे धात्वर्थे धातोर्वर्त्तमानकाले 'लिङ्' भवति चात् कृत्याश्च ।। भवान् शत्रुं जयेत् । भवता शत्रुर्जेतव्यः । भवता शत्रुर्जय्यः । जेतुं शक्नोतीत्यर्थः ।। १७२ ।।

यहां 'कृत्याः' पद का अनुवर्त्तन है । शकि से यहां शक्यार्थ अभिधेय है ।।

[शकि] शक्यार्थ गम्यमान हो तो धातु से वर्त्तमानकाल में [लिङ् च] 'लिङ्' प्रत्यय होता है, चकार से 'कृत्य' प्रत्यय होते हैं ।।

जैसे—भवान् शत्रुं जयेत् । भवता शत्रुर्जेतव्यः । भवता शत्रुर्जय्यः । अर्थात् आप शत्रु को जीत सकते हैं ।। १७२ ।।

आशिषि लिङ्लोटौ[1] ।। १७३ ।।

आशिषि । ७ । १ । लिङ्लोटौ । १ । २ । आशीरप्राप्तस्य पदार्थस्य प्राप्तीच्छा ।।

आशिषि गम्यमाने धातोर्वर्त्तमानकाले लिङ्-लोटौ प्रत्ययौ भवतः । लटोऽपवादौ ।।

बुद्धिस्ते शुद्धा भूयात् । बुद्धिस्ते शुद्धा भवतु । शतं वर्षाणि ते पुत्रो जीव्यात् । शतं वर्षाणि ते पुत्रो जीवतु । आयुष्मान् भव सौम्य ।।

'आशिषि' इति किम्—शतं वर्षाणि जीवति । अत्र वर्त्तमान उत्सर्गत्वाल्लडेव भवति ।। १७३ ।।

आशीः = अप्राप्त पदार्थ की प्राप्ति की इच्छा को कहते हैं । यह सूत्र 'लट्' का अपवाद है ।।

[आशिषि] आशीर्वाद गम्यमान होने पर धातु से वर्त्तमानकाल में [लिङ्लोटौ] 'लिङ्' और 'लोट्' प्रत्यय होते हैं ।।

जैसे—बुद्धिस्ते शुद्धा भूयात् । बुद्धिस्ते शुद्धा भवतु । शतं वर्षाणि ते पुत्रो जीव्यात् । शतं वर्षाणि ते पुत्रो जीवतु । आयुष्मान् भव सौम्य ।।

'आशिषि' ग्रहण इसलिये है कि—शतं वर्षाणि जीवति । यहां वर्त्तमान के उत्सर्ग होने से 'लट्' ही होता है ।। १७३ ।।

क्तिच्क्तौ च संज्ञायाम्[2] ।। १७४ ।।

'आशिषि' इत्यनुवर्त्तते । क्तिच्क्तौ । १ । २ । च । [अ०] । संज्ञायाम् । ७ । १ ।।

प्रत्ययार्थेन संज्ञायां गम्यमानायामाशिष्यभिधेये धातोः 'क्तिच्-क्तौ' प्रत्ययौ भवतः ।।

---

१. आ० सू० ६५ ।। २. आ० सू० १४९८ ।।

सामान्यविहितस्य क्तप्रत्ययस्य क्तिच् बाधकः स्यादिति मत्वा पुनः क्त-ग्रहणं क्रियते—तन्तिः । सातिः । भूतिः । देवदत्तः । यज्ञदत्तः । चकारो विशेषणार्थः । **'न क्तिचि०'**[1] इति सामान्येन ग्रहणं मा भूत् ॥ १७४ ॥

यहां 'आशिषि' पद का अनुवर्त्तन है ॥

प्रत्ययार्थ से [संज्ञायाम्] संज्ञा गम्यमान होने पर आशीर्वाद अभिधेय हो तो धातु से [क्तिच्क्तौ] 'क्तिच्' और 'क्त' प्रत्यय होते हैं ॥ सामान्यविहित 'क्त' प्रत्यय का 'क्तिच्' बाधक हो जाता ऐसा सोच कर पुनः 'क्त' ग्रहण किया है ॥

जैसे—तन्तिः । सातिः । भूतिः । देवदत्तः । यज्ञदत्तः । चकार विशेषण के लिये है कि—'न क्तिचि०' इसमें सामान्य करके ग्रहण न हो ॥ १७४ ॥

माङि लुङ्[2] ॥ १७५ ॥

'आशिषि लिङ्लोटौ' इत्यनुवर्त्तते[3] । माङि । ७ । १ । लुङ् । १ । १ ॥

माङ्पूर्वाद् धातोराशिषि[4] गम्यमानायां वर्त्तमानकाले 'लुङ्-लिङ्-लोटः' प्रत्यया भवन्ति ॥

मा कार्षीत् । इह मा भूत् । इह मा भूवन् । रोगस्त्वां मा हन्यात् । मा ते सङ्गोऽस्त्वकर्मणि[5] ॥ १७५ ॥

यहां 'आशिषि' और 'लिङ्लोटौ पदों का अनुवर्त्तन है ॥

---

१. अ० ६ । ४ । ३९ ॥ २. आ० सू० ७९६ ॥

३. मण्डूकप्लुतिन्यायेन इति शेषः । अन्ये वृत्तिकाराः **'आशिषि लिङ्लोटौ'** (अ० ३ । ३ । १७३) इति नानुवर्त्तयन्ति सर्वलकाराणामपवादो लुङ् इति च वदन्ति । तत्र कथं—'मा भवतु, पापं मा भविष्यति' इति, अत्राह **काशिकाकारः**—असाधुरेवायम् । केचिदाहुः—अङ्दिपरो मा शब्दो विद्यते तस्यायं प्रयोग इति (प्रायेणान्येऽपि ग्रन्थकारा अत्राऽनुकूलाः) । तदसाधुरेव । **'मा ते सङ्गोऽस्त्वकर्मणि'** (गी० अ० २ । श्लो० ४७) इत्यादिशिष्टप्रयोगाणामसन्दिग्धैव साधुता । न चान्योऽङित् माशब्दः प्रतिषेधवाची विद्यते यस्यायं प्रयोगः स्यात् । तदुक्तं भाष्यकृता—**आङ्माङोः सानुबन्धकयोर्निर्देशो गतिकर्मप्रवचनीयप्रतिषेधसम्प्रत्ययार्थः ।.....माङः प्रतिषेधसम्प्रत्ययार्थं** इति (अ० ६ । १ । ७४ भा०) ॥

यत्तु **नागेशभट्ट** आह—'असाधुत्वमेतादृशप्रयोगाणामनार्षाणामिति' तत्तस्याज्ञानविजृम्भितमेव उपलभ्यन्ते हि—**'मा ते सङ्गोऽस्त्वकर्मणि'** इत्यादय आर्षप्रयोगाः । तस्मादेवंभूतानां प्रयोगाणां साधुत्वज्ञापनायानुवर्त्तनीयावेव 'लिङ्लोटौ' ॥

४. लिङ्लोड्भ्यां सहोच्चारणाद् 'आशिषि' इति पदं ताभ्यामेव सम्बध्यते, न लुङा, तथैव चोदाहृतमिति बोध्यम् ॥

५. भगवद्गीता—अ० २ । श्लो० ४७ ॥

[माङि] माङ्पूर्वक धातु से आशीर्वाद गम्यमान होने पर वर्त्तमानकाल में [लुङ्] 'लुङ्' 'लिङ्' और 'लोट्' प्रत्यय होते हैं ॥

जैसे—मा कार्षीत् । इह मा भूत् । इह मा भूवन् । रोगस्त्वां मा हन्यात् । मा ते सङ्गोऽस्त्वकर्मणि ॥ १७५ ॥

स्मोत्तरे लङ् च[1] ॥ १७६ ॥

'लुङ्' अनुवर्त्तते । स्मोत्तरे । ७ । १ । लङ् । १ । १ । च । [अ०] स्मशब्द उत्तरो यस्मात् तस्मिन् । स्मोत्तरे माङ्युपपदे धातोर्लङ् प्रत्ययो भवति चाल् 'लुङ्' च ॥

मा स्म करोत् । मा स्म कार्षीत् । मा स्म पचत् । मा स्म पाक्षीत् । स्मादि-विशेषोपाधीनामभावे लडेव भविष्यति ॥ १७६ ॥

॥ इति तृतीयाध्यायस्य तृतीयः पादः ॥

यहां 'लुङ्' पद का अनुवर्त्तन है ॥

[स्मोत्तरे] स्म शब्द परे रहते माङ् उपपद हो तो धातु से [लङ्] 'लङ्' प्रत्यय और चकार से 'लुङ्' भी होता है ॥

जैसे—मा स्म करोत् । मा स्म कार्षीत् । मा स्म पचत् । मा स्म पाक्षीत् । स्म आदि उपपद के विना 'लट्' ही होगा ॥ १७६ ॥

[तीसरे अध्याय का तृतीयपाद समाप्त हुआ]

---

१. आ० सू० ७९७ ॥

अथ तृतीयाध्याये चतुर्थः पादः ॥

धातुसम्बन्धे प्रत्ययाः[1] ॥ १ ॥

धातुसम्बन्धे । ७ । १ । प्रत्ययाः । १ । ३ । धातुसम्बन्ध इत्यत्रोत्तरपदलोपः । धातोरर्थो धात्वर्थः धात्वर्थस्यान्येन शब्दार्थेन सम्बन्धो धातुसम्बन्धः ॥

धातुसम्बन्धे सति भिन्नकालोक्ताः प्रत्यया अपि कालान्तरे [साधवो[2]] भवन्ति ॥

अग्निष्टोमयाजी पुत्रोऽस्य जनिता[3] । अग्निष्टोमयाजीति भूतकालो[4] जनितेत्यनद्यतनभविष्यत्कालेन सम्बध्यते । जनितेत्युत्पत्तिर्धात्वर्थस्तस्य भविष्यति प्रवृत्तिः । तत्सम्बन्धे 'अग्निष्टोमयाजीति' भूतकालविहितो [णिनि]प्रत्ययोऽत्र विधीयते ॥ पुत्रो जनिष्यमाण आसीत् । अत्र जनिष्यमाण इति भविष्यति काले तस्यासीदिति भूतकालेन सह सम्बन्धः ॥

प्रत्ययाधिकारेऽनुवर्त्तमाने[5] पुनः प्रत्यय-ग्रहणस्यैतत् प्रयोजनम्—अधातोरर्थात् प्रातिपदिकाद्विहितानामपि [तद्धित]प्रत्ययानां धातुसम्बन्धे साधुत्वं यथा स्यात् । गोमानासीत्[6] । गोमान् भविता । अत्र गोमानिति वर्त्तमानकाले मतुप् । तस्याऽऽसीदिति भूतकालेन, भवितेत्यनद्यतनभविष्यत्कालेन सह सम्बन्धः ॥ १ ॥

'धातुसम्बन्धे' यहां उत्तरपदलोपी समास है । जैसे—'धातोरर्थो धात्वर्थस्यान्येन शब्दार्थेन सम्बन्धो धातुसम्बन्धः' यहां अर्थ पद का लोप है ॥

[धातुसम्बन्धे] धातुसम्बन्ध होने पर भिन्नकाल में विहित [प्रत्ययाः] प्रत्यय भी कालान्तर में साधु हो जाते हैं ॥

---

१. आ० सू० ७९८ ॥

२. साधुत्वमात्रमत्र विधीयते न तु कालान्तरे प्रत्ययविधिरिति ॥

३. वाक्यमेवैतदेवंजातीयं यत्र यथाकालविहितानामपि प्रत्ययानां सम्बन्धो भवति **'अग्निष्टोमयाजी पुत्रोऽस्य जनिता'** इत्यत्र 'अग्निष्टोमयाजीति' पदे भविष्यत्कालस्य प्रतीतिमात्रत्वमेव । सम्बन्धप्रतिपत्तिस्तु भाष्य एवं प्रदर्शिता—**एवं तर्हि वाक्यमेवैतदेवंविषयं प्रयुज्यते । अग्निष्टोमयाजीत्येतत् तस्मिन् भविता । कस्मिन् । योऽस्य पुत्रो जनिता । कदा । यदानेनाग्निष्टोमेनेष्टं भवति ॥**

४. भूतः कालोऽस्येति बहुव्रीहिः ॥

५. अत्र भाष्यम्—**प्रत्यय इति वर्त्तमाने पुनः प्रत्ययग्रहणं किमर्थम् । अधातुप्रत्ययानामपि धातुसम्बन्धे साधुत्वं यथा स्यात् ॥**

६. अत्र भाष्यम्—**नैषा गवां सत्ता कथ्यते । किं तर्हि गौमत्सत्तैषा कथ्यते । अस्त्यत्र वर्त्तमानकालोऽस्तिः । कथं तर्हि भूतभविष्यत्सत्ता गम्यते । 'धातुसम्बन्धे प्रत्ययाः'** (अ० ३ । ४ । १) इति ॥ अ० ५ । २ । ९४ भा० ॥

जैसे—अग्निष्टोमयाजी पुत्रोऽस्य जनिता। यहां 'अग्निष्टोमयाजी' यह भूतकाल में है परन्तु 'जनिता' इन अनद्यतनभविष्यत् में वर्त्तमान शब्द के साथ सम्बन्ध है ॥

'जनिता' इसमें धात्वर्थ उत्पत्ति है उसकी भविष्यत् में प्रवृत्ति है, उस भविष्यत्काल के सम्बन्ध में 'अग्निष्टोमयाजी' यहां भूतकाल में विहित णिनि प्रत्यय का विधान किया है ॥

पुत्रो जनिष्यमाणःआसीत्—यहां 'जनिष्यमाण' भविष्यत्काल में है। उसका 'आसीत्' इस भूतकाल के साथ सम्बन्ध है ॥

प्रत्यय अधिकार के अनुवर्त्तित होने पर पुनः प्रत्यय-ग्रहण का यह प्रयोजन है कि—अधातु अर्थात् प्रातिपदिक से विहित तद्धित प्रत्ययों का भी धातुसम्बन्ध में साधुत्व होजाय ॥

जैसे—गोमानासीत्। गोमान् भविता। 'गोमान्' इसमें 'मतुप्' प्रत्यय वर्त्तमानकाल में है। उसका 'आसीत्' इस भूतकालवाची के साथ तथा अनद्यतनभविष्यत्कालवाची 'भविता' इस पद के साथ सम्बन्ध हो जाता है ॥ १ ॥

क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः[1] ॥ २ ॥

सर्वलकारापवादो लोट् ॥ क्रियासमभिहारे। ७। १। लोट्। १। १। लोटः। ६। १। हिस्वौ। १। २। वा। [अ०] च। [अ०।] तध्वमोः। ६। २॥ क्रियायाः समभिहारो भृशं करणम्। तत्र विकल्पेन यङ् विधीयते, पक्षे स्वस्वकाले सर्वे लकाराः प्राप्तास्तेषां बाधनार्थं लोड् विधीयते ॥

क्रियासमभिहारे गम्यमाने सर्वस्मिन् काले सर्वलकारापवादो धातोर्लोट् प्रत्ययो भवति, तस्य लोटः स्थाने हिस्वावादेशौ नित्यं भवतः। त-ध्वम्-भाविनस्तु लोटः स्थाने हिस्वावादेशौ विकल्पेन भवतः। पक्षे त-ध्वमावेव तिष्ठतः ॥

वर्त्तमानविषये तावत्—स भवात् लुनीहि लुनीहीत्येवायं लुनाति। तौ भवन्तौ लुनीहि [2]लुनीहीतीमौ लुनीतः। ते भवन्तो लुनीहि लुनीहीतीमे लुनन्ति। त्वं लुनीहि लुनीहीति लुनासि। युवां लुनीहि लुनीहीति लुनीथः। त-ध्वम्-विषये लोण्मध्यमबहुवचनविषये हिस्वौ वा भवतः। यूयं लुनीत लुनीतेति लुनीथ। यूयं लुनीहि लुनीहीति लुनीथ। अहं लुनीहि लुनीहीति लुनामि। आवां लुनीहि लुनीहीति लुनीवः। वयं लुनीहि लुनीहीति लुनीमः ॥ भूतविषये—स भवान् लुनीहि लुनीहीत्यलावीत्। तौ भवन्तौ लुनीहि लुनीहीत्यलाविष्टाम्। ते भवन्तो लुनीहि लुनीहीत्यलाविषुः। त्वं लुनीहि लुनीहीत्यलावीः। युवां लुनीहि लुनीहीत्यलाविष्टम्। त-ध्वमोर्वा—यूयं लुनी[त] लुनीतेत्यलाविष्ट [यूयं लुनीहि लुनीहीत्यलाविष्ट] अहं लुनीहि लुनीहीत्यलाविषम्। आवां लुनीहि लुनीहीत्यलाविष्व। वयं लुनीहि लुनीहीत्यलाविष्म ॥ भविष्यद्विषये—स

१. आ० सू० ७९९ ॥

२. अत्र द्विर्वचनं तु—क्रियासमभिहारे द्वे भवतः (अ० ८। १। १२ भा० वा०) ॥

भवान् लुनीहि लुनीहीति लविष्यति । तौ भवन्तौ लुनीहि लुनीहीति लविष्यतः । ते भवन्तो लुनीहि लुनीहीति लविष्यन्ति । एवं रीत्या मध्यमोत्तमयोरप्युदाहार्य्यम् ॥

स्व-विषये—स भवानधीष्वाधीष्वेत्येवायमधीते । तौ भवन्तावधीष्वाधीष्वेतीमावधीयाते । ते भवन्तोऽधीष्वाऽधीष्वेतीमेऽधीयते । त्वमधीष्वाधीष्वेत्यधीषे । युवामधीष्वाधीष्वेत्यधीयाथे । त-ध्वमोर्विषये वा—यूयमधीध्वमधीध्वेमित्यधीध्वे । यूयमधीध्वाधीष्वेत्यधीध्वे । एवमुत्तमेऽपि ॥ भूतविषये—स भवानधीष्वाधीष्वेत्यध्यगीष्ट । अध्यैष्ट वा ॥ भविष्यद्विषये—स भवानधीष्वाधीष्वेत्यध्येष्यते ॥

एवं सर्वेषु लकारेषु सर्वेषु पुरुषेषु सर्वेषु वचनेषु चोदाहरणान्यूह्यानि । न तु सर्वाणि [1]लिखितुं शक्यन्ते । हिस्वौ लोडादेशौ विधीयेते तत्र लकारस्यातिङ्त्वात् पदसंज्ञा न प्राप्नोति । तस्येदं समाधानम्—लकारस्य कृत्त्वात्प्रातिपदिकसंज्ञा । प्रातिपदिकात् स्वाद्युत्पत्तिः । 'सुबन्तं पदम्' इति पदसंज्ञा । **विभक्तिस्वरप्रतिरूपकाश्चेत्यव्ययत्वमव्ययात्** सुपां लुग्भविष्यति । **[इह तर्हि स भवान् लुनीहि लुनीहीत्येवायं लुनाति,** *तिङ्ङतिङः'* (अ० ८ । १ । २८) **इति निघातो न प्राप्नोति । योगविभागः करिष्यते । क्रियासमभिहारे लोड् भवति । ततो लोटो हिस्वौ भवतः, लोडित्येवानुवर्त्तते लोटौ यौ हिस्वाविति । कथं च तध्वमोरिति । वा च तध्वंभाविनो लोट इत्येवमेतद् विज्ञायते]** ॥ २ ॥

यह लोट् सब लकारों का अपवाद है । क्रियासमभिहार = क्रिया के पुनः पुनः करने को कहते हैं । क्रियासमभिहार में विकल्प से यङ् विहित है, पक्ष में अपने अपने काल में सब लकार प्राप्त थे उन सब को बाधने के लिये लोट् प्रत्यय का विधान किया है ॥

[क्रियासमभिहारे] क्रियासमभिहार गम्यमान हो तो धातु से सब कालों में सब लकारों का अपवाद **[लोट्]** लोट् प्रत्यय होता है, उस **[लोटः]** लोट् के स्थान में **[हिस्वौ]** 'हि' और 'स्व' ये आदेश नित्य हो जाते हैं परन्तु **[तध्वमोः]** त-ध्वम् होने वाले लोट् के स्थान में **[वा]** विकल्प से 'हि-स्व' आदेश होते हैं । पक्ष में 'त' और 'ध्वम्' ही रहते हैं ॥

जैसे—वर्त्तमानविषय में—**स भवान् लुनीहि लुनीहीत्येवायं लुनाति** इत्यादि । इसी प्रकार वर्त्तमान के शेष उदाहरण तथा भूत और भविष्यत् के उदाहरण भी मूल संस्कृत में देख लेवें । क्योंकि सब लकारों को दर्शाना कठिन है ॥

'हि' और 'स्व' लोट् के आदेश कहे हैं । अतः लकार के अतिङ् होने से पदसंज्ञा नहीं पाती ? । उसका यह समाधान है कि—लकार के कृत् होने से प्रातिपदिकसंज्ञा, प्रातिपदिक से स्वाद्युत्पत्ति होकर 'सुबन्तं पदं' इस नियम से पदसंज्ञा हो जायगी—'विभक्तिस्वरप्रतिरूपकाश्च०' इससे निपात होकर अव्ययसंज्ञा पुनः अव्ययों से सुपों का लुक् हो जायगा । इस पक्ष में—स भवान् लुनीहि लुनीहीत्येवायं लुनाति । यहां 'तिङ्ङतिङः' से निघात की प्राप्ति नहीं होती,

१. अत्र कुटस्यादिः कुटादिरिति षष्ठीसमासमप्याश्रित्य गुणाभावः ॥

अतः इस दोष की निवृत्ति के लिये योगविभाग करेंगे—[क्रियासमभिहारे लोट्] क्रिया के समभिहार में लोट् होता है, तदनन्तर [लोटो हिस्वौ] उस लोट् के स्थान में 'हि' और 'स्व' ये आदेश हो जाते हैं और लोट् इस पद की अनुवृत्ति आने के कारण वे 'हि' और 'स्व' लोट्धर्म वाले होते हैं। तथा [वा च तध्वमोः] त और ध्वम्-भावी (जिस लोट् के स्थान में त और ध्वम् होने हैं उस) लोट् के स्थान में विकल्प से 'हि' और 'स्व' होते हैं ॥ २ ॥

समुच्चयेऽन्यतरस्याम्[1] ॥ ३ ॥

पूर्वं सूत्रं सर्वमनुवर्त्तते । समुच्चये । ७ । १ । अन्यतरस्याम् [अ०] ॥ अनेकासां क्रियाणामेकत्रप्रयोगः समुच्चयस्तस्मिन् ॥

समुच्चये सति क्रियासमभिहारे धातोः सामान्यकाले विकल्पेन लोट् प्रत्ययो भवति, पक्षे स्वस्वविषये लकारा भवन्ति ॥

व्याकरणमधीष्व । अग्निहोत्रं जुहुधि । गुरुं सेवस्व । मृदु वद । प्रातः स्नाहि । [इत्येवायं करोति, अकार्षीत्, करिष्यति, वा] । अत्र यदि भूतविषयस्तदा पक्षे—व्याकरणमध्यगीष्ट । अध्यैष्ट वा । अग्निहोत्रमहौषीत् । गुरुमसेविष्ट । मृदवादीत् । प्रातरस्नासीत् । [इत्येवायमकार्षीत्] । एवं यस्मिन् पुरुषे यद्वचनं विवक्षितं स्यात्, तदेव कर्त्तुं शक्यते । वर्त्तमाने—व्याकरणमधीते । अग्निहोत्रं जुहोति । गुरुं सेवते । मृदु वदति । प्रातः स्नाति । [इत्येवायं करोति] एवमन्यान्यपि त्रिकवचनान्युदाहार्य्याणि । भविष्यत्काले—व्याकरणमध्येष्यते । अग्निहोत्रं होष्यति । गुरुं सेविष्यते । मृदु वदिष्यति । प्रातः स्नास्यति । [इत्येवायं करिष्यति] । एवं यस्य लकारस्य विषये क्रियासमुच्चये लोट् विवक्षितः स्यात्, स एव लकारः पक्षे प्रयोक्तव्यः ॥ ३ ॥

यहां पूर्व सूत्र से सब पदों की अनुवृत्ति है। अनेक क्रियाओं को इकट्ठा करके प्रयोग करना समुच्चय कहाता है ॥

[समुच्चये] समुच्चय होने पर क्रियासमभिहार में वर्त्तमान धातु से सामान्यकाल में [अन्यतरस्याम्] विकल्प से लोट् प्रत्यय होता है, पक्ष में—अपने अपने विषय में लकार होते हैं ॥

जैसे—व्याकरणमधीष्व-अग्निहोत्रं जुहुधि-गुरुं सेवस्व-मृदु वद-प्रातः स्नाहि । इत्येवायं करोति, अकार्षीत्, करिष्यति वा । यहां यदि भूतविषय होगा तब पक्ष में—व्याकरणमध्यगीष्ट, अध्यैष्ट वा । अग्निहोत्रमहौषीत् । गुरुमसेविष्ट । मृदवादीत् । प्रातरस्नासीत् । इत्येवाऽयमकार्षीत् । इस प्रकार जिस पुरुष में जो वचन विवक्षित हो वही किया जा सकता है ॥

वर्त्तमान में—व्याकरणमधीते-अग्निहोत्रं जुहोति-गुरुं सेवते-मृदु वदति-प्रातः स्नाति । इत्येवायं करोति । इसी प्रकार शेष वचनों के भी उदाहरण समझ लेने चाहियें ॥

---

१. आ० सू० ८०० ॥

भविष्यत् काल में—व्याकरणमध्येष्यते-अग्निहोत्रं होष्यति-गुरुं सेविष्यते-मृदु वदिष्यति-प्रातः स्नास्यति । इत्येवायं करिष्यति ॥

इसी प्रकार जिस लकार के विषय में क्रियासमुच्चय में लोट् विवक्षित हो, पक्ष में उसी लकार का प्रयोग करना चाहिये ॥ ३ ॥

यथाविध्यनुप्रयोगः पूर्वस्मिन्[1] ॥ ४ ॥

यथाविधि । [अ०] । अनुप्रयोगः । १ । १ । पूर्वस्मिन् । ७ । १ ॥

पूर्वस्मिन् लोड्विधायके सूत्रे यथाविधि यस्माद्धातोर्लोड् विधीयते तस्यैव धातोरनुप्रयोगः स्यात् । यथा—स भवान् लुनीहि लुनीहीति लुनाति । अत्र लुनातिः शब्दः [अनु]प्रयुज्यते । तथैव पूर्वमुदाहृतम् ॥

'यथाविधि' इति किम्—लुनातीत्यत्र छिनत्तीत्यस्यानुप्रयोगो मा भूत् ॥ ४ ॥

[पूर्वस्मिन्] पहले लोड्विधायक सूत्र में [**यथाविधि**] जिस धातु से लोट् विधान किया हो उसी धातु का [**अनुप्रयोगः**] अर्थात् द्वितीय प्रयोग भी वैसा ही होता है ॥

जैसे—स भवान् लुनीहि लुनीहीति लुनाति । यहां लुनाति शब्द का अनुप्रयोग होता है ॥

'यथाविधि' ग्रहण इसलिये है कि—लुनाति के स्थान में 'छिनत्ति' आदि भिन्न क्रियाओं का अनुप्रयोग न हो ॥ ४ ॥

समुच्चये सामान्यवचनस्य[2] ॥ ५ ॥

समुच्चये । ७ । १ । सामान्यवचनस्य । ६ । १ ॥ अनुप्रयोग इत्यनुवर्त्तते । सर्वासां समुच्चितानां क्रियाणां येनैकेन प्रयोगेणार्थो गम्यते तत्सामान्यवचनं तस्य ॥

समुच्चयेऽर्थात् '**समुच्चयेऽन्यतरस्याम्**[3]' इति सूत्रे सामान्यवचनस्य धातोरनुप्रयोगो भवति ॥

वेदानधीष्व । सत्यं वद । अग्निहोत्रं जुहुधि । सत्पुरुषान् सेवस्व । एवं धर्मं [करोति, करिष्यति, अकार्षीद वा] सामान्यवचनस्यानुप्रयोगः ॥ ५ ॥

यहां 'अनुप्रयोगः' इस पद का अनुवर्त्तन है ॥ सामान्यवचन उसे कहते हैं कि जिस एक के प्रयोग से सारी समुच्चित क्रियाओं का अर्थ जाना जाय ॥

[**समुच्चये**] अर्थात् 'समुच्चयेऽन्यतरस्याम्' इस सूत्र में [**सामान्यवचनस्य**] सामान्यवचन धातु का अनुप्रयोग होता है ॥

जैसे—वेदानधीष्व-सत्यं वद-अग्निहोत्रं जुहुधि-सत्पुरुषान् सेवस्व । एवं धर्मं करोति-करिष्यति-अकार्षीत् वा । यहां सामान्यवचन कृञ् धातु का अनुप्रयोग होता है ॥ ५ ॥

---

१. आ० सू० ८०१ ॥ २. आ० सू० ८०२ ॥
३. अ० ३ । ४ । ३ ॥

छन्दसि लुङ्लङ्लिटः[1] ॥ ६ ॥

धातुसम्बन्ध इत्यनुवर्त्तते [अन्यतरस्यामिति च]। छन्दसि। ७। १। लुङ्-लङ्लिटः। १। ३ ॥ सामान्यकाले धातुसम्बन्धे विधानार्थ आरम्भः ॥

छन्दसि वैदिकप्रयोगविषये धातुसम्बन्धे धातोः सामान्यकाले [अन्यतरस्याम्] लुङ्-लङ्-लिटः प्रत्यया भवन्ति ॥

देवो देवेभिरागमत्[2]। आगमदिति लुङ्। आगच्छतीत्यर्थः ॥ **अहं तेभ्योऽकरं**[3] **नमः**। अकरमिति लङ् ॥ **अहन्नहिमन्वपस्ततर्द**[4]। **त्वष्टाऽस्मै वज्रं स्वर्य्यं ततक्ष**[5]। ततर्द,[6] ततक्ष, इति वर्त्तमानकाले लिट् ॥

इतोऽग्रे **सृपितृदोः कसुन्**[7] इतिपर्य्यन्तं छन्दसीत्यधिकारः ॥ ६ ॥

यहां 'धातुसम्बन्धे' तथा 'अन्यतरस्याम्' पदों का अनुवर्त्तन है ॥ सामान्यकाल धातुसम्बन्ध में विधान के लिये यह सूत्र है ॥

[छन्दसि] वैदिकप्रयोग में धातुसम्बन्ध होने पर सामान्यकाल में विकल्प से [लुङ्-लङ्-लिटः] लुङ्-लङ् और लिट् प्रत्यय होते हैं ॥

जैसे—**देवो देवेभिरागमत्**। 'आगमत्' यह लुङ् लकार का प्रयोग **'आगच्छति'** इस वर्त्तमानकाल के अर्थ में है। **अहं तेभ्योऽकरन्नमः**। 'अकरम्' यह लङ् लकार का प्रयोग है। **अहन्नहिमन्वपस्ततर्द। त्वष्टाऽस्मै वज्रं स्वर्य्यं ततक्ष**। ततर्द—ततक्ष—इन प्रयोगों में लिट् वर्त्तमानकाल में है ॥

यहां से आगे 'सृपितृदोः कसुन्' सूत्र तक 'छन्दसि' इस पद का अनुवर्त्तन है ॥ ६ ॥

लिङर्थे लेट्[8] ॥ ७ ॥

छन्दसीत्यनुवर्त्तते [अन्यतरस्यामिति च]। लिङर्थे। ७। १। लेट्। १। १। लिङर्थो हेतुहेतुमदित्यादिः ॥

छन्दसि लिङर्थविशिष्टे कर्त्तरि वाच्ये धातो [रन्यतरस्याम्] लेट् प्रत्ययो भवति ॥

---

१. आ ८०४ ॥
२. ऋ० १। १। ५ ॥
३. यजु० १६। ८ ॥
४. ऋ० १। ३२। १ ॥
५. ऋ० १। ३२। २ ॥
६. उदाहरणेषु धातुसम्बन्धो मृग्य इति **पदमञ्जर्याम् ॥**
७. अ० ३। ४। १७ ॥
८. आ० सू० ५७ ॥

स देवाँ एह वक्षति[1] । वक्षतीति वह-धातोर्लेट् प्रयोगः । **धियो यो नः प्रचोदयात्**[2] । प्रचोदयादिति ण्यन्तात् प्रार्थनायां लेट् । **सविता धर्म साविषत्**[3] । **प्र ण आयूंषि** तारिषत्[4] ॥ ७ ॥

यहां 'छन्दसि' तथा 'अन्यतरस्याम्' पद का अनुवर्त्तन है । हेतु और हेतुमत् इत्यादि लिङ् के अर्थ हैं ॥

छन्द में [लिङर्थे] लिङर्थविशिष्ट कर्त्ता वाच्य होने पर धातु से विकल्प करके [लेट्] लेट् प्रत्यय होता है ॥

जैसे—स देवाँ एह वक्षति । वक्षति यह 'वह' धातु से लेट् का प्रयोग है । 'धियो यो नः प्रचोदयात्' इसमें प्रचोदयात् यहां प्रपूर्वक ण्यन्त 'चुद' से प्रार्थना में लेट् प्रत्यय है ॥

सविता धर्म साविषत् । प्र ण आयूंषि तारिषत् ॥ ७ ॥

उपसंवादाशङ्कयोश्च ॥ ८ ॥

छन्दसि लेडित्यनुवर्त्तते । उपसंवादाशङ्कयोः । ७ । २ । [च । अ०] ॥ उपसंवादो व्यवहारे परस्परं भाषणम् । कारणं दृष्ट्वा कार्य्याद्भ्रियमाशङ्का ॥

उपसंवाद आशङ्कायां च गम्यमानायां छन्दसि वेदविषये धातोर्लेट् प्रत्ययो भवति ॥

उपसंवादे—**निहारं च हरासि मे निहारं निहराणि ते स्वाहा**[5] । हरासीत्यत्रोपसंवादे लेट् ॥ आशङ्कायाम्—**नेज्जिह्मायन्तो**[6] **नरकं पताम**[7] । अत्र पताम इति लेट् । जिह्माचरणेन नरकपात आशङ्क्यते ॥ ८ ॥

---

१. ऋ० १ । १ । २ ॥

२. ऋ० ३ ।६२ । १० ॥ यजु० ३ । ३५ ॥ २२ । ९ ॥ ३० । २ ॥ ३६ । ३ ॥ सा० उ० ६ । १० । १ ॥

३. यजु० ९ । ५ ॥ १८ । ३० ॥ ४. यजु० २३ । ३२ ॥

५. यजु० ३ । ५० ॥

६. छान्दसत्वादुपमानादन्यत्राप्याचार एव क्यच् । **अभ्यासस्यात्** (अ० ७ । ४ । ३७) इति योगविभागात्—आत्वम् ॥

भाष्यम्—**केचित्तावदाहुः—हेतुहेतुमतोर्लिङिति । अपर आहुः—वक्तव्य एवैतस्मिन् विशेषे लिङ् । प्रयुज्यते हि लोके यदि मे भवानिदं कुर्य्यात्, अहमपि त इदं कुर्य्यामेति ॥**

७. नि० १–११ ॥ ऋ०–खिल–१० । १०६ । १ ॥ तुलनात्मको 'यन्त्याः' पाठः ॥

यहां 'छन्दसि' तथा 'लेट्' इन पदों का अनुवर्त्तन है। व्यवहार में परस्पर भाषण को उपसंवाद कहते हैं अर्थात् तू ऐसा करे तो मैं ऐसा करूं। कारण को देख कर कार्य से भय करना आशङ्का कहाती है॥

[उपसंवादाशङ्कयोः] उपसंवाद और आशङ्का गम्यमान हों तो छन्द अर्थात् वेद विषय में धातु से 'लेट्' प्रत्यय होता है॥

जैसे—उपसंवाद में—**निहारश्च हरासि मे निहारं निहराणि ते स्वाहा**॥ 'हरासि' यह लेट् प्रत्ययान्त प्रयोग उपसंवाद में है॥

आशङ्का में—**नेज्जिह्मायन्तो नरकं पताम**। यहां 'पताम' यह लेडन्त प्रयोग है॥ अर्थात् जिह्म = कुटिलाचरण से नरकपात की आशङ्का की जाती है॥

तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्-तवैतवेङ्तवेनः[1] ॥ ९ ॥

छन्दसीत्यनुवर्त्तते। तुमर्थे। ७। १। से० तवेनः। १। ३॥ तुमर्थो भावः। यदि च कर्त्तुर्ग्रहणं स्यात्तुमर्थग्रहणमनर्थकं स्यात्। '**कर्त्तरि कृत्**[2]' इति कर्त्तरि विधीयन्त एव। पुनस्तुमर्थग्रहणज्ञापकादेवेदं वचनं निस्सरति। ''**अव्ययकृतो भावे भवन्तीति**[3]'' भावो धात्वर्थस्वार्थः स्तस्मिन्॥

तुमर्थे वर्त्तमानाद् धातोश्छन्दसि विषये से-इत्यादयः पञ्चदश प्रत्यया भवन्ति॥

से—वक्षै रायः[4]। अत्र वह-धातोः से॥ सेन्—**तावमेषे रथानाम्**[5]। अत्र इण्-धातोः सेन्॥ असे-असेन्—**क्रत्वे दक्षाय जीवसे**[6]। अत्र जीवधातोर्[सेऽ]सेन्। स्वर-विशेषार्थं नित्करणेन प्रत्ययान्तरं सर्वत्र॥ क्से—प्रेषे **भगाय**[7]। अत्र इण्-धातोः क्से॥ कसेन्—**श्रियसे**[8]। अध्यै-अध्यैन्—कर्मण्युपाचरध्यै[9]॥ कध्यै-कध्यैन्—**इन्द्राग्नी आ**

---

१. आ० सू० १५०१॥ २. अ० ३। ४। ६७॥
३. अ० ३। ४। २६ सू० भाष्ये॥ ४. अनुपलब्धमूलमिदम्॥
५. से—**एषे,** ऋ० १। १८०। ४॥ सेन्—ऋ० ५। ६६। ३॥
६. अथ० ६। १९। २॥ ७. यजु० ५। ७॥
८. **गवामिव श्रियसे,** ऋ० ५। ५९। ३॥ अत्र 'कसे' प्रत्ययस्याभावाच्छान्दसः स्वर-व्यत्ययो द्रष्टव्यः। आद्युदात्तस्तु मृग्यः॥
९. अनुपलब्धमूलमिदम्॥

हुवध्यै[1] ॥ शध्यै-शध्यैन्—**पिबध्यै**[2] । शित्त्वादत्र पिबादेशः । **सह मादयध्यै**[3] ॥ तवै—सोममिन्द्राय पातवै[4]। तवेङ्—**दशमे मासि सूतवे**[5] । अत्र पूङ्-धातोस्तवेङ्, ङित्त्वाद् गुणाभावः ॥ तवेन्—**स्वर्देवेषु गन्तवे**[6] । अत्र गम-धातोस्तवेन् ॥ ९ ॥

यहां 'छन्दसि' पद का अनुवर्त्तन है । तुमर्थ से यहां भाव अभिप्रेत है । यदि यहां कर्त्ता अर्थ अभिप्रेत होता तो तुमर्थ-ग्रहण अनर्थक हो जाता क्योंकि 'कर्त्तरि कृत्' सूत्र से कृत् प्रत्ययों का कर्त्ता में विधान है ही । फिर इस तुमर्थ-ग्रहण के ज्ञापक से यह वचन निकलता है कि—'अव्यय-कृतो भावे भवन्तीति' अर्थात् अव्ययसंज्ञक कृत् भाव में होते हैं । भाव धात्वर्थ अर्थात् धातु के अपने अर्थ को कहते हैं ॥

[तुमर्थे] तुमर्थ अर्थात् स्वार्थ में वर्त्तमान धातु से छन्दविषय में [से० तवेन०] से, सेन, असे, असेन्, क्से, कसेन्, अध्यै, अध्यैन्, कध्यै, कध्यैन्, शध्यै, शध्यैन्, तवै, तवेङ् तवेन् ये पन्द्रह प्रत्यय होते हैं ॥

जैसे—से—**वक्षे रायः** । यहां वह धातु से 'से' प्रत्यय होकर 'वक्षे' सिद्ध हुआ है ॥ सेन्—'**ता वामेषे रथानाम्**' यहां 'इण्' धातु से 'सेन्' प्रत्यय होकर 'एषे' रूप सिद्ध हुआ है ॥ असे-असेन्—'**ऋत्वे दक्षाय जीवसे**' यहां 'जीव' धातु से असे-असेन् प्रत्यय होकर 'जीवसे' रूप सिद्ध हुआ है ॥ यहां सर्वत्र प्रत्ययों में नित् करके प्रत्ययान्तर स्वर भेद करने के लिये किया है ॥ क्से—'**प्रेषे भगाय**' यहां इण् धातु से क्से-प्रत्यय में 'इषे' रूप है ॥ कसेन्—**श्रियसे** । अध्यै, अध्यैन्—**कर्मण्युपाचरध्यै** ॥ कध्यै, कध्यैन्—**इन्द्राग्नी आहुवध्यै** ॥ शध्यै, शध्यैन्—'**पिबध्यै**' यहां प्रत्यय के शित् होने से 'पा' धातु को 'पिब' आदेश हो जाता है । **सह मादयध्यै** ॥ तवै—सोम-मिन्द्राय पातवै' ॥ तवेङ्—दशमे मासि सूतवे ॥ यहां 'पूङ्' धातु से 'तवेङ्' प्रत्यय होता है । तथा 'तवेङ्' के ङित् होने से गुण नहीं होता ॥ तवेन्—स्वर्देवेषु गन्तवे । यहां गम-धातु से 'तवेन्' प्रत्यय होता है ॥ ९ ॥

प्रयै रोहिष्यै अव्यथिष्यै[7] ॥ १० ॥

छन्दसि तुमर्थ इत्यनुवर्त्तते । प्रयै-रोहिष्यै-अव्यथिष्यै-इत्येते त्रयः शब्दा वैदिकास्तुमर्थविषये निपात्यन्ते ॥

---

१. यजु० ३ । १३

२. ऋ० ७ । ९२ । २ ॥ शध्यैन्' प्रत्ययोदाहरणम् ॥

३. यजु० ३ । १३ ॥ शध्यै-प्रत्ययोदाहरणम् ॥

४. अनुपलब्धमूलमिदम् । तु०—ऋ० ३ । ४६ । ५ ॥

५. ऋ० १० । १८४ । ३ ॥ अत्र व्यत्ययेनाद्युदात्तत्वम् ॥ अथ० ५ । २५ । १० ॥

६. यजु० १५ । ५५ ॥ अथ० ९ । ५ । १७ ॥

७. आ० सू० १५०२ ॥

प्रपूर्वाद् 'या' धातोः 'कै' प्रत्ययः। प्रयातुं, **प्रयै**[1]। 'रुह' धातोरिष्यैप्रत्ययः। रोढुं रोहिष्यै। अपामोषधीनां रोहिष्यै[2]। नञ्पूर्वाद् 'व्यथ' धातोरिष्यैप्रत्ययः। अव्यथितुमव्यथिष्यै[3]॥ १०॥

यहां 'छन्दसि' तथा 'तुमर्थे' पदों का अनुवर्त्तन है।

प्रयै-रोहिष्यै-अव्यथिष्यै-ये तीन वैदिक शब्द तुमर्थ में निपातन हैं॥

प्रयै—प्रपूर्वक 'या' धातु से 'कै' प्रत्यय है। प्रयातुम् के अर्थ में 'प्रयै' यह प्रयोग है॥ **रोहिष्यै**—'रुह' धातु से 'इष्यै' प्रत्यय है। रोहिष्यै-प्रयोग 'रोढुम्' पद के अर्थ में है। जैसे—**अपामोषधीनां रोहिष्यै**॥ नञ्पूर्वक 'व्यथ' धातु से 'इष्यै' प्रत्यय होकर 'अव्यथिष्यै' रूप सिद्ध होता है। अव्यथिष्यै का अर्थ 'अव्यथितुम्' है॥ १०॥

दृशेविख्ये च[4]॥ ११॥

दृशे-विख्ये इत्येतौ द्वौ वैदिकौ शब्दौ तुमर्थे निपात्येते॥

दृश-धातोः के प्रत्ययः। **दृशे विश्वाय सूर्य्यम्**[5]॥ विपूर्वात् ख्या-धातोः के-प्रत्ययः। विख्यातुमिति विख्ये। विख्ये त्वा हरामि[6]॥ ११॥

[दृशेविख्ये च] दृशे-विख्ये ये दो वैदिक-शब्द तुमर्थ में निपातित हैं॥

'दृश' धातु से 'के' प्रत्यय हो कर दृशे रूप बनता है। जैसे—दृशे विश्वाय सूर्य्यम्॥ वि-पूर्वक ख्या धातु से 'के' प्रत्यय होकर विख्ये रूप सिद्ध होता है 'विख्यातुम्' पद के अर्थ में। जैसे—**विख्ये त्वा हरामि**॥ ११॥

शकि णमुल्कमुलौ[7]॥ १२॥

शकि। ७। १। णमुल्कमुलौ। १। २॥ शक्नोति धातावुपपदे तुमर्थे वर्त्तमानाद् धातोश्छन्दसि विषये णमुल्कमुलौ प्रत्ययौ भवतः॥

विभाजं नाशकत्[8]। अत्र विपूर्वाद् भज-धातोर्णमुल्, णित्त्वाद् वृद्धिः। विभक्तुमित्यर्थः॥ अपलुपं नाशकत्[9]। अत्रापपूर्वाल्लुप-धातोः कमुल्, कित्त्वाद् गुणाभावः। लकार उभयत्र स्वरार्थः॥ १२॥

---

१. ऋ० १। १४२। ६॥ २. अनुपलब्धमूलमिदम्॥
३. आ० सू० १५०३॥ ४. यजु० ७। ४१। ८। ४१॥,
५. अनुपलब्धमूलमिदम्॥ (ख) चकारात् 'विख्यै' इत्यपि भवति—**चक्षुर्विख्यै तनूभ्यः**। ऋ० १०। १५८। ४॥
६. आ० सू० १५०४॥
७. अनुपलब्धमूलमिदम्। परन्तूपलभ्यते चैवं प्रयोगः—**'तौ विभाजं नाशक्नोत्'**। तै० ब्रा० १। १। ५। ६॥
८. अनुपलब्धमूलमिदम्॥

[शकि] शक्नोति धातु उपपद हो तो तुमर्थं में वर्त्तमान धातु से छन्दविषय में [**णमुल्-कमुलौ**] 'णमुल्' और 'कमुल्' प्रत्यय होते हैं ॥ जैसे—**विभाजं नाशकत्** । यहां वि-पूर्वक 'भज' धातु से 'णमुल्' प्रत्यय तथा णित् होने से वृद्धि होती है । 'विभाजम्' यहां 'विभक्तुम्' पद के अर्थ में है ॥ '**अपलुपं नाशकत्**' यहां अप् पूर्वक 'लुप्' धातु से 'कमुल्' प्रत्यय होता है । तथा कित् होने से गुण नहीं होता ॥ दोनों प्रत्ययों में लित्करण स्वर के लिये है ॥ १२ ॥

ईश्वरे तोसुन्कसुनौ[1] ॥ १३ ॥

तुमर्थे छन्दसीत्यनुवर्त्तते । ईश्वरे । ७ । १ । तोसुन्कसुनौ । १ । २ ॥

ईश्वरशब्द उपपदे तुमर्थे वर्त्तमानाद् धातोश्छन्दसि विषये तोसुन्कसुनौ प्रत्ययौ भवतः ॥ ईश्वरो विचरितोः[2] । ईश्वरो विलिखः[2] ॥ विचरितुं विलेखितुमित्यर्थः[3] ॥

कित्त्वं गुणप्रतिषेधार्थम् । नित्करणमुभयत्र स्वरार्थम् ॥ १३ ॥

यहां 'तुमर्थे' तथा 'छन्दसि' पदों का अनुवर्त्तन है ॥

[ईश्वरे] ईश्वर शब्द उपपद हो तो तुमर्थ में वर्त्तमान धातु से छन्द विषय में [**तोसुन्-कसुनौ**] तोसुन् और कसुन् प्रत्यय होते हैं ॥

जैसे—**ईश्वरो विचरितोः । ईश्वरो विलिखः ।** विचरितुम्-विलेखितुम्-ये दोनों के अर्थ हैं । कित्व गुणप्रतिषेध के लिये है । दोनों प्रत्ययों में नित्करण स्वर के लिये है ॥ १३ ॥

कृत्यार्थे तवैकेन्केन्यत्वनः[4] ॥ १४ ॥

तुमर्थ इति नानुवर्त्तते । छन्दसीत्यनुवर्त्तते । कृत्यार्थे । ७ । १ । तवै० त्वनः । १ । ३ ॥ कृत्यार्थो भावकर्मणी ॥

कृत्यार्थेऽभिधेये छन्दसि विषये धातोस्तवै-केन्-केन्य-त्वन् इति चत्वारः प्रत्यया भवन्ति ॥ अकर्मकाद्भावे, सकर्मकात् कर्मणि चेति विशेषः ॥

ब्राह्मणेन न म्लेच्छितवै नापभाषितवै[5] । न म्लेच्छितव्यं नापभाषितव्यम् । केन्—नावगाहे[6] । नावगाहितव्यम् ॥ केन्य—**दिदृक्षेण्यः**[7] । शुश्रूषेण्यः[8] । दिदृक्षितव्यम् । शुश्रूषितव्यम् ॥ त्वन्—**कर्त्वं हविः**[9] । कर्त्तव्यम् ॥ नित्करणमुभयत्र स्वरार्थम् ॥१४॥

---

१. आ० सू० १५०५ ॥ २. अनुपलब्धमूलमिदम् ॥
३. कुटादित्वाभावपक्षे गुणाभावः ॥ ४. आ० सू० १५०६ ॥
५. महाभाष्यपस्पशाह्निके ॥ ६. अनुपलब्धमूलम् ॥
७. **दिदृक्षेण्यो दर्शनीयो** भवति ॥ तै० ब्रा० २ । ७ । ९ । ४ ॥
८. अनुपलब्धमूलमिदम् ॥ **वाचंमुद्या सꣳशुश्रूषेण्यां मनुष्येभ्यः** ॥ तै० आ० प्र० ४ । अनु० १ । १ ॥
९. अथ० १ । ४ । ३ ॥

यहां 'तुमर्थे' पद का निवर्त्तन है। 'छन्दसि' पद का अनुवर्त्तन है। कृत्यार्थ से यहां भाव और कर्म अर्थ अभिप्रेत हैं॥

[कृत्यार्थे] कृत्यार्थ अभिधेय हो तो वेदविषय में धातु से [तवै० त्वनः] तवै, केन्, केन्य और त्वन् ये चार प्रत्यय होते हैं॥

अकर्मक धातुओं से भाव में और सकर्मकों से कर्म में प्रत्यय होते हैं। ऐसा समझना चाहिये॥

जैसे—ब्राह्मणेन न म्लेच्छितवै नापभाषितवै। न म्लेच्छितव्यम्, नापभाषितव्यम् यह अर्थ है॥ केन्—नावगाहे। अर्थ हुआ 'नावगाहितव्यम्'॥ केन्य—दिदृक्षेण्यः। शुश्रूषेण्यः। अर्थ हुआ—दिदृक्षितव्यम्, शुश्रूषितव्यम्॥ त्वन्—कर्त्वं हविः। अर्थ हुआ–कर्त्तव्यम्॥ दोनों प्रत्ययों में नित्करण स्वर के लिये है॥ १४॥

अवचक्षे च'॥ १५॥

कृत्यार्थ इत्यनुवर्त्तते छन्दसीति च॥ अवचक्षे [अ० । च । अ०]॥

अवचक्षे-इति वैदिकः शब्दः कृत्यार्थे निपात्यते॥

रिपुणा नावचक्षे[2]। अवपूर्वाच्चक्षिङ्-धातोः 'शेन्'[3] प्रत्ययो निपात्यते। शित्त्वात् सार्वधातुकत्वं, तेन ख्याञादेशाभावः। सार्वधातुके परतः शप्[4]। अदादित्वात्तस्य लुक्॥ १५॥

यहां 'कृत्यार्थे' इस पद का अनुवर्त्तन है और 'छन्दसि' का भी॥ [अवचक्षे] अवचक्षे यह वैदिक-शब्द कृत्यार्थ में निपातन है॥

जैसे—रिपुणा नावचक्षे॥ अव पूर्वक चक्षिङ् धातु से 'शेन्' प्रत्यय निपातित है॥ शित् होने से सार्वधातुक संज्ञा हो जाती है। अतः चक्षिङ् को 'ख्याञ्' आदेश नहीं हुआ॥ सार्वधातुक परे रहते शप् होता है। उसका अदादि होने से लुक् हो जाता है॥ १५॥

भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्[5]॥ १६॥

छन्दसीत्यनुवर्त्तते। कृत्यार्थ इति निवृत्तम्। भावलक्षणे। ७। १। स्थेण्० जनिभ्यः। ५। ३। तोसुन्। १। १॥ लक्ष्यते येन तल्लक्षणं, भावस्य धात्वर्थस्य लक्षणं भावलक्षणं तस्मिन्॥

---

१. आ० सू० १५०७॥ २. यजु० १७। ९३॥

३. अत्र 'एश्' प्रत्यय इति वृत्तिकारादयो मन्यन्ते। वेदे सर्वत्र उत्तरपदाद्युदात्तदर्शनात् 'शेन्' इत्येव सम्यक्॥

४. भावकर्मणोर्यक् प्राप्तौ छान्दसत्वात् शबिति ध्येयम्॥

५. आ० सू० १५०८॥

भावलक्षणे वर्त्तमानेभ्यः स्थादिधातुभ्यश्छन्द[सि] विषये 'तोसुन्' प्रत्ययो भवति ।।

आसंस्थातोर्वेद्यां सीदन्ति । आसंस्थानादासमाप्तेरित्यर्थः[1] ।। इण्—पुरा सूर्य्यस्योदेतोराधेयः[2] । सूर्य्योदयात्प्रागग्न्याधानं कर्त्तव्यम् ।। कृञ्—पुरा वत्सानामपाकर्तोः[3] । अपाकरणात् ।। वदि—पुरा प्रवदितोरग्नौ[4] प्रहोतव्यम् । प्रवदनात् । चरि—पुरा प्रचरितोराग्नीध्रे[5] । प्रचरणात् ।। हु—आहोतोरप्रमत्तस्तिष्ठति[6] । आहवनसमाप्तेः ।। तमि—आतमितोरासीत्[7] ।। आतमनात् ।। जनि—आविजनितोः[8] सम्भवाम । आविजननात् ।। १६ ।।

यहां 'छन्दसि' पद का अनुवर्त्तन है, कृत्यार्थे पद निवृत्त हुआ ।। जिससे लक्षित किया जाय वह लक्षण कहाता है ।। भाव अर्थात् धात्वर्थ का लक्षण भावलक्षण कहाता है ।।

[**भावलक्षणे**] भावलक्षण में वर्त्तमान [**स्थे० जनिभ्यः**] स्था, इण, कृञ्, वदि, चरि, हु, तमि, जनि इन धातुओं से छन्द विषय में [**तोसुन्**] 'तोसुन्' प्रत्यय होता है ।।

जैसे—**आसंस्थातोर्वेद्यां सीदन्ति** । आसंस्थानात् अर्थात् यज्ञसमाप्ति तक ।। इण्—**पुरा सूर्य्यस्योदेतोराधेयः** । अर्थात् सूर्योदय से पहले अग्न्याधान करना चाहिये ।। कृञ्—**पुरावत्सानामपाकर्त्तोः** । अपाकरणम् अर्थात् दूर करने से पूर्व । वदि—**पुरा प्रवदितोरग्नौ प्रहोतव्यम्** । चरि—**पुरा प्रचरितोराग्नीध्रे**[5] ।। हु—**आहोतोरप्रमत्तस्तिष्ठति** । अर्थात् हवन समाप्ति तक । तमि—**आतमितोरासीत्** ।। जनि—**आविजनितोः सम्भवाम** ।। १६ ।।

सृपितृदोः कसुन्[9] ।। १७ ।।

भावलक्षणे छन्दसीति चानुवर्त्तते । सृपितृदोः । ६ । २ । कसुन् [१ । १] ।।

भावलक्षणे वर्त्तमानाभ्यां सृपि-तृदिभ्यां धातुभ्यां छन्दसि विषये 'कसुन्' प्रत्ययो भवति ।। **पुरा क्रूरस्य विसृपो[10] विराप्शिन् । पुरा जत्रुभ्य आतृदः[11]** ।। १७ ।।

यहां 'भावलक्षणे' तथा 'छन्दसि' पदों का अनुवर्त्तन है ।।

भावलक्षण में वर्त्तमान [**सृपितृदोः**] सृपि तथा तृद धातु से छन्द विषय में [कसुन्] 'कसुन्' प्रत्यय होता है ।।

---

१. सम्पूर्वस्तिष्ठतिः समाप्तौ वर्त्तते—**'संस्तिष्ठते पिण्डपितृयज्ञ** (द्र० बा० मनो०) इत्यादौ तथा दर्शनात् ।।

२. अनुपलब्धमूलमिदम् । एवं तु दृश्यते—**'आ सूर्य्यस्योदेतोः शंसेत्'** तां० ब्रा० ९ । १ । ३८ ।।

३. अनुपलब्धमूलमिदम् ।।

४. अनुपलब्धमूलमिदम् । एवं तु दृश्यते—**'पुरा वाचः प्रवदितोरनूच्यः'** ऐ० ब्रा० २ । १५ ।।

५. **पुरा प्रचरितोराग्नीध्रीये होतव्या** ।। गोपथ० २ । २ । १० ।।

६. आ० सू० १५०९ ।। ७. यजु० १ । २८ ।।

८. तु० ऋ० ८ । १ । १२ ।। अथ० १४ । २ । ४७ ।।

जैसे—पुरा क्रूरस्य विसृपो विरप्शिन् । पुरा जत्रुभ्य आतृदः ॥ १७ ॥

अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा[1] ॥ १८ ॥

छन्दसि भावलक्षण इति सर्वं निवृत्तम् । अलंखल्वोः । ७ । २ । प्रतिषेधयोः । ७ । २ । प्राचाम् । ६ । ३ । क्त्वा [१ । १] ॥

प्रतिषेधवाचिनोरलंखल्वोरुपपदयोर्धातोः प्राचां मतेन 'क्त्वा' प्रत्ययो भवति ॥

प्राचां ग्रहणं विकल्पार्थम्[2] । अलमुक्त्वा । खलूक्त्वा । अलं भुक्त्वा । खलु भुक्त्वा । न वक्तव्यम्, न भोक्तव्यम् [इत्यर्थः] । अन्येषां मतेन क्त्वा न भवति ॥

[अलं वचनेन । अलं भोजनेन । खलु वचनेन । खलु भोजनेन ॥

'अलं खल्वोः' इति किम्—मा कार्षीत् ॥ 'प्रतिषेधयोः' इति किम्—अलङ्कारः] ॥ १८ ॥

यहां 'छन्दसि' तथा 'भावलक्षणे' इन सब पदों की निवृत्ति हो जाती है ॥

[प्रतिषेधयोः] प्रतिषेधवाची [**अलं-खल्वोः**] अलं और खलु उपपद हों तो धातु से [**प्राचाम्**] प्राचों के मत से [**क्त्वा**] 'क्त्वा' प्रत्यय होता है । यहां 'प्राचां' ग्रहण विकल्प के लिये है ॥

जैसे—**अलमुक्त्वा । खलूक्त्वा । अलं भुक्त्वा ।** खलु भुक्त्वा । न भोक्तव्यम् न वक्तव्यम् यह अर्थ हुआ । अन्य आचार्यों के मत से पक्ष में क्त्वा नहीं होता—अलं वचनेन । खलु वचनेन । अलं भोजनेन । खलु भोजनेन ॥ १८ ॥

उदीचां माङो व्यतीहारे[3] ॥ १९ ॥

क्त्वेत्यनुवर्त्तते । उदीचाम् । ६ । ३ । माङः । ५ । १ । व्यतीहारे । ७ । १ । पूर्वकाले क्त्वा विधीयतेऽपूर्वकालार्थोऽयमारम्भः ॥ माङ् इति मेङ्-धातोरात्त्वभूतस्य ग्रहणम्, व्यतीहारो विपर्ययः । पूर्वकाले विधीयमानः क्त्वा प्रत्ययः परकाले यथा स्यात् ॥

व्यतीहारार्थान्मेङ्-धातोरुदीचां मतेन 'क्त्वा' प्रत्ययो भवति ॥ अपमित्य याचते । पूर्वं भिक्षुको याचते[4] पश्चाद्वस्त्रादिकमपमयतेऽस्मिन् देहीति ॥

---

१. आ० सू० १५१० ॥

२. अत्र नव्याः प्राचां ग्रहण पूजार्थमाचक्षते । वाऽसरूपविधिना च 'अलं रोदनेन' इत्यादि प्रयोगान् साधयन्ति तच्चिन्त्यम्—स्त्र्यधिकारात् प्रागेव वासरूपविधिरिति **भाष्ये** स्पष्टम् । तदुक्तम् । **विध्यर्थं तु स्त्रियाः प्रागिति वचनात्** (अ० ३ । ३ । १६३ सूत्रभाष्ये) इति । एवं च क्त्वाप्रत्ययेन लुटो नित्यं बाधापत्तेः । तस्मात् प्राचां ग्रहणं विकल्पार्थमेवैषितव्यम् ॥

३. आ० सू० १५११ ॥

४. अत्र **पदमञ्जरी**—पूर्वं ह्यसौ याचते पश्चादपमयते, यदा चास्माद् वचनान् मयतेः क्त्वा भवति, तदा **'समानकर्तृकयोः०'** (अ० ३ । ४ । २१) इत्यादिना याचेर्न भवति, अनेन बाधितत्वात् यथा—द्वितीयद्विर्वचनेन प्रथमद्विर्वचनम् । अनभिधानाद्वा ॥

अत्र मेङः सानुबन्धकस्यात्त्वभूतस्य ग्रहणादेवेयं परिभाषा निस्सरति—**'नानुबन्धकृतमनेजन्तत्वम्'**[1] इति । सा च **'दाधाघ्वदाप्'**[2] इत्यत्र व्याख्याता ॥ १९ ॥

यहां 'क्त्वा' पद का अनुवर्त्तन है । पूर्वकाल में क्त्वा का विधान किया है यह सूत्र अपूर्वकाल के लिये है ॥

यहां **माङ्** से आत्वभूत **मेङ्** धातु का ग्रहण है । व्यतीहार विपर्य्यय को कहते हैं ॥ पूर्वकाल में विहित क्त्वा प्रत्यय परकाल में भी हो जाय ॥

[व्यतीहारे] व्यतीहार अर्थ वाले [माङः] 'मेङ्' धातु से [उदीचाम्] उदीचों के मत में 'क्त्वा' प्रत्यय होता है ॥

जैसे—**अपमित्य** याचते । पहले भिक्षुक मांगता है पुनः वस्त्रादिक फैलाता है कि इसमें दे दो ॥

यहां सानुबन्धक 'मेङ्' को आत्वनिर्देश से पढ़ना इस परिभाषा को ज्ञापित करता है कि—'नानुबन्धकृतमनेजन्तत्वम्' अर्थात् अनुबन्ध के होने पर भी धातु का एजन्तत्व नष्ट नहीं होता । यह परिभाषा 'दाधाघ्वदाप्' सूत्र में व्याख्यात है ॥ १९ ॥

परावरयोगे च[3] ॥ २० ॥

परावरयोगे । ७ । १ । च । [अ०] ॥ परावरयोः परपूर्वयोर्योगः परावरयोगस्तत्र । परावरयोगे वर्त्तमानाद् धातोः 'क्त्वा' प्रत्ययो भवति ॥

पूर्वस्य परेण सह सम्बन्धो भवति परस्य च पूर्वेण तदाऽस्य प्रवृत्तिः ॥ पूर्वस्य परेण योगे—अप्राप्य वाटिकां कूपः । परा वाटिका तद्योगेन कूपो विशेष्यते ॥ परस्य पूर्वेण योगे—अतिक्रम्य पर्वतं नदी । पूर्वः पर्वतस्तद्योगेन नदी विशेष्यते ॥ २० ॥

[परावरयोगे] पर और पूर्व के योग में वर्त्तमान धातु से 'क्त्वा' प्रत्यय होता है ॥

जब पूर्व का पर के साथ और पर का पूर्व के साथ सम्बन्ध होता है तब यह सूत्र प्रवृत्त होता है । जैसे पूर्व का पर के साथ योग होने पर—**अप्राप्य वाटिकां कूपः** । वाटिका परे है उसके सम्बन्ध से कूएँ को विशेषित किया है ॥ पर का पूर्व के साथ योग होने पर—**अतिक्रम्य पर्वतं नदी** । पूर्व पर्वत है उसके योग से नदी को विशेषित किया है ॥ २० ॥

समानकर्तृकयोः पूर्वकाले[4] ॥ २१ ॥

समानकर्तृकयोः । ७ । २ । पूर्वकाले । ७ । १ ॥ समान एकः कर्त्ता ययोर्धात्वर्थयोस्तयोः ॥

---

१. भाष्ये ३ । ४ । १९ ॥ पारि० ६ ॥ २. अ० १ । १ । २० ॥
३. आ० सू० १५१५ ॥ ४. आ० सू० १५१६ ॥

पूर्वकाले धात्वर्थे वर्त्तमानाद् धातोः 'क्त्वा' प्रत्ययो भवति ।। स्नात्वा भुङ्क्ते । भुक्त्वा[1] व्रजति । हृत्वा धावति । जित्वा भुङ्क्ते ।।

अस्मिन् सूत्रे समानकर्त्तृकयोरिति द्विवचननिर्देशः कृतः, स प्रातिपदिकनिर्देश-न्यायेन[2] ज्ञातव्यः, अवश्यं कयाचिद्विभक्त्या केनचिद्वचनेन निर्देशः कर्त्तव्यः । अर्थादिष्ट-त्वेनात्र द्विवचननिर्देशो नास्ति, इष्टा च शब्दसिद्धिः । सा सिद्धिर्यया विभक्त्या येन वचनेन भवेत्तदेव तत्रोह्यम्, एवं कृत्वा बहूनां पौर्वकाल्येपि क्त्वा सिद्धो भवति । स्नात्वा पीत्वा भुक्त्वा व्रजति[3] ।। २१ ।।

[समानकर्तृकयोः] समान अर्थात् एक कर्त्ता है जिन दो धातुओं का उन में [पूर्व-काले] पूर्वकाल धात्वर्थ में वर्त्तमान धातु से 'क्त्वा' प्रत्यय होता है ।।

जैसे—स्नात्वा भुङ्क्ते । भुक्त्वा व्रजति । हृत्वा धावति । जित्वा भुङ्क्ते ।।

इस सूत्र में 'समानकर्तृकयोः' पद में द्विवचन का निर्देश है । वह प्रातिपदिकनिर्देश न्याय से समझना चाहिये क्योंकि अवश्य ही किसी न किसी विभक्ति और वचन से तो निर्देश करना ही होगा, अर्थात् यहां द्विवचननिर्देश इष्ट नहीं, इष्ट तो शब्दसिद्धि है वह शब्दसिद्धि जिस विभक्ति और जिस वचन से हो उसकी वहां ऊहा कर लेनी चाहिये । ऐसा करने से बहुतों के पूर्वकाल में भी क्त्वा सिद्ध होता है ।। जैसे—स्नात्वा, पीत्वा, भुक्त्वा व्रजति ।। २१ ।।

आभीक्ष्ण्ये णमुल् च[4] ।। २२ ।।

[अत्र समानकर्तृकयोः पूर्वकाले] क्त्वाप्यनुवर्त्तते । आभीक्ष्ण्ये । ७ । १ । णमुल् । १ । १ । च । [अ०] ।। आभीक्ष्ण्यं पौनःपुन्यम् ।।

आभीक्ष्ण्ये गम्यमाने धातो 'णमुल्' प्रत्ययो भवति चात् 'क्त्वा' च ।।

भुक्त्वा भुक्त्वा[5] हसति । भोजं भोजं[5] हसति । स्मृत्वा स्मृत्वा रोदिति । स्मारं स्मारं रोदिति ।। २२ ।।

---

१. अत्र **पुरुषोत्तमदेवः**—'अव्ययकृतो भावे भवन्तीति' भावेऽपि हि प्रत्यये सकर्मकाद्धातोः पश्चात् कर्मसम्बन्धो भवत्येव । पाक ओदनस्य, कटं कृत्वा शेते इति गम्यते मया ग्रामम् । इति भागवृत्ता-वुक्तम्, (अ० ३ । ४ । १८ भाषावृत्तौ) ।।

२. अत्र भाष्यम्—**नात्र निर्देशस्तन्त्रम् । कथं पुनस्तेनैव निर्देशः क्रियते तच्चातन्त्रं स्यात् । तत्कारी च भवान् तद्द्वेषी च । नान्तरीयकत्वादत्र द्विवचनेन निर्देशः क्रियते, अवश्यं कयाचिद्वि-भक्त्या केनचिद्वचनेन निर्देशः कर्त्तव्यः ।।** (अ० ३ । ४ । २१ सूत्रे) ।।

३. 'व्यादाय स्वपिति' अत्र भाष्यम्—**अपरकालः स्वप्नः, अवश्यमसौ व्यादाय मुहूर्त्तमपि स्वपिति ।।** (अ० ३ । ४ । २१ सूत्रे) ।।

४. आ० सू० १५४० ।।

५. **आभीक्ष्ण्ये द्वे भवतः** (८ । १ । १२) इति वार्त्तिकेन द्विर्वचनम् ।।

यहां 'समानकर्त्तृकयोः पूर्वकाले' तथा 'क्त्वा' इन पदों की अनुवृत्ति आती है ॥ आभीक्ष्ण्य = पुनः पुनः होना ॥

[आभीक्ष्ण्ये] आभीक्ष्ण्य (पुनः पुनः होना) अर्थ गम्यमान हो तो धातु से [णमुल्] 'णमुल्' प्रत्यय होता है [च] और चकार से 'क्त्वा भी ॥

जैसे—भुक्त्वा भुक्त्वा हसति । भोजं भोजं हसति । स्मृत्वा स्मृत्वा रोदिति । स्मारं स्मारं रोदिति ॥ २२ ॥

न यद्यनाकाङ्क्षे[1] ॥ २३ ॥

न । [अ०] । यदि । ७ । १ । अनाकाङ्क्षे । ७ । १ ॥ आभीक्ष्ण्य इत्यनुवर्त्तते ॥

यच्छब्दयोगेऽनाकाङ्क्षवाक्य[2] आभीक्ष्ण्येऽपि क्त्वा-णमुलौ प्रत्ययौ न भवतः ॥ यदयं भुङ्क्ते ततोऽधीते ॥

'अनाकाङ्क्षे' इति किम्—यदयं भुक्त्वा व्रजति ततोऽधीते ॥ २३ ॥

यहां 'आभीक्ष्ण्ये' पद का अनुवर्त्तन है ॥

[यदि] यत्-शब्द के योग में [अनाकाङ्क्षे] अनाकाङ्क्ष वाक्य में आभीक्ष्ण्य अर्थ होने पर भी धातु से 'क्त्वा' और 'णमुल्' प्रत्यय [न] नहीं होते ॥

जैसे—यदयं भुङ्क्ते ततोऽधीते ॥

'अनाकाङ्क्षे' ग्रहण इसलिये है कि—यदयं भुक्त्वा व्रजति ततोऽधीते ॥ २३ ॥

विभाषाऽग्रेप्रथमपूर्वेषु[3] ॥ २४ ॥

अप्राप्तविभाषेयम् । आभीक्ष्ण्य इति नाऽनुवर्त्तते । समानकर्त्तृकयोः पूर्वकाल इत्यनुवर्त्तत एव । विभाषा । १ । १ । अग्रेप्रथमपूर्वेषु । [७ । ३] ॥

अग्रे-प्रथम-पूर्व-इति शब्दत्रयोपपदात् समानकर्त्तृकधात्वर्थयोः पूर्वकाले धात्वर्थे वर्त्तमानाद् धातोर्विकल्पेन क्त्वा-णमुलौ प्रत्ययौ भवतः, पक्षे च लडादयः ॥

अग्रे[4] भुक्त्वा व्रजति । अग्रे भोजं व्रजति । अग्रे भुङ्क्ते ततो व्रजति । प्रथमं भुक्त्वा व्रजति । प्रथमं भोजं व्रजति । [प्रथमं भुङ्क्ते ततो व्रजति ।] पूर्वं भुक्त्वा व्रजति । पूर्वं भोजं व्रजति । [पूर्वं भुङ्क्ते ततो व्रजति] ॥

---

१. आ० सू० १५४२ ॥

२. न विद्यत आकाङ्क्षा यस्य स अनाकाङ्क्षस्तस्मिन्ननाकाङ्क्ष इति बहुव्रीहिः ॥

३. आ० सू० १५४३ ॥

४. अग्र-शब्दो देशवचनोऽप्यस्ति—प्रभोरग्रे भुङ्क्ते इति, इह तु प्रथमशब्दसाहचर्य्यात् 'काल-विशेषवाचिनो ग्रहणम् । अनुकरणत्वाच्चाग्रे इति विभक्तेर्लुगभावोऽस्यवामीयमिति यथेति पदमञ्जरी ॥

स्त्र्यधिकारात् प्राग् वाऽसरूपविधिः सम्यक् प्रवर्त्तते। इह तु **तस्यानित्य-**[1] **त्वाल्लडादयो** न प्राप्नुवन्त्यतो विभाषाऽऽरभ्यते। '**अमैवाव्ययेन**[2]' इत्यत्रोक्तमेवकार[3]-ग्रहणस्य प्रयोजनम्—यत्र केवलोऽम् विधीयते तत्रैवोपपदसमासः स्यात्। यत्र तु अन्येन सह विधीयेते तत्र मा भूत्। अतोऽग्र आदीनां णमुलन्तेन सह समासो न भवति॥ २४॥

यह सूत्र अप्राप्तविभाषा है। यहां आभीक्ष्ण्ये पद का अनुवर्त्तन नहीं, किन्तु 'समानकर्तृकयोः' तथा 'पूर्वकाले' इन दो पदों का अनुवर्त्तन है॥

[**अग्रेप्रथमपूर्वेषु**] अग्रे-प्रथम-पूर्व ये तीन शब्द उपपद हों तो समानकर्तृकधात्वर्थों में जो पूर्वकाल धात्वर्थ में वर्त्तमान है उस धातु से [**विभाषा**] विकल्प करके 'क्त्वा' और 'णमुल्' प्रत्यय होते हैं। पक्ष में—लडादि होते हैं॥

---

१. क्त्वाणमुलौ यत्र सह विधीयेते तत्र वाऽसरूपविधिर्न भवतीति भावः। इयमत्राभिसन्धिः—वाऽसरूपविधिः स्त्रियाः प्रागिति भाष्यसिद्धान्तः। अत एव **'स्त्रियाः प्रागिति चेत् क्त्वायां वावचनम्'** (अ० ३। १। ९४ भाष्ये) इत्यादिभाष्यं तत्तत्स्थलेषु वाऽऽसरूपविधिविधायकम्। अतो यत्त्वत्र **काशिकाकारेणोक्तम्**—'ननु च वाऽऽसरूप इति भविष्यति, क्त्वाणमुलौ यत्र सह विधीयेते तत्र वाऽऽसरूपविधिर्नास्तीत्येतदेतेन ज्ञाप्यते' इत्याद्युक्तं तद्भाष्यानारूढत्वादुपेक्षणीयम्।

किञ्च—"यत्त्वत्र विभाषाग्रहणं एताभ्यां मुक्ते लडादयोपि यथास्युरिति" **काशिकाकारः** 'पक्षे लडादय इति कर्त्रादिपक्ष इत्यर्थः। भावे ह्येतौ, तदाह अग्रे भुङ्क्त इति। अत्रैवार्थे विभाषाग्रहणं तात्पर्यग्राहकम्। एतद्विषये कर्त्रादिविवक्षाऽपि, पूर्वसूत्रविषये तु न सा मानाभावादिति दिक्' इति **नागेशः**। तत्सर्वमेतच्चिन्त्यम्—**'अव्ययकृतो भावे भवन्ति'** इति भाष्यनियमात्। क्त्वाणमुलौ भाव एव। कुतः कर्त्रादिविवक्षासम्भवो भिन्नविषयत्वात्। अतः **पक्षे** लडादय इत्यादि सर्वमविचारितरमणीयमेव। विभाषा ग्रहणं किमर्थमितिचेदत्रोच्यते—**आभीक्ष्ण्ये णमुल् च** (अ० ३। ४। २२।) इति सूत्रे चकारग्रहणेन क्त्वाऽनुकृष्यते। **चानुकृष्टं नोत्तरत्र** (परि० वृ० ४८) इति न्यायेन क्त्वाग्रहणं निवृत्तम्। अतो **'विभाषाग्रेप्रथमपूर्वेषु'** (अ० ३। ४। २४) इति सूत्रे क्त्वा विभाषाग्रहणेन प्रतीप्रसूयते। विभाषाग्रहणस्य प्रयोजनम्। **'न यद्यनाकाङ्क्षे'** (अ० ३। ४। २३) इति तु यदुक्तं तन्न भवतीति निषेधपरम्॥

'क्त्वाभीक्ष्ण्ये णमुल् च' (अ० ३। ४। २२) इत्यत्र लडादयो मानाभावान्न स्युरिति तदपि कर्त्तृविवक्षायाः भाव-प्रत्ययेन मिथः कः सम्बन्ध इत्येवाकिञ्चित्करम्॥

विशेषे तु सुधिय एव शरणम्॥

२. अ० २। २। २०॥

३. अत्र भाष्यम्.....**उक्तमेतत्। अमैवाव्ययेन** (अ० २। २। २०।) **इत्यत्र एवकरणस्य प्रयोजनम्—अमैवाव्ययेन यत्तुल्यविधानमुपपदं तत्र समासो यथा स्यात्। अमा चान्येन च यतुल्यविधानमुपपदं तत्र मा भूदिति॥** (अ० ३। ४ २४ सूत्रे)॥

जैसे—अग्रे भुक्त्वा व्रजति । अग्रे भोजं व्रजति । अग्रे भुङ्क्ते ततो व्रजति । प्रथमं भुक्त्वा व्रजति । प्रथमं भोजं व्रजति । प्रथमं भुङ्क्ते ततो व्रजति । पूर्वं भुक्त्वा व्रजति । पूर्वं भोजं व्रजति । पूर्वं भुङ्क्ते ततो व्रजति ॥

स्त्र्यधिकार से पूर्व पूर्व वाऽसरूपविधि सम्यक्तया प्रवर्त्तित होती है । परन्तु यहां तो उसके अनित्य होने से लडादि प्राप्त नहीं होते इस लिये विभाषा कही है ॥ 'अमैवाव्ययेन' इस सूत्र में एवकार ग्रहण का यह प्रयोजन कहा है कि—जहां केवल 'अम्' का विधान हो वहीं उपपद का समास हो, जहां अन्य प्रत्यय के साथ 'अम्' का विधान हो वहां न हो, इस कारण अग्रे आदि उपपदों का णमुलन्त के साथ समास नहीं होता ॥ २४ ॥

कर्मण्याक्रोशे कृञः खमुञ्[1] ॥ २५ ॥

कर्मणि । ७ । १ । आक्रोशे । ७ । १ । कृञः । ५ । १ । खमुञ् । १ । १ ॥ आक्रोश आह्वानमत्र गृह्यते ॥

[कर्मण्युपपदे 'कृञ्' धातोः 'खमुञ्' प्रत्ययो भवति आक्रोशे गम्यमाने ॥] चोरंकारमाक्रोशति[2] । दस्युंकारमाक्रोशति । चोरोऽसीत्याह्वयति । खित्त्वान्मुम् ॥२५॥

यहां आक्रोश का अर्थ पुकारना है ॥

[कर्मणि] कर्म उपपद हो तो [कृञः] 'कृञ्' धातु से [खमुञ्] 'खमुञ्' प्रत्यय होता है [आक्रोशे] आक्रोश गम्यमान हो तो ॥

जैसे—चोरंकारमाक्रोशति । दस्युंकारमाक्रोशति । चोर है, ऐसा पुकारता है । प्रत्यय के खित् होने से 'मुम्' हो जाता है ॥ २५ ॥

स्वादुमि णमुल्[3] ॥ २६ ॥

कृञ इत्यनुवर्त्तते ॥ स्वादुमि । ७ । १ । णमुल् । १ । १ । स्वादुशब्दोऽत्र मकारान्तो निपातितः ॥

स्वादुम्पूर्वात् 'कृञ्' धातो 'र्णमुल्' प्रत्ययो भवति ॥ स्वादुंकारं[4] भुङ्क्ते ॥

मकारान्तनिपातनस्यैतत् प्रयोजनं स्वादुशब्दः सर्वथा मकारान्त एव स्यात्, अर्थात् स्त्रीलिङ्ग ईकारान्तत्वं[5] प्राप्नोति तन्मा भूत् । स्वाद्वीं कृत्वा[6] यवागूं भुङ्क्ते,

---

१. आ० सू० १५४४ ॥

२. अन्ये तु—करोतिरत्रोच्चारणे, चोरशब्दमुच्चार्य्याक्रोशति चोरोऽसीति । तथैव चाख्यातिके ॥

३. आ० सू० १५४५ ॥

४. अन्ये त्वत्र "लवणंकारं भुङ्क्ते—सम्पन्नंकारं भुङ्क्ते" इत्याद्युदाहरन्ति, तत्र चैवं वदन्ति—इह चार्थनिर्देशाः, अर्थपरत्वन्तु निर्देशस्याविच्छिन्नपारम्पर्य्योपदेशाद् विज्ञायत इति **न्यासः** ॥

५. **'वोतो गुणवचनात्'** अ० ४ । १ । ४४ ॥

६. अत्र भाष्यम्—**स्वादुमि मान्तनिपातनं क्रियत ईकारामावार्थम् । ईकारो मा भूदिति स्वाद्वीं कृत्वा यवागूं भुङ्क्ते स्वादुकारं यवागूं भुङ्क्ते इति । च्व्यन्तस्य च मकारान्तत्वं यथा स्यात् । अस्वादु स्वादु कृत्वा भुङ्क्ते स्वादुंकारं भुङ्क्ते** ॥ (अ० ३ । ४ । २६)

स्वादुंकारं भुङ्क्ते । च्व्यन्तस्य—अस्वादु स्वादु कृत्वा भुङ्क्ते स्वादुंकारं भुङ्क्ते ॥ २६ ॥

यहां 'कृञः' पद का अनुवर्त्तन है । स्वादु शब्द यहां मकारान्त निपातन है ॥

[स्वादुमि] स्वादुम् उपपद होने पर 'कृञ्' धातु से [णमुल्] 'णमुल्' प्रत्यय होता है ॥

जैसे—स्वादुंकारं भुङ्क्ते ॥

मकारान्त निपातन करने का यह प्रयोजन है कि—स्वादु-शब्द सर्वथा मकारान्त ही होवे, अर्थात् स्त्रीलिङ्ग में ईकारान्तत्व प्राप्त है वह न हो । जैसे—स्वाद्वीं कृत्वा यवागूं भुङ्क्ते स्वादुंकारं भुङ्क्ते । च्व्यन्त से—अस्वादु स्वादु कृत्वा भुङ्क्ते स्वादुंकारं भुङ्क्ते ॥ २६ ॥

अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चत्[1] ॥ २७ ॥

कृञो णमुल् इत्यनुवर्त्तते । अन्यथैवंकथमित्थंसु । ७ । ३ । सिद्धाप्रयोगः । १ । १ । चेत् । [अ०] ॥ प्रयोक्तुमयोग्योऽप्रयोगः,[2] सिद्धस्य णमुलन्तस्य कृञ् धातोरप्रयोगः सिद्धाप्रयोगः ॥

अन्यथा, एवम्, कथम्, इत्थं[3], इति शब्दचतुष्टयोपपदात् 'कृञ्' धातो 'र्णमुल्' प्रत्ययो भवति सिद्धस्य यद्यप्रयोगः स्यात् ॥

अन्यथाकारं भुङ्क्ते । एवंकारं भुङ्क्ते । कथंकारं भुङ्क्ते । इत्थंकारं[4] भुङ्क्ते ॥

अन्यथाकारं भुङ्क्ते-इत्यनेन योऽर्थः प्रतीयते, स एवान्यथा भुङ्क्ते [इत्य] स्यार्थः ॥

'सिद्धाप्रयोगः' इति किम्—शिर एवं कृत्वा भुङ्क्ते । अत्र णमुल् न भवति ॥ २७ ॥

यहां 'कृञः' तथा 'णमुल्' इन दो पदों का अनुवर्त्तन है ॥

जो कृञ्-धातु के प्रयोग के विना भी अभीष्ट अर्थ वाक्य से कहा जाय तो कृञ् के प्रयोग को भी अप्रयोग के तुल्य समझना चाहिये, इस प्रकार सिद्ध 'कृञ्' धातु के अप्रयोग को यहां सिद्धाप्रयोग कहा है ॥

[अन्यथैवं कथमित्थंसु] अन्यथा, एवं, कथं, इत्थं ये चार शब्द उपपद हों तो 'कृञ्' धातु से 'णमुल्' प्रत्यय होता है [सिद्धाप्रयोगश्चेत्] यदि सिद्ध का अप्रयोग हो ॥

---

१. आ० सू० १५४६ ॥ २. अनर्थक इति यावत् (द्र० ३ । ४ । २८) ॥

३. अन्यथादयः प्रकारवचनाः ॥

४. वाऽसरूपविधिना क्त्वा प्रत्ययोऽपि दृश्यते—**अन्यथा कृत्वा चोदितमन्यथा कृत्वा परिहारः । कथं कृत्वा बाधक**मित्यादिभाष्यप्रयोगात् ॥

जैसे—अन्यथाकारं भुङ्क्ते । एवंकारं भुङ्क्ते । कथंकारं भुङ्क्ते । इत्थंकारं भुङ्क्ते ॥ 'अन्यथाकारं' भुङ्क्ते इससे जो अर्थ जाना जाता है वही 'अन्यथा भुङ्क्ते' का अर्थ है ॥

'सिद्धाप्रयोगः' ग्रहण इसलिये है कि—शिर एवं कृत्वा भुङ्क्ते । यहां 'णमुल्' नहीं होता ॥ २७ ॥

यथातथयोरसूयाप्रतिवचने[1] ॥ २८ ॥

कृञः सिद्धाप्रयोगश्चेत्यनुवर्त्तते । यथातथयोः । ७ । २ । असूयाप्रतिवचने । ७ । १ ॥ असूयया निन्दया यः पृच्छेत्तस्य प्रतिवचनमुत्तरं तस्मिन् ॥

असूयाप्रतिवचने गम्यमाने यथातथा-शब्दोपपदात् 'कृञ्' धातो 'र्णमुल्' प्रत्ययो भवति, तस्य सिद्धस्य कृञ् धातोरप्रयोगो यद्यनर्थकः प्रयोगः स्यात् ॥

यथाकारं भुञ्जे तथाकारं भुञ्जे किं तवाऽनेन ॥

'असूयाप्रतिवचने' इति किम्—यथा कृत्वाऽहं भुञ्जे तथा त्वं पश्यसि ॥ 'सिद्धाऽप्रयोगः' इति किम्—यथाऽहं शिरः कृत्वा भुञ्जे किं तवानेन ॥ २८ ॥

यहां 'कृञः' तथा 'सिद्धाप्रयोगश्चेत्' इन पदों का अनुवर्त्तन है ॥ असूया अर्थात् निन्दा से जो पूछे उसका जो प्रतिवचन अर्थात् उत्तर देना है वह **असूयाप्रतिवचन** कहाता है ॥

[असूयाप्रतिवचने] असूयाप्रतिवचन (जो न सह करके दूसरे की निन्दा करना उसका प्रतिवचन = उत्तर) गम्यमान हो तो [यथातथयोः] यथा तथा शब्दोपपद 'कृञ्' धातु से 'णमुल्' प्रत्यय होता है यदि 'कृञ्' का अप्रयोग अर्थात् अनर्थक प्रयोग हो तो ॥

जैसे—यथाकारं भुञ्जे, तथाकारं भुञ्जे किं तवानेन ॥

'असूयाप्रतिवचने' ग्रहण इसलिये है कि—यथा कृत्वाऽहं भुञ्जे तथा त्वं पश्यसि ॥ 'सिद्धाप्रयोगः' ग्रहण इसलिये है कि—यथाऽहं शिरः कृत्वा भुञ्जे किं तवाऽनेन ॥ २८ ॥

कर्मणि दृशिविदोः साकल्ये[2] ॥ २९ ॥

कर्मणि । ७ । १ । दृशिविदोः । ६ । २ । साकल्ये । ७ । १ ॥

साकल्ये = सम्पूर्णताविशिष्टे कर्मण्ययुपपदे दृशि-विदिभ्यां[3] धातुभ्यां 'णमुल्' प्रत्ययो भवति ॥

यवनदर्शं घातयति । यं यं यवनं पश्यति तं तं घातयतीत्यर्थः । ब्राह्मणवेदं भोजयति । यं यं ब्राह्मणं जानाति तं तं साकल्येन भोजयतीत्यर्थः ॥

'साकल्ये' इति किम्—ब्राह्मणं दृष्ट्वा भोजयति ॥ २९ ॥

---

१. आ० सू० १५४७ ॥ २. आ० सू० १५४८ ॥

३. विद् इत्यनेन सामान्यतया—लाभार्थस्य, ज्ञानार्थस्य, विचारार्थस्य चेह ग्रहणं भवति । **विदसत्तायामित्यस्य** न भवत्यकर्मकत्वात् ॥

[साकल्ये] साकल्य अर्थात् सम्पूर्णतावि‌शिष्ट [कर्मणि] कर्म उपपद हो तो [दृशिविदोः] दृशि तथा विद धातु से 'णमुल्' प्रत्यय होता है ॥

जैसे—यवनदर्शं घातयति । अर्थात् जिस जिस यवन को देखता है उस उस को मारता है ॥ ब्राह्मणवेदं भोजयति । जिस जिस ब्राह्मण को जानता है उस उस को भोजन कराता है ॥ 'साकल्ये' ग्रहण इसलिये है कि—ब्राह्मणं दृष्ट्वा भोजयति ॥ २९ ॥

यावति विन्दजीवोः[1] ॥ ३० ॥

यावति । ७ । १ । विन्दजीवोः । ६ । २ ॥ विन्द इति सनुमो लाभार्थस्य ग्रहणम् ॥

यावच्छब्दोपपदाभ्यां विन्द-जीवधातुभ्यां 'णमुल्' प्रत्ययो[2] भवति ॥

यावद्वेदं भुङ्क्ते, यावल्लभते तावद्भुङ्क्ते ॥ यावज्जीवमधीते, मरणपर्य्यन्तमधीते ॥ ३० ॥

यहां 'विन्द' इस सनुम् ग्रहण से लाभार्थक 'विद' धातु का ग्रहण है ॥

[यावति] यावत् शब्द उपपद हो तो [विन्दजीवोः] विन्द तथा जीव धातु से 'णमुल्' प्रत्यय होता है ॥

जैसे—यावद्वेदं भुङ्क्ते । अर्थात् जितना मिलता है, उतना खा लेता है । यावज्जीवमधीते, अर्थात् मरण पर्य्यन्त पढ़ता है ॥ ३० ॥

चर्मोदरयोः पूरेः[3] ॥ ३१ ॥

कर्मणीत्यनुवर्त्तते । चर्मोदरयोः । ७ । २ । पूरेः । ५ । १ ॥ पूरीति ण्यन्तस्य ग्रहणम् ॥

चर्मोदरयोः कर्मोपपदयोः 'पूरि' धातो 'णमुल्' प्रत्ययो भवति ॥

चर्मपूरं स्तृणाति । उदरपूरं भुङ्क्ते ॥ ३१ ॥

यहां 'कर्मणि' पद का अनुवर्त्तन है । 'पूरि' से ण्यन्त का ग्रहण है ॥

[चर्मोदरयोः] चर्म और उदर कर्म उपपद हों तो [पूरेः] 'पूरि' धातु से 'णमुल्' प्रत्यय होता है ॥

जैसे—चर्मपूरं स्तृणाति । उदरपूरं भुङ्क्ते ॥ ३१ ॥

वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम्[4] ॥ ३२ ॥

कर्मणीत्यनुवर्त्तते पूरेश्च । वर्षप्रमाणे । ७ । १ । ऊलोपः । १ । १ । च । [अ० ।] अस्य । ६ । १ । अन्यतरस्याम् । [अ०] ॥ वर्षस्य=वर्षणस्य प्रमाणं वर्षप्रमाणं तस्मिन् । अप्राप्तविभाषेयम् । ऊलोपेन सह सम्बध्यते ॥

---

१. आ० सू० १५४९ ॥ २. असाकल्यार्थ आरम्भः ॥
३. आ० सू० १५५० ॥ ४. आ० सू० १५५१ ॥

वर्षप्रमाणे गम्यमाने कर्मण्युपपदे 'पूरि' धातो 'र्णमुल्' प्रत्ययो भवति, अस्य पूरिधातोरूलोपश्च विकल्पेन भवति ॥

गोष्पदप्रं वृष्टो देवः । गोष्पदपूरं वृष्टो देवः ॥

['अस्य' इति किम्] मूषिकाबिलप्रं वृष्टो देवः । मूषिकाबिलपूरं वृष्टो देवः । अत्र मूषिकाशब्दे य ऊकारस्तस्य लोपो मा भूत् ॥ ३२ ॥

यहां 'कर्मणि' तथा 'पूरेः' इन दोनों पदों का अनुवर्त्तन है । यह अप्राप्तविभाषा है, इसका सम्बन्ध ऊलोप से है ॥

[**वर्षप्रमाणे**] वर्षा का प्रमाण गम्यमान हो तो कर्म उपपद होने पर 'पूरि' धातु से 'णमुल्' प्रत्यय होता है [**ऊलोपश्चास्य**] और इस पूरि धातु के ऊकार का लोप [**अन्यतरस्याम्**] विकल्प से होता है ॥

जैसे—गोष्पदप्रं वृष्टो देवः । गोष्पदपूरं वृष्टो देवः ॥

'अस्य' ग्रहण इसलिये है कि—मूषिकाबिलप्रं वृष्टो देवः । मूषिकाबिलपूरं वृष्टो देवः । यहां मूषिका शब्द के ऊकार का लोप न हो ॥ ३२ ॥

चेले क्नोपेः[1] ॥ ३३ ॥

कर्मणीत्यनुवर्त्तते, वर्ष-प्रमाण इति च । चेले । ७ । १ । क्नोपेः । ५ । १ । चेल-शब्दो वस्त्रवाची । **'क्नूयी शब्दे उन्दे च'**[2] उन्दनार्थस्य[3] क्लेदनार्थस्य क्नूयीधातोर्ण्यन्तस्य ग्रहणम् ॥

चेले कर्मण्युपपदे क्नोपिधातो 'र्णमुल्' प्रत्ययो भवति ॥

चेलक्नोपं वृष्टो मेघः । अत्र पर्य्याय[4]-वचनानामपि ग्रहणं भवति । वस्त्रक्नोपम् । वसनक्नोपम् ॥ ३३ ॥

यहां 'कर्मणि' पद का अनुवर्त्तन है, और 'वर्षप्रमाण' का भी ॥ चेल शब्द वस्त्रवाची है ॥ उन्दन = गीला करने अर्थ में वर्त्तमान ण्यन्त 'क्नूयि शब्दे उन्दे च' का ग्रहण है ॥

[चेले] चेल कर्म उपपद हो तो [**क्नोपेः**] ण्यन्त 'क्नोपि' धातु से 'णमुल्' प्रत्यय होता है ॥

---

१. आ० सू० १५५२ ॥ २. धा० भ्वा० ४७८ ॥

३. चेलक्नोपमित्यत्र ये क्नूयिधातोः शब्दार्थं दृष्ट्वैवं व्याचक्षते—'चेलं क्नोपयन् शब्दापयन् वृष्ट इत्यर्थः' इत्यादि वदन्ति तदसमञ्जसं वस्त्रामार्द्रीकरणमात्रमेव वृष्टो मेघ इत्यर्थस्यैवात्र युक्ततरत्वात् । अत एवात्र 'उन्दनार्थस्य क्लेदनार्थस्य' इत्युक्तम् ॥

४. अर्थपरत्वादत्र चेलशब्दस्य ॥

जैसे—चेलक्नोपं वृष्टो मेघः। यहां पर्य्यायवाची का भी ग्रहण होता है॥ जैसे—वस्त्रक्नोपम् ।वसनक्नोपम् ॥ ३३ ॥

निमूलसमूलयोः कषः[1] ॥ ३४ ॥

कर्मणीत्यनुवर्त्तते । निमूलसमूलयोः । ७ । २ । कषः । ५ । १ ।।

निमूल-समूलकर्मोपपदात् 'कष' धातो 'र्णमुल्' प्रत्ययो भवति ।।

हिंसार्थस्य कषधातोरत्र[2] ग्रहणम् । निमूलकाषं कषति । समूलकाषं कषति । निमूलं कषति, समूलं कषति, हन्तीत्यर्थः ।। ३४ ।।

यहां 'कर्मणि' पद का अनुवर्त्तन है ॥

[निमूलसमूलयोः] निमूल, समूल कर्म उपपद हों तो [कषः] 'कष' धातु से 'णमुल्' प्रत्यय होता है ॥ यहां हिंसार्थक 'कष' धातु का ग्रहण है ॥

जैसे—निमूलकाषं कषति। जड़ को छोड़ के जैसे काटता हो वैसे काटता है[3]॥ समूलकाषं कषति। जड़समेत जैसे काटता हो वैसे काटता है॥ ३४ ॥

शुष्कचूर्णरूक्षेषु पिषः[4] ॥ ३५ ॥

कर्मणीत्यनुवर्त्तते । शुष्कचूर्णरूक्षेषु । ७ । ३ । पिषः । ५ । १ ।।

शुष्कादिषु [कर्मसु] उपपदेषु 'पिष' धातो 'र्णमुल्' प्रत्ययो भवति ।। शुष्कपेषं पिनष्टि । शुष्कं पिनष्टीत्यर्थः । चूर्णपेषं पिनष्टि । रूक्षपेषं पिनष्टि ।। ३५ ।।

यहां 'कर्मणि' पद का अनुवर्त्तन है ॥

[शुष्कचूर्णरूक्षेषु] शुष्क, चूर्ण, रूक्ष ये कर्म उपपद हों तो [पिषः] 'पिष' धातु से 'णमुल्' प्रत्यय होता है ॥

जैसे—शुष्कपेषं पिनष्टि। सूखा पीसता हो वैसे पीसता है॥ चूर्णपेषं पिनष्टि। रूक्षपेषं पिनष्टि। चूर्ण तथा रूक्ष जैसे पीसता हो वैसे पीसता है॥ ३५ ॥

समूलाकृतजीवेषु हन्कृञ्ग्रहः[5] ॥ ३६ ॥

कर्मणीत्यनुवर्त्तते । समूलाकृतजीवेषु । ७ । ३ । हन्कृञ्ग्रहः । ५ । १ ।। हनादीनां समाहारद्वन्द्वः ।।

---

१. आ० सू० १५५३ ॥ २. अत्र कषादिषु पूर्वकालता न सम्बध्यते ॥

३. यहां से लेकर ३ । ४ । ४६ सूत्र तक उदाहरणों का भाषार्थ आख्यातिक के अनुसार दिया है ॥

४. आ० सू० १५५४ ॥ ५. आ० सू० १५५५ ॥

समूल-अकृत-जीव इत्येतेषु कर्मसूपपदेषु यथासंख्यं हन्, कृञ्, ग्रह इत्येतेभ्यो धातुभ्यो 'णमुल्' प्रत्ययो भवति ।।

समूलघातं शत्रुं हन्ति । समूलं हन्तीत्यर्थः ।। अकृतकारं करोति । अकृतं करोति ।। जीवग्राहं गृह्णाति । जीवान् गृह्णाति [इत्यर्थः] ।। ३६ ।।

यहां 'कर्मणि' पद का अनुवर्त्तन है । 'हन्कृञ्ग्रहः' में समाहारद्वन्द्व समास है ।।

[समूलाकृतजीवेषु] समूल, अकृत, जीव ये कर्म उपपद हों तो यथासंख्य [हन्-कृञ्-ग्रहः] हन्, कृञ्, ग्रह धातुओं से 'णमुल्' प्रत्यय होता है ।।

जैसे—समूलघातं शत्रुं हन्ति । मूलसमेत जैसे मारता हो वैसे मारता है । अकृतकारं करोति । न किये को जैसे करता हो, वैसे करता है । जीवग्राहं गृह्णाति । जीव का ग्रहण करता हो वैसे ग्रहण करता है ।। ३६ ।।

करणे हनः[1] ।। ३७ ।।

कर्मणीति नानुवर्त्तते । करणे । ७ । १ । हनः । ५ । १ ।।

करण उपपदे 'हन' धातो 'र्णमुल्' प्रत्ययो भवति ।।

पाण्युपघातं वेदिं हन्ति । पादोपघातं भूमिं हन्ति । पाणिभ्यां पादाभ्यां वा हन्तीत्यर्थः ।।

'हिंसार्थानाञ्च समानकर्मकाणाम्'[2] इति वक्ष्यमाणसूत्रेण णमुल् स्यादेव, पुनर्ग्रहणमहिंसार्थादपि यथा स्यात् । वेदिभूमी जडपदार्थौ, तत्र हिंसा न सम्भवति । अन्यच्च—वक्ष्यमाणसूत्रेण यत्र णमुल् विधीयते तत्र **'तृतीयाप्रभृतीन्यन्यतरस्याम्'[3]** इति विकल्पेन समासो भवति । अनेन णमुलि सति नित्यसमासो यथा स्यात् । यथाविध्यनुप्रयोगार्थश्च ।। ३७ ।।

यहां 'कर्मणि' पद की अनुवृत्ति नहीं आती ।।

[**करणे**] करण उपपद हो तो [हनः] 'हन' धातु से 'णमुल्' प्रत्यय होता है ।।

जैसे—पाण्युपघातं वेदिं हन्ति । पादोपघातं भूमिं हन्ति । हाथ तथा पांव से मारता हो वैसे मारता है ।।

'हिंसार्थानाञ्च समानकर्मकाणाम्' इस अगले सूत्र से 'णमुल्' हो ही जाता पुनः 'हन' का ग्रहण इसलिये है कि—अहिंसार्थक से भी णमुल् हो जावे, क्योंकि वेदि तथा भूमि जड़ पदार्थ हैं, उनमें हिंसा नहीं हो सकती ।। दूसरा प्रयोजन यह है कि—वक्ष्यमाणसूत्र से जहां 'णमुल्' होता है, उस णमुल् विषय में 'तृतीयाप्रभृतीन्यन्यतरस्याम्' सूत्र से विकल्प करके समास होता है, परन्तु इससे विहित णमुल् के साथ नित्यसमास हो तथा यथाविध्यनुप्रयोग भी हो जावे ।। ३७ ।।

---

१. आ० सू० १५५६ ।। २. अ० ३ । ४ । ४८ ।।
३. अ० २ । २ । २१ ।।

स्नेहने पिषः[1] ॥ ३८ ॥

करण इत्यनुवर्त्तते । स्नेहने । ७ । १ । पिषः । ५ । १ ॥

स्नेहनवाचिनि करण उपपदे 'पिष' धातो 'ण्मुल्' प्रत्ययो भवति ॥

उदपेषं पिनष्टि । उदकेन पिनष्टीत्यर्थः । **'पेषंवासवाहनधिषु च'**[2] इत्युदकशब्दस्योदादेशः । तैलपेषं पिनष्टि । घृतपेषं पिनष्टि ॥ ३८ ॥

यहां 'करणे' पद का अनुवर्त्तन है ॥

[स्नेहने] स्नेहन वाची करण उपपद हो तो [पिषः] 'पिष' धातु से 'णमुल्' प्रत्यय होता है ॥

जैसे—उदपेषं पिनष्टि । जल से पीसता हो वैसे पीसता है । 'पेषंवासवाहनधिषु च' इससे उदक शब्द को 'उद' आदेश हो जाता है । तैलपेषं पिनष्टि । घृतपेषं पिनष्टि ॥ ३८ ॥

हस्ते वर्त्तिग्रहोः[3] ॥ ३९ ॥

करण इत्यनुवर्त्तते । हस्ते । ७ । १ । वर्त्तिग्रहोः । ६ । २ । वर्त्तीति ण्यन्तस्य ग्रहणम् ॥

हस्ते करण उपपदे वर्त्ति-ग्रहधातुभ्यां 'णमुल्' प्रत्ययो भवति ॥

हस्तवर्त्तं वर्त्तयति । हस्तेन वर्त्तयति ॥ हस्तग्राहं गृह्णाति । हस्तेन गृह्णातीत्यर्थः । हस्तपर्य्यायाणामपि ग्रहणमिष्यते—करग्राहम् । पाणिग्राहम् ॥ ३९ ॥

यहां 'करणे' पद का अनुवर्त्तन है । वर्त्ति से यहां ण्यन्त 'वृतु' धातु का ग्रहण है ॥

[हस्ते] हस्त करण उपपद हो तो [वर्त्तिग्रहोः] वर्त्ति तथा ग्रह धातु से 'णमुल्' प्रत्यय होता है ॥

जैसे—हस्तवर्त्तं वर्त्तयति । हस्तग्राहं गृह्णाति । जैसे हाथ से वर्त्तता तथा ग्रहण करता हो वैसे वर्त्तता तथा ग्रहण करता है ॥ यहां हस्त के पर्य्यायों का भी ग्रहण इष्ट है । जैसे—करग्राहम् । पाणिग्राहम् ॥ ३९ ॥

स्वे पुषः[4] ॥ ४० ॥

करण इत्यनुवर्त्तते । स्वे । ७ । १ । पुषः । ५ । १ ॥ अत्र सर्वस्मिन् प्रकरणे **'पित्पर्य्यायवचनस्य [च] स्वार्थम्'**[5] इति वार्त्तिकेन सर्वेषूपपदेषु पर्य्यायवचनानां ग्रहणं भवति ॥

करणवाचिषु स्वपर्य्यायेषूपपदेषु 'पुष' धातो 'ण्मुल्' प्रत्ययो भवति ॥

---

१. आ० सू० १५५७ ॥
२. अ० ६ । ३ । ५८ ॥
३. आ० सू० १५५८ ॥
४. आ० सू० १५५९ ॥
५. अ० १ । १ । ६८ वा० ॥

स्व-शब्दोऽत्रं [आत्मीयज्ञाति] धनपर्य्यायो गृह्यते । स्वपोषं पुष्यति । आत्मपोषं पुष्यति । पितृपोषं पुष्यति । मातृपोषं पुष्यति । रैपोषं पुष्यति । धनपोषं पुष्यति । अश्वपोषम् । गोपोषम् ॥ ४० ॥

यहां 'करणे' पद का अनुवर्त्तन है । इस प्रकरण में 'पित्पर्यायवचनस्य च स्वाद्यर्थम्' इस वार्त्तिक से सब उपपदों में पर्य्यायवाची का ग्रहण होता है ॥

करणवाची [स्वे] स्व के पर्य्याय उपपद हों तो [पुषः] 'पुष' धातु से 'णमुल्' प्रत्यय होता है ॥ यहां स्व-शब्द आत्मा तथा ज्ञाति और धन का पर्य्यायवाची है ॥

जैसे—स्वपोषं पुष्यति । आत्मपोषं पुष्यति । पितृपोषं पुष्यति । मातृपोषं पुष्यति । रैपोषं पुष्यति । धनपोषं पुष्यति । अश्वपोषं । गोपोषं ॥ ४० ॥

अधिकरणे बन्धः[1] ॥ ४१ ॥

अधिकरणे । ७ । १ । बन्धः । ५ । १ ॥ अधिकरणवाचिशब्दोपपदाद् 'बन्ध' धातो 'र्णमुल्' प्रत्ययो भवति ॥

चक्रबन्धं बध्नाति । कूटबन्धं बध्नाति । मुष्टिबन्धं बध्नाति । चक्रे-कूटेमुष्टौ वा बध्नातीत्यर्थः ॥ ४१ ॥

[अधिकरणे] अधिकरणवाची शब्द उपपद हो तो [बन्धः] 'बन्ध' धातु से 'णमुल्' प्रत्यय होता है ॥

जैसे—चक्रबन्धं बध्नाति । कूटबन्धं बध्नाति । मुष्टिबन्धं बध्नाति ॥ जैसे चक्र (पहिया) कूट तथा मुष्टि(मुट्ठी) में बांधता हो वैसे बांधता है ॥ ४१ ॥

संज्ञायाम्[2] ॥ ४२ ॥

अधिकरण[3] इति नानुवर्त्तते । संज्ञायाम् । ७ । १ ॥

संज्ञायां विषये सामान्योपपदाद् 'बन्ध' धातो 'र्णमुल्' प्रत्ययो भवति ॥

अट्टालिकाबन्धं बद्धः । चण्डालिकाबन्धं बद्धः । बन्धविशेषस्य 'अट्टालिकाबन्ध' इत्यादयः संज्ञाः सन्ति ॥ ४२ ॥

यहां 'अधिकरण' पद की निवृत्ति हो जाती है ॥

[संज्ञायाम्] संज्ञाविषय में सामान्य उपपद होने पर 'बन्ध' धातु से 'णमुल्' प्रत्यय होता है ॥

जैसे—अट्टालिकाबन्धं बद्धः । चण्डालिकाबन्धं बद्धः । ये बन्धविशेष के नाम हैं अर्थात् अट्टालिका (अटारी) तथा चण्डालिका के समान बांधता हो वैसे बांधता है ॥ ४२ ॥

---

१. आ० सू० १५६० ॥ २. आ० सू० १५६१ ॥

३. अनधिकरणार्थं आरम्भः ॥

कर्त्रोर्जीवपुरुषयोर्नशिवहोः[1] ॥ ४३ ॥

कर्त्रोः । ७ । २ । जीवपुरुषयोः । ७ । २ । नशिवहोः । ६ । २ ॥

यथासंख्यं कर्तृवाचिजीव-पुरुषोपपदाभ्यां नशि-वहिधातुभ्यां 'णमुल्' प्रत्ययो भवति ॥

जीवनाशं नश्यति । जीवो नश्यतीत्यर्थः ॥ पुरुषवाहं वहति । पुरुषो वहतीत्यर्थः । 'कर्त्रोः' इति किम्—जीवेन नष्टः ॥ ४३ ॥

[कर्त्रोः] कर्तृवाची [जीवपुरुषयोः] जीव और पुरुष उपपद हों तो यथासंख्य [नशिवहोः] नश तथा वह धातु से 'णमुल्' प्रत्यय होता है ॥

जैसे—जीवनाशं नश्यति । जीव नष्ट होता है ॥ पुरुषवाहं वहति । अर्थात् जैसे पुरुष जहां तहां वस्तु ले जाने तथा ले आने में वहता है वैसे वहता है ॥

'कर्त्रोः' ग्रहण इसलिये है कि—जीवेन नष्टः ॥ ४३ ॥

ऊर्ध्वे शुषिपूरोः[2] ॥ ४४ ॥

कर्तृग्रहणमनुवर्त्तते । ऊर्ध्वे । ७ । १ । शुषिपूरोः । ६ । २ ॥

कर्तृवाचिन्यूर्ध्वशब्दोपपदाभ्यां शुषि-पूरिधातुभ्यां 'णमुल्' प्रत्ययो भवति ॥

ऊर्ध्वशोषं शुष्यति । ऊर्ध्वं शुष्यतीति यावत् ॥ ऊर्ध्वपूरं पूर्य्यते । ऊर्ध्वं पूर्य्यत इत्यर्थः ॥ ४४ ॥

यहां 'कर्तृ' पद का अनुवर्त्तन है ॥

कर्तृवाची [ऊर्ध्वे] ऊर्ध्व शब्द उपपद हो तो [शुषिपूरोः] शुषि तथा पूरि धातु से 'णमुल्' प्रत्यय होता है ॥

जैसे—ऊर्ध्वशोषं शुष्यति । ऊपर को सूखता हो वैसे सूखता है ॥

ऊर्ध्वपूरं पूर्य्यते ॥ ऊपर को पूरा होता हो वैसे पूरा होता है ॥ ४४ ॥

उपमाने कर्मणि च[3] ॥ ४५ ॥

कर्तृग्रहणमप्यनुवर्त्तते । उपमाने । ७ । १ । कर्मणि । ७ । १ । च । [अ०] ॥

उपमानवाचिनि कर्मणि कर्त्तरि चोपपदे सामान्यधातो 'र्णमुल्' प्रत्ययो भवति ॥

मातृधायं धयति । गुरुसेवं सेवते । मातरमिव धयति । गुरुमिव सेवते ॥ कर्त्तरि—बालरोदं रोदिति । बाल इव रोदिति । सिंहगर्जं गर्जितः । सिंह इव गर्जितः ॥ ४५ ॥

---

१. आ० सू० १५६२ ॥ २. आ० सू० १५६३ ॥
३. आ० सू० १५६४ ॥

यहां 'कर्त्तृ' पद का अनुवर्त्तन है ॥

[उपमाने] उपमानवाची [कर्मणि च] कर्म तथा कर्त्ता उपपद हो तो सामान्य धातु से 'णमुल्' प्रत्यय होता है ॥

जैसे—मातृधायं धयति । गुरुसेवं सेवते । जैसे माता पिलाती हो वैसे पिलाती है, गुरु की सेवा के तुल्य सेवा करता है ॥

कर्त्तरि—बालरोदं रोदिति । बालक के रोने के तुल्य रोता है । सिंहगर्जं गर्जितः । सिंह की गर्जना के तुल्य गर्जा ॥ ४५ ॥

कषादिषु[1] [2]यथाविध्यनुप्रयोगः ॥ ४६ ॥

कषादिषु । ७ । ३ । यथाविधि । [अ० ।] अनुप्रयोगः । १ । १ ॥ **'निमूलसमूलयोः कषः'**[3] इत्यारभ्याऽनुक्रान्ताः कषादयः ॥

कषादिषु यथाविधि यस्माद् धातोर्णमुल् विधीयते तस्य धातोरन्यप्रत्ययान्तो द्वितीयः प्रयोगः कर्त्तव्यः ॥

यथा—निमूलकाषं कषति, कषतु, कषितव्यम्, कषिता वा । ते चाऽनुप्रयोगाः[4] सर्वत्रास्याऽनुकूलत उदाहृताः ॥ अस्मिन् [णमुल्] प्रकरणे णमुल्-कमुल्-खमुञ्-इत्येतेषु प्रत्ययेषु निरनुबन्धकेषु 'अम्' शिष्यते । तत्र **'अमैवाव्ययेन'**[5] इत्युपपदस्याऽमन्तेन नित्यसमासो भवति । अग्रे तृतीयाप्रभृतिषु विकल्प उक्तस्तत्र पक्षे वाक्यमपि स्थास्यति ॥४६॥

'निमूलसमूलयो कषः' सूत्र से लेकर यहां तक कषादि कहे हैं । [कषादिषु] कषादि में [यथाविधि] जिस धातु से णमुल् विधान किया है उस धातु का अन्य प्रत्ययान्त [अनुप्रयोगः] पीछे प्रयोग करना चाहिये ॥

जैसे—निमूलकाषं कषति, कषतु, कषितव्यम्, कषिता वा ॥ ये अनुप्रयोग सब सूत्रों में इसी प्रकार दिखाये जा चुके हैं ॥

इस प्रकरण में—णमुल्, कमुल्, खमुञ् इन प्रत्ययों में अनुबन्ध रहित होने पर 'अम्' शेष रह जाता है । वहां 'अमैवाव्ययेन' इस सूत्र से उपपद का अमन्त के साथ नित्य समास होता है ॥ आगे तृतीया प्रभृतियों में विकल्प से समास कहा है, अतः पक्ष में वाक्य भी रहता है ॥ ४६ ॥

---

१. आ० सू० १५६५ ॥ २. यथाविधीति नियमार्थं वचनम् ॥

३. अ० ३ । ४ । ३४ ॥

४. "स च क्रियासमभिहारानुप्रयोगवद् व्यवधानेऽपि भवति यथा—घृतनिधायमुदकं निदधातीति" **भागवृत्तिः** ॥

५. अ० २ । २ । २० ॥

उपदंशस्तृतीयायाम्[1] ॥ ४७ ॥

उपदंशः । ५ । १ । तृतीयायाम् । ७ । १ ॥ [2]तृतीयान्तोपपदादुपपूर्वाद् 'दंश' धातो 'र्णमुल्' प्रत्ययो भवति ॥

मूलकोपदंशं भुङ्क्ते । मूलकेनोपदंशं भुङ्क्ते ॥ दन्तोपदंशं भुङ्क्ते । दन्तैरुपदंशं भुङ्क्ते । विकल्पेनात्र[3] समासः ॥ ४७ ॥

[तृतीयायाम्] तृतीयान्त उपपद हो तो [उपदंशः] उपपूर्वक 'दंश' धातु से 'णमुल्' प्रत्यय होता है ॥

जैसे—मूलकोपदंशं भुङ्क्ते । मूलकेनोपदंशं भुङ्क्ते ॥ दन्तोपदंशं भुङ्क्ते ॥ दन्तैरुपदंशं भुङ्क्ते ॥ यहां विकल्प से समास होता है ॥ ४७ ॥

हिंसार्थानाञ्च समानकर्मकाणाम्[4] ॥ ४८ ॥

तृतीयायामित्यनुवर्त्तते । हिंसार्थानाम् । ६ । ३ । च । [अ० ।] समानकर्मकाणाम् । ६ । ३ ॥

हिंसा जङ्गमानां जीवानां प्राणत्याजना, हिंसाऽर्थो येषां ते हिंसार्थास्तेषाम् । ये चात्राऽनुप्रयुक्ता धातवस्तैः समानकर्मकाणाम्, अर्थाद्धिंसार्थस्य धातोरनुप्रयुक्तस्य चैकं कर्म स्यात्तदा, तृतीयान्तोपपदेभ्यो हिंसार्थेभ्यो धातुभ्यो 'णमुल्' प्रत्ययो भवति ॥

दण्डोपघातं गाश्चालयति । नखोपघातं यूकान् गृह्णाति । अत्र हनो ग्रहणस्य [च] यूकशब्द एकं कर्मेति समानकर्मत्वम् ॥

'समानकर्मकाणाम्' इति किम्—दण्डेन वृकमुपहत्य गोपालको गाश्चालयति । अत्रोपघातस्य पूर्वकालत्वात् क्त्वा प्रत्ययो भवति ॥ ४८ ॥

यहां 'तृतीयायाम्' पद का अनुवर्त्तन है । जङ्गम प्राणियों के प्राणों को छुड़ा देना हिंसा कहाती है ॥

तृतीयान्त उपपद हो तो [समानकर्मकाणाम्] अनुप्रयुक्त धातु के समान कर्म वाले [हिंसार्थानाम्] हिंसार्थक धातुओं से 'णमुल्' प्रत्यय होता है ॥

जैसे—दण्डोपघातं गाश्चालयति । नखोपघातं यूकान् गृह्णाति । यहां उपपूर्वक हन धातु का तथा णिजन्त चल धातु का गौ एक कर्म होने से समानकर्मत्व है, इसी प्रकार हन का तथा गृह्णाति का यूक एक कर्म है, अतः यहां समानकर्मकत्व है ॥

'समानकर्मकाणाम्' ग्रहण इसलिये है कि—दण्डेन वृकमुपहत्य गोपालको गाश्चालयति । यहां उपघात के पूर्वकाल होने से क्त्वा प्रत्यय होता है ॥ ४८ ॥

---

१. आ० सू० १५६६ ॥
२. अतः परं पूर्वकालस्य सम्बन्धः ॥
३. अ० २ । २ । २१ ॥
४. आ० सू० १५६७ ॥

सप्तम्याञ्चोपपीडरुधकर्षः[1] ॥ ४९ ॥

तृतीयामित्यप्यनुवर्त्तते । सप्तम्याम् । ७ । १ । च । [अ०] । उपपीडरुध[2]-कर्षः । ५ । १ ॥ उपशब्दः प्रत्येकं सम्बध्यते ॥

तृतीयान्तसप्तम्यन्तोपपदेभ्य उपपूर्वेभ्यः 'पीड-रुध-कर्ष' धातुभ्यो 'णमुल्' प्रत्ययो भवति ॥

पार्श्वोपपीडं शेते । पार्श्वाभ्यामुपपीडं शेते ॥ कण्ठोपपीडं जलं पिबति । कण्ठ उपपीडं जलं पिबति ॥ पाण्युपरोधं चूर्णं पिनष्टि । पाणिभ्यामुपरोधं चूर्णं पिनष्टि ॥ हृदयोपरोधं वाक्यं वदति । हृदय उपरोधं वा । ॥ हस्तोपकर्षं काष्ठं गृह्णाति । हस्ताभ्यामुपकर्षं वा ॥ कूपोपकर्षं रज्जुं गृह्णाति । कूप उपकर्षं वा ॥ कर्ष इति गुणनिर्देशाद् भ्वादेर्ग्रहणं न तु तुदादेः ॥ ४९ ॥

यहां 'तृतीयायाम्' पद का अनुवर्त्तन है । उप-शब्द का पीड, रुध, कर्ष इन तीनों के साथ सम्बन्ध है ॥

[**सप्तम्याश्च**] तृतीयान्त तथा सप्तम्यन्त उपपद हो तो [**उप-पीड-रुध-कर्षः**] उप-पूर्वक पीड, रुध, कर्ष धातुओं से 'णमुल्' प्रत्यय होता है ॥

जैसे—पार्श्वोपपीडं शेते । पार्श्वाभ्यामुपपीडं शेते ॥ कण्ठोपपीडं जलं पिबति । कण्ठ उपपीडं जलं पिबति ॥ पाण्युपरोधं चूर्णं पिनष्टि । पाणिभ्यामुपरोधं चूर्णं पिनष्टि ॥ हृदयोपरोधं वाक्यं वदति । हृदय उपरोधं वा ॥ हस्तोपकर्षं काष्ठं गृह्णाति । हस्ताभ्यामुपकर्षं वा ॥ कूपोपकर्षं रज्जुं गृह्णाति । कूप उपकर्षं वा ॥ 'कर्षः' इसमें गुण निर्देश से भ्वादि का ग्रहण होता है तुदादि का नहीं ॥ ४९ ॥

समासत्तौ[3] ॥ ५० ॥

सप्तम्यन्तं तृतीयान्तं चोभयमनुवर्त्तते[4] । समासत्तौ । ७ । १ ॥ समासत्तिः समीपता ॥

समासत्तौ गम्यमानायां तृतीयान्तसप्तम्यन्तोपपदात् सामान्यधातो 'र्णमुल्' प्रत्ययो भवति ॥

---

१. आ० सू० १५६८ ॥

२. पीडादीनां समाहारद्वन्द्वः, उपपूर्वपीडादिरित्युत्तरपदलोपी समासः, पुंस्त्वं विभक्तिव्यत्ययश्च सौत्रत्वात् ॥ 'उप' इत्येतस्य 'पीड' इत्येतेनैव सम्बन्ध इति **भागवृत्तिकारः पुरुषोत्तमदेवश्च** ॥

३. आ० से० १५६९ ॥

४. **'सप्तम्याञ्चोपपीडरुधकर्षः'** इत्यत्र चकारस्यैतत् प्रयोजनम्—तृतीयायामित्यस्य निवर्त्तनं न स्यादिति, तेनात्र **'चानुकृष्टं नोत्तरत्र'** इति न युज्यते । अतः स्वरितत्वादेवात्रानुवर्त्तते सप्तम्यां तृतीयायाञ्चेति ॥

केशग्राहं, केशैर्ग्राहिं युध्यन्ते[1] । केशग्राहं, केशेषु ग्राहं युध्यन्ते । केशाकेशियुद्धेऽत्यन्तः सन्निकर्षो भवतीत्यर्थः ।। ५० ।।

यहां 'तृतीयायाम्' तथा 'सप्तम्याम्' पदों का अनुवर्त्तन है ।। [समासत्तौ] समीपता गम्यमान होने पर तृतीयान्त तथा सप्तम्यन्त उपपद हों तो सामान्य धातु से' णमुल्' प्रत्यय होता है । जैसे—केशग्राहं, केशैर्ग्राहिं युध्यन्ते । केशग्राहं, केशेषु ग्राहं युध्यन्ते, अर्थात् केशाकेशि युद्ध में अत्यन्त सन्निकर्ष होता है ।। ५० ।।

प्रमाणे च[2] ।। ५१ ।।

तृतीयासप्तम्योरित्युभयमनुवर्त्तते । प्रमाणे । ७ । १ । च । [अ०] । प्रमाण[3]-मियत्ता ।।

प्रमाणे गम्यमाने तृतीयान्तसप्तम्यन्तोपपदाद् धातो'र्णमुल' प्रत्ययो भवति द्व्यङ्गुल्युत्कर्षं खण्डिकां[4] छिनत्ति । द्व्यङ्गुल उत्कर्षम् । द्व्यङ्गुलेनोत्कर्षं वा ।।५१।।

यहां 'तृतीयायाम्' तथा 'सप्तम्याम्' पदों का अनुवर्त्तन है ।। [प्रमाणे च] प्रमाण अर्थात् इयत्ता (इतनापन) गम्यमान हो तो तृतीयान्त तथा सप्तम्यन्त उपपद होने पर धातु से 'णमुल्' प्रत्यय होता है । जैसे—द्व्यङ्गुल्युत्कर्षं खण्डिकां छिनत्ति । द्व्यङ्गुल उत्कर्षम् । द्व्यङ्गुलेनोत्कर्षं वा ।। दो अङ्गुल के प्रमाण में वा दो अङ्गुल के प्रमाण से काष्ठ को काटता है ।। ५१ ।।

अपादाने परीप्सायाम्[5] ।। ५२ ।।

तृतीयासप्तम्योरिति निवृत्तम् । अपादाने । ७ । १ ।। परीप्सायाम् । ७ । १ ।। परितः सर्वत इच्छा तस्याम् ।।

परीप्सायां[6] गम्यमानायामपादानोपपदाद् धातो 'र्णमुल्' प्रत्ययो भवति ।।

शय्योत्थायं धावति । शय्याया उत्थायं धावति । पीठोत्थायं ग्रामं गच्छति । पीठादुत्थायं वा ।।

'परीप्सायाम्' इति किम्—आसनादुत्थायेतस्ततो भ्रमति ।। ५२ ।।

यहां 'तृतीयायाम्' तथा 'सप्तम्याम्' इन दो पदों की निवृत्ति है ।। [परीप्सायाम्] परीप्सा सब ओर से चाहना गम्यमान हो तो [अपादने] अपादान उपपद होने पर धातु से 'णमुल्' प्रत्यय होता है ।।

---

१. आ० सू० १५७० ।।
२. **आयामस्तु प्रमाणं स्यात्** । अ० ५ । १ । १९ भा० ।।
३. ह्रस्वः खण्डः खण्डिका ।।
४. आ० सू० १५७१ ।।
५. परीप्सा = त्वरा, इत्यन्ये ।।

जैसे—शय्योत्थायं धावति । शय्याया उत्थायं धावति । पीठोत्थायं ग्रामं गच्छति । पीठादुत्थायं वा ग्रामं गच्छति ॥ 'परीप्सायाम्' ग्रहण इसलिये है कि—आसनादुत्थायेतस्ततो भ्रमति ॥ ५२ ॥

द्वितीयायाञ्च[1] ॥ ५३ ॥

परीप्सायामित्यनुवर्त्तते । द्वितीयायाम् । ७ । १ । च । [अ०] ॥

परीप्सायामभिधेयायां द्वितीयान्तोपपदाद् धातो 'र्णमुल्' प्रत्ययो भवति ॥

असिग्राहं युध्यन्ते । असिं ग्राहं वा । यष्टिग्राहं युध्यन्ते । यष्टिं ग्राहं वा ॥

'परीप्सायाम्' इति किम्—यष्टिं गृहीत्वा भ्रमति ॥ १३ ॥

यहां 'परीप्सायाम्' पद का अनुवर्त्तन है ॥ परीप्सा अभिधेय हो तो [द्वितीयायाम्] द्वितीयान्त उपपद होने पर धातु से णमुल् प्रत्यय होता है ॥

जैसे—असिग्राहं युध्यन्ते । असिं ग्राहं वा । यष्टिग्राहं युध्यन्ते । यष्टिं ग्राहं वा ॥ 'परीप्सायाम्' ग्रहण इसलिये है कि—यष्टिं गृहीत्वा भ्रमति ॥ ५३ ॥

स्वाङ्गेऽध्रुवे[2] ॥ ५४ ॥

द्वितीयायामित्यनुवर्त्तते, न परीप्सायाम् । स्वाङ्गे । ७ । १ । अध्रुवे । ७ । १ ॥

[अध्रुवे स्वाङ्गवाचिनि द्वितीयान्त उपपदे धातो 'र्णमुल्' प्रत्ययो भवति ॥] केशप्रसारं भुङ्क्ते ॥

'अध्रुवे' इति किम्—शिरः प्रकम्प्य वाक्यं वदति ॥ यदेकस्मिञ्छरीरे सदा न स्थीयते तदध्रुवम्[3] । केशास्तु कदाचिद्भवन्ति कदाचिन्न ॥ ५४ ॥

यहां 'द्वितीयायाम्' पद का अनुवर्त्तन है, परीप्सा का नहीं ॥ [अध्रुवे] अध्रुव अर्थात् अस्थिर [स्वाङ्गे] स्वाङ्गवाची द्वितीयान्त उपपद हो तो धातु से 'णमुल् प्रत्यय होता है ॥

जैसे—केशप्रसारं भुङ्क्ते ॥ 'अध्रुवे' ग्रहण इसलिये है कि—शिरः प्रकम्प्य वाक्यं वदति ॥ जो एक शरीर में सदा नहीं रहता वह अध्रुव कहाता है, यहां इस उदाहरण में केश कभी होते हैं कभी नहीं, शरीर बना रहता है अतः केश अध्रुव हैं ॥ ५४ ॥

परिक्लिश्यमाने च[4] ॥ ५५ ॥

स्वाङ्गे द्वितीयायामित्यनुवर्त्तते । परिक्लिश्यमाने । ७ । १ । च । [अ०] । परिक्लेशोऽतिदुःखम् ॥

---

१. आ० सू० १५७२ ॥ २. आ० सू० १५७४ ॥

३. **अध्रुवं मूर्त्तिमत् स्वाङ्गं प्राणिस्थ०** (अ० ४ । १ । ५४ । का०) ॥ यस्मिन्नङ्गे छिन्नेऽपि प्राणी न म्रियत इत्यन्ये ॥

४. आ० सू० १५७५ ॥

परिक्लिश्यमाने[1] द्वितीयान्तस्वाङ्ग उपपदे धातो 'र्णमुल्' प्रत्ययो भवति ।।

शिरस्त्रोटं युध्यन्ते । पाणिच्छेदं युध्यन्ते । पार्णि छेदं वा ।।

अध्रुवे पूर्वेण सिद्धं, ध्रुवार्थोऽयमारम्भः ।। 'परिक्लिश्यमाने' इति किम्—शिरः प्रकम्प्य व्रजति ।। ५५ ।।

यहां 'स्वाङ्गे' तथा 'द्वितीयायाम्' पद का अनुवर्त्तन है ।। [परिक्लिश्यमाने] अति दुःख को प्राप्त स्वाङ्गवाची द्वितीयान्त उपपद हो तो धातु से 'णमुल्' प्रत्यय होता है ।।

जैसे—शिरस्त्रोटं युध्यन्ते । पाणिच्छेदं युध्यन्ते । पार्णि छेदं वा ।।

पूर्वसूत्र अध्रुव स्वाङ्गवाची के विषय में था, यह ध्रुव स्वाङ्ग के लिये है ।। 'परिक्लिश्यमाने' ग्रहण इसलिये है कि—शिरः प्रकम्प्य व्रजति ।। ५५ ।।

विशिपतिपदिस्कन्दां व्याप्यमानाऽऽसेव्यमानयोः[2] ।। ५६ ।।

द्वितीयायामित्यनुवर्त्तते । विशिपतिपदिस्कन्दाम् । ६ । ३ । व्याप्यमानासेव्यमानयोः । ७ । २ ।। क्रियया साकल्येन सम्बन्धो व्याप्तिः । क्रियायाः पौनःपुन्यमासेवा ।। तत् क्रियमाणयोः कर्त्रोरभिधेययोर्द्वितीयान्तोपपदेभ्यो विश्यादिधातुभ्यो 'णमुल्' प्रत्ययो भवति ।।

गेहं गेहमनुप्रविश्य गेहानुप्रवेशमास्ते[3] । असमासपक्षे—गेहं गेहमनुप्रवेशमास्ते ।। आसेव्यमाने—राजसभाप्रवेशमास्ते । राजसभा [मनुप्रवेशमनुप्रवेशं] वा ।। [पति]—गेहानुप्रपातमास्ते । गेहं गेहमनुप्रपातमास्ते । गेहानुप्रपातमास्ते । गेह[मनुप्रपातमनुप्रपातं] वा ।। पदि—गेहानुप्रपादमास्ते । गेहं गेहमनुप्रपादं वा । गेहानुप्रपादमास्ते । गेह[मनुप्रपादमनुप्रपादं] वा ।। [स्कन्दि]—गेहावस्कन्दमास्ते । गेहं गेहमवस्कन्दं वा । गेहावस्कन्दमास्ते । गेह[मवस्कन्दमवस्कन्दं] वा ।।

'व्याप्यमानासेव्यमानयोः' इति किम्—गेहमनुप्रविश्य भुङ्क्ते ।। आभीक्ष्ण्यमासेवा चेत्यनर्थान्तरम् ।। आभीक्ष्ण्ये यो णमुल् विधीयते तत्रोपपदनियमो नास्ति । अत्रोपपदनियमेन विकल्पेन तृतीयाप्रभृतावुपपदसमासः सिद्धो भवति ।। ५६ ।।

यहां 'द्वितीयायाम्' पद का अनुवर्त्तन है ।। क्रिया के साथ सम्पूर्णता से सम्बन्ध होना 'व्याप्ति' कहाती है, बार बार करना 'आसेवा' कहाती है ।।

[व्याप्यमानासेव्यमानयोः] व्याप्ति तथा आसेवा का करने वाला कर्त्ता अभिधेय हो तो द्वितीयान्त उपपद होने पर [विशि० स्कन्दाम्] विशि, पति, पदि, स्कन्द इन धातुओं से 'णमुल्' प्रत्यय होता है ।।

---

१. परिक्लिश्यमान इत्यत्र **'क्लिशूविबाधने'** इत्यस्य ग्रहणम्, न तु **'क्लिश उपतापे'** इत्यस्य ।।

२. आ० सू० १५७६ ।।

३. समासेन व्याप्त्यासेवयोरुक्तत्वात् **'नित्यवीप्सयोः'** (अ० ८ । १ । ४) इति द्वित्वं न भवति, समासः स्वभावत एतयोरर्थयोरभिधानं करोति 'सप्तपर्वा' इति यथा ।।

जैसे—गेहं गेहमनुप्रविश्य=गेहानुप्रवेशमास्ते । असमासपक्षे—गेहं गेहमनुप्रवेशमास्ते ।। आसेव्यमाने—राजसभाप्रवेशमास्ते । राजसभामनुप्रवेशमनुप्रवेशं वा ।।

पति—गेहानुप्रपातमास्ते । गेहं गेहमनुप्रपातमास्ते । गेहानुप्रपातमास्ते । गेहमनुप्रपातमनुप्रपातं वा ।। पदि—गेहानुप्रपादमास्ते । गेहं गेहमनुप्रपादमास्ते । गेहानुप्रपादमास्ते । गेहमनुप्रपादमनुप्रपादं वा ।। स्कन्दि—गेहावस्कन्दमास्ते । गेहं गेहमवस्कन्दं वा । गेहावस्कन्दमास्ते । गेहमवस्कन्दमवस्कन्दं वा ।।

'व्याप्यमानासेव्यमानयोः' ग्रहण इसलिये है कि—गेहमनुप्रविश्य भुङ्क्ते ।। आभीक्ष्ण्य और आसेवा ये पर्य्यायवाची हैं। आभीक्ष्ण्य अर्थ में जो णमुल् विधान किया है उसमें उपपद का नियम नहीं, इस सूत्र में उपपद के नियम से तृतीयाप्रभृति होने से विकल्प करके उपपद समास सिद्ध हो जाता है ।। ५६ ।।

अस्यतितृषोः क्रियान्तरे कालेषु[1] ।। ५७ ।।

द्वितीयान्तग्रहणमनुवर्त्तते । अस्यतितृषोः । ६ । २ । क्रियान्तरे । ७ । १ । कालेषु । ७ । ३ ।। क्रियाया अन्तरं व्यवधानं[2] तस्मिन् । कालेष्विति द्वितीयान्तेन सह सम्बध्यते ।।

क्रियान्तरे गम्यमाने कालवाचिषु द्वितीयान्तेषूपपदेषु सत्सु अस्यति-तृषिधातुभ्यां 'णमुल्' प्रत्ययो भवति ।।

द्व्यहात्यासं पशून् पाययति । द्व्यहमत्यासं वा ।। द्व्यहतर्षं पशून् पाययति । द्व्यहं तर्षं वा । अत्र पानक्रियाया द्वे अह्नी व्यवधानम् ।।

'अस्यतितृषोः' इति किम्—द्व्यहं लङ्घयित्वा भुङ्क्ते ।। 'क्रियान्तरे' इति किम्—अहरत्यस्य रात्रौ भुङ्क्ते[3] ।। 'कालेषु' इति किम्—क्रोशत्रयमत्यस्य पशून् पाययति ।। ५७ ।।

यहां 'द्वितीयायाम्' पद का अनुवर्त्तन है । 'कालेषु' पद का सम्बन्ध द्वितीयान्त के साथ है ।।

[क्रियान्तरे] क्रिया का व्यवधान हो तो [कालेषु] कालवाची द्वितीयान्त उपपद होने पर [अस्यतितृषोः] अस्यति तथा 'तृष' धातु से 'णमुल्' प्रत्यय होता है ।।

जैसे—द्व्यहात्यासं पशून् पाययति । द्व्यहमत्यासं वा । द्व्यहतर्षं पशून् पाययति । द्व्यहं तर्षं वा ।। यहां पानक्रिया में दो दिन का व्यवधान है अर्थात् दो दिन छोड़कर पशुओं को पानी पिलाता है ।।

'अस्यतितृषोः' ग्रहण इसलिये है कि—द्व्यहं लङ्घयित्वा भुङ्क्ते यहां 'लघि' क्रिया का व्यवधान है अतः णमुल् नहीं होता ।। 'क्रियान्तरे' ग्रहण इसलिये है कि—अहरत्यस्य रात्रौ

---

१. आ० सू० १५७७ ।।

२. क्रियामन्तरयति इति क्रियान्तरः, क्रियाव्यवधायक इत्यन्ये ।।

३ सर्वं दिनमत्यसनक्रियां कृत्वा, अव्यवधानेन भोजनं करोतीत्यर्थः ।।

भुङ्क्ते । यहां दिन का व्यवधान है न कि क्रिया का ॥ 'कालेषु' ग्रहण इसलिये है कि—क्रोशत्रयमत्यस्य पशून् पाययति यहां अध्ववाची द्वितीयान्त उपपद है अतः णमुल् न होकर क्त्वा हो जाता है ॥ ५७ ॥

नाम्न्यादिशिग्रहोः[1] ॥ ५८ ॥

द्विती[या]यामित्यनुवर्त्तते । नाम्नि । ७ । १ । आदिशिग्रहोः । ६ । २ ॥

द्वितीयान्तनामशब्दोपपदाभ्यामाङ्पूर्वदिशि[2]-ग्रहधातुभ्यां 'णमुल्' प्रत्ययो[3] भवति ॥ नामादेशमाचष्टे । नामग्राहमाचष्टे ॥ ५८ ॥

यहां 'द्वितीयायाम्' पद का अनुवर्त्तन है ॥ द्वितीयान्त [नाम्नि] नाम शब्द उपपद हो हो [आदिशिग्रहोः] आङ्-पूर्वक दिश तथा ग्रह धातु से 'णमुल्' प्रत्यय होता है ॥

जैसे—नामादेशमाचष्टे । नामग्राहमाचष्टे । नाम का उच्चारण करके अथवा नाम लेकर के कहता है ॥ ५८ ॥

अव्ययेऽयथाऽभिप्रेताख्याने कृञः क्त्वाणमुलौ[4] ॥ ५९ ॥

द्वितीयायामिति निवृत्तम्, णमुल् च ॥ अव्यये । ७ । १ । अयथाऽभिप्रेताख्याने । ७ । १ । कृञः । ५ । १ । क्त्वाणमुलौ । १ । २ ॥

अभिप्रेतस्येत्स्याख्यानं यथा कर्त्तव्यं तथा [न [भवतीत्ययथाभिप्रेताख्यानम् । अयथाऽभिप्रेताख्याने गम्यमानेऽव्ययोपपदात् 'कृञ्' धातोः क्त्वा-णमुलौ प्रत्ययौ भवतः ॥

उच्चैःकृत्य वदति । उच्चैः कृत्वा वदति ॥ उच्चैःकारं वदति ॥ यदभिप्रैति तस्याख्यानं न [तथा[5]] करोतीत्यर्थः ॥ सामान्यविहितः क्त्वा प्रत्ययोऽत्रापि स्यात् पुनर्विधानस्यैतत् प्रयोजनं—'**क्त्वा च**[6]' इति तृतीयाप्रभृतौ विकल्पेनोपपदसमासो यथा स्यात् ॥

'अयथाऽभिप्रेताख्याने' इति किम्—उच्चैः कृत्वाऽऽचष्टे पुत्रस्ते जात इति ॥५९॥

यहां 'द्वितीयायाम्' पद का निवर्त्तन है [अयथाभिप्रेताख्याने] अयथाऽभिप्रेताख्यान (अभिप्रायविरुद्ध अर्थात् इष्ट की तरह न बोलना) अर्थ गम्यमान हो तो [अव्यये] अव्यय उपपद होने पर [कृञः] 'कृञ्' धातु से [क्त्वाणमुलौ] क्त्वा और णमुल् प्रत्यय होते हैं ॥

जैसे—उच्चैःकृत्य वदति । उच्चैःकृत्वा वदति । उच्चैःकारं वदति ॥ अर्थात्—जैसे कहना चाहिये वैसे नहीं कहता । अप्रिय बात नीचे स्वर से कही जाती है उसे नीचे स्वर से न कह कर ऊंचे स्वर से कहता है ॥

---

१. आ० सू० १५७८ ॥

२. आङो दिशतिना सम्बन्धः, आङ्पूर्वो दिशतिरुच्चारणे ॥

३. आ० सू० १५७९ ॥

४. अप्रियमुच्चैर्वदति, प्रियं वा नीचैः कृत्वा वदतीत्यर्थोऽभिप्रेतः ॥

५. अ० २ । २ । २२ ॥

सामान्यविहित क्त्वा प्रत्यय यहां भी हो ही जाता पुनः क्त्वा प्रत्यय के विधान का यह प्रयोजन है कि—**'क्त्वा च'** इस सूत्र से तृतीयाप्रभृति उपपदों में विकल्प से समास हो जावे ॥ 'अयथाभिप्रेताख्याने' ग्रहण इसलिये है कि—**उच्चैः कृत्वाऽऽचष्टे पुत्रस्ते जात इति** ॥ ५९ ॥

तिर्य्यच्यपवर्गे[1] ॥ ६० ॥

'क्त्वाणमुलावनुवर्त्तेते कृञश्च ॥ तिर्य्यचि । ७ । १ । अपवर्गे । ७ । १ । अपवर्गः समाप्तिः । तिरश्चीति[2] प्राप्ते सौत्रो निर्देशः ॥

अपवर्गे गम्यमाने तिर्य्यगुपपपदात् 'कृञ्' धातोः क्त्वा-णमुलौ प्रत्ययौ भवतः ॥

तिर्य्यक्कृत्य पाकं गतः । तिर्य्यक्कृत्वा पाकं गतः । तिर्य्यक्कारं पाकं गतः । समाप्य गत इत्यर्थः ॥

'अपवर्गे इति किम्—तिर्य्यक्कृत्वा यष्टिं गतः । वक्रामित्यर्थः ॥ ६० ॥

यहां 'क्त्वाणमुलौ' तथा 'कृञः' पदों का अनुवर्त्तन है । अपवर्ग समाप्ति को कहते हैं । तिरश्चि ऐसा प्राप्त था परन्तु सूत्रनिर्देश से तिर्य्यचि पद शुद्ध है ॥

[अपवर्गे] अपवर्ग = समाप्ति गम्यमान हो तो [तिर्यचि] तिर्यक् उपपद होने पर 'कृञ्' धातु से क्त्वा और णमुल् प्रत्यय होते हैं ॥

जैसे—तिर्य्यक् कृत्य पाकं गतः । तिर्य्यक् कृत्वा पाकं गतः । तिर्यक्कारं पाकं गतः । अर्थात् पाक को समाप्त करके गया ॥ 'अपवर्गे' ग्रहण इसलिये है कि—तिर्य्यक् कृत्वा यष्टिं गतः । अर्थात् लाठी टेढ़ी करके गया ॥ ६० ॥

स्वाङ्गे तस् प्रत्यये कृभ्वोः[3] ॥ ६१ ॥

क्त्वाणमुलावनुवर्त्तेते । स्वाङ्गे । ७ । १ । तस्प्रत्यये । ७ । १ । कृभ्वोः । ६ । २ ॥ तस् प्रत्ययो यस्मात्तस्मिन्[4] ।

तस्-प्रत्ययान्तस्वाङ्गवाचिशब्दोपपदाभ्यां कृ-भूधातुभ्यां क्त्वा-णमुलौ[5] प्रत्ययौ भवतः ॥

मुखतःकृत्य । मुखतःकृत्वा । मुखतःकारम् । पाणितःकृत्य ॥ पाणितःकृत्वा । पाणितःकारम् । मुखतोभूय । मुखतो भूत्वा । मुखतोभावम् 'स्वाङ्गे' इति किम्—विश्वतः कृत्वा । विश्वतो भूत्वा ॥ 'तस्प्रत्यये' इति किम्—मुखीकृत्य । मुखीभूय[6] ॥ ६१ ॥

---

१. आ० सू० १५८० ॥

२. अत्र भाष्यम्—**अयुक्तोऽयं निर्देशः तिरश्चीति भवितव्यम् । सौत्रोऽयंनिर्देशः** ॥

३. आ० सू० १५८१ ॥ ४. बहुव्रीहिः कर्मधारयो वेति पदमञ्जरी ॥

५. कृभ्वोरिति लक्षणव्यभिचारचिह्नात्, अस्वरितत्वाद्वाऽत्र यथासंख्याभावः ॥

६. अत्र **वृत्तिकारः**—प्रत्ययग्रहणं किमर्थम् । मुखे तस्यतीति मुखतः कृत्वा गतः ॥ वस्तु-तस्तु—**'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य च ग्रहणं भवतीति** परिभाषया, **प्रत्यया-**

यहां 'क्त्वाणमुलौ' पद का अनुवर्त्तन है ॥ [तस्प्रत्यये] तस्प्रत्ययान्त [स्वाङ्गे] स्वाङ्गवाची शब्द उपपद होने पर [कृभ्वोः] कृ तथा भू धातुओं से क्त्वा और णमुल् प्रत्यय होते हैं ॥

जैसे = मुखतःकृत्य । मुखतः कृत्वा । मुखतःकारम् ॥ पाणितःकृत्य । पाणितः कृत्वा । पाणितःकारम् ॥ भू—मुखतोभूय । मुखतो भूत्वा । मुखतोभावम् ॥ 'स्वाङ्गे' ग्रहण इसलिये है कि—विश्वतः कृत्वा । विश्वतो भूत्वा ॥ 'तस्प्रत्यये' ग्रहण इसलिये है कि—मुखीकृत्य । मुखीभूय । यहां न हो ॥ ६१ ॥

नाधार्थप्रत्यये च्व्यर्थे[1] ॥ ६२ ॥

कृभ्वोः, क्त्वाणमुलावित्यनुवर्त्तते । नाधार्थप्रत्यये । ७ । १ । च्व्यर्थे । ७ । १ ॥ नाधयोः प्रत्ययोरर्थ इवार्थो येषां ते नाधार्थाः, नाधार्थाः प्रत्यया यस्मात्तस्मिन् ॥

च्व्यर्थे नाधार्थप्रत्ययोपपदाभ्यां कृ-भूधातुभ्यां क्त्वाणमुलौ प्रत्ययौ भवतः ॥ अनाना नाना कृत्वा—नानाकृत्य । नाना कृत्वा । नानाकारम् ॥ विनाकृत्य । विना कृत्वा । विनाकारम् ॥ अनाना नाना भूत्वा-नानाभूय । नान भूत्वा । नानाभावम् ॥ विनाभूय । बिना भूत्वा । विनाभावम् ॥ धार्थोपपदाभ्याम्—अद्विधा द्विधा कृत्वा द्विधाकृत्य । द्विधा कृत्वा । द्विधाकारम् । द्वैधं कृत्य । द्वैधं कृत्वा । द्वैधंकारम् । अद्विधा द्विधा भूत्वा-द्विधाभूय । द्विधा भूत्वा । द्विधाभावम् ॥ द्वैधंभूय । द्वैधं भूत्वा । द्वैधंभावम्[2] ॥

प्रत्यय-ग्रहणं किम्—पृथक्कृत्वा ॥ 'च्व्यर्थे' इति किम्—नाना कृत्वा काष्ठानि गतः ॥ ६२ ॥

यहां 'कृभ्वोः' तथा 'क्त्वाणमुलौ' इन पदों का अनुवर्त्तन है ॥ ना तथा धा प्रत्ययों के अर्थ के समान अर्थ हैं जिनके वे नाधार्थ कहाते हैं ॥

[च्व्यर्थे] च्वि के अर्थ में वर्त्तमान [नाधार्थप्रत्यये] नाधार्थप्रत्ययान्त शब्द उपपद हों तो कृ तथा भू धातु से क्त्वा और णमुल् प्रत्यय होते हैं ॥

जैसे—अनाना नाना कृत्वा = नानाकृत्य, नाना कृत्वा, नानाकारम् ॥ विनाकृत्य, विना कृत्वा, विनाकारम् ॥ अनाना नाना भूत्वा = नानाभूय, नाना भूत्वा, नानाभावम् ॥

प्रत्ययग्रहणं किम्—**प्रत्ययस्यैव ग्रहणमिति** परिभाषया वा प्रत्ययग्रहणमत्र व्यर्थमित्यपि वक्तुं सुशकम् । व्यर्थं सज्ज्ञापयति **प्रत्ययाप्रत्ययोः प्रत्ययस्यैव ग्रहणमि**त्यनित्येयं परिभाषा ॥

१. आ० सू० १५८२ ॥

२. अर्थं ग्रहणेन—**धमुञन्तात् स्वार्थे डदर्शनम्** (अ० ५ । ३ । ४५ वा०) इति वार्त्तिक-विहितस्य ड प्रत्ययान्तस्यापि द्वैधशब्दस्यात्र ग्रहणम् । द्वैधंकृत्य, द्वैधं कृत्वा, द्वैधंकारमिति ॥ तथा च **न्यासः**—वयं तु ब्रूमो नार्थमप्यर्थंग्रहणं कर्त्तव्यमेव । तथाहि द्वौ नाप्रत्ययौ । एको निरनुबन्धकः । द्वितीयः सानुबन्धकः । तत्रासत्यर्थग्रहणे निरनुबन्धकग्रहणे न सानुबन्धकस्येति नाप्रत्ययस्यैव ग्रहणं स्यात् । न सानुबन्धस्य नाम्नः । अर्थग्रहणे तु सति तस्यापि ग्रहणं भवति ॥

विनाभूय, विना भूत्वा, विनाभावम् ।। धार्थोपपदाभ्याम्—अद्विधा द्विधा कृत्वा = द्विधाकृत्य, द्विधा कृत्वा, द्विधाकारम् ।। द्वैधं कृत्य, द्वैधं कृत्वा, द्वैधंकारम् । अद्विधा द्विधा भूत्वा = द्विधा भूय, द्विधा भूत्वा, द्विधाभावम् ।। द्वैधं भूय, द्वैधं भूत्वा, द्वैधंभावम् ।।

प्रत्ययग्रहण इसलिये है कि—पृथक्कृत्वा । यहां न हो ॥ 'च्व्यर्थे' ग्रहण इसलिये है कि—नाना कृत्वा काष्ठानि गतः । अर्थात् लकड़ियों को पृथक् पृथक् करके चला गया ॥ ६२ ॥

तूष्णीमि भुवः[1] ॥ ६३ ।

क्त्वा-णमुलावनुवर्त्तेते । तूष्णीमि । ७ । १ । भुवः । ५ । १ ।। कृञो निवृत्त्यर्थमत्र भूग्रहणम् ।।

तूष्णीमि शब्दोपपदाद् 'भू' धातोः क्त्वा-णमुलौ प्रत्ययौ भवतः ।।

तूष्णींभूय । तूष्णींभूत्वा । तूष्णींभावं गतः ।। ६३ ।।

यहां 'क्त्वाणमुलौ' पद का अनुवर्त्तन है । इस में भू ग्रहण कृञ् की निवृत्ति के लिये है ।।

[तूष्णीमि] तूष्णीं शब्द उपपद हो तो [भुवः] भू धातु से क्त्वा और णमुल् प्रत्यय होते हैं ।।

जैसे—तूष्णींभूय, तूष्णीं भूत्वा, तूष्णींभावं गतः ॥ ६३ ॥

अन्वच्यानुलोम्ये[2] ॥ ६४ ॥

भुव इत्यनुवर्त्तते, क्त्वाणमुलौ च । अन्वचि । ७ । १ । आनुलोम्ये । ७ । १ ।। अत्राप्यनूचीति प्राप्ते सौत्रो[3] निर्देशः ।।

आनुलोम्येऽनुकूलत्वे गम्यमानेऽन्वगुपपदाद् 'भू' धातोः क्त्वा-णमुलौ प्रत्ययौ भवतः ।।

अन्वग्भूय राजसभामध्यास्ते । अन्वग्भूत्वा । अन्वग्भावं वा ।।

'आनुलोम्ये' इति किम्—अन्वग्भूत्वा व्रजति ।। ६४ ।।

यहां 'भुवः' तथा 'क्त्वाणमुलौ' पदों का अनुवर्त्तन है । यहां भी 'अनूचि' ऐसा प्राप्त था परन्तु 'अन्वचि' यह सौत्र निर्देश है ।।

[आनुलोम्ये] अनुकूलता अर्थात् दूसरे के चित्त की प्रसन्नता रखना अर्थ गम्यमान हो तो [अन्वचि] अन्वक् शब्द उपपद होने पर 'भू' धातु से क्त्वा और णमुल् प्रत्यय होते हैं ।।

जैसे—अन्वग्भूय राजसभामध्यास्ते । अन्वग्भूत्वा, अन्वग्भावं वा ।।

'आनुलोम्ये' ग्रहण इसलिये है कि—अन्वग्भूत्वा व्रजति यहां पीछे होकर जाता है, इस अर्थ के होने से क्त्वा और णमुल् नहीं होते ॥ ६४ ॥

---

१. आ० सू० १५८३ ॥ २. आ० सू० १५८४ ॥

३. अत्र भाष्यम्—**अयुक्तोऽयं निर्देशः । अनूचीति भवितव्यम् । सौत्रोऽयं निर्देशः ॥**

शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्[1] ॥ ६५ ॥

क्त्वाणमुल् प्रकरणं निवृत्तम् । शक० स्त्यर्थेषु । ७ । ३ । तुमुन् । १ । १ ॥ अस्त्यर्थास्त्रयः । अस्ति । भवति । विद्यते ॥

[2]शकादिधातुप्रयोगेषूपपदेषु धातुमात्रात् 'तुमुन्' प्रत्ययो भवति ॥

शक्नोति योद्धुम् । शक्नोति पक्तुम् । धृष्णोति भोक्तुम् । जानाति पठितुम् । ग्लायति गन्तुम् । घटते शयितुम् । आरभते लेखितुम् । लभते खादितुम् । क्रमते रचितुम् । सहते क्रोष्टुम् । अर्हति पाठयितुम् ॥ अस्त्यर्थेषु—अस्ति त्रोटितुं दण्डः । भवति पालयितुं राजा । विद्यन्ते वोढुं काष्ठानि[2] ॥ ६५ ॥

यहां 'क्त्वाणमुलौ' का प्रकरण समाप्त हुआ । अस्त्यर्थ पद से अस्ति, भवति और विद्यते का ग्रहण है ॥

[शक० त्यर्थेषु] शक, धृष, ज्ञा, ग्ला, घट, रभ, लभ, क्रम; सह, अर्ह, अस्त्यर्थ उपपद हों तो धातुमात्र से [तुमुन्] 'तुमुन्' प्रत्यय होता है ॥

जैसे—शक्नोति योद्धुम् । शक्नोति पक्तुम् । धृष्णोति भोक्तुम् । जानाति पठितुम् । ग्लायति गन्तुम् । घटते शयितुम् । आरभते लेखितुम् । लभते खादितुम् । क्रमते रचितुम् । सहते क्रोष्टुम् । अर्हति पाठयितुम् ॥ अस्त्यर्थेषु—अस्ति त्रोटितुं दण्डः । भवति पालयितुं राजा । विद्यन्ते वोढुं काष्ठानि ॥ ६५ ॥

पर्य्याप्तिवचनेष्वलमर्थेषु[3] ॥ ६६ ॥

तुमुन्नित्यनुवर्त्तते । पर्य्याप्तिवचनेषु । ७ । ३ । अलमर्थेषु । ७ । ३ : पर्य्याप्तिः सामर्थ्यमुच्यते यैस्ते पर्य्याप्तिवचनास्तेषु ॥

पर्य्याप्तिवचनेष्वलमर्थेषूपपदेषु धातोः 'तुमुन्' प्रत्ययो भवति ॥

पर्य्याप्तो भोक्तुम् । समर्थो भोक्तुम् । अलं भोक्तुम् ॥

'पर्य्याप्तिवचनेषु' इति किम्—अलं कृत्वा ॥ 'अलमर्थेषु' इति किम्—पर्य्याप्तं भुङ्क्ते[4] ॥ ६६ ॥

यहां 'तुमुन्' पद का अनुवर्त्तन है ॥ [पर्य्याप्तिवचनेषु] सामर्थ्य को कहने वाले [अलमर्थेषु] अलमर्थ उपपद होने पर धातु से तुमुन् प्रत्यय होता है ॥

---

१. आ० सू० १३२८ ॥

२. अक्रियार्थोऽयमारम्भः ॥ अक्रियार्थेष्वपि शकादिषु तुमुन् यथा स्यात् । शक्नोति-धृष्णोति-जानति भोक्तुम् । अत्रैते धातवोऽनेकार्थत्वात् प्रावीण्यं द्योतयन्ति ॥ ग्लायति भोक्तुम् । अत्राशक्तिं द्योतयति ॥ घटयति भोक्तुम् । अर्हति भोक्तुम् । तद्योग्यतामात्रं द्योतयतः ॥ आरभते-प्रक्रमते-उत्सहते भोक्तुम् इत्येत आदिप्रयत्नमाचक्षते ॥ लभते भोक्तुम् । अप्रत्याख्यानम् ॥ अस्ति-भवति-विद्यते भोक्तुम् । इत्यादौ सम्भवमात्रम् ॥

३. आ० सू० १३२९ ॥

४. प्रभूतत्वमात्रमिह गम्यते न तु सामर्थ्यम् ॥

जैसे—पर्य्याप्तो भोक्तुम् । समर्थो भोक्तुम् । अलं भोक्तुम् ॥

'पर्य्याप्तिवचनेषु' ग्रहण इसलिये है कि—अलं कृत्वा यहां निषेधार्थक है ॥ 'अलमर्थेषु' ग्रहण इसलिये है कि—'पर्य्याप्तं भुङ्क्ते' यहां न हो ॥ ६६ ॥

कर्त्तरि कृत्[1] ॥ ६७ ॥

'कृदतिङ्[2]' इत्यध्यायस्यास्य प्रथमपादे कृत्संज्ञा कृता तस्या इदानीमभिधानमुच्यते । कर्त्तरि । ७ । १ । कृत् । १ । १ ॥

अस्मिन् तृतीयाध्याये धातोः प्रत्ययविधाने सामान्यविहिताः कृत्संज्ञकाः प्रत्ययाः कर्त्तरि भवन्ति । विशेषविहिताश्चास्य सूत्रस्य बाधका भविष्यन्ति । यथा सामान्यविहितेषु । कर्त्ता । कारकः । नन्दनः । ग्राही । पचः ॥ विशेषविहितेषु—'**धः कर्मणि ष्ट्रन्**[3]' दाम्न्यादिभ्यः करणे[4], इत्यादयोऽस्य बाधकाः ॥ ६७ ॥

इस अध्याय के प्रथम पाद में 'कृदतिङ्' इस सूत्र से कृत्संज्ञा का विधान किया है । अब वह कृत्संज्ञक प्रत्यय किस अर्थ में होते हैं, इसका विधान किया जाता है ॥

इस तृतीयाध्याय में धातु से प्रत्यय विधान में सामान्य विहित [कृत्] कृत्संज्ञक प्रत्यय [कर्त्तरि] कर्त्ता में होते हैं, विशेष विहित इस [कर्त्तरि कृत्] सूत्र के बाधक होंगे ॥

जैसे—सामान्यविहितों में—कर्त्ता । कारकः । नन्दनः । ग्राही । पचः । विशेष विहितों में—'धः कर्मणि ष्ट्रन्' दाम्नी० नहः करणे' इत्यादि बाधक हैं ॥ ६७ ॥

भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा[7] ॥ ६८ ॥

वक्ष्यमाणेन 'तयोरेव०[8]' इति सूत्रेण भावकर्मणोरेव प्राप्ताः कृत्याः कर्त्तृ[रि] विकल्प्यन्ते । भव्य० पात्याः । १ । ३ । वा । [अ०] ॥

भव्यादयः कृत्यप्रत्ययान्ताः शब्दा विकल्पेन कर्त्तरि निपात्यन्ते, पक्षे [यथाप्राप्तं भावकर्मणोः] ॥

भव्यः पुत्रः । भव्यं पुत्रेण । अत्र पक्षे भावे यत्, अनभिहिते कर्त्तरि तृतीया ॥ गेयो माणवकः साम्नाम् । गेयानि माणवकेन सामानीति वा ॥ प्रवचनीयो ब्राह्मणो व्याकरणस्य । प्रवचनीयं ब्राह्मणेन व्याकरणम् ॥ जायतेऽसौ जन्यः पुत्रः । जन्यं पुत्रेण वा ॥ अत्र पक्षे भावे यत् ॥ आप्लाव्यो देवदत्तः । आप्लाव्यं देवदत्तेन वा ॥ आपात्यो बालः । आपात्यं बालेन वा[9] ॥ ६८ ॥

---

१. आ० सू० ९१३ ॥ २. अ० ३ । १ । ९३ ॥
३. अ० ३ । २ । १८१ ॥ ४. **दाम्नीशस० करणे** (अ० ३ । २ । १८२) ॥
५. आ० सू० ९७३ ॥ ६. अ० ३ । ४ । ७० ॥
७. 'रजनीयकोपनीयमोहनीयेति भव्यगेयादिपाठात्कर्त्तरि कृत्य इति, **वाचस्पतिमिश्रः** । यद्यपि भव्यगेयादीनां नियतानामेव सूत्रेण पाठान्नाकृतिगणोऽयम् । तथापि शिष्टप्रयोगप्राचुर्य्यात्तत्र पाठो

'तयोरेव कृत्यक्तखलर्थाः' इस अगले सूत्र से कृत्यप्रत्यय भावकर्म में प्राप्त थे अतः यहां कर्त्ता में विकल्प करके विधान करते हैं ॥ [भव्य० पात्याः] भव्य, गेय, प्रवचनीय, उपस्थानीय, जन्य, आप्लाव्य, आपात्य ये शब्द [वा] विकल्प से कर्त्ता में निपातन हैं । पक्ष में यथाप्राप्त भाव और कर्म में होते हैं ॥

जैसे—**भव्यः पुत्रः । भव्यं पुत्रेण** । यहां पक्ष में भाव में यत् के होने से अनभिहित कर्त्ता में तृतीया विभक्ति होती है ॥ **गेयो माणवकः साम्नाम् । गेयानि माणवकेन सामानीति वा ॥ प्रवचनीयो ब्राह्मणो व्याकरणस्य । प्रवचनीयं ब्राह्मणेन व्याकरणम् । जायतेऽसौ जन्यः । जन्यं पुत्रेण वा ।** यहां पक्ष में यत् हो जाता है । **आप्लाव्यो देवदत्तः । आप्लाव्यं देवदत्तेन वा । आपात्यो बालः । आपात्यं बालेन वा ॥** ६८ ॥

लः कर्मणि च भावे चाकर्मकेभ्यः[1] ॥ ६९ ॥

[2]कर्तृग्रहणमप्यनुवर्त्तते ॥ **लः**[3] । १ । ३ । कर्मणि । ७ । १ । च । [अ०] । भावे । ७ । १ । च । [अ०] । **अकर्मकेभ्यः** । ५ । ३ ॥ अकर्मकग्रहणात् सकर्मका अपि धातव आक्षिप्यन्ते ॥

सकर्मकेभ्यो धातुभ्यो लकाराः कर्मणि भवन्ति चकारात् कर्त्तरि च, अकर्मकेभ्यो भावे भवन्ति द्वितीयचकारात् कर्त्तरि च ॥

पठ्यते विद्या ब्राह्मणेन । पठति विद्यां ब्राह्मणः । अकर्मकेभ्यः—आस्यते देवदत्तेन । शय्यते देवदत्तेन । आस्ते देवदत्तः । शेते देवदत्तः ॥ **'कर्त्तरि कृत्'**[4] इति कर्त्तरि प्राप्ता बाध्यन्ते । सकर्मकेभ्यो भावे[5] न भवन्तीति नियमः ॥ ६९ ॥

द्रष्टव्यः । **पाणिनिनैव** कर्मप्रवचनीया इत्यनेन व्यभिचारस्य दर्शितत्वादित्युदयनाचार्य्यः । न च प्रवचनीय-शब्दस्योक्तसूत्रे पाठादसङ्गतमेवैतदिति वाच्यम् । वर्त्तमानार्थ एव तद्विधानात् । **कर्मप्रवचनीये**त्यत्र तु भूते तस्येष्टत्वात् । अत एव तत्र बाहुलकाद् भूते कर्त्तर्यनीयरिति **कैय्यटादिभिर्व्याख्यातम्** ॥

१. आ० सू० ५ ॥

२. ल इत्युत्सृष्टाऽनुबन्धकस्येह ग्रहणम् ॥ द्विविधो लकारस्तिङ्भावी-अतिङ्भावी च । तत्र तिङ्भाविनः कृत्संज्ञानिषेधात्, **'कर्त्तरि कृत्'** इत्यस्यानुपस्थानात् स्वार्थे भावे विधानं प्राप्नोति । अतिङ्भाविनस्तु 'कर्त्तरि कृत्' इति वचनात् कर्त्तर्य्येव साधुत्वं प्राप्नोतीति वचनम्, अत इदमारभ्यते ॥

अत्र भाष्यम्—**किमर्थमिदमुच्यते । लग्रहणं क्रियते सकर्मकनिवृत्त्यर्थम् ॥ सकर्मकाणां भावे मा भूदिति ॥**

३. उच्चारणार्थाकारेण सूत्रे **'लस्य'** (अ० ३ । ४ । ७७) इति षष्ठ्यैकवचनवत् प्रथमैकवचनं जातौ, 'एतावांश्च लो यदुत परस्मैपदम्' (अ० १ । ४ । ९९ भाष्ये) **इत्याहुः** ॥ केचिल्ल इति प्रथमां व्याचक्षतेऽपरे षष्ठीं लस्य य आदेश इति **कैय्यटः** (अ० ३ । ४ । ६९) ॥

४. अ० ३ । ४ । ६७ ॥

५. अत्र **भाषावृत्तिः**—भावेऽपि हि प्रत्यये सकर्मकाद् धातोः पश्चात् कर्मसम्बन्धो भवत्येव पाक ओदनस्य । कटं कृत्वा शेते । गम्यते मया ग्राममिति **भागवृत्ता**वुक्तम् (पृ० १८९) ॥

यहां 'कर्त्तरि' पद का अनुवर्त्तन है ॥ इस सूत्र में अकर्मक ग्रहण से सकर्मक धातुओं का भी आक्षेप अर्थात् ग्रहण होता है ॥

सकर्मक धातुओं से लकार [**कर्मणि**] कर्म में होते हैं [**च**] चकार से कर्त्ता में भी होते हैं, [**अकर्मकेभ्यः**] अकर्मकों से [**भावे**] भाव में तथा द्वितीय [**च**] चकार से कर्त्ता में भी होते हैं ॥

जैसे—पठ्यते विद्या ब्राह्मणेन । पठति विद्यां ब्राह्मणः ॥ अकर्मकों से—आस्यते देवदत्तेन । शय्यते देवदत्तेन । आस्ते देवदत्तः । शेते देवदत्तः ॥ 'कर्त्तरि कृत्' सूत्र से कर्त्ता में प्राप्त थे उनका बाधन किया है । और सकर्मकों से भाव में नहीं होते, यह नियम भी किया है ॥ ६९ ॥

तयोरेवकृत्यक्तखलर्थाः[1] ॥ ७० ॥

भावे चाकर्मकेभ्य इत्यनुवर्त्तते ॥ तयोः । ७ । २ । एव । [अ०] । कृत्यक्त-खलर्थाः । १ । ३ ॥ एवकारः कर्त्तरीति निवृत्यर्थः । कृत्याश्च क्तश्च खलर्थाश्च ते ॥ **'कर्त्तरि कृत्'** इत्यस्यापवादः ॥

कृत्संज्ञकेषु कृत्यक्तखलर्थाः प्रत्ययास्तयोर्भावकर्मणोरेव भवन्ति । सकर्मकेभ्यो कर्मण्यकर्मकेभ्यो भावे ॥

कृत्याः कर्मणि—कर्त्तव्यो घटः कुलालेन । भुक्त ओदनो देवदत्तेन ॥ भावे—आसितव्यं भवता । शयितव्यं भवता ॥ क्तः कर्मणि—कृतो घटः कुलालेन । भुक्त ओदनो देवदत्तेन ॥ भावे—आसितं भवता । शयितं भवता ॥ खलर्थाः कर्मणि—ईषत्पच ओदनो देवदत्तेन । सुपचः । दुष्पचः । ईषत्पठा विद्या ब्राह्मणेन । सुपठा । दुष्पठा ॥ भावे—ईषत्स्वपं भवता । सुस्वपम् । दुस्स्वपम् । ईषदाढ्यं भवं भवता ॥ अर्थग्रहणादत्रापि सिद्धं भवति—ईषत्पानं दुग्धं भवता । ईषद्दान ओदनो भवता । भावे—ईषद्ग्लानं भवता ॥ भावे चाकर्मकेभ्य इत्यनुवर्त्तनात् सकर्मकेभ्यो भावे न भवन्ति ॥ ७० ॥

यहां 'भावे चाकर्मकेभ्यः' पदों का अनुवर्त्तन है । एवकार 'कर्त्तरि' पद की निवृत्ति के लिये है । यह सूत्र 'कर्त्तरि कृत्' का अपवाद है ॥

कृत्संज्ञक प्रत्ययों में [कृत्यक्तखलर्थाः] कृत्य-क्त-और खलर्थ प्रत्यय [तयोरेव] भाव और कर्म में ही होते हैं । सकर्मकों से कर्म में अकर्मकों से भाव में ॥

जैसे—कृत्याः कर्मणि—कर्त्तव्यो घटः कुलालेन । भुक्त ओदनो देवदत्तेन ॥ भावे—आसितव्यं भवता । शयितव्यं भवता ॥ क्तः कर्मणि—कृतो घटः कुलालेन । भुक्त ओदनो देवदत्तेन । भावे—आसितं भवता । शयितं भवता ॥ खलर्थाः कर्मणि—ईषत्पच ओदनो देवदत्तेन । सुपचः । दुष्पचः । ईषत्पठा विद्या ब्राह्मणेन । सुपठा । दुष्पठा । भावे—ईषत्स्वपं भवता । सुस्वपं । दुस्स्वपम् । ईषदाढ्यं भवं भवता ॥

---

१. आ० सू० ९१४ ॥

'अर्थ' ग्रहण से यहां भी सिद्ध हो जाता है—ईषत्पानं दुग्धं भवता। ईषद्दान ओदनो भवता ।। भावे—ईषद्ग्लानं भवता ।। 'भावे चाकर्मकेभ्यः' इन पदों के अनुवर्त्तन से सकर्मकों से भाव में नहीं होते ॥ ७० ॥

आदिकर्मणि क्तः कर्त्तरि च[1] ॥ ७१ ॥

तयोरेवकृत्यक्तखलर्थाः[2] इति भावकर्मणोः प्राप्तस्तस्यापवाद आरभ्यते ।।

आदिकर्मणि । ७ । १ । क्तः । १ । १ । कर्त्तरि । ७ । १ ।।

[3]आदिकर्मणि=क्रियारम्भस्यादिक्षणेषु विहितः क्तः प्रत्ययः कर्त्तरि भवति चकाराद्भावकर्मणोरपि ।।

प्रकृतः कटं देवदत्तः। प्रभुक्त ओदनं देवदत्तः।। भावकर्मणोः—प्रकृतः कटो देवदत्तेन। प्रशयितं देवदत्तेन। शयनारम्भः कृत इत्यर्थः ।। ७१ ।।

'तयोरेव कृत्यक्तखलर्थाः' इस सूत्र से भावकर्म में प्राप्त का यह सूत्र अपवाद है ।। [आदिकर्मणि] क्रियारम्भ के आदि क्षणों में विहित [क्त] क्तप्रत्यय [कर्त्तरि] कर्त्ता में तथा [च] चकार से भाव कर्म में भी होता है ।।

जैसे—प्रकृतः कटं देवदत्तः। प्रभुक्त ओदनं देवदत्तः।। भावकर्मणोः—प्रकृतः कटो देवदत्तेन। प्रशयितं देवदत्तेन। अर्थात् चटाई बनाना तथा सोना आरम्भ किया ॥ ७१ ॥

गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्य्यतिभ्यश्च[3] ॥ ७२ ॥

क्तः कर्त्तरीत्यनुवर्त्तते ।। गत्यर्था० जीर्य्यतिभ्यः। ५ । ३ । च । [अ०] ।। गतिरर्थो येषां ते गत्यर्थाः। न विद्यते कर्म येषां तेऽकर्मकाः[4] ।।

गत्यर्थाकर्मकेभ्यः श्लिष्यादिभ्यश्च विहितः क्तः प्रत्ययः कर्त्तरि भवति चकारादुभावकर्मणोः ।।

गतो ग्रामं देवदत्तः। गतो ग्रामो देवदत्तेन ।। व्रजितो ग्रामं देवदत्तः। व्रजितो ग्रामो देवदत्तेन ।। अकर्मक—ग्लानो देवदत्तः। ग्लानं देवदत्तेन ।। सुप्तो देवदत्तः। सुप्तं देवदत्तेन। उपश्लिष्टो भार्य्यां देवदत्तः। उपश्लिष्टा भार्य्या देवदत्तेन [उपश्लिष्टा कन्यां माता। उपश्लिष्टा कन्या मात्रा] ।। उपशयितो गुरुं देवदत्तः। उपशयितो गुरुर्देवदत्तेन। उपास्थितो गुरुं देवदत्तः। उपास्थितो गुरुर्देवदत्तेन। उपासितो गुरुं शिष्यः। उपासितो गुरुः शिष्येण ।। अनूषितो गुरुं भवान्। अनूषितो गुरुर्भवता। अनुजातः पुत्रः

---

१. आ० सू० ११८१ ॥

२. आदिक्षणेषु भूतेष्वपि क्रियाया भूतत्वात् **'आदिकर्मणि निष्ठा'** (अ० ३ । २ । १०२ भा० वा०) इति वार्त्तिकेन निष्ठा विहिता, तस्यात्र ग्रहणम् ॥

३. आ० सू० १२१९ ॥

४. अत्रापि (अ० ३ । ४ । १८) सूत्रस्था टिप्पणिरवलोकनीया ॥

कन्याम् । अनुजाता पुत्रेण कन्या ।। आरूढो हस्तिनं हस्तिपकः । आरूढो हस्ती हस्तिपकेन ।। अनुजीर्णो देवदत्तः पुत्रेण । अनुजीर्णो देवदत्तेन पुत्रः ।।

'अकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्ति'[1] इति श्लिष्यादीनामकर्मकाणां ग्रहणं सोपसर्गत्वे सकर्मकार्थम् । श्लिष्यादिभ्यः सोपसर्गेऽपि कर्त्तरि क्तो यथा स्यात् ।। ७२ ।।

यहां 'क्तः' तथा 'कर्त्तरि' पदों का अनुवर्त्तन है ।। 'गत्यर्थाकर्मक' गति अर्थ वाले तथा अकर्मक धातुओं से और [श्लिष० जीर्यतिभ्यश्च] श्लिष्-शीङ्-स्था-आस-वस-जन-रुह् जीर्यति इन धातुओं से विहित क्त प्रत्यय कर्त्ता में होता है चकार से भाव और कर्म में भी ।।

जैसे—गतो ग्रामं देवदत्तः । गतो ग्रामो देवदत्तेन । व्रजितो ग्रामं देवदत्तः । व्रजितो ग्रामो देवदत्तेन ।। अकर्मक—ग्लानो देवदत्तः । ग्लानं देवदत्तेन । सुप्तो देवदत्तः । सुप्तं देवदत्तेन ।। श्लिष—उपश्लिष्टो भार्य्यां देवदत्तः । उपश्लिष्टा भार्य्या देवदत्तेन । उपश्लिष्टा कन्यां माता । उपश्लिष्टा कन्या मात्रा ।। शीङ्—उपशयितो गुरुं देवदत्तः । उपशयितो गुरुर्देवदत्तेन ।। स्था—उपास्थितो गुरुं देवदत्तः । उपास्थितो गुरुर्देवदत्तेन ।। आस्—उपासितो गुरुं शिष्यः । उपासितो गुरुः शिष्येण ।। वस्—अनूषितो गुरुं भवान् । अनूषितो गुरुर्भवता ।। जन—अनुजातः पुत्रः कन्याम् । अनुजाता पुत्रेण कन्या ।। रुह—आरूढो हस्तिनं हस्तिपकः । आरूढो हस्ती हस्तिपकेन ।। जीर्यति—अनुजीर्णो देवदत्तः पुत्रेण । अनुजीर्णो देवदत्तेन पुत्रः ।। 'अकर्मका० भवन्ति' 'अकर्मक धातुएँ भी उपसर्ग से युक्त होने पर सकर्मक हो जाती हैं' इस नियम से अकर्मक श्लिष आदि धातुओं का ग्रहण सोपसर्ग हो जाने पर सकर्मक हो जाने से किया है । अर्थात् श्लिष्यादि सोपसर्गों से भी कर्त्ता में क्त हो जाय ।। ७२ ।।

दाशगोघ्नौ सम्प्रदाने[2] ।। ७३ ।।

दाशगोघ्नौ । १ । २ । सम्प्रदाने । ७ । १ ।। दाशगोघ्नौ शब्दौ कृदन्तौ सम्प्रदानकारके निपात्येते ।।

'दाशृ दाने'[3] इत्यस्मादच् प्रत्ययः । दाशन्त्यस्मै स दाशः । गोपूर्वाद्हनधातोष्टक् प्रत्ययः । गां घ्नन्ति यस्मै स **गोघ्नः**[4] ।। ७३ ।।

---

१. **क्वचिदन्तरेणाप्युपसर्गमकर्मकाः सकर्मका भवन्ति । ····· तद्यथा—नदी वहतीत्यकर्मकः । भारं वहतीति सकर्मकः ।।** द्र० अ० १ । ३ । २७ भाष्ये ।।

२. आ० सू० १३२२ ।। ३. धा० भ्वा० ८७१ ।।

४. शब्दव्युत्पादनपरमिदं सूत्रम् । कृतः कर्त्तरि भवन्तीति शास्त्रेण सामान्येन निर्देशः क्रियते । तत्र सम्प्रदानकारके विधानार्थं सूत्रम् । वेदे तु कर्त्तर्य्यपि गोघ्नपदं दृश्यते । तद्यथा—**'आरे ते गोघ्नमुत पूरुषघ्नम्'** इति (ऋ० १ । ११४ । १०) अस्य व्याख्याने गोघ्नशब्देन 'गवां हन्त्रीत्यर्थः स्कन्दसायणादिभाष्यकारैरपि गृह्यते । किञ्च 'गौः' इति शब्देनानेकार्थाः शास्त्रे प्रदर्श्यन्ते । तद्यथा—

[दाशगोघ्नौ] दाश तथा गोघ्न कृदन्त शब्द [सम्प्रदाने] सम्प्रदान कारक में निपातन हैं ॥

'दाश्रृ दाने' से अच् प्रत्यय होता है। दाशन्त्यस्मै स दाशः। गोपूर्वक हन् धातु से टक् प्रत्यय होता है। गां घ्नन्ति यस्मै स 'गोघ्नः' ॥ ७३ ॥

भीमादयोऽपादाने[1] ॥ ७४ ॥

भीमादयः। १। ३। अपादाने। ७। १॥ भीमादयः शब्दा औणादिकास्तेऽपादानकारके निपात्यन्ते ॥

बिभ्यति जना यस्मात् स भीमः। भीष्मो वा। '**भियः घुग्वा**[2]' इत्यादिसूत्रैः सिद्धाः ॥

अथ भीमादिगणः—[१] भीमः[3] [२] भीष्मः[3] [३] भयानकः[3]। [४] वरुः[4] [५] चरूः[5] [६] भूमिः[6] [७] रजः[7]। [८] प्रस्कन्दनम् [९] प्रपतनम्[8]

निघण्टौ गौरिति पृथिवीनामसु पठितम्। **गौरिति पृथिव्या नामधेयं यद्दूरं गता भवति यच्चास्यां भूतानि गच्छन्ति।** (नि० २। ५) इति निरुक्तम्। हन्तिरपि न केवलं हिंसायामेव वर्त्तते किन्तु गतावपि **'हन हिंसागत्योः'** (धा० अदा०) इति शासनात्। ज्ञानं गमनं प्राप्तिश्चेति गत्यर्थाः। गां-पृथिवीं-वाणीं-रश्मि-इषुं-हन्ति जानाति प्राप्नोति, इति यः कश्चिदपि ॥

गोशब्देन तद्विकारा दधि, पयः, चर्मप्रभृतयो गृह्यन्त इत्यपि शास्त्रकारा आहुः। तद्यथा निरुक्ते—**अथापि पशुनामेह भवत्येतस्मादेव। अथाप्यस्यां ताद्धितेन कृत्स्नवन्निगमा भवन्ति। गोभिः शृणीत मत्सरम्** (ऋ० ९। ४६। ४) **इति पयसः ॥**

अंशुं दुहन्तोऽध्यासते गविं। (ऋ० १०। ९४। ९) **इत्यधिषवणचर्मणः। अथापि चर्म च श्लेष्मा च। गोभिः सन्नद्धो असि वीळयस्व।** (ऋ० ६। ४७। २६ **इति**) **रथस्तुतौ ॥**

अथापि स्नाव च श्लेष्मा च। गोभिः सन्नद्धा पतति प्रसूता (ऋ० ६। ७५। ११)। **इतीषुस्तुतौ** (नि० २। ५) ॥ अनेनापि दुर्जनसन्तोषन्यायेन गोघ्नपदेन यस्मै चर्म हन्यते। असमय आगताय कस्मैचिदभ्यागताय पयो हन्यते प्राप्यतेऽसौ गोघ्न इति वक्तुं सुशकम्। न चापि गोघ्न-शब्दोऽतिथिपरत्वेन वेदादिसच्छास्त्रेषु गृहीतः। वेदे च **'अ नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट'** (ऋ० ८। १०१। १५) इति श्रुतिप्रामाण्यात्। 'अहन्तव्याया गोर्हननं न कस्मा अपि युज्यते कुतो न्वतिथय इति कृत्वा 'गोघ्नोऽतिथिः' इत्यादिसर्वमप्रमाणार्हम् ॥

१. आ० सू० १३२३ ॥
२. उणा० १। १४८ ॥
३. उणा० ३। ८२ ॥
४. उणा० १। ७ तत्रोह्यम् ॥
५. उणा० १। ७ ॥
६. उणा० ४। १४५ ॥
७. उणा० ४। २१७ ॥
८. उणादिभूमिकायां 'प्रतपनः' इत्येवं पाठः ॥

[१०] समुद्रः[1] [११] स्रुवः[2] [१२] स्रुक्[3] [१३] संस्कारः [१४] सङ्क्रन्दनः [१५] वृष्टिः [१६] रक्षः[4] [१७] संकसुकः[5] [१८] मूर्खः[6] [१९] खलतिः[7] ॥ इति भीमादयः ॥ ७४ ॥

[भीमादयः] भीमादि औणादिक शब्द [अपादाने] अपादान कारक में निपातन हैं ॥

जैसे—बिभ्यति जना यस्मात् स भीमः—भीष्मो वा । 'भियः पुरवा' इत्यादि सूत्रों से सिद्ध होते हैं ॥ ७४ ॥

ताभ्यामन्यत्रोणादयः[8] ॥ ७५ ॥

ताभ्याम् । ५ । २ । अन्यत्र [अ०] । उणादयः । १ । ३ ॥ ताभ्यामिति संप्रदानापादाने निर्दिश्यते । 'कर्त्तरि कृत्[9]' इति कर्त्तरि प्राप्ता उणादयो नियम्यन्ते ॥

ताभ्यां संप्रदानापादानाभ्यामन्यत्रान्यस्मिन् कर्मादिकारक उणादयः प्रत्यया भवन्ति ॥

वस्त आच्छादयते यत्तद्वासः[10] । कृष्यतेऽसौ कृषिः[11] । तन्यतेऽसौ तन्तुः[12] ॥७५॥

यहां 'ताभ्याम्' पद से सम्प्रदान तथा अपादान का निर्देश है । 'कर्त्तरि कृत्' सूत्र से कर्त्ता में प्राप्त उणादि प्रत्ययों का नियम किया है ॥

[ताभ्यामन्यत्र] सम्प्रदान तथा अपादान से अन्यत्र कर्मादिकारकों में [उणादयः] उणादि प्रत्यय होते हैं ॥ जैसे—वस्त आच्छादयते यत्तद्वासः । कृष्यतेऽसौ कृषिः । तन्यतेऽसौ तन्तुः ॥ ७५ ॥

क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः[13] ॥ ७६ ॥

क्तः । १ । १ । अधिकरणे । ७ । १ । च । [अ०] । ध्रौव्य० नार्थेभ्यः । [५ । ३] ॥ ध्रौव्यार्थाः स्थित्यर्थाः[14] । प्रत्यवसानार्था भोजनार्थाः ॥

---

१. उणा० २ । १३ ॥ समुद्रः कस्मात् ? समुद्रवन्त्यस्मादापः (निरु० २ । १०) ॥
२. उणा० २ । ६१ ॥ ३. उणा० २ । ६२ ॥
४. उणा० ४ । १८९ ॥ ५. उणा० २ । २९ ॥
६. उणा० ५ । २२ ॥ ७. उणा० ३ । १२२ ॥

क्वचिदेते नोपलभ्यन्ते—रजः । रहः । वरुः । चरूः । भूमिः । प्रस्कन्दनम् । स्रुवः । स्रुक् । संस्कारः । सङ्क्रन्दनः । वृष्टिः । सङ्कसुकः । मूर्खः ॥ काशिकायां न सन्ति—वृष्टिः । रक्षः । सङ्कसुकः । मूर्खः ॥ उणादिभूमिकायामेते न सन्ति —प्रस्कन्दनम् । संस्कारः । वृष्टिः । रक्षः । सङ्कसुकः ॥

८. आ० सू० १३२४ ॥ ९. अ० ३ । ४ । ६७ ॥
१०. वसेर्णित् (उ० ४ । २१८) ॥ ११. इगुपधात् कित् (उ० ४ । १२०) ॥
१२ सितनिगमि० (उ० १ । ६९) ॥ १३. आ० सू० १२२० ॥
१४. अकर्मकोपलक्षणार्थमिदम् । यथा स्थित्यर्थका अकर्मकास्तथा येऽकर्मकाः । अन्ये तु ध्रौव्यार्था अकर्मका इति स्वनिकायप्रसिद्धिरित्याहुः (का० पृ० २४७) ॥

ध्रौव्यगतिप्रत्यवसानार्थेभ्यो धातुभ्यो यः क्तो विहितः सोऽधिकरणे भवति चाद्यथा [प्रा] प्तञ्च भाव-कर्म-कर्त्तृषु ।।

ध्रौव्यार्थ– इदमेषामासितम् । इदमेषां स्थितम् । स्थानमित्यर्थः ।। गत्यर्थ—इदमेषां यातम् । इदमेषां गतम् । मार्ग इत्यर्थः ।। प्रत्यवसानार्थ—इदमेषां जग्धम् । इदमेषां भुक्तम् । पात्रमित्यर्थः[1] ।। ७६ ।।

[ध्रौव्य] स्थिरता [गति] जाने और [प्रत्यवसानार्थ] (भक्षण) अर्थ वाले धातुओं से विहित जो [क्तः] क्त प्रत्यय, वह [अधिकरणे] अधिकरण में हो [च] चकार से यथाप्राप्त भावकर्म और कर्त्ता में ।।

जैसे—ध्रौव्यार्थ से—इदमेषामासितम् । इदमेषां स्थितम् । अर्थात् यह इनकी बैठक है ।। गत्यर्थ—इदमेषां यातम् । इदमेषां गतम् । यह इनके जाने का मार्ग है ।। प्रत्यवसानार्थ—इदमेषां जग्धम् । इदमेषां भुक्तम् । अर्थात् यह इनके खाने का पात्र है ।। ७६ ।।

लस्य ।।[2] ७७ ।।

लस्य । ६ । १ ।। निरनुबन्धकस्य केवलस्य लकारस्यात्र ग्रहणम् । अकारोऽस्मिन्नुच्चारणार्थो निर्दिश्यते । निरनुबन्धकस्य ग्रहणात् सामान्येन दशलकाराणां[3] ग्रहणं सम्भवति । तद्यथा—लट् । लिट् । लुट् । लृट् । लेट् । लोट् । लङ् । लिङ् । लुङ् । लृङ् । षट्टितः, चत्वारो ङितः । अक्षरसमाम्नायक्रमेणोपदिष्टाः ।।

अधिकारसूत्रमिदमतोऽग्रे 'लस्य' कार्य्यं भविष्यत्यध्यायपरिसमाप्तेः, क्वचित्सामान्येन क्वचिद्विशेषत्वेन ।। ७७ ।।

निरनुबन्धक केवल लकार मात्र का यहां ग्रहण है । लकार में अकार उच्चारणार्थ है । निरनुबन्ध के ग्रहण से दश लकारों का ग्रहण होता है ।

जैसे—लट्-लिट्-लुट्-लृट्-लेट्-लोट्-लङ्-लिङ्-लुङ्-लृङ् छः लकार टित् और चार ङित् हैं वह अक्षरसमाम्नाय के क्रम से पढ़ दिये हैं ।।

यह अधिकार सूत्र है, आगे अध्याय की परिसमाप्ति पर्य्यन्त लकार सम्बन्धी कार्य्य कहीं सामान्य रूप से और कहीं विशेष रूप से होंगे ।। ७७ ।।

---

१. अत्र भाष्यम्—(**विभक्ता भ्रातरः, पीता गावः**)..... **कथं तर्हि कर्त्तृत्वं गम्यते । अकारो मत्वर्थीयः । विभक्तमेषामस्तीति विभक्ताः । पीतमेषामस्तीति पीता इति । अथवा उत्तरपदलोपोऽत्र द्रष्टव्यः—विभक्तधना विभक्ताः, पीतोदका पीता इति** । (अ० ३ । ४ । ६७ भाष्ये) ।।

२. आ० सू० ८ ।।

३. 'क्रियते विशिष्टग्रहणं लस्ये' ति भाष्यवचनात् 'शाला-माला-मल्ल' इत्यौणादिको यो 'लन्' प्रत्ययस्तस्य ग्रहणं न भवति ।।

तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथां ध्वमिड्वहिमहिङ्[1] ॥ ७८ ॥

सामान्यलकारस्य स्थाने तिवादयोऽष्टादश प्रत्यया भवन्ति, परस्मैपदात्मनेपद-विभागेन नव नव ॥

तिप्सिप्मिप्सु पित्करणमनुदात्तार्थम् । इटि टित्करणमिट्टोऽदि[2]ति विशेषणार्थम् । महिङि ङित्करणं तिङ् तङ् प्रत्याहारद्वयसिद्ध्यर्थम् ॥ परस्मैपदाद्धातोस्तिबादयो[3] नव भवन्ति । आत्मनेपदात् तादयश्च । उभयपदाच्च सर्वे ॥ तिप्-तस्-झि ॥ सिप्-थस्-थ ॥ मिप्-वस्-मस् ॥ त-आताम्-झ ॥ थास्-आथाम्-ध्वम् ॥ इट्-वहि-महिङ् ॥ भवति । भवतः । भवन्ति ॥ भवसि । भवथः । भवथ ॥ भवामि । भवावः । भवामः ॥ एधते । एधेते । एधन्ते ॥ एधसे । एधेथे । एधध्वे ॥ एधे । एधावहे । एधामहे ॥ उभयपदात्—पचति । पचते । एवमन्येभ्योऽन्येष्वपि लकारेषु बोध्यम् ॥ ७८ ॥

[तिप्तस्झि० महिङ्] सामान्य लकार के स्थान में तिबादि १८ प्रत्यय होते हैं । तिबादि नव परस्मैपद के, त आदि नव आत्मनेपद के ॥ तिप्-सिप्-मिप् में पित्करण अनुदात्त करने के लिये है इट् में टित् करण 'इटोऽत्' सूत्र के विशेषण के लिये है । और महिङ् में ङित्करण तिङ् तङ् दो प्रत्याहारों के बनाने के लिये है ॥

परस्मैपदी धातुओं से तिबादि नव होते हैं, और आत्मनेपदी धातुओं से तादि नव तथा उभयपदी धातुओं से सारे (१८) प्रत्यय होते हैं ॥

जैसे—तिप्-तस्-झि ॥ सिप्-थस्-थ ॥ मिप्-वस्-मस् ॥ त-आताम्-झ ॥ थास्-आथाम्-ध्वम् ॥ इट्-वहि-महिङ् ॥ भवति । भवतः । भवन्ति ॥ भवसि । भवथः । भवथ ॥ भवामि । भवावः । भवामः ॥ एधते । एधेते । एधन्ते ॥ एधसे । एधेथे । एधध्वे ॥ एधे । एधावहे । एधामहे ॥ उभयपदी से—पचति । पचते ॥ इसी प्रकार प्रकार अन्य धातुओं से तथा शेष लकारों में समझ लेना चाहिये ॥ ७८ ॥

टित आत्मनेपदानां टेरे[4] ॥ ७९ ॥

टितः । ६ । १ । आत्मनेपदानाम् । ६ । ३ । टेः । ६ । १ । एः । १ । १ । टितः । षट् लकाराः ॥

टितो लकारस्य यान्यात्मनेपदानि तेषां टिसंज्ञकस्य विभागस्य एकारादेशो भवति । तथा चैवोदाहृतम् ॥

[प्र०]—अथ पचमानो यजमान इत्यादिष्वेकारः कस्मान्न भवति । टिदादेशत्वादात्मनेपदत्वाच्च ? ।

---

१. आ० सू० ९ ॥ २. अ० ३ । ४ । १०६ ॥

३. परस्मैपदमस्य स परस्मैपदः, तस्मात् परस्मैपदात्, एवमात्मनेपदादुभयपदाच्च ॥ अकारोऽत्र मत्वर्थीयः ॥ ४. आ० सू० ९६ ॥

[उत्तर] का०—**आने मुग् ज्ञापकं त्वेत्त्वे टित्तङामिशिसीरिचः ।**
ङारौरःसु टिदटितः प्रकृते तद्गुणे कथम्[1] ॥

पचमान इत्यत्र यदेत्वं न भवति तत्र '**आने मुक्**[2]' इति सूत्रं ज्ञापकम्, यद्यानस्यैत्त्वं स्यात्तर्ह्यानयि मुगिति ब्रूयात् । एत्त्वे 'आने मुग्' ज्ञापकन्तु ॥ द्वितीयं समाधानम्—टित्तङां टिल्लकारस्य प्रकृतानां तङामात्मनेपदानामेत्त्वं विधीयते तन्मुख्यम् । गुणे गौणस्यानस्यैत्त्वं कथं स्यात् । अथ लुटः प्रथमपुरुषस्य ये डा-रौ-रसो विधीयन्ते तत्र स्थानिवद्भावादेत्त्वं कस्मान्न भवति ? डारौरःसु इशिसीरिचो ज्ञापकम् । यदि डारौरःसु स्थानिवद्भावेन एत्वं स्यात्तर्हि '**लिटस्तझयोरेशिरेच्**[3]' '**थासः से**[4]' इति सूत्रद्वये पाठगौरवं न कुर्य्यात् । 'एश्, से, इरेच्' एषां स्थाने 'इश्-सि-इरिच्' एवं वक्तव्यं स्यात्, पुनरेत्वं स्यादेव । अतो ज्ञापकाज्ज्ञायते—डारौरस्सु एत्वं न भवतीति ॥ टिदटितः अकुर्वीत्यत्र लङ उत्तमैकवचनेऽटितो ङितो लङ्स्थान इट् तत्रास्य सूत्रस्य प्राप्तिरेव नास्ति ॥ ७९ ॥

[टितः] छ टित् लकारों के [**आत्मनेपदानाम्**] आत्मनेपद प्रत्ययों के [**टेः**] टिसंज्ञकविभाग के स्थान [**ए**] एकार आदेश होता है ॥

जैसे—एधते इत्यादि उदाहरण पूर्वसूत्र में दिये हैं ॥

प्र०—**पचमानः, यजमानः** इत्यादि में टिदादेश तथा आत्मनेपद होने पर टिसंज्ञकविभाग को एकार आदेश क्यों नहीं होता ? ।

उ०—का०—आने मुग्ज्ञापक०—यहां पर जो एकार नहीं होता इसमें 'आने मुक्' यह सूत्र ज्ञापक है । क्योंकि यदि आन के स्थान में एत्व हो जाता त 'आनयि मुक्' ऐसा सूत्र बनाते, पहिला समाधान तो 'आने मुक्' का ज्ञापक है । दूसरा समाधान यह है कि—**टित्तङाम्**=टिल्लकार के स्थान में होने वाले प्रकृत आत्मनेपदों को एत्व होता है । **गुणे**=गौण आन के स्थान में कैसे हो ॥

(प्र०) लुट् के प्रथमपुरुष के स्थान में जो डा-रौ-रस्-आदेश होते हैं उन में स्थानिवत् धर्म मान के एत्व क्यों नहीं होता ? ।

उ०—डा-रौ-रस् विषय में 'इशिसीरिचः' ज्ञापक, है अर्थात् यदि डा-रौ-रस् को स्थानिवद्भाव मान कर एत्व होता तो 'लिटस्तझयोरेशिरेच्' तथा च 'थासः से' इतना पाठ न करते । 'एश्-से-इरेच्' इन तीनों के स्थान में इश् सि इरिच् ऐसा पढ़ देते और उनको टित् होने से एत्व हो ही जाता, पुनः ऐसा पाठ न करना ही इस बात का ज्ञापक है कि—डा-रौ-रस् इनमें एत्व नहीं होता । यहाँ 'अकुर्वि' में क्यों नहीं होता ? **टिदटितः**=अकुर्वि इस प्रयोग में लङ् के उत्तम पुरुष एकवचन में अटित् अर्थात् ङित् लङ् के स्थान में 'इट्' होता है, अतः यहां इस सूत्र की प्राप्ति ही नहीं होती ॥ ७९ ॥

---

१. अ० ३ । ४ । ७८ भाष्ये का० ॥ २. अ० ७ । २ । ८२ ॥
३. अ० ३ । ४ । ८१ ॥ अ० ३ । ४ । ८० ॥

थासः से[1] ॥ ८० ॥

टित इत्यनुवर्त्तते । थासः । ६ । १ । से । [१ । १] ॥ टितो लकारस्य स्थाने यस्थास् तस्य स्थाने 'से' इत्यादेशो भवति ॥

पचसे । पेचिषे । पक्तासे । पक्ष्यसे ॥ ८० ॥

यहां 'टितः' पद का अनुवर्त्तन है ॥ टित् लकार के स्थान में जो [थासः] थास् होता है उसके स्थान में [से] 'से' यह आदेश होता है ॥

जैसे—**पचसे** । पेचिषे । पक्तासे । पक्ष्यसे ॥ ८० ॥

लिटस्तझयोरेशिरेच्[2] ॥ ८१ ॥

लिटः । ६ । १ । तझयोः । ६ । २ । एशिरेच् । १ । १ ॥ लिट आदेशयोस्तझयोः स्थाने एश्-इरेच् इत्यादेशौ यथासंख्येन भवतः ॥

पेचे । पेचिरे । लेभे । लेभिरे । शित्करणं सर्वादेशार्थम् । चित्करणं स्वरार्थम् ॥ ८१ ॥

[लिटः] लिट् के आदेश [तझयोः] त और झ के स्थान में यथासंख्य एश् तथा इरेच् ये आदेश होते हैं ॥

जैसे—पेचे । पेचिरे । लेभे । लेभिरे ॥ एश् में शित्करण सर्वादेशार्थ है, चित्करण स्वरार्थ है ॥ ८१ ॥

परस्मैपदानां णलतुसुस्थलथुस्णल्वमाः[3] ॥ ८२ ॥

लिट इत्यनुवर्त्तते । परस्मैपदानाम् । ६ । ३ । णल० वमाः । १ । ३ ॥

लिट आदेशानां परस्मैपदसंज्ञानां तिबादीनां स्थाने णलादयो नवादेशा यथासंख्येन भवन्ति ॥

णल्-अतुस्-उस् ॥ थल्-अथुस्-अ[4] ॥ णल्-व-म ॥ णकारोऽनुबन्धो वृद्ध्यर्थः ॥ लकारः स्वरार्थः । सकारस्य ['न विभक्तौ तुस्माः' (अ० १ । ३ । ४) इति प्रतिषेधात्] प्रयोगेषूच्चारणं भवत्येव ॥

पपाच । पेचतुः । पेचुः ॥ पेचिथ, पपक्थ । पेचथुः । पेच ॥ पपाच, पपच । पेचिव । पेचिम ॥ ८२ ॥

यहां 'लिटः' पद का अनुवर्त्तन है । लिट् लकार के [परस्मैपदानाम्] परस्मैपद संज्ञक तिबादि आदेशों के स्थान में [णल० वमाः] णल्-अतुस्-उस् । थल्-अथुस्-अ । णल्-व-म-ये

---

१. आ० सू० ९९ ॥ २. आ० सू० १०५ ॥

३. आ० सू० ३१ ॥

४. अत्र तु भाष्यम्—**प्रश्लिष्टनिर्देशोऽयम् । अ अ इति । सोऽसावनेकाल्, 'अनेकाल् शित् सर्वस्य' (अ० १ । १ । ५५) इति सर्वादेशो भविष्यति ॥**

आदेश यथासंख्य होते हैं। इन णल् आदि आदेशों में णित्करण वृद्धि के लिये है। और लकारानुबन्ध स्वर के लिये है, सकार का प्रयोगों में श्रवण होता ही है॥

जैसे—पपाच। पेचतुः। पेचुः। पेचिथ, पपक्थ। पेचथुः। पेच। पपाच, पपच। पेचिव। पेचिम॥ ८२॥

विदो लटो वा[1] ॥ ८३ ॥

परस्मैपदानामित्यनुवर्त्तते, न लिट इति॥ विदः। ५। १। लटः। ६। १। वा। [अ०]॥ अप्राप्तविभाषेयम्॥

'विद ज्ञाने'[2] इत्यस्माद् धातोः परो यो लट् तस्यादेशानां परस्मैपदसंज्ञकानां तिवादीनां स्थाने णलादयो नवादेशा यथासंख्यं विकल्पेन भवन्ति॥

वेद। विदतुः। विदुः॥ वेत्थ। विदथुः। विद॥ वेद। विद्व। विद्म॥ पक्षे न भवन्ति—वेत्ति। वित्तः। विदन्ति॥ वेत्सि। वित्थः। वित्थ॥ वेद्मि। विद्वः। विद्मः॥ ८३॥

यहां 'परस्मैपदानाम्' पद का अनुवर्त्तन है 'लिटः' का नहीं॥ यह सूत्र अप्राप्त-विभाषा है॥

[विदः] विद ज्ञाने इस धातु से परे जो [लटः] लट् उसके स्थान में होने वाले परस्मैपद तिबादि आदेशों के स्थान में णलादि नव आदेश यथासंख्य [वा] विकल्प से होते हैं॥

जैसे --वेद। विदतुः। विदुः॥ वेत्थ। विदथुः। विद॥ वेद विद्व। विद्म। पक्ष में नहीं होते—वेत्ति। वित्तः। विदन्ति। वेत्सि। वित्थः। वित्थ॥ वेद्मि। विद्वः। विद्मः॥ ८३॥

ब्रुवः पञ्चानामादित आहो ब्रुवः[3] ॥ ८४ ॥

परस्मैपदानां लटो वेति चानुवर्त्तते॥ ब्रुवः। ५। १। पञ्चानाम्। ६। ३। आदितः। [अ०]। आहः। १। १। ब्रुवः। ६। १॥

ब्रू-धातोः परो यो लट् तस्यादेशानामादिभूतानां परस्मैपदसंज्ञकानां पञ्चानां तिबादीनां स्थाने पञ्च णलादय आदेशाः क्रमतो विकल्पेन भवन्ति, आदेशपक्षे ब्रू-धातोश्च 'आहः' इत्यादेशो भवति॥

आह। आहतुः। आहुः। आत्थ। आहथुः। पक्षे न भवन्ति—ब्रवीति। ब्रूतः। ब्रुवन्ति। ब्रवीषि। ब्रूथः॥

---

१. आ० सू० ३४९॥ २. धा० अदा० ५४॥

अत्र तु भाष्यम्—**विहितविशेषणं धातुग्रहणं—धातोर्विहितस्य लस्येति। यद्येवं विन्दतीति णलादयः प्राप्नुवन्ति। धातुनाऽत्र विहितं विशेषयिष्यामो विदिना चाऽऽनन्तर्य्यम्। धातोर्विहितस्य लस्य विदेरनन्तरस्येति॥** (अ० ३। १। ९१ भाष्ये)॥

३. आ० सू० ३३१॥

'पञ्चानाम्' इति किम्—ब्रूथ । ब्रवीमि । ब्रूवः । ब्रूमः ।। 'आदितः' इति किम्—परेषां पञ्चानां [मा] भूवन् ।। 'ब्रुवः' इति पुनर्वचनमादेशार्थम्[1] ।। ८४ ।।

यहां 'परस्मैपदानाम्' 'लटः' 'वा' इन पदों का अनुवर्त्तन है ।। [ब्रुवः] 'ब्रूञ्' धातु से परे जो लट् उसके स्थान में होने वाले परस्मैपद संज्ञक [आदितः] आदि के [पञ्चानाम्] पांच तिबादि आदेशों के स्थान में णलादि पांच आदेश यथासंख्य विकल्प से होते हैं साथ ही आदेश पक्ष में [ब्रुवः] ब्रूञ् धातु को [आहः] आह आदेश हो जाता है ।।

जैसे—आह । आहतुः । आहुः ।। आत्थ । आहथुः । पक्ष में नहीं होते—ब्रवीति । ब्रूतः । ब्रुवन्ति । ब्रवीषि । ब्रूथः ।।

'पञ्चानाम्' ग्रहण इसलिये है कि—ब्रूथः । ब्रवीमि । ब्रूवः । ब्रूमः ।। 'आदितः' ग्रहण इसलिये है कि—अगले पांच तिबादि के स्थान में आदेश न हो जायँ ।। 'ब्रुवः' इस पद का पुनः उच्चारण आदेश के स्थान के निर्देश के लिये है, अर्थात् ब्रूञ् के स्थान पर आह आदेश हो ।। ८४ ।।

लोटो लङ्वत्[2] ।। ८५ ।।

'कार्य्यातिदेशोऽयम् । लोटः । ६ । १ । लङ्वत् [अ०] ।। लङ इव लङ्वत् षष्ठीसमर्थाद्वतिः प्रत्ययः ।।

लोट्लकारस्य लङ्वत् कार्य्यं भवति, अर्थात् ङित्कार्य्यं लोटोऽपि भवति **तस्थस्थमिपां तान्तन्तामः**[3]' इति ।।

पचताम् । पचतम् । पचत । पचाव । पचाम । अत्र सलोपः ।। षष्ठीसमर्थादत्र वतिः क्रियते तेन लङि परतो यत्कार्य्यमडागमादि तन्न भवति ।। ८५ ।।

यह सूत्र कार्य्यातिदेश है । लङ्-वत् में लङः इस षष्ठी समर्थ से वति-प्रत्यय है ।। [लोटः] लोट् लकार को [लङ्वत्] लङ् की तरह कार्य्य होता है अर्थात् ङित् कार्य **'तस्थस्थमिपां तान्तन्तामः'** यह लोट् को भी हो जाता है ।।

जैसे—पचताम् । पचतम् । पचत । पचाव । पचाम । यहां सकार का लोप हो जाता है ।। 'लङ्वत्' में षष्ठी समर्थ से वति होने के कारण लङ् को परे मानकर होने वाले अट् आदि आगम नहीं होते ।। ८५ ।।

एरुः[4] ।। ८६ ।।

लोट इत्यनुवर्त्तते । एः । ६ । १ । उः । १ । १ ।। लोट्लकारस्य य इकारस्तस्य स्थान उ-इत्यादेशो भवति ।। पचतु । पचन्तु ।।

---

१. ब्रुवः स्थाने 'आह' आदेशः स्यादन्यथा हि परस्मैपदानां स्थाने स्यादिति भावः ।।

२. आ० सू० ६८ ।। ३. अ० ३ । ४ । १०१ ।।

४. आ० सू० ६६ ।।

हिन्योरुच्चारणसामर्थ्यादुत्त्वं न भवति, यद्युत्त्वं स्यात्तदा **'मेर्निः'** इत्यत्र मेर्नु रिति ब्रूयात् ॥ ८६ ॥

यहां 'लोटः' पद का अनुवर्त्तन है ॥ लोट् लकार का जो [एः] इकार उसके स्थान में [उः] उ यह आदेश होता है ॥

जैसे—**पचतु । पचन्तु** ॥ 'हि' तथा 'नि' के इकार को उच्चारण सामर्थ्य से 'उत्व' नहीं होता यदि उत्व हो जाता तो 'मेर्नु :' ऐसा सूत्र पढ़ते ॥ ८६ ॥

सेर्ह्यपिच्च[1] ॥ ८७ ॥

['लोटः' इत्यनुवर्त्तते ॥ सेः । ६ । १ । हि । १ । १ । अपित् । १ । १ । च । अ०] ॥

लोट् लकारस्य सिपः स्थाने हि इत्यादेशो भवति स चापित् । स्थानिवद्भावात् पित्त्वं प्राप्तं प्रतिषिध्यते ॥

लुनीहि । पुनीहि । ब्रूहि । पित्प्रतिषेधेन गुणो मा भूत् ॥ ८७ ॥

लोट् लकार के [सेः] सिप् के स्थान में [हि] हि यह आदेश होता है [अपिच्च] और वह अपित् होता है, अर्थात् स्थानिवत्त्व से प्राप्त पित्त्व का प्रतिषेध किया है ॥

जैसे—लुनीहि । पुनीहि । ब्रूहि । पित् प्रतिषेध से गुण नहीं होता ॥ ८७ ॥

वा छन्दसि ॥ ८८ ॥

वा । [अ०] । छन्दसि । ७ । १ ॥ अप्राप्तविभाषेयम् । अपित्त्वं विकल्प्यते ॥

सिपः स्थाने हि इत्यादेशो विधीयते स छन्दसि वेदविषये विकल्पेनापिद्भवति, पित्पक्षे गुणः ॥

जुहुधि । जुहोधि ॥ प्रीणाहि । प्रीणीही । अत्रापित्पक्ष ईत्वम्[3] ॥ ८८ ॥

यह सूत्र 'अप्राप्तविभाषा' है । यहां अपित्त्व का विकल्प है ॥ सिप् के स्थान में 'हि' यह आदेश होता है वह [छन्दसि] वेद विषय में [वा] विकल्प से अपित् होता है, पित्पक्ष में गुण हो जाता है ॥

जैसे जुहुधि, जुहोधि । प्रीणाहि, प्रीणीहि । यहां अपित्पक्ष में ईत्व हो जाता है ॥८८॥

मेर्निः[4] ॥ ८९ ॥

लोट इत्यनुवर्त्तते ॥ मेः । ६ । १ । निः । १ । १ ॥

---

१. अ० ३ । ४ । ८९ ॥ २. आ० सू० ७० ॥
३. अ० ६ । ४ । ११३ ॥ ४. आ० सू० ७२ ॥

लोट आदेशस्य मिपः स्थाने निरादेशो भवति। पठानि। पचानि। उत्वलोपयोरपवादः[1]। यदि कृत आदेशे लोपः स्यात् तर्हि नकारमेवादिशेत् ॥ ८९ ॥

यहां 'लोटः' पद का अनुवर्त्तन है ॥ लोट् सम्बन्धी [मेः] मिप् के स्थान में [निः]नि आदेश होता है ॥

जैसे—पठानि। पचानि ॥ यह सूत्र उत्व तथा लोप का अपवाद है। यदि आदेश करने के अनन्तर इकार का लोप हो जाता तो नकार ही आदेश कर देते ॥ ८९ ॥

आमेतः[2] ॥ ९० ॥

लोट इत्यनुवर्त्तते ॥ आम्। १। १। एतः। ६। १॥ लोटष्टित्त्वात् '**टित आत्मनेपदानां टेरे**[3]' इति सूत्रेण यदेत्त्वं भवति तस्येह कार्य्यमुच्यते ॥

लोट्सम्बन्धिन एकारस्य स्थाने 'आम्' इत्यादेशो भवति ॥ एधताम्। एधेताम्। एधन्ताम् ॥ ९० ॥

यहां 'लोटः' पद का अनुवर्त्तन है ॥ लोट् के टित् होने से 'टित आत्मनेपदानां टेरे' सूत्र से जो एत्व होता है उसको यहां कार्य्य कहा है ॥

लोट् सम्बन्धी [एतः] एकार के स्थान में [आम्] आम् आदेश होता है ॥

जैसे—एधताम्। एधेताम्। एधन्ताम् ॥ ९० ॥

सवाभ्यां वामौ[4] ॥ ९१ ॥

लोट इत्यनुवर्त्तते एत इति च ॥ सवाभ्याम्। ५। २। वामौ। १। २॥ पूर्वसूत्रेण आम् प्राप्तः स बाध्यते ॥

सकारवकाराभ्यां परो लोटः सम्बन्धी य एकारस्तस्य स्थाने यथासंख्येन व-अम्-इति द्वावादेशौ भवतः ॥

एधस्व। एधध्वम्। सकारोत्तरस्य वः, वकारोत्तरस्य च 'अम्' भवति ॥ ९१ ॥

यहां 'लोटः' तथा 'एतः' पदों का अनुवर्त्तन है। पूर्व सूत्र से आम् प्राप्त था उसका यह बाधक है ॥

[सवाभ्याम्] सकार वकार से परे लोट् सम्बन्धी एकार के स्थान में यथासंख्य [वामौ] व, अम् ये आदेश होते हैं ॥

---

१. 'वयं तु ब्रूमो—**'लोटो लङ्वत्** (अ० ३। ४। ८५) इति प्राप्तस्यामादेशस्यापवादः' इति **पदमञ्जरी** ॥

२. आ० सू० ११५ ॥ ३. अ० ३। ४। ७९ ॥

४. आ० सू० ११६ ॥

जैसे—एधस्व । एधध्वम् ।। सकार से उत्तर एकार को 'व' तथा वकार से उत्तर एकार को 'अम्' होता है ॥ ९१ ॥

आडुत्तमस्य पिच्च[1] ॥ ९२ ॥

लोट इत्यनुवर्त्तते ॥ आट् । १ । १ । उत्तमस्य । ६ । १ । पित् । १ । १ । च । [अ०] ॥

लोट्सम्बन्धिन उत्तमपुरुषस्य 'आट्' आगमो भवति स च पित् ॥

नवानि । नवाव । नवाम ॥ स्तवै । स्तवावहै । स्तवामहै ॥ ९२ ॥

यहां 'लोटः' पद का अनुवर्त्तन है ॥ लोट् सम्बन्धी [उत्तमस्य] उत्तम पुरुष को [आट्] आट् आगम होता है और वह आट् [पिच्च] पित् होता है ॥

जैसे—नवानि । नवाव । नवाम ॥ स्तवै । स्तवावहै । स्तवामहै ॥ ९२ ॥

एत ऐ[2] ॥ ९३ ॥

लोट उत्तमस्य चेत्यनुवर्त्तते ॥ एतः । ६ । १ । ऐ । [अ०] ॥

लोट उत्तमपुरुषस्य य एकारस्तस्य स्थाने 'ऐ' इत्यादेशो भवति ॥

करवै । करवावहै । करवामहै । अत्राडागमस्य पित्त्वादुकारस्याप्राप्तो गुणः । अन्त्य एकारस्य चैकारः ॥ ९३ ॥

यहां 'लोटः' तथा 'उत्तमस्य' पदों का अनुवर्त्तन है । लोट् के उत्तम पुरुष का जो [एतः] एकार उसके स्थान में [ऐ] 'ऐ' यह आदेश होता है ॥

जैसे—करवै । करवावहै । करवामहै ॥ यहां आडागम के पित् होने से उकार को गुण हो जाता है और अन्त्य एकार के स्थान में ऐकार आदेश हो जाता है ॥ ९३ ॥

लेटोऽडाटौ[3] ॥ ९४ ॥

लोट्प्रकरणं निवृत्तम् ॥ लेटः । ६ । १ । अडाटौ । १ । २ ॥

लेट्लकारस्य अट्-आट् इत्येतावागमौ पर्य्यायेण भवतः ॥

सविता धर्म सावित्। प्र णु आयूंषि तारिषत्[4] । अत्र हल्तकारात् पूर्वमडागमः[5] ।

जीवाति शरदः शतम् । भवाति[6] । पताति[7] । प्रचोदयात्[8] ॥ ९४ ॥

---

१. आ० सू० ११८ ॥ २. आ० सू० ११७ ॥

३. आ० सू० ६१ ॥ ४. यजु० २३ । ३२ ॥

५. ऋ० १० । ८५ । ३९ ॥

६. विषुरूपा भवाति (अथ० १८ । १ । २) एवं बहुत्र ॥

७. अस्य पारिधिष्पताति (अथ० ५ । २९ । २)

८. धियो यो नः प्रचोदयात् । (यजु० ३ । ३५ ।, २२ । ९ ।, ३० । २ ।, सा० उ० ६ । १० । १) ॥

यहां लोट् का प्रकरण समाप्त हुआ ॥ [**लेटः**] लेट् लकार को [**अडाटौ**] अट्-आट् ये आगम पर्य्याय से होते हैं ॥

जैसे—सविता धर्मं साविषत् । प्र ण आयूँषि तारिषत् । यहां हलन्त लकार से पूर्व अट् का आगम है ॥ जीवाति शरदः शतम् । भवाति । पताति । **प्रचोदयात्** ॥ ९४ ॥

आत ऐ[1] ॥ ९५ ॥

लेट इत्यनुवर्त्तते ॥ आतः । ६ । १ । ऐ । [अ०] ॥ **प्रथममध्यमयोर्द्विवचन आताम्, आथाम् इत्याकारोऽस्ति तस्येह कार्य्यमुच्यते ॥**

लेट्सम्बन्धिन आकारस्य स्थाने 'ऐ' इत्यादेशो भवति ॥

एधैते । एधैथे । पचैते । पचैथे ॥

आट आकारस्य 'ऐ' कस्मान्न भवति—पताति विद्युत् ? । यद्यत्रैकारः स्यात्तर्ह्यैडागममेव ब्रूयात् ॥ ९५ ॥

यहां 'लेटः' पद का अनुवर्त्तन है । प्रथम और मध्यम पुरुष के द्विवचन में आताम्, आथाम् का जो आकार है, उसको यहां कार्य्य कहा है ॥ लेट् लकार सम्बन्धी [आतः] आकार के स्थान में [ऐ] ऐ यह आदेश है ॥

जैसे—ऐधैते । ऐधैथे । पचैते । पचैथे ॥

प्र०—पताति विद्युत्—यहां आट् के आकार के स्थान में ऐकार क्यों नहीं होता ? ।

उ०—यदि यहां ऐकार हो जाता तो ऐडागम ही पढ़ देते । इसलिये आट् के आकार को ऐकार नहीं होता ॥ ९५ ॥

वैतोऽन्यत्र[2] ॥ ९६ ॥

लेट इत्यनुवर्त्तते ॥ वा । [अ०] । एतः । ६ । १ । अन्यत्र । [अ०] ॥ कस्मादन्यत्रेति सापेक्षम्, तत्रानन्तरमेवापेक्षते 'आत ऐ[3]' सूत्रस्य यो विषयस्तस्मादन्यत्र लेट्सम्बन्धिन एकारस्य स्थाने विकल्पेन ऐ इत्यादेशो भवति ॥

अहमेव पशूनामीशै । ईशे वा । एधते । एधाते । एधतै । एधातै । अप्राप्तविभाषेयम् ॥

'अन्यत्र' इति किम्—मन्त्रयैते । अत्र मा भूत् ॥ ९६ ॥

यहां 'लेटः' पद का अनुवर्त्तन है ॥ [अन्यत्र] 'आत ऐ' सूत्र के विषय से अन्यत्र लेट् लकार सम्बन्धी [एतः] एकार के स्थान में [वा] विकल्प से ऐ यह आदेश होता है ॥

जैसे—**अहमेव पशूनामीशै । ईशे वा ॥** एधते । एधाते । एधतै । एधातै । यह सूत्र अप्राप्त विभाषा है ॥ 'अन्यत्र' ग्रहण इसलिये है कि—मन्त्रयैते । यहां नहीं होता ॥ ९६ ॥

---

१. आ० सू० ११४ ॥ २. आ० सू० ११३ ॥

३. अ० ३ । ४ । ९५ ॥

इतश्च लोपः परस्मैपदेषु[1] ॥ ९७ ॥

लेट इति वेति चानुवर्त्तते ॥ इतः । ६ । १ । च । [अ०] । लोप । १ । १ । परस्मैपदेषु । ७ । ३ ॥ परस्मैपदेषु परस्मैपदविषयस्य लेट्सम्बन्धिन इकारस्य विकल्पेन लोपो भवति, पक्षे श्रवणञ्च ॥

प्रचोदयात्[2] । जोषिषत्[3] । तारिषत्[4] । अत्र सर्वत्र तिप इकारस्य लोपः । पक्षे न च भवति—स देवाँ एह वक्षति[5] । भवाति[6] । पताति[7] ॥ परस्मैपद-ग्रहणं किम्—इड्वहिमहिङां मा भूत् ॥ ९७ ॥

यहां 'लेटः' तथा 'वा' पदों का अनुवर्त्तन है ॥ [परस्मैपदेषु] परस्मैपद विषय में लेट् सम्बन्धी [इतः] इकार का विकल्प करके [लोपः] लोप होता है । पक्ष में श्रवण होता है ॥

जैसे—प्रचोदयात् । जोषिषत् । तारिषत् । यहां सब जगह तिप् के इकार का लोप हुआ है ॥ पक्ष में नहीं होता—स देवाँ एह वक्षति । भवाति । पताति ॥

'परस्मैपदेषु' ग्रहण इसलिये है कि—'इट्-वहि-महिङ्' के इकार का लोप न होवे ॥९७॥

स उत्तमस्य[8] ॥ ९८ ॥

लेट इत्यनुवर्त्तते [वा च] ॥ सः । ६ । १ । उत्तमस्य । ६ । १ ॥

लेट उत्तमपुरुषस्थस्य सकारस्य विकल्पेन लोपो भवति ॥

करवाव । करवाम । पक्षे—करवावः । करवामः ॥ ९८ ॥

यहां 'लेटः' तथा 'वा' पदों का अनुवर्त्तन है ॥ लेट् लकार के [उत्तमस्य] उत्तम पुरुष के [सः] सकार का विकल्प से लोप होता है ॥

जैसे—करवाव । करवामः । पक्ष में—करवावः । करवामः ॥ ९८ ॥

नित्यं ङितः[9] ॥ ९९ ॥

लेट्-प्रकरणं निवृत्तम् विकल्पोऽपि । स उत्तमस्येत्यनुवर्त्तते, परस्मैपदेष्विति च ॥ नित्यम् । १ । १ । ङितः । ६ । १ ॥ ङितो लकाराश्चत्वारस्ते पूर्वं परिगणिताः[10] ॥ तेषां सम्बन्धिन उत्तमपुरुषस्थस्य सकारस्य नित्यं लोपो भवति ॥

---

१. आ० सू० ६२ ॥
२. यजु० ३ । ३५ ॥, एवं बहुत्र ॥
३. सुपेशसस्करति जोषिषद्धि (ऋ० २ । ३५ । १) ॥
४. यजु० २३ । ३२ ॥
५. ऋ० १ । १ । २ ॥
६. अथ० १८ । १ । २ ॥
७. अथ० ५ । २९ । २ ॥
८. आ० सू० ६३ ॥
९. आ० सू० ७३ ॥
१०. "लस्य" (अ० ३ । ४ । ७७) इति सूत्रे ॥

अपचाव । अपचाम ।। पचेव । पचेम । पच्यास्व । पच्यास्म ।। अपाक्ष्व । अपाक्ष्म । अपक्ष्याव । अपक्ष्याम । भवाव । भवाम ।। लोटो लङ्वत् कार्यं भवतीति लोट उत्तमेऽपि नित्यमेव ।। ९९ ।।

लेट् प्रकरण की समाप्ति हुई तथा 'वा' की भी निवृत्ति हुई। परन्तु 'स उत्तमस्य' तथा 'परस्मैपदेषु' इन पदों का अनुवर्त्तन है ।। ङित् लकार चार हैं उनका पूर्व परिगणन कर दिया है ।।

[ङित्] ङित् लकार सम्बन्धी उत्तमपुरुषस्य सकार का [नित्यं] नित्य लोप हो जाता है ।।

जैसे—अपचाव । अपचाम ।। पचेव । पचेम ।। पच्यास्व । पच्यास्म । अपाक्ष्व । अपाक्ष्म ।। अपक्ष्याव । अपक्ष्याम ।। भवाव । भवाम । लोट् को लङ्वत् कार्य्य होता है, इस कारण लोट् लकार के उत्तम पुरुष में भी नित्य ही सकार का लोप हो जाता है ।। ९९ ।।

इतश्च[1] ।। १०० ।।

ङितो लोप इत्यनुवर्त्तते परस्मैपदेष्विति च ।। इतः । ६ । १ । च । [अ०] ।।

ङिल्लकारसम्बन्धिनः परस्मैपदविषयस्येकारस्य नित्यं लोपो भवति ।।

अपचत् । अपाक्षीत् । अपचः । अपाक्षीः । अपचम् । अपाक्षम् । परस्मैपदेष्वित्यनुवर्त्तनादिह न भवति—अपचावहि अपचामहि ।।

लोट्लकारस्य लङ्वत्कार्य्यमिकारलोपो न भवति, इकारस्यान्येषां कार्य्याणां विहितत्वात् ।। १०० ।।

यहां 'ङितः' तथा 'लोपः' पदों का अनुवर्त्तन है, 'परस्मैपदेषु' का भी ।। ङित् लकार सम्बन्धी परस्मैपद के [इतश्च] इकार का नित्य लोप होता है ।।

जैसे—अपचत् । अपाक्षीत् । अपचः । अपाक्षीः । अपचम् । अपाक्षम् ।। परस्मैपद का अनुवर्त्तन होने से यहां नहीं होता—अपचावहि । अपचामहि ।।

लोट् को ङित् मानकर उसके इकार का लोप नहीं होता क्योंकि 'एरुः' आदि सूत्रों से लोट् के इकार को अन्य कार्य्यों का विधान किया है ।। १०० ।।

तस्थस्थमिपां तान्तन्तामः[2] ।। १०१ ।।

ङित इत्यनुवर्त्तते ।। तस्थस्थमिपाम् । ६ । ३ । तान्तन्तामः । १ । ३ ।।

ङिल्लकारसम्बन्धिनां तस्-थस्-थ-मिप्-इत्येतेषां क्रमेण ताम्-तम्-त-अम् इत्येत आदेशा भवन्ति ।।

अपचताम् । अपचतम् । अपचत । अपचम् । एवमन्येष्वपि—पचताम् । पचतम् । पचत । लोट्लकारे लङ्वत् कार्य्यमिदं भवति । मिपः स्थाने नेर्बाधकत्वान्न ।। १०१ ।।

१. आ० सू० ७६ ।। २. आ० सू० ६९ ।।

यहां 'ङितः' पद का अनुवर्त्तन है ॥ ङित् लकार सम्बन्धी [तस्थस्थमिपां] तस्-थस्-थ-मिप्-इनके स्थान में [तान्तन्तामः] ताम्-तम्-त-अम् ये आदेश यथासंख्य होते हैं ॥

जैसे—अपचताम् । अपचतम् । अपचत । अपचम् । इसी प्रकार अन्य ङित् लकारों में भी जानना चाहिये । पचताम् । पचतम् । पचत । लोट् लकार को यह लङ्वत् कार्य्य हो जाता है ॥ परन्तु मिप् के स्थान पर 'नि' आदेश का विधान होने से अम् आदेश नहीं होता ॥ १०१ ॥

लिङः सीयुट्[1] ॥ १०२ ॥

लिङः । ६ । १ । सीयुट् [१ । १] ॥ लिङ्लकारस्य सीयुडागमो भवति । परसूत्रे परस्मैपदे यासुटा बाधितत्वादिहात्मनेपदमायाति ॥

पचेत । पचेयाताम् । पचेरन् ॥ पक्षीष्ट । पक्षीयास्ताम् । पक्षीरन् । ईडीत ॥ तिप्सीष्ट । तिप्सीयास्ताम् । तिप्सीरन् ॥ १०२ ॥

[लिङः] लिङ् लकार को [सीयुट्] सीयुट् आगम होता है ॥ अगले सूत्र में परस्मैपद परे यासुट् के बाधक होने से यहां आत्मनेपद का ग्रहण होता है ॥

जैसे—पचेत । पचेयाताम् । पचेरन् ॥ पक्षीष्ट । पक्षीयास्ताम् । पक्षीरन् ॥ ईडीत ॥ तिप्सीष्ट । तिप्सीयास्ताम् । तिप्सीरन् ॥ १०२ ॥

यासुट् परस्मैपदेषूदात्तो ङिच्च[2] ॥ १०३ ॥

सीयुटोऽपवादः । लिङ इत्यनुवर्त्तते ॥ यासुट् । १ । १ । परस्मैपदेषु । ७ । ३ । उदात्तः । १ । १ । ङित् । १ । १ । च । [अ०] ॥

लिङ्सम्बन्धिनां परस्मैपदविषयाणां तिबादीनां यासुडागमो भवति स उदात्तो ङिच्च बोद्धव्यः ॥

भवेत् । भवेताम् । भवेयुः ॥ भूयात् । भूयास्ताम् । भूयासुः ॥ कुर्य्यात् । कुर्य्यास्ताम् । कुर्य्यासुः । अत्र यासुडागमस्य ङित्त्वाद् गुणो न भवति ॥

अस्मिन् सूत्रे आगमस्योदात्तशासनाज्ज्ञायते 'आगमा अनुदात्ता भवन्तीति' । ङिच्चेति द्वितीयं ज्ञापकं 'ङिदादेशा ङितो न भवन्तीति' । यदि लिङः स्थाने तिबादयः स्थानिवद्भावान्ङितः स्युः, पुनस्तेषामागमोऽपि तद्गुणीभूतो ङित् स्यादेव । पुनर्यासुटो ङिद्वचनं ज्ञापकं ङिदादेशा ङितो न भवन्तीति ॥

ङिदादेशा ङितो न भवन्तीत्युच्यते चेत्, '**नित्यं ङित**[3]' '**इतश्च**[4]' सकारेकार-लोपो ङित्कार्य्यं कथं भवति ? । यासुटो ङिद्वचनादेतज्ज्ञाप्यते ङिदादेशानां स्थानि-वद्भावान् ङितो यत् कार्य्यं तद्भवति, ङिति यत्कार्य्यं तन्न भवतीति । यासुट्ङिद्वचनस्यै-तत्प्रयोजनं गुणप्रतिषेधो यथा स्यात् । तच्च ङिति परतः कार्य्यमस्ति, स गुणप्रतिषेधो

---

१. आ० सू० १२० ॥ २. आ० सू० ७८ ॥
३. अ० ३ । ४ । ९९ ॥ ४. अ० ३ । ४ । १०० ॥

यदि ङिल्लकारस्य स्थानिवद्भावात् स्यात्तर्हि यासुटो ङिद्वचनमनर्थकं स्यात्, तेन ज्ञायते ङिति यत्कार्य्यं तल्लकारस्य स्थानिवद्भावान्न भवति ङितो यत्कार्य्यं तत्तु भवत्येव, अस्य ज्ञापकस्यान्यत्र फलम्—अचिनवम् । असुनवम् । अकरवम् । अत्र लङुत्तमैकवचने ङितो लङः स्थाने य आदेशस्तस्य स्थानिवद्भावान्-ङिति गुणप्रतिषेधो न भवति ॥ १०३ ॥

यह सूत्र सीयुट् का अपवाद है ॥ यहां 'लिङः' पद का अनुवर्त्तन है ॥

लिङ् लकार सम्बन्धी [परस्मैपदेषु] परस्मैपदसंज्ञक तिबादि को [यासुट्] यासुट् आगम होता है [उदात्तः] वह उदात्त तथा [ङिच्च] ङित् भी होता है ॥

जैसे—भवेत् । भवेताम् । भवेयुः ॥ भूयात् । भूयास्ताम् । भूयासुः । कुर्य्यात् । कुर्य्यास्ताम् । कुर्य्यासुः ॥ यहां यासुट् आगम के ङित् होने से गुण नहीं होता ॥

इस सूत्र में आगम को उदात्त शासन करने से यह जाना जाता है कि—'आगमा अनुदात्ता भवन्तीति' अर्थात् आगम अनुदात्त होते हैं ॥

'ङिच्च' ऐसा शासन करने से दूसरा ज्ञापक ङित् सम्बन्ध में निकलता है कि—'ङिदादेशा ङितो न भवन्तीति' अर्थात् ङित् के आदेश ङित् नहीं होते । यदि लिङ् के स्थान में होने वाले तिबादि स्थानिवद्भाव से ङित् हो जाते तो फिर उन का आगम भी तद्गुणीभूत होने से ङित् हो ही जाता, फिर यासुट् को ङित् करना इस बात का ज्ञापक है कि—'ङित् के स्थान में होने वाले आदेश ङित् नहीं होते' ॥

प्र०—ङित् के स्थान में होने वाले आदेश ङित् नहीं होते, यदि ऐसा कहते तो 'नित्यं ङितः' 'इतश्च' इन सूत्रों से सकार तथा इकार का लोप कैसे होता है ॥

उ०—यासुट् का ङित् करना ही इस बात का ज्ञापक है कि—ङिदादेशों को स्थानिवद्भाव से 'ङितः' अर्थात् ङित् को होने वाला कार्य्य तो हो जाता है, परन्तु 'ङिति' अर्थात् ङित् परे मान कर जो कार्य्य कहा है वह नहीं होता । यासुट् को ङित् करने का प्रयोजन गुण का निषेध है, वह गुणनिषेध कार्य्य (ङिति) अर्थात् ङित् परे रहते होता है, यदि यह गुण प्रतिषेध ङित् लकार के स्थानिवद्भाव से हो जाता तो यासुट् को ङित् करना व्यर्थ हो जाता । अतः इस से यह जाना जाता है कि—ङित् परे रहते जो कार्य्य होता है वह लकार को स्थानिवद्भाव से नहीं होता, परन्तु ङित् को जो कार्य्य होता है वह हो ही जाता है । इस ज्ञापक का अन्यत्र प्रयोजन यह है कि—अचिनवम् । असुनवम् । अकरवम् । यहां लङ् लकार के उत्तमपुरुष के एकवचन में ङित् लकार के स्थान में आदेश होता है उसके स्थानिवद्भाव से ङित् परे गुण का प्रतिषेध नहीं होता ॥ १०३ ॥

किदाशिषि[1] ॥ १०४ ॥

लिङो यासुट् परस्मैपदेषूदात्त इति सर्वमनुवर्त्तते ॥ कित् । १ । १ । आशिषि । ७ । १ ॥

आशिषि विहितस्य परस्मैपदविषयस्य लिङो यो यासुड् विधीयते स किदुदात्तश्च भवति ॥

१. आ० सू० ८५ ॥

गुणप्रतिषेध उभयत्र तुल्य एव। किति सम्प्रसारणं जागृधातोश्च गुणादेशो विशेषः कित्त्वस्य प्रयोजनम्। उच्यात्। उच्यास्ताम्। उच्यासुः। इज्यात्। अत्र **'वचिस्वपियजादीनां किति'**[1] इति सम्प्रसारणं कित्कार्य्यम्। जागर्य्यात्। जागर्य्यास्ताम्। जागर्य्यासुः। अत्र जागृ-धातोर्ङिति गुणः प्रतिषिद्धः किति भवत्येव॥

'आशिषि' इति किम्—वच्यात्॥ १०४॥

यहां 'लिङः' 'यासुट्' 'परस्मैपदेषु' 'उदात्तः' इन पदों का अनुवर्त्तन है॥ [आशिषि] आशीर्वाद में विहित परस्मैपदसंज्ञक लिङ् को जो यासुट् का आगम कहा है, वह [कित्] कित् होता है साथ ही उदात्त भी हो जाता है॥

गुणप्रतिषेध कार्य्य कित् तथा ङित् दोनों में समान ही है। परन्तु कित् करने के विशेष प्रयोजन ये हैं कि कित् परे रहते सम्प्रसारण, तथा जागृ धातु को गुण हो जावे। जैसे—उच्यात्। उच्यास्ताम्। उच्यासुः। इज्यात्। यहां 'वचिस्वपियजादीनां किति' सूत्र से कित् कार्य्य सम्प्रसारण होता है। जागर्य्यात्। जागर्य्यास्ताम्। जागर्य्यासुः। यहां 'जाग्रोऽविचि०'[2] सूत्र से जागृ धातु को ङित् परे गुण का निषेध कहा है परन्तु कित् परे हो जाता है॥

'आशिषि' ग्रहण इसलिये है कि—वच्यात्। यहां विधिलिङ् में 'यासुट्' कित् न हो॥ १०४॥

झस्य रन्[3]॥ १०५॥

प्रत्ययादेशविधायकस्य 'झोऽन्तः'[4] इत्यस्यायमपवादः॥ झस्य। ६। १। रन्। १। १॥ 'लिङः' इत्यनुवर्त्तते॥

लिङ आदेशस्य झस्य[5] 'रन्' इत्यादेशो भवति। पचेरन्। यजेरन्। एधिषीरन्॥ १०५॥

प्रत्यय के आदि झकार को आदेश करने वाले 'झोऽन्तः' सूत्र का यह अपवाद है। यहां 'लिङः' पद का अनुवर्त्तन है॥

लिङ के आदेशभूत [झस्य] झकार को [रन्] 'रन् आदेश होता है॥

जैसे—पचेरन्। यजेरन्। एधीषीरन्॥ १०५॥

इटोऽत्[6]॥ १०६॥

लिङ इत्यनुवर्त्तते॥ [इटः। ६। १। अत्। १। १॥] आत्मनेपदेपूत्तमैकवचनस्य ग्रहणम्॥

---

१. अ० ६। १। १५॥ २. अ० ७। ३। ८५॥
३. आ० सू० १२१॥ ४. अ० ७। १। ३॥
५. संघातस्यात्र 'रन्' आदेशः, अन्यथा झो रन्नित्येव ब्रूयात्॥
६. आ० सू० १२२॥

लिङ आदेशस्य इटः स्थाने 'अत्' इत्यादेशो भवति ॥ तकार उच्चारणार्थः, न त्वादेशावयवः ॥

एधेय । एधिषीय । अधीयीय । अधीषीय । पचेय । यजेय ॥ **'अर्थवद्ग्रहणे नानर्थकस्य'**[1] इति परिभाषयाऽऽगमस्येटो ग्रहणं न भवति ॥ १०६ ॥

यहां 'लिङः' इस पद का अनुवर्त्तन है । आत्मनेपद के उत्तम पुरुषस्थ एकवचन के इट् का ग्रहण है ॥

लिङ् आदेश के [इटः] इट् के स्थान में [अत्] 'अत्' आदेश होता है ॥ 'अत्' में तकार करना उच्चारणार्थ है, आदेश का अवयव नहीं है ॥

जैसे—एधेय । एधिषीय । अधीयीय । अधीषीय । पचेय । यजेय ॥

यहां 'अर्थवद्ग्रहणे नानर्थकस्य' इस परिभाषा से इट् आगम का ग्रहण नहीं होता ॥ १०६ ॥

सुट् तिथोः[2] ॥ १०७ ॥

'लिङः' इत्यनुवर्त्तते ॥ सुट् । १ । १ । तिथोः । ६ । २ ॥

लिङ् सम्बन्धिनोस्तकारथकारयोः सुडागमो भवति ॥

एधिषीष्ट । एधिषीयास्ताम् । एधिषीरन् ॥ एधिषीष्ठाः । एधिषीयास्थाम् ॥

तकारथकारमात्रस्य प्रत्ययस्यस्यागम इष्यते । यदि 'तथयोः' इति ब्रूयादातामित्यत्र मध्ये सुडागमो न स्यात् । किन्तु तकारस्य प्रथमैकवचनस्य थकारस्य मध्यमबहुवचनस्य च ग्रहणं स्यात् ॥ १०७ ॥

यहां 'लिङः' पद का अनुवर्त्तन है ॥ लिङ् सम्बन्धी [तिथोः] तकार-थकार को [सुट्] 'सुट्' आगम होता है ॥ जैसे—एधिषीष्ट । एधिषीयास्ताम् । एधिषीरन् । एधिषीष्ठाः । एधिषीयास्थाम् ॥

यहां प्रत्ययस्थ तकारथकारमात्र को आगम इष्ट है । यदि 'तथयोः' ऐसा सूत्र पढ़ते तो 'आताम्' इस के मध्य में वर्त्तमान तकार को सुट् का आगम न होता, किन्तु तकार से प्रथम पुरुष के एकवचन का तथा थकार से मध्यम पुरुष के बहुवचन का ग्रहण होता ॥ १०७ ॥

झेर्जुस्[3] ॥ १०८ ॥

लिङ इत्यनुवर्त्तते ॥ झेः । ६ । १ । जुस् । १ । १ ॥

लिङ आदेशस्य झेः स्थाने 'जुस्' इत्यादेशो भवति ॥

भवेयुः । पचेयुः । वदेयुः । यजेयुः ॥ अतोऽग्रे लिङ् नानुवर्त्तते ॥ १०८ ॥

---

१. अ० ५ । १ । २२ भाष्ये ॥ २. आ० सू० ७९ ॥

३. आ० सू० ८२ ॥

यहां 'लिङः' पद का अनुवर्त्तन है ॥ लिङादेश [झेः] झि के स्थान में 'जुस्' यह आदेश होता है ॥

जैसे—भवेयुः । पचेयुः । वदेयुः । यजेयुः ॥ इस सूत्र से आगे लिङ् का अनुवर्त्तन नहीं होता ॥ १०८ ॥

सिजभ्यस्तविदिभ्यश्च[1] ॥ १०९ ॥

मण्डूकप्लुतगत्या[2] ङित इत्यनुवर्त्तते । 'झेर्जुस्' इति च ॥ सिजभ्यस्तविदिभ्यः । ५ । ३ । च । । अ०] ॥ लुङि सिज् भवति, अतः सिचः परस्य लुङः सम्बन्धिनो झेर्जुस् भादः । अभ्यस्त[3]विदोर्ग्रहणमसिजर्थम् ॥

सिजादिभ्यः परस्य झेर्जुस् भवति ॥

सिच्—अकार्षुः । अहार्षुः । असेधिषुः । अपाक्षुः ॥ अभ्यस्तात्—अजुहवुः । अबिभयुः ॥ विदेः—अविदुः[4] ॥ १०९ ॥

यहां मण्डूकप्लुतगति से 'ङितः' इस पद का, तथा 'झेर्जुस्' का भी अनुवर्त्तन है ॥ सिच् लुङ् लकार में होता है इस कारण सिच् से परे लुङ् का जो झि उस को जुस् होता है 'अभ्यस्त' तथा 'विद' का ग्रहण सिच् से भिन्न के लिये है ॥

[सिजभ्यस्तविदिभ्यः] सिच्, अभ्यस्त तथा विद से परे [च] झि को 'जुस्' आदेश हो जाता है ॥

जैसे—सिच् से—अकार्षुः । अहार्षुः । असेधिषुः । अपाक्षुः । अभ्यस्त से—अजुहवुः । अबिभयुः । विद से—अविदुः ॥ १०९ ॥

आतः[5] ॥ ११० ॥

सिज्ग्रहणमनुवर्त्तते ङित इति च ॥ आतः । ५ । १ ॥ नियमार्थं सूत्रमिदम् ॥ सिचः परस्याकारान्तात् परस्य च झेर्जुस् भवति ॥

---

१. आ० सू० १३४ ॥

२. **'लिङः सीयुट्'** (अ० ३ । ४ । १०२) इत्यादिषु ङित इति नानुवर्त्तते प्रयोजनाभावात्, इत्येवं मतमास्थायाह—मण्डूकप्लुतेति ॥

३. अत्र केचन धातुवृत्तिकारादय आहुः—अभ्यस्तग्रहणं विदिसाहचर्य्याल्लङ्विषयमेव तेन भवतेर्यङ्लुगन्ताल्लुङि प्रथमपुरुषबहुवचने झेर्जुस् न भवति सिजाश्रयस्तु **'आतः'** इति नियमादेव न प्रवर्त्तत इति । तच्चिन्त्यम् । **भाष्यकृता** साहचर्य्यनियमस्यानभ्युपगमात्, तथाहि—**'अपीपचन्नित्येकादेशे कृतेऽभ्यस्ताज्झेर्जुस् भवतीति जुस्भावः प्राप्नोति'** इति अ० १ । १ । ५७ ॥ यदीह साहचर्य्यनियमः स्यात्, जुस् भावस्य प्राप्तिरेव न स्यात् । एवं च कृत्वा **'अबोभवुः'** इत्येव भवति ॥

४. सत्ताविचारणार्थयोर्विदेरात्मनेपदित्वादसम्भव एव झेः, लाभार्थस्यापि विकरणेनव्यवधानादनन्तरस्य झेरसम्भवात्, परिशेषात् **'विद ज्ञाने'** इत्येव गृह्यते ॥

५. आ० सू० २५० ॥

येभ्य आकारान्तेभ्यः सिचो लुग्विधीयते तेभ्य आकारान्तेभ्यः परो झिर्भवति सिचो लुकि प्रत्ययलक्षणेन यदि सिचः परस्य झेर्जुस्स्यात्तर्ह्याकारान्तेभ्यः परस्यैव स्यात् । अदात् । अदाताम् । अदुः । अधुः । अपुः । अस्थुः । अनेन सूत्रेण नियमकरणात्—अभूवन्निति प्रत्ययलक्षणाश्रयः पूर्वसूत्रेण जुस् न भवति । सिज्लुगन्तादाकारान्तादेव धातोः परस्य झेर्जुस्स्यात्, नान्यस्मादिति ॥ ११० ॥

यहां 'सिच्' तथा 'ङितः' पदों का अनुवर्त्तन है । यह सूत्र नियमार्थ है ॥

सिच् से परे तथा [आतः] आकारान्त से परे झि को जुस् आदेश होता है ॥

जिन आकारान्तों से सिच् का लुक् हो जाता है, उन आकारान्तों से परे झि होता है, सिच् लुक् हो जाने पर प्रत्ययलक्षण से यदि सिच् से उत्तर झि को जुस् होवे तो आकारान्तों से परे ही हो ॥

जैसे—अदात् । अदाताम् । अदुः । अधुः । अपुः । अस्थुः ॥ इस सूत्र के नियम कर देने से—अभूवन् इस में प्रत्ययलक्षण मान कर पूर्वसूत्र से जुस् नहीं होता क्योंकि सिज्लुगन्त आकारान्त धातु से ही परे झि को जुस् होता है और किसी से नहीं ॥ ११० ॥

लङः शाकटायनस्यैव[1] ॥ १११ ॥

आत इत्यनुवर्त्तते ॥ लङः । ६ । १ । शाकटायनस्य । ६ । १ । एव । [अ०] ॥

आकारान्तादुत्तरस्य लङः आदेशस्यैव शाकटायनस्याचार्य्यस्य मते झेर्जुस्स्यात् । अर्थाल्लुङादेशस्य सर्वेषां मते । अयात् । अयाताम् । अयुः । अवात् । अवाताम् । अवुः ॥ अन्येषां मते—अयान् । अवान् ॥

ङित इत्यनुवर्त्तते तेन लङ एव झेर्जुस् भविष्यति । पुनर्लङ्-ग्रहणस्यैतत् प्रयोजनम्—लङेव यो लङ् तत्र जुस्भावः स्यात् । **'लोटो लङ्वत्'**[2] इति लङ्वद्भावेन लोटो झेर्जुस् मा भूत् ॥ १११ ॥

यहां 'आतः' पद का अनुवर्त्तन है ॥ आकारान्तों से परे [लङः] लङ् आदेश वाले [एव] ही झि के स्थान में जुस् होता है [शाकटायनस्य] शाकटायन आचार्य्य के मत में अर्थात् और सब आचार्य्यों के मत में लुङ् लकार के झि को जुस् होता है ॥

जैसे—अयात् । अयाताम् । अयुः ॥ अवात् । अवाताम् । अवुः ॥ औरों के मत में—अयान् । अवान् ॥

यहां 'ङितः' पद के अनुवर्त्तन से लङ् के ही झि को जुस् होगा पुनः 'लङः' पद के ग्रहण का यह प्रयोजन है कि—'लङेव यो लङ्' अर्थात् शुद्ध लङ् के ही झि को जुस् हो । 'लोटो लङ्वत्' से लङ्वद्भाव को प्राप्त हुये लोट् के झि को जुस् न हो ॥ १११ ॥

---

१. आ० सू० ३४८ ॥ २. अ० ३ । ४ । ८५ ॥

द्विषश्च[1] ॥ ११२ ॥

लङः शाकटायनस्यैवेत्यनुवर्त्तते ॥ द्विषः । ५ । १ । च । [अ०] ॥

'द्विषः' धातोः परस्य लङ आदेशस्य झेर्जुस् भवति शाकटायनस्यैव मतेन ॥ अद्विषुः । अन्येषां मते—अद्विषन् ॥ ११२ ॥

यहां पूर्वसूत्र 'लङः' शाकटायनस्यैव' का अनुवर्त्तन है ॥ [द्विषः] 'द्विष' धातु से परे [च] लङ् आदेश के झि को जुस् होता है शाकटायन के मत से ॥

जैसे—अद्विषुः । औरों के मत में—अद्विषन् ॥ ११२ ॥

तिङ्शित् सार्वधातुकम्[2] ॥ ११३ ॥

तिङ्शित् । १ । १ । सार्वधातुकम् । १ । १ ॥ तिङ्.प्रत्याहारस्तिबादयोऽष्टादश गृह्यन्ते । तिङश्च शितश्चैषां समाहारः ॥

तिङः शितश्च प्रत्ययाः सार्वधातुकसंज्ञा भवन्ति ॥

रोदिति । स्वपिति । सार्वधातुकाश्रय इट्[3] । पच्यमानः । इज्यमानः । सार्वधातुकत्वाद् यक् ॥ ११३ ॥

यहां तिङ् पद से, तिङ् प्रत्याहार का ग्रहण है जिस में तिबादि अठारह आदेशों का ग्रहण होता है ॥ तङ्शित् में समाहारद्वन्द्व समास है । जैसे—तिङ् च शिच्च तिङ्शित् ॥

[तिङ्शित्] तिङ् और शित् प्रत्यय [सार्वधातुकम्] सार्वधातुक संज्ञक होते हैं ॥

जैसे—रोदिति । स्वपिति । इस में सार्वधातुकाश्रय इट् होता है । पच्यमानः । इज्यमानः । यहां सार्वधातुकाश्रय यक् हो जाता है ॥ ११३ ॥

आर्द्धधातुकं शेषः[4] ॥ ११४ ॥

आर्द्धधातुकम् । १ । १ । शेषः । १ । १ ॥ तिङ्शिद्भ्यो भिन्नः शेषः ॥

धातोर्विहिताः शेषाः प्रत्यया आर्द्धधातुकसंज्ञा भवन्ति ॥

लविता । चिकीर्षिता । लवितुम् । चिकीर्षितुम् । शयितः । 'आर्द्धधातुकस्येड्वलादेः[5]' इत्यादीनि प्रयोजनानि ॥

धात्वधिकारे धातोर्विहितानां संज्ञाकरणादिह न भवति—लूभ्याम् । लूभिः । भूकाम्यति । जुगुप्सते ॥ ११४ ॥

यहां शेष पद से तिङ शित् से भिन्न प्रत्ययों का ग्रहण होता है । धातु से विहित [शेषः] शेष प्रत्यय [आर्द्धधातुकम्] आर्द्धधातुक संज्ञक होते हैं ॥

---

१. आ० सू० ३१० ॥
२. आ० सू० १८ ॥
३. अ० ७ । २ । ७६ ॥
४. आ० सू०४९ ॥
५. अ० ७ । २ । ३५ ॥

जैसे—लविता । चिकीर्षिता । लवितुम् । चिकीर्षितुम् । शयितः ॥ 'आर्द्धधातुकस्येड्वलादेः' इत्यादि इस के प्रयोजन हैं ॥

धातु के अधिकार में धातु से विहित प्रत्ययों की आर्द्धधातुक संज्ञा करने से—लूभ्याम् । लूभिः । भूकाम्यति । जुगुप्सते । इत्यादि की आर्द्धधातुक संज्ञा नहीं होती ॥ ११४ ॥

लिट् च[1] ॥ ११५ ॥

सार्वधातुकसंज्ञाया अपवादः ॥ लिट् । १ । १ । च । [अ०] ॥

लिटः स्थाने [ये] तिबादय[स्त] आर्द्धधातुकसंज्ञा भवन्ति ॥

पेचिथः । पपक्थ । आर्द्धधातुकत्वाद्विकल्पेनेट् । ददे । दधे । आर्द्धधातुकत्वात् 'आतो लोप इटि च'[2] इत्याकारलोपः ॥ ११५ ॥

यह सूत्र सार्वधातुकसंज्ञा का अपवाद है ॥ [लिट्] लिट् के स्थान में तिबादि [च] भी आर्द्धधातुक संज्ञक होते हैं ॥

जैसे—पेचिथ, पपक्थ । आर्द्धधातुक संज्ञा होने से इट् विकल्प से होता है ॥

जैसे—ददे । दधे । यहां आर्द्धधातुक होने से 'आतो लोप इटि च' सूत्र से आकार लोप होता है ॥ ११५ ॥

लिङाशिषि[3] ॥ ११६ ॥

अयमपि सार्वधातुकस्यैवापवादः ॥ लिङ् । १ । १ । आशिषि । ७ । १ ॥

आशिषि विहितो यो लिङ् तस्य स्थाने य आदेशास्तिबादयस्त आर्द्धधातुकसंज्ञाः स्युः ॥

लविषीष्ट । यविषीष्ट । इडागमादीनि प्रयोजनानि ॥ ११६ ॥

यह सूत्र भी सार्वधातुकसंज्ञा का अपवाद है ॥ [आशिषि] आशीर्वाद में विहित जो [लिङ्] लिङ् उस के स्थान में होने वाले तिबादि आर्द्धधातुकसंज्ञक होते हैं ॥

जैसे—लविषीष्ट । यविषीष्ट । यहां इडागमादि प्रयोजन हैं ॥ ११६ ॥

छन्दस्युभयथा ॥ ११७ ॥

सार्वधातुकार्द्धधातुकस्य सर्वस्य[प्रकरणस्या]यं शेषः ॥ छन्दसि । ७ । १ । उभयथा [अ०] ॥

छन्दसि=वैदिकप्रयोगेषु सार्वधातुकार्द्धधातुकसंज्ञे उभयथा भवतः, अर्थाद् यस्य सार्वधातुकसंज्ञा कृता तस्यार्द्धधातुकसंज्ञापि भवति, आर्द्धधातुकस्य च सार्वधातुकसंज्ञा, अर्थादेकस्मिन् पदेऽपि संज्ञाद्वयकार्य्याणि दृश्यन्ते ॥

---

१. आ० सू० ३० ॥ २. अ० ६ । ४ । ६४ ॥

३. आ० सू० ८४ ॥

वर्धन्तु त्वा सुष्टुतयः[1] । आर्द्धधातुकत्वाण्णेर्लोपः, सार्वधातुकत्वाच्छप् । वर्धयन्तु इति प्राप्ते । उपस्थेयाम शरणं बृहन्तम्[2]—अत्र सार्वधातुकत्वाल्लिङः सलोपः । आर्द्धधातुकत्वात् 'एर्लिङि[3]' इति स्थाधातोरेकारादेशः ॥ ११७ ॥

इति तृतीयाध्यायस्य चतुर्थः पादोऽध्यायश्च समाप्तः ॥

यह सार्वधातुक तथा आर्द्धधातुक इस सारे प्रकरण का शेष है ॥ [छन्दसि] वैदिक प्रयोगों में सार्वधातुक तथा आर्द्धधातुक [उभयथा] दोनों संज्ञा हो जाती हैं । अर्थात् जिसकी सार्वधातुक संज्ञा कही है उस की आर्द्धधातुक संज्ञा भी हो जाती है, और जिस की आर्द्धधातुक संज्ञा कही है उस की सार्वधातुक संज्ञा अर्थात् एक पद में भी दोनों संज्ञाओं के कार्य्य देखे जाते हैं ॥

जैसे—वर्धन्तु त्वा सुष्टुतयः । यहां आर्द्धधातुक संज्ञा के आश्रय से णि का लोप और सार्वधातुक संज्ञा के आश्रय से शप् होता है 'वर्धयन्तु' ऐसा प्राप्त था ॥ 'उपस्थेयाम शरणं बृहन्तम्' यहां लिङ् के सार्वधातुक होने से सकार का लोप हो जाता है, और आर्धधातुक संज्ञा मान कर 'एर्लिङि' सूत्र से स्थाधातु को एकार आदेश हो जाता है ॥ ११७ ॥

यह तृतीयाध्याय का चौथा पाद और यह अध्याय भी समाप्त हुआ ॥

१. ऋ० ७ । ९९ । ७ ॥
२. अनुपलब्धमूलमिदम् । तु० ऋ० ६ । ४७ । ८ ॥ तै० ब्रा० २ । ७ । । १३ । ४ ॥
३. अ० ६ । ४ । ६७ ॥